ISSN: 2320-740X

# शारदा

वार्षिकपत्रिका



प्रधानसम्पादकः
आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकौ
डा. चन्द्रशेखरभट्टः
डा. मुरलीकृष्णः टि.

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७१३९

# शारदा

## वार्षिकपत्रिका

प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकौ

डा. चन्द्रशेखरभट्टः

डा. मुरलीकृष्णः टि.


## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७१३९

# शारदा ISSN: 2320-740X

प्रधानसम्पादकः आचार्यः ए. पि. सच्चिदानन्दः
सम्पादनसमितिः

डा. चन्द्रशेखरभट्टः
डा. मुरलीकृष्णः टि.
श्री रवीशः एन्.
डा. कविता एस्.
श्रीमती बबिता बहुगुणा
श्रीमती पावना एम्. एन्.
आयुष्मान् प्रदीपभट्टः के.
आयुष्मान् नवीनः के. आर्.
आयुष्मान् नवनीतकृष्णः जे.
आयुष्मती कीर्तिहेगडे एन्.

प्रकाशनवर्षम् : 2019
© राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577139
कर्णाटकराज्यम्

प्रतिः 550
प्रकाशकः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी –577139
कर्णाटकराज्यम्

पृष्ठविन्यासः – रवीशः एन्., सङ्गणकप्राध्यापकः

मुद्रणम्
श्री सिरि एण्टर्प्रैसस्, शृङ्गेरी

© All rights are reserved for Publisher,
Provided that contributors are responsible for their respective writing.

# श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी



जगद्गुरवः श्रीश्रीभारतीतीर्थमहास्वामिनः
श्रीदक्षिणाम्नायशृङ्गेरीशारदापीठम्, शृङ्गेरी

पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्रीराजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति । विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता
डा. वे. रा. गौरीशङ्करः

**प्रो. पि. एन्. शास्त्री**
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. P. N. Shastry**
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# श्वोवसीयसं वो भूयात्

"योऽनूचानः स नो महान्" इति त्रय्या उक्तिं शिरउक्तिं विधाय सनातनविद्याशेवधिं गोपायद्राष्ट्रियसंस्कृतसंस्थानं स्वकर्मणा राष्ट्रेऽन्ताराष्ट्रेषु च लब्धयशश्श्रीकं सुरभारतीसमुपासकानां पङ्क्तिमाद्यामध्यास्ते । "स्वाध्यायोऽध्येतव्यः" इति विधेरनुपिपालयिषया, मानवजीवनचरमलक्ष्यसम्पिपादयिषया, शास्त्रविद्यासंरक्षणपटूनां निर्मित्सया चानारतं परितप्यमानोऽयं विश्वविद्यालयः देशस्य विभिन्नप्रान्तेषु द्वादश परिसरान् बिभर्ति । समेषामेषां तिलकायमानः श्रीशङ्करभगवत्पादानां तपोभूमौ शृङ्गगिरौ राजन् राजीवगान्धीपरिसरः विद्वच्छात्रैः, विद्वत्प्रष्ठैरध्यापकैश्च भूषितोऽनिशमनालस्येन शास्त्रसपर्यां चेक्रीयत इति नितरां तोतुष्मः । अध्ययनाध्यापनाभ्यां साकं शिष्योपाध्यायबुद्धिवैशद्याय अध्यापकवाक्यार्थसभा, वाग्वर्धिनीसभा, शारदाविशिष्टव्याख्यानमित्येवं बहुविधान् कार्यक्रमान्परिसरो विदाधेति । तेषु 'शारादा'याः वार्षिकपत्रिकायाः प्रकटनं नूनं श्लाघापदं पद्यते । तदेतत्कृतिरस्मिन्नपि हायने सोत्साहं सम्पाद्यत इत्यतितरामुपादेयं देयं सारस्वतलोकाय । छात्राणां पाट, उपाध्यायानां वैदुष्यपूर्णैश्च लेखनैः भूषितेयं पत्रिका बुधान् रञ्जयतु, सन्नाहयेत् पठितॄन् लेखने, उपकुर्याच्च जिज्ञासूनिति दृढो मे विश्वासः । यशोहेतूंश्छात्रानुपाध्यायांश्चाभिनन्दन् प्राचार्याणां नेतृत्वेऽहन्यहन्येधमानोऽयंपरिसर इमित्थमेवाऽर्षविद्याया उपासनं विदधत् परमपूज्यानां जगद्गुरूणामाशीर्भिः, भगवत्याः शारदाम्बाया अनुग्रहविशेषेण चेतोऽधिकां श्रेयःपरम्परामवाप्नुयादिति शुभमाशासे।

प.ना.शास्त्री

आचार्यः प. ना. शास्त्री,
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi -110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

**प्रो. एस्. सुब्रह्मण्य शर्मा**
कुलसचिव
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. S. Subrahmanya Sharma**
The Registrar
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)




# शारदा शं तनोतु वः

गैर्वाणभारतीसंरक्षणैकधिषणैः प्रतिष्ठापितं राष्ट्रियसंस्कृतसंस्थानं स्वाध्यायप्रवचने एव तप इति मत्वा प्राचीनशास्त्राणां संरक्षणे निरन्तरं प्रयस्यतीति सर्वविदितम् । संस्थानस्यास्य विद्यमानेषु परिसरेषु मुकुटमणीयमानः शृङ्गगिरिस्थः राजीवगान्धीपरिसरः शास्त्रानुशीलनकेन्द्रमिव दीप्यते । सन्ततशास्त्राध्यापनोद्यमशीलैरध्यापकैः स्वाध्यायव्यवसायनिष्ठैश्छात्रैश्चाञ्चितोऽयं परिसरः प्रतिवर्षमिवैषमोऽपि परिसरप्रतिष्ठाभिवर्धिकां **"शारदा"** नाम्नीं वार्षिकपत्रिकां प्रकटयतीति महतो हर्षस्य विषयः । भगवत्याः शारदाम्बायाः, शारदापीठाधीश्वराणां जगद्गुरूणां च अनुग्रहविशेषेण पत्रिकेयं सर्वोपादेयतामाप्नोतु इत्याशासे । प्राचार्याणां नेतृत्वे परिसरोऽयमुत्तरोत्तरं समेधतामिति शं सन्दिशामि ।

यौष्माकः

प्रो. एस्. सुब्रह्मण्यशर्मा


56-57, Institutional Area, Janakapuri, New Delhi-110058
Ph.: (O) 011-28520979; (Fax) 011-28520976
EPABX : 28524993, 28521994, 28524995
E-Mail: sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# पुर उक्तिः

## श्रीशारदा वसतु वाचि निरन्तरं नः

शारदा वार्षिकी पत्रिका परिसरस्य वार्षिकमहे आत्मानं प्रकटयितुं सन्नद्धेति अतिवेलं हृष्यति मे स्वान्तम् । जगति सर्वोऽपि जन्तुः कामयते दुःखनिवृत्तिर्मेऽस्त्विति । प्राणिमात्रेणाकाङ्क्षितदुःखनिवृत्त्यर्थं यद्यपि सन्ति बहवो लौकिकोपायास्तथापि न तेभ्य आत्यन्तिकी दुःखनिवृत्तिः । अतस्तादृशं सेवनीयं यन्न दुःखेन सम्भिन्नं स्यात् । तद्धि निरतिशयानन्दरूपं निःश्रेयसमेवेति प्रेक्षावत्प्रेक्षितम् । सर्वज्ञानमयवेदबोधितस्यास्य तत्त्वस्योपबृंहणायैव शास्त्राणां प्रवृत्तिः । अप्रयोजनेऽप्रवर्तमानानां प्रेक्षावतां शास्त्रे प्रवृत्तिर्दृश्यते निःश्रेयसहेतुकतत्त्वज्ञानबोधकत्वाच्छास्त्राणाम् । तस्मात् चित्तशुद्धिपूर्वकतत्त्वज्ञानप्राप्तये विवेकावाप्तये च शिष्टानुकारिभिः शास्त्रमेवोपासनीयम् । इदमेवाकलय्य पूर्वसूरिभिर्मनीषिभिः परःसहस्रं शरदां तपस्तप्त्वा शास्त्रमय्या वाण्या वयमन्वगृह्यामहि । तामिमां शास्त्रमयीं गिरं त्रातुकामं राष्ट्रियसंस्कृतसंस्थानं भरतवर्षस्य नानाऽऽशासु त्रयोदश परिसरान् प्रतिष्ठाप्य गैर्वाण्या वरिवस्यामतिमात्रं चरीकरीति । तेषु च परिसरेषु दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां जगद्गुरूणां कृपाविशेषेण शङ्करभगवत्पादतपोभूमौ लब्धजनी राजीवगान्धीपरिसरो नैकशास्त्रपारगैरध्यापकैर्मण्डितो जिज्ञासुभिश्छात्रैश्च विभूषितः शास्त्रविद्याया अधीतिबोधाचरणप्रचारणेषु सर्वातिशायीति प्रकटयितुं जरीहृषीमि । "अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मभिः" इत्यभियुक्तोक्त्या परिसरेऽस्मिन् विवेकवृद्धिफलकाः कलापाः नैरन्तर्येणानुष्ठीयन्ते । स्वाध्यायप्रवचनपटुभिरध्यापकैः, स्वाध्यायादप्रमत्तैरन्तेवासिभिश्च अक्षरैर्विन्यस्तैः प्रतिभाप्रसूतैर्लेखनैरञ्चिता "शारदा" प्रतिहायनमिवैषमोऽपि प्राकाश्यं नीयमाना जगद्गुरुकरसरसीरुहाभ्यामाविष्क्रियत इति भाग्यस्थानमेतत्परिसरस्य । विद्वज्ज्ञानविस्तारं छात्रबुद्धिवैशद्यं चोद्दिष्टं कृत्वा भाषाणां चतुष्टय्या रुचिरैर्लेखैश्चोपनिबद्धेयं शारदा नूनं वाचकचेतांस्याह्लादयेदिति मे विस्रम्भः।

पत्रिकामेनां सामस्त्येन परिशील्य रुचिरां शुभाशंसां प्रहितवद्भ्यः सुरभारतीसमुपासकेभ्य इदम्परिसरविकासे सततं बद्धादरेभ्यः कुलपतिवर्येभ्यः आचार्येभ्यः परमेश्वरनारायणशास्त्रिवर्येभ्यः मदीया हार्दी कृतज्ञताऽऽविष्क्रियते । शास्त्रविद्याप्रचारे सर्वदा प्रयत्नशीलेभ्यः कुलसचिवेभ्यः आचार्येभ्यः सुब्रह्मण्यशर्मभ्यः सप्रणति कार्तज्ञ्यं निवेद्यते ।

पत्रिकासम्पादने सत्रादितः कृतश्रमयोः वाग्वर्धिनीपरिषदध्वदर्शिनोः सर्वदैव छात्राणां चतुरश्रविकासे बद्धदीक्षयोः डा. चन्द्रशेखरभट्ट - डा. मुरलीकृष्णमहाशययोः कृते धन्यवादान् वितनोमि । अस्मत्परिसरीयच्छात्रान् सर्वविधस्पर्धार्थं सज्जीकरणे सततं कृतश्रमयोः स्पर्धिष्णुपरिषदध्वदर्शिनोः डा. चन्द्रकला आर्. कोण्डि – डा. प्रदीपशर्ममहोदययोः कृते धन्यताम् आविष्करोमि । परिश्रमसाध्येऽस्मिन् कार्यजाते सहकृतवद्भ्यः पत्रिकासम्पादनसमितिसदस्येभ्य आचार्येभ्यश्छात्रेभ्यश्च मङ्गलं कामये।

अस्मत्परिसरस्य अशेषयशोनिदानं वाग्देवतायाः शारदाम्बायाः कृपाविशेषः, ज्ञानतपोविग्रहाणाम् अनन्तश्रीविभूषितानां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां जगद्गुरूणां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च दिव्यानुग्रह इति श्रीशारदामातरं श्रीजगद्गुरुचरणांश्च सभक्तिश्रद्धं वावन्दीमि ।

**इत्थं विद्वज्जनविधेयः**

ए. पी. सच्चिदानन्दः

**(ए. पी. सच्चिदानन्दः)**

# सम्पादकीयम्

सुखदुःखसंयोगवियोगादिफलकजन्मजरामरणप्रबन्धात्मकसंसारपङ्कमग्नस्य पुरुषस्य श्रेयःसाधनं हि धर्मः ।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

इति सङ्गृह्य प्रपञ्चितं मनुना । विधिनिषेधात्मकस्यास्य धर्मस्य मूलं परब्रह्मणो निःश्वासभूता वेदाः । उक्तं च धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः इति । अस्य चापौरुषेयस्य सर्वज्ञानमयस्य वेदस्यार्थपरिज्ञानस्य मानुषमनीषाशक्यतया लोकानुपकर्तुं परःसहस्रं शरदां परिश्रम्य शिष्टाः परमर्षयः शिक्षाव्याकरणाद्यङ्गानि, न्यायमीमांसादिशास्त्राणि च प्रणिनिन्युः । उपेयप्रतिपत्त्यर्थानुपायाञ्छास्त्रेणैवावयन्ति लोकाः । किञ्च

श्रुतिस्मृतिसदाचारविहितं कर्म शाश्वतम् ।
स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत् ॥

इत्युक्तदिशा विहितस्य सेवनाय, निषिद्धस्य च परित्यागाय शास्त्रज्ञानं परमावश्यकम् । आतश्च शास्त्रमध्येयं यद् वेदाप्रमाणवादः, वेदप्रामण्यमभ्युपगम्यापि प्रवृत्तो विपरीतवादश्च शास्त्रेणैव निरसनीयः । शास्त्रार्थानुष्ठानपरायणशिष्टाचारप्रत्ययः शास्त्रैकगम्यः । अविज्ञाय वाऽनुकरणं शिष्टस्य साधु भवति । तस्मात् शिष्टज्ञानार्थं वाऽध्येयानि शास्त्राणि भवन्ति ।

शास्त्राणां परिरक्षणं तु गुरुशिष्यपरम्परयैव सम्भवतीत्यवेत्य संस्थापितस्य राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरीस्थराजीवगान्धीपरिसरोऽधीयानांश्छात्रान् विदुषो विधातुमनवरतं यायसीतीति प्रसिद्धिर्देशे सर्वत्र ।

अत्र हि परिसरे छात्राणां नालं भवति केवलदेवगवीभाषणेन न वा केवलेनाध्ययनेन किन्त्वधीतविद्यायाः काले स्फूर्तिः, चारुतरप्रकाशनसामर्थ्यं चाध्येतृणां स्यादिति सङ्कल्प्य 'वाग्वर्धिनीपरिषद्' प्राकल्पि यया च परिषदा प्रतिसप्ताहं गुरुमुखश्रुतशास्त्रविद्यानामध्येतृणां प्रतिभाया अनावरणाय प्रतिसप्ताहमधिवेशनमायोज्यते । अस्मिंश्च विद्यार्थिनस्त्रुटिसंशोधकानामध्यापकानां पुरतः शास्त्रार्थचर्चां विधाय प्रकटितप्रतिभा आत्मनो ज्ञानस्य परिष्कारं प्राप्नुवन्ति । इत्थं परिनिष्ठितज्ञानं लभमानाश्छात्राः शास्त्रीयस्पर्धासु परीक्षासु च जयशीला भूत्वा परिसरस्य यशोराशिं तन्तनति ।

वाक्कौशलाद्भिन्नैव लेखनपटुता । लेखनाभ्यासो हि भाषणाभ्यासापेक्षया भूयःप्रयोजनमातनोति । परुदिवैषमोऽपि छात्राणां लेखनपाटवसम्पादनाय तत्प्रतिभाविशेषेण पल्लवितान् लेखान्,

शास्त्रविषयजिज्ञासूनामुपकाराय परिसरस्य विदुषां प्राध्यापकानां लेखनानि च सङ्कलय्य परिसरवार्षिकी पत्रिका “शारदा” वाग्वर्धिनीपरिषदा प्रकाश्यते । संस्कृत-कर्णाट-हिन्दी-आङ्ग्लभाषासु शास्त्रीय-लौकिकविचारपरान्निबन्धान् दधतीयं वार्षिकी पत्रिका परिसरस्य वार्षिके उत्सवे परमपूज्यानां जगद्गुरुचरणकरकमलाभ्यामनावृतिं विन्दतीत्यानन्दावहं नः । येषां परमानुग्रहेणैव जनिमवाप्य उत्तरोत्तरमेधमानः तुङ्गाधुनीमधिष्ठितोऽयमुत्तुङ्गयशश्शिखरे प्रतिष्ठितः परिसरः, यदीयपादुकासेवनेनैव घास्रिककलाप उपक्रम्य निष्प्रत्यूहं कर्म सम्पादयति तेषाम् अनन्तश्रीविभूषितदक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वरजगद्गुरुश्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमल-सञ्जातानां जगद्गुरुश्रीश्रीविधुशेखरभारतीस्वामिनाञ्च चरणसरसीरुहयोः नमसां सहस्रं समर्पयावः । अस्य परिसरस्य समुत्कर्षहेतुभ्यः सुरभारतीप्रणयिभ्यः सन्देशं प्रदायानुगृहीतवद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदं विभूषयद्भ्यः आचार्यपमेश्वरनारायणशास्त्रिवर्येभ्यः, कुलसचिवेभ्यः आचार्यसुब्रह्मण्यशर्मभ्यश्च सप्रणति धन्यवादान् वितनुवः । वाग्वर्धिनीपरिषदमसीमप्रसितधिषणया पोषयद्भ्यः पत्रिकाप्रकाशनमनुमन्तृभ्यः प्राचार्येभ्यः आचार्येभ्यः ए. पि. सच्चिदानन्दवर्येभ्यः कार्तज्ञ्यं विनिवेदयावः । पत्रिकाप्रकाशने अर्थव्यवस्थां ततवद्भ्यः कार्यालयसदस्येभ्यः श्रीगुरुराजभट्टप्रभृतिभ्यः धन्यतामाविष्कुर्वः । काले प्रबन्धान् प्रदत्तवद्भ्यः परिसरप्राध्यापकेभ्यः कृतज्ञतां, छात्रेभ्यश्च साधुवादान् वितन्वहे । पत्रिकाया आकृतिमलङ्कृतिञ्च विहितवते सङ्गणप्राध्यापकाय एन्. रवीशवर्याय, प्रबन्धानामक्षरविन्यासं कृतवत्यै कार्यालयसदस्यायै श्रीमत्यै सौम्यावर्यायै च कार्तज्ञ्यं व्याहरावः । पत्रिकासम्पादनसमितिसदस्येभ्यः कन्नड-आङ्ग्ल-हिन्दीप्राध्यापिकाभ्यः डा.कविता-श्रीमतीपावना-श्रीमतीबबिताबहुगुणवर्याभ्यः धन्यवादान्, नेपथ्यवर्तिभ्यः सुधाकलिकाया अस्याः पत्रिकायाः सम्पादने परिश्रान्तवद्भ्यः परिषदः पत्रिकाप्रतिनिधिभ्यः छात्रेभ्यः प्रदीपभट्ट-नवीन के आर्-नवनीतकृष्ण-कीर्तिहेगडे-सौदामिनी-अपर्णा इत्येतेभ्यः, शोधच्छात्राय गणेशप्रसादाय, चित्रसङ्ग्रहं कृतवते मनोजभट्टाय च शुभाशिषो वितरावः । भगवत्याः शारदाया अनुकम्पयैव शारदेयं भवतां करकमलयो राराष्टीति मातरं शारदां सश्रद्धं नुवः । यद्यपि यत्नेन परिहृता अपि दोषाः अस्मच्चक्षुरगोचरास्तत्र तत्र स्युरेव तथापि गुणग्राहिभिस्ते नादर्तव्या इति

निवेदयितारौ सम्पादकौ

डा. चन्द्रशेखरभट्टः

डा. टि. मुरलीकृष्णश्च

# ज्यौतिषविभागः



प्रो. ए. पि. सच्चिदानन्दः
विभागाध्यक्षः



डा. मुरलीकृष्णः टि.
प्राध्यापकः



डा. प्रसादभट्टः
प्राध्यापकः



डा. प्रदीपशर्मा
प्राध्यापकः

# व्याकरणविभागः



प्रो. हरिनारायणतिवारि
विभागाध्यक्षः



डा. चन्द्रशेखरभट्टः
सहायकाचार्यः



डा. कृष्णानन्तपद्मनाभम्
सहायकाचार्यः



डा. प्रमोदभट्टः
प्राध्यापकः



विद्वान् अरुणभट्टः
प्राध्यापकः

# मीमांसाविभागः



प्रो. सुब्राय वि. भट्टः
विभागाध्यक्षः



डा. सूर्यनारायणभट्टः
सहायकाचार्यः



डा. वेङ्कटेशताताचार्यः
सहायकाचार्यः

# न्यायविभागः



प्रो. का. इ. मधुसूदनः
विभागाध्यक्षः



डा. नवीनहोळळः
सहायकाचार्यः



डा. श्यामसुन्दरः ए.
प्राध्यापकः



डा. आर्. नवीनः
प्राध्यापकः

# अद्वैतवेदान्तविभागः



डा. गणेश ईश्वर भट्टः
विभागाध्यक्षः



डा. श्रीकरः जि. एन्
प्राध्यापकः



विद्वान् निरञ्जनभट्टः
प्राध्यापकः

# साहित्यविभागः



डा. राघवेन्द्रभट्टः
विभागाध्यक्षः



डा. चन्द्रकला आर्. कोण्डी
सहायकाचार्या



डा. कोम्पेल्लि विनयकुमारः
प्राध्यापकः



डा. एम्. श्रीनिवासमूर्तिः
प्राध्यापकः



विद्वान् श्रीकरः वि.
प्राध्यापकः

# शिक्षाविभागः


डा. चन्द्रकान्तः
विभागाध्यक्षः


डा. रामचन्द्रुल बालाजि
सहाचार्यः


डा. हरिप्रसादः के.
सहायकाचार्यः


डा. गणेश ति. पण्डितः
सहायकाचार्यः


डा. वेङ्कटरमण एस्. भट्टः
सहायकाचार्यः


डा. नारायणवैद्यः
प्राध्यापकः


डा. अरविन्दकुमार सोमदत्तः
प्राध्यापकः

# आधुनिकविषयविभागः


डा. प्रभाकरः एम्. ए.
प्राध्यापकः (इतिहासः)


डा. कविता एस्.
प्राध्यापिका (कन्नडभाषा)


श्रीमती पावना एम्. एन्.
प्राध्यापिका (आङ्ग्लभाषा)


श्रीमती बबिता बहुगुणा
प्राध्यापिका (हिन्दीभाषा)


श्री रामचन्द्रः एच्. डि.
प्राध्यापकः (क्रीडा)


श्री शशिधरः के. वि.
प्राध्यापकः (सङ्गणकम्)


श्री रवीशः एन्.
प्राध्यापकः (सङ्गणकम्)

## पदविकापाठ्यप्रणाली
(Diploma Course)



डा. सुधांशुकुमारनन्दः
प्राध्यापकः (वास्तु)



डा. रमानन्दभट्टः
प्राध्यापकः (ज्यौतिषम्)

## मुक्तस्वाध्यायपीठम्



श्री. कु. वेङ्कटेशमूर्तिः
समन्वयकः



श्री कौशिकः डोन्ग्रे
डि. ई. ओ. (बा. सं)



श्री सन्दीपकुमारः एम्. आर्.
एम्. टि. एस्. (बा. सं)

## कार्यालयीयाः सदस्याः



श्रीमती सीतालक्ष्मीः
अनुभागाधिकारिणी



श्री गुरुराजभट्टः
कार्यालयसहायकः



श्री. एस्. आर्. चन्द्रशेखरः
यू. डि. सि.



श्रीमति मञ्जुळा एस्.
एल्. डि. सि.



श्री दिनेशः एस्.
एम. टि. एस्. (ग्रन्थालयः)



श्री एच्. के. कुमारः
एम. टि. एस्.



श्री एस्. शिवण्णः
एम. टि. एस्.



श्रीमती सिद्दम्मा
एम. टि. एस्. (ग्रन्थालयः)



श्री एम्. रफीकः
एम. टि. एस्.



श्रीमती जयम्मा
स्वच्छताकर्मचारिणी

# बाह्यसंस्थासु नियुक्ताः कार्यालयीयाः सदस्याः


श्रीमती सौम्या बि. टि.
डि. ई. ओ.


श्रीमती शारदा एस्. आर्.
डि. ई. ओ.


श्रीमती सावित्री टि. एन्.
छात्रावासनिरीक्षिका


कुमारि रश्मी एस्.
छात्रावासनिरीक्षिका


श्रीमती शुभा
एम्. टि. एस्.


श्री लोकेशः
छात्रावाससहायकः


श्री उमेशः एच्. एस्.
स्वच्छताकर्मचारी


श्रीमती तिम्मम्मा
स्वच्छताकर्मचारिणी


श्रीमती सुन्दरी
स्वच्छताकर्मचारिणी


श्रीमती पार्वती
स्वच्छताकर्मचारिणी


श्रीमती पद्मा
स्वच्छताकर्मचारिणी


श्रीमती अन्नपूर्णा
स्वच्छताकर्मचारिणी


श्री नागेशः एन्
उद्यानपालकः


श्री एम्. बि. शङ्करः
रक्षणकर्मचारी


श्री सदाशिव शेट्टि
रक्षणकर्मचारी


श्री के. एस्. चन्द्रप्पः
रक्षणकर्मचारी


श्री एम्. के. राजुः
रक्षणकर्मचारी


श्री रविः एम्. एस्.
रक्षणकर्मचारी


श्री एम्. वि. महेशः
रक्षणकर्मचारी


श्री एम्. जि. अप्पय्याचार्
रक्षणकर्मचारी


श्री सुब्रह्मण्यः एम्. बि.
रक्षणकर्मचारी

# वाग्वर्धिनीपरिषत्





डा. चन्द्रशेखरभट्टः
अध्वदर्शी

डा. मुरलीकृष्णः टि.
अध्वदर्शी

## परिषत्सदस्याः



अश्विन् जि. भट्टः
कार्यदर्शी



अपेक्षा राव्
कार्यदर्शिनी



हरिप्रसादः एस्.
स्पर्धिष्णुपरिषत्कार्यदर्शी



मोहित जोशी
स्पर्धिष्णुपरिषत्कार्यदर्शी



श्रीगणेश वि. भट्टः
स्पर्धिष्णुपरिषत्कार्यदर्शी



महेशः एम्. हेगडे
स्पर्धिष्णुपरिषत्कार्यदर्शी



कार्तिकेशः के.
सांस्कृतिककार्यदर्शी



सुजना वाल्ताजे
सांस्कृतिककार्यदर्शिनी



वेङ्कटरमण जि. हेब्बारः
क्रीडाकार्यदर्शी



काव्या बि. एम्
क्रीडाकार्यदर्शिनी



प्रदीपभट्टः के.
पत्रिकाकार्यदर्शी



नवनीतकृष्णः जे.
पत्रिकाकार्यदर्शी



नवीनः के. आर्.
पत्रिकाकार्यदर्शी



कीर्तिः एन्. हेगडे
पत्रिकाकार्यदर्शिनी



अपर्णाहोळ्ळा
पत्रिकाकार्यदर्शिनी



सौदामिनी एम्. आर्.
पत्रिकाकार्यदर्शिनी



श्रीशसमीरः के. एस्.
शारदाप्रसादवितरणम्



नवीनः डि. हेगडे
शारदाप्रसादवितरणम्







| सुदर्शनः एम्. एस्. | रवीन्द्रः बि. के. | सौजन्या के. | मनोज् एम्. भट्टः | गणेशः आर्. भट्टः |
|---|---|---|---|---|
| शारदाप्रसादवितरणम् | भूमिकानिर्वहणम् | भूमिकानिर्वहणम् | भूमिकानिर्वहणम् | भूमिकानिर्वहणम् |

# कक्ष्याप्रतिनिधयः








| नरसिंहसरस्वतिशास्त्री | पूजिता के. एन् | महेशः पि. देवते | देवीकृष्णा एन्. | हनुमन्तरायः के. डि. | मधुमिता साहु |
|---|---|---|---|---|---|
| आचार्यद्वितीयवर्षम् | आचार्यद्वितीयवर्षम् | आचार्यप्रथमवर्षम् | आचार्यप्रथमवर्षम् | शिक्षाशास्त्रिद्वितीयवर्षम् | शिक्षाशास्त्रिद्वितीयवर्षम् |








| चिन्मयभट्टः वि. | मिन्सु भगर्ती | हितेशभट्टः | स्वाती एन्. एन्. | शशाङ्कभट्टः | मनस्विनी के. जि. |
|---|---|---|---|---|---|
| शिक्षाशास्त्रिप्रथमवर्षम् | शिक्षाशास्त्रिप्रथमवर्षम् | शास्त्रितृतीयवर्षम् | शास्त्रितृतीयवर्षम् | शास्त्रिद्वितीयवर्षम् | शास्त्रिद्वितीयवर्षम् |








| सत्यवान साहू | सौदामिनी टप्पो | बिकासः राय् | अम्बिका भट् ए. | सत्यप्रमोदः एच्. वि. | श्रीनिधि एम्. भट् |
|---|---|---|---|---|---|
| शास्त्रिप्रथमवर्षम् | शास्त्रिप्रथमवर्षम् | प्राक्शास्त्रिद्वितीयवर्षम् | प्राक्शास्त्रिद्वितीयवर्षम् | प्राक्शास्त्रिप्रथमवर्षम् | प्राक्शास्त्रिप्रथमवर्षम् |

# विविधपरिषदाम् संयोजकाः

## स्पर्धिष्णुपरिषत्



डा. चन्द्रकला आर्. कोण्डी
सहायकाचार्या, साहित्यविभागः



डा. प्रदीपशर्मा
प्राध्यापकः, ज्यौतिषविभागः

## श्रीशारदाविशिष्टव्याख्यानमाला



डा. वेङ्कटरमणः एस्. भट्टः
सहायकाचार्यः, शिक्षाविभागः



डा. एम्. श्रीनिवासमूर्तिः
प्राध्यापकः, साहित्यविभागः

## वाक्यार्थपरिषत्



डा. सूर्यनारायणभट्टः
सहायकाचार्यः, मीमांसाविभागः



डा. आर्. नवीनः
प्राध्यापकः, न्यायविभागः

## क्रीडासमितिः



डा. चन्द्रकान्तः
विभागाध्यक्षः, शिक्षाविभागः



श्री रामचन्द्रः एच्. डि.
प्राध्यापकः, (क्रीडा)

## सांस्कृतिकसमितिः



डा. राघवेन्द्रभट्टः
विभागाध्यक्षः, साहित्यविभागः



श्री कु. वेङ्कटेशमूर्तिः
अध्वदर्शी, मुक्तस्वाध्यायपीठम्



डा. श्रीकरः जि. एन्.
प्राध्यापकः, अद्वैतवेदान्तविभागः



डा. मुरलीकृष्णः टि.
प्राध्यापकः, ज्यौतिषविभागः

# विद्यावारिधि–उपाधिप्राप्तिः



**श्रीमान् रमानन्दभट्टः**
(फलितज्यौतिषम्)

मार्गदर्शकः
**आचार्यः ए. पि. सच्चिदानन्दः**



**श्रीमान् शशाङ्कभट्टः सारङ्गः**
(व्याकरणशास्त्रम्)

मार्गदर्शकः
**डा. चन्द्रशेखरभट्टः**



**श्रीमान् नवीनभट्टः**
(व्याकरणशास्त्रम्)

मार्गदर्शकः
**डा. सि. हेच्. कृष्णानन्तपद्मनाभम्**



**श्रीमान् शिवकुमारशर्मा**
(वेदान्तशास्त्रम्)

मार्गदर्शकः
**आचार्यः महाबलेश्वर पि. भट्टः**



**शकुन्तलाभट्टः**
(वेदान्तशास्त्रम्)

मार्गदर्शकः
**डा. गणेश ईश्वरभट्टः**

# परिसरीयविविधशैक्षिकपुरस्कारराशिः



**श्रीलक्ष्मी के. एस्**
(साहित्यशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीगुरुकृपापुरस्कारः



**महेश्वरी**
(वेदान्तशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मास्मारकपुरस्कारः



**सुनीलभट्टः**
(फलितज्यौतिषे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**रोझी बन्चोर्**
(न्यायशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मास्मारकपुरस्कारः



**योगिता दि. च्छत्रे**
(व्याकरणशास्त्रे आचार्यस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्



**सुब्राय: एच्. जे.**
(मीमांसाशास्त्रे आचार्यस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्



**वेङ्कट्रमण जि. हेब्बार:**
(फलितज्यौतिषे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कार:
श्रीमती ललितम्मास्मारकपुरस्कार:



**शरण्य: पि.**
(साहित्यशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कार:



**आदर्श विनायक भट्ट:**
(मीमांसाशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कार:



**एम्. महेशकुमार:**
(व्याकरणशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कार:



**चिन्मय वि. भट्ट:**
(वेदान्तशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कार:



**देवीकृष्णा एन्**
(न्यायशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कार:



**प्रशान्त:**
(शिक्षाशास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्



**सत्यवान साहू**
(प्राक्शास्त्रिस्तरे अत्यधिकाङ्का:)
श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमहाबलभिडेस्मारकपुरस्कार:



**कोण्डि अनिरुद्ध राममूर्तिः**
(शास्त्रिस्तरे अत्यधिकाङ्काः)
श्री बी. जी. शेषगोपालस्मारकपुरस्कारः



**शेषकालेट्**
(शिक्षाशास्त्रिस्तरे अत्यधिकाङ्काः)
शिक्षाशास्त्रिस्तरे श्री वेङ्कटेश्वरपुरस्कारः



**श्रीमान् श्रीपतिः**
(ज्यौतिषशात्रे विद्यावारिधिच्छात्रः)
शृङ्गेरीकुलपतिशङ्करनारायणजोयीस पुरस्कारः



**श्रीमान् यज्ञदत्तः**
(ज्यौतिषशात्रे विद्यावारिधिच्छात्रः)
शृङ्गेरीकुलपतिशङ्करनारायणजोयीस पुरस्कारः



**डा. रमानन्दभट्टः**
(ज्यौतिषशात्रे विद्यावारिधिच्छात्रः)
शृङ्गेरीकुलपतिशङ्करनारायणजोयीस पुरस्कारः

# प्रातिभवैभवम्



**हरिप्रसादः एस्.**
आचार्यद्वितीयवर्षम्
राष्ट्रस्तरे साहित्यशलाकायां प्रथमः ।
तिरुपतौ प्रातिभसमारोहे समस्यापूर्तिस्पर्धायां प्रथमः,
एकपात्राभिनये प्रथमः, नाटके तृतीयः ।
राज्यस्तरे साहित्यशलाकायां प्रथमः,
समस्यापूर्तिस्पर्धायां द्वितीयः ।



**श्रीगणेशः वि. भट्टः**
आचार्यप्रथमवर्षम्
राष्ट्रस्तरे वेदभाष्यभाषणे तृतीयः ।
तिरुपतौ प्रातिभसमारोहे वेदभाष्यभाषणे द्वितीयः,
नाटके तृतीयः ।
राज्यस्तरे वेदभाष्यभाषणे प्रथमः ।
स्वर्णवल्ल्यां योगभाषणे प्रथमः,
पुराणव्याख्याने प्रथमः, समस्यापूर्तौ तृतीयः ।



**आदर्श वि. भट्टः**
आचार्यप्रथमवर्षम्
राष्ट्रस्तरे मींमांसाभाषणे द्वितीयः ।
राज्यस्तरे मीमांसाभाषणे प्रथमः ।
स्वर्णवल्ल्यां मीमांसाभाषणे प्रथमः, न्यायभाषणे प्रथमः, कालोचितकण्ठपाठे तृतीयः ।
अह्मदनगरपरीक्षायां द्वितीयश्रीणी



**नवीनः के. आर्.**
आचार्यप्रथमवर्षम्
राष्ट्रस्तरे सांख्यभाषणे तृतीयः ।
तिरुपतौ प्रातिभसमारोहे योगभाषणे द्वितीयः ।
राज्यस्तरे सांख्यभाषणे प्रथमः ।

# प्रातिभवैभवम्



## अपर्णा होळ्ळ
शास्त्रिप्रथमवर्षम्

तिरुपतौ प्रातिभसमारोहे नृत्ये प्रथमा, संस्कृतगीते तृतीया, नाटके तृतीया।
राज्यस्तरे धातुकण्ठपाठे तृतीया।



## शरण्यः पि.
आचार्यप्रथमवर्षम्

तिरुपतौ प्रातिभसमारोहे साहित्यभाषणे द्वितीयः, समस्यापूर्तौ सान्त्वनपुरस्कारः, नाटके तृतीयः।
राज्यस्तरे साहित्यभाषणे द्वितीयः।



## ऐश्वर्या
आचार्यप्रथमवर्षम्

राज्यस्तरे व्याकरणशलाकायां प्रथमा।
अहमदनगरपरीक्षायां प्रथमश्रीणी।



## लिखित शर्मा
आचार्यप्रथमवर्षम्

स्वर्णवल्ल्यां व्याकरणभाषणे प्रथमः।
तरुणोदयसंस्थायां संस्कृतभाषणे प्रथमः।



## विवेक त्रिपाठी
शास्त्रिद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे ज्यौतिषभाषणे तृतीयः।
राज्यस्तरे ज्यौतिषशलाकायां द्वितीयः।



## गोपिका
शास्त्रितृतीयवर्षम्

तिरुपतौ प्रातिभसमारोहे नृत्ये प्रथमा, नाटके तृतीया।



## सुजना
आचार्यप्रथमवर्षम्

तिरुपतौ प्रातिभसमारोहे नृत्ये प्रथमा, नाटके तृतीया।



## ग्रीष्मा
शास्त्रितृतीयवर्षम्

तिरुपतौ प्रातिभसमारोहे नृत्ये प्रथमा, नाटके तृतीया।



## कार्तिकेशः
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे नाटके तृतीयः।



## अश्विनभट्टः
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे व्याकरणभाषणे सान्त्वनपुरस्कारः।



## आकाशजैनः
आचार्यद्वितीयवर्षम्

राज्यस्तरे जैनबौद्धभाषणे द्वितीयः।



## एम्. महेशकुमारः
आचार्यप्रथमवर्षम्

राज्यस्तरे व्याकरणभाषणे द्वितीयः।

# प्रातिभवैभवम्



**वाणी एम्. हेगडे**
विद्यावारिधिच्छात्रा
राज्यस्तरे शास्त्रार्थविचारे तृतीया ।



**प्रदीपभट्टः के.**
आचार्यद्वितीयवर्षम्
राज्यस्तरे धर्मशास्त्रभाषणे तृतीयः ।



**देवीकृष्णा एन्.**
आचार्यप्रथमवर्षम्
राज्यस्तरे न्यायशलाकायां तृतीया ।



**महेश पि. देवते**
आचार्यप्रथमवर्षम्
राज्यस्तरे पुराणेतिहासशलाकायां तृतीया ।



**महेश सि. भट्टः**
शास्त्रिद्वितीयवर्षम्
राज्यस्तरे मीमांसाशलाकायां तृतीयः ।



**नरेश सारस्वत**
शास्त्रिद्वितीयवर्षम्
राज्यस्तरे धातुकण्ठपाठे तृतीयः ।



**दीपक झा**
शास्त्रिप्रथमवर्षम्
राज्यस्तरे अष्टाध्यायीकण्ठपाठस्पर्धायां तृतीयः ।



**श्रीनिधिः**
प्राक्शास्त्रिप्रथमवर्षम्
स्वर्णवल्ल्यां संस्कृतप्रबन्धे प्रथमा ।



**भार्गवी**
प्राक्शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां भगवद्गीताकण्ठपाठस्पर्धायां द्वितीया ।



**कवितादेवी**
आचार्यप्रथमवर्षम्
स्वर्णवल्ल्यां व्याकरणभाषणे द्वितीया ।



**द्वितीकृष्णपाणिग्राही**
शिक्षाशास्त्रिप्रथमवर्षम्
स्वर्णवल्ल्यां श्लोकान्त्याक्षरीस्पर्धायां द्वितीयः ।



**रूपा जोशी**
प्राक्शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां संस्कृतप्रबन्धे द्वितीया ।

# प्रातिभवैभवम्



**वीरेन्द्रः**
शास्त्रितृतीयवर्षम्
स्वर्णवल्लर्यां पुराणव्याख्याने तृतीयः ।



**अम्बिका**
प्राक्शास्त्रिद्वितीयवर्षम्
स्वर्णवल्लर्यां काव्यव्याख्याने तृतीया ।



**गोविन्दहेगडे**
विद्यावारिधिच्छात्रः
अहमदनगरपरीक्षायां द्वितीयश्रेणी ।



**योगिता**
विद्यावारिधिच्छात्रा
अहमदनगरपरीक्षायां प्रथमश्रेणी ।



**प्रमोदः जि. के.**
विद्यावारिधिच्छात्रः
अहमदनगरपरीक्षायां तृतीयश्रेणी ।



**दुर्गाश्रीवत्सा**
शास्त्रिद्वितीयवर्षम्
अहमदनगरपरीक्षायां प्रथमश्रेणी ।



**अवनी टेङ्गसे**
शास्त्रिद्वितीयवर्षम्
अहमदनगरपरीक्षायां द्वितीयश्रेणी ।


विविधपरिषदाम् उद्घाटनं कुर्वाणाः आचार्याः श्रीपादभट्टाः


जगद्गुरुचरणैः संस्कृतोत्सवस्य उद्घाटनम्


संस्कृतोत्सव समारोपभाषणं विदधानाः विद्वांसः रमेशोपाध्यायाः


म. म. रङ्गनाथशर्मणां जन्मशताब्दोत्सवस्य उद्घाटनम्


म. म. रङ्गनाथशर्मणां जन्मशताब्दोत्सवे सम्मानिताः विद्वांसः टि. एन्. प्रभाकरवर्याः


शिक्षकदिवससमारोहे लक्ष्मीनारायणभट्टवर्यस्य सम्माननम्


शिक्षकदिवससमारोहे नागराज अडिगवर्यस्य सम्माननम्


कन्नडराज्योत्सवे भाषमाणाः डा. के. नागराजवर्याः



अद्वैतवेदान्तविभागाध्यक्षाणाम् आचार्यमहाबलेश्वरभट्टानां सौप्रस्थानिककार्यक्रमः



विश्वविद्यालयानुदानायोगस्य निरीक्षणसन्दर्भे भाषमाणाः प्राचार्याः



विश्वविद्यालयानुदानायोगस्य निरीक्षण समितेः अध्यापकैसः संवादः




हिन्दीदिवससमारोहे मुख्यातिथयः प्रो. सुधाकरवर्याः



मिमांसाशास्त्रप्रशिक्षणकार्यशालायाः उद्घाटनं कुर्वाणाः
आचार्याः एम्. एल्. नरसिंहमूर्तिवर्याः




अन्ताराष्ट्रिययोगदिवसे मुख्यवक्तारः उमेशहेगडेवर्याः




शिक्षाशास्त्रीयराष्ट्रियसङ्गोष्ठ्याः उद्घाटनसत्रम्

# अनुक्रमणिका

## संस्कृतविभागः


| | | | |
|---|---|---|---|
| 1. | ईशावास्यम् | आचार्यः महाबलेश्वर. पि. भट्टः | 01 |
| 2. | अतोऽन्ये व्यञ्जनदोषाः | आचार्यः हरिनारायणतिवारी | 05 |
| 3. | स्मार्तप्रयोगेषु मीमांसासिद्धान्तसमन्वयः | आचार्यः सुब्राय वि. भट्टः | 19 |
| 4. | सामान्यम् | आचार्यः का. इ. मधुसूदनः | 25 |
| 5. | भ्वादिगणे विशिष्टधातूनां लट्लकारे रूपपरिचयः | आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः | 39 |
| 6. | शैक्षिकानुसन्धाने प्राक्कल्पनायाः स्वरूपम् | डा. चन्द्रकान्तः | 43 |
| 7. | सुकरातीस्-वर्यस्य उज्ज्वलजीवनगाथा | डा. रामचन्द्रुल बालाजी | 47 |
| 8. | नित्यकर्मणां मोक्षोपयोगित्वविमर्शः | डा. गणेश ईश्वर भट्टः | 53 |
| 9. | आध्यात्मयोगयोः परिणामः – एकं समीक्षणम् | डा. हरिप्रसादः के. | 58 |
| 10. | वैशेषिकसिद्धान्तपरिशीलनम् | डा. नवीनहोळ्ळः | 63 |
| 11. | रुद्रौ वा रुद्ररुद्राण्यौ ? | डा. चन्द्रशेखरभट्टः | 67 |
| 12. | कर्णाटकेषु यक्षगानपरम्परा कृष्णभक्तिश्च | डा.राघवेन्द्रभट्टः | 70 |
| 13. | करुणविप्रलम्भरसः – एकं विवेचनम् | डा. चन्द्रकला आर् कोण्डी | 82 |
| 14. | सामाजिकानां संस्कृताभिमुखीकरणे विद्यमानाः मनोवैज्ञानिकोपायाः | डा. गणेश ति पण्डितः | 88 |
| 15. | रामायणस्य सार्वकालिकत्वम् | डा. वेङ्कटरमण भट्टः | 94 |
| 16. | सन्दंशन्यायः | डा.सूर्यनारायणभट्टः | 102 |
| 17. | क्रियाविशेषणवाचकपदोत्तरद्वितीयोपपत्तिः | डा. एस्. वेङ्कटेश ताताचार्यः | 106 |
| 18. | काव्ये भ्रान्तेरपि प्रमात्वम् | डा. कोम्पेल्लि विनयकुमारः | 110 |
| 19. | मनुष्यालयचन्द्रिकोक्तः खण्डीकरणविधिः | डा. मुरलीकृष्णः टि | 116 |
| 20. | मिथ्यात्वस्य मिथ्यात्वविचारः | डा. श्रीकरः जि. एन्. | 120 |
| 21. | लक्षणावृत्तिविचारः | डा. श्यामसुन्दरः ए. | 122 |
| 22. | व्युत्पत्तिवादे प्रथमखण्डान्तर्गतद्वितीयाकारके उद्धृतवाक्यानां शाब्दबोधवर्णनम् | डा. आर्. नवीनः | 126 |
| 23. | मार्कण्डेयपुराणे रुचिकृतपितृस्तवः | डा. प्रमोद भट्टः | 130 |
| 24. | छेद्यकम् | डा. प्रसादभट्टः | 136 |
| 25. | लेखनकौशलाभिवर्धकशिक्षणपद्धतयः | डा. अरविन्द सोमदत्तः | 141 |
| 26. | सुखबोधिन्याः सुखबोधकत्वं गुरुत्वञ्च | विद्वान् अरुणभट्टः | 143 |

| | | |
|---|---|---|
| 27. मानवजीवने ज्यौतिषप्रभावः | डा. प्रदीपशर्मा | 147 |
| 28. कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च | विद्वान् निरञ्जनभट्टः | 151 |
| 29. फलनिर्धारणे मानानि | डा. रमानन्द भट्टः एन्. | 154 |
| 30. प्लवत्ववशाद्भूमेः शुभाशुभज्ञानम् | डा. सुधांशु कुमार नन्दः | 165 |
| 31. पुन्नामनरकः | डा. एम्. श्रीनिवासमूर्तिः | 169 |
| 32. शाब्दिकचिन्तामणौ अतिदेशविचारः | राजेन्द्र भट्टः | 171 |
| 33. मीमांसाशास्त्रे योगसम्बद्धयमेषु अहिंसायाः विचारः | प्रशान्तगांव्करः | 175 |
| 34. शर्करामिव गोक्षीरे वाचोयुक्तिं निवेशय | उमामहेश्वरः एन्. | 177 |
| 35. समावेशात्मकशिक्षायाः निदर्शनरूपेण भगवद्गीता | प्रियाङ्का चन्द्र | 179 |
| 36. सामुद्रिकशास्त्रे रेखाफलविचारः | कुलदीपः | 184 |
| 37. उपनिष्क्रमणविधिः | कृष्णकुमार द्विवेदी | 187 |
| 38. अग्निपुराणे रसमीमांसा | ब्रजेश कश्यपः | 190 |
| 39. वास्तुशास्त्रोक्तमानसाधनविचारः | गणेशकृष्णभट्टः | 195 |
| 40. पदशक्यविचारपराणां यववराहाद्यधिकरणानां विषयभेदविमर्शः | गोविन्द गोपालकृष्ण हेगडे | 198 |
| 41. योगः धर्माध्यात्मविज्ञानसङ्गमः | वाणी मञ्जुनाथ हेगडे | 199 |
| 42. कादम्बर्यां परिसङ्ख्यालङ्कारः | सूर्यः हेब्बार् ए, | 202 |
| 43. सच्चिदानन्देन्द्रसरस्वतीस्वामिनां परिचयः वेदान्तार्थविशेषणं च | रविशंकर भट् के. एस्. | 206 |
| 44. अमरकोषस्य सुधाव्याख्यायाः वैशिष्ट्यम् | गणेशप्रसादः के .एस् | 210 |
| 45. षड्वर्गविचारः | राजेश कुमारः | 212 |
| 46. भारतीयस्य मनोगतम् | राजेशः आर्. एस्. | 215 |
| 47. स्वं रूपं शब्दस्याशब्दसंज्ञा | ऐश्वर्या | 216 |
| 48. भारतस्य विश्वगुरुत्वं संस्कृतमाध्यमेन अस्माभिः कथं साध्यम् ? | महेश हेगडे | 218 |
| 49. शारदाम्बाष्टकम् | नागराज मय्यः | 221 |
| 50. रीतिप्रस्थानम् | शरण्यः पि. | 222 |
| 51. साम्प्रतं संस्कृतम् | राहुलमिश्रः | 224 |
| 52. स्मृतिग्रन्थेषु मूल्यशिक्षा | मधुस्मिता राउत | 227 |
| 53. शिक्षायाः अभिकरणानि, तेषां प्रकृतिः, सम्प्रत्ययः, आवश्यकता च । | मधुस्मिता मिश्र | 229 |
| 54. धर्मः | रंजुला पधान् | 233 |

| | | |
|---|---|---|
| 55. व्यक्तित्वम् (Personality) | रवीश जोशी | 234 |
| 56. दशाफलविचारः | वेङ्कट्रमण हेब्बारः | 237 |
| 57. संस्कृतं संस्कारः संस्कृतिश्च | रोजी बन्चोर् | 239 |
| 58. मानवजीवनस्योद्देश्यम् | चण्डीप्रसादः | 241 |
| 59. दिङ्निर्धारणम् | विवेक त्रिपाठी | 242 |
| 60. इकोऽचि विभक्तौ | दुर्गा श्रीवत्सा | 244 |
| 61. यथोद्देशं संज्ञापरिभाषम् । कार्यकालं संज्ञापरिभाषम् । | महेशबाग्वारः | 246 |
| 62. कालिदासस्य चित्रकलानुशंसनम् | प्रसीदरञ्जन मेहर | 248 |
| 63. रप्रत्याहारखण्डनमण्डनपरम्परा | सौरभ रावुतः | 250 |
| 64. वसिष्ठः | शशाङ्क भट्टः | 252 |
| 65. भारतीयसंस्कृतौ योगः | सुदर्शन एम्. एस्. | 253 |
| 66. आध्यात्मिकजगति शिक्षायाः माहात्म्यम् | द्वितीकृष्ण पाणिग्राही | 255 |
| 67. काव्यस्यार्थः | संजीव कुमार साहु | 258 |


## हिन्दीविभागः


| | | |
|---|---|---|
| 1. श्राद्धश्रीमती | बबीता बहुगुणा | 260 |
| 2. चन्द बातें | रोहित कुमार | 263 |
| 3. संस्कृत भाषा से पलायन | दीपक उनियाल | 264 |
| 4. ऋग्वेद में यज्ञ का महत्व | विनय कुमार शुक्ल | 266 |
| 5. इनकी जुबानी मैं रो रही हुँ | पुपुन दास | 268 |
| 6. देवभूमि उत्तराखण्ड की संस्कृति | अशोक डंगवाल | 269 |
| 7. कुम्भ का महत्व | नरेश जोशी | 272 |
| 8. समय का महत्व | रञ्जन कंस्रालि | 273 |
| 9. तीन गुणों (सतोगुण-रजोगुण-तमगुण) की त्रिवेणी, अलग अलग है इन्की श्रेणी | राजू सरकार | 274 |


## English Section


| | | |
|---|---|---|
| 1. Distractions And Obstacles For Yoga Practice | Sri Ramachandra H.D | 277 |
| 2. Reader Response Theory | Smt. Pavana M. N. | 279 |
| 3. Beauty | Swagat Kumar | 281 |
| 4. Qualities of A Teacher | Greeshma N. T. | 281 |

| | | |
|---|---|---|
| 5. LIFE | Sabita Mandal | 283 |
| 6. Implication of Psychology | Kartik Mishra | 283 |
| 7. Basic doctrines of Advaita Vedanta, Visistadvaita Vedanta and Dvaita Vedanta | Loknath Panda | 286 |
| 8. BECAUSE ATTITUDE IS EVERYTHING | Praveen Sandimani | 290 |


## ಕನ್ನಡ ವಿಭಾಗ


| | | |
|---|---|---|
| 1. ಗೋಸಂಪತ್ತು : ಅಂದು ಮತ್ತು ಇಂದು | ಡಾ. ಪ್ರಭಾಕರ ಎಮ್.ಎ. | 294 |
| 2. ಕನ್ನಡದ ಪ್ರಾಚೀನ ಶಾಸನ....? | ಡಾ. ಕವಿತಾ ಎಸ್ | 297 |
| 3. ಮನೋವಿಜ್ಞಾನವಾಗಿ ಭಗವದ್ಗೀತೆ | ಶ್ರೀಪತಿ ಭಟ್ಟ | 303 |
| 4. ಜೀವನದಲ್ಲಿ ಅತಿ ಮುಖ್ಯವಾದುದು ಯಾವುದು ? | ಗಿರೀಶ ಭಟ್ಟ | 305 |
| 5. ಸಮಯ | ದತ್ತಾತ್ರೇಯ ಹೆಗಡೆ | 308 |
| 6. ಮರೆಯಾಗದಿರಲಿ ಮಾತಾಯಿ | ಯಶಸ್ವಿನಿ ಹೆಗಡೆ | 309 |
| 7. 'ಮಾತೃದೇವೋ ಭವ' ಎನ್ನುವುದು ಸಮರ್ಥನೀಯ | ಮನಸ್ವಿನಿ.ಕೆ.ಜಿ. | 311 |
| 8. ಗೊಮ್ಮಟೇಶ್ವರ : ಕಾರ್ಕಳ ಮತ್ತು ವೇಣೂರು | ಸಂಗ್ರಹ - ರಕ್ಷಾ ಆರ್. ಡೋಂಗ್ರೆ | 312 |
| 9. ಭಗವದ್ಗೀತೆ ಹಾಗೂ ಇದರ ಮೌಲ್ಯಗಳು | ಶ್ವೇತಾ ವಿಷ್ಣು ಭಟ್ಟ | 314 |
| 10. ಮತದಾನ | ಮಂಜುನಾಥ | 315 |
| 11. ನಿದ್ದೆಯ ಸಂದೇಶ | ಚೈತ್ರಾ .ಕೆ. ಹೆಗಡೆ | 317 |
| 12. ಅಮ್ಮಾ..... | ಗಗನ ಎಚ್.ವಿ | 318 |
| 13. ಶ್ರೇಷ್ಠತೆಗೆ ಮತ್ತೊಂದು ಹೆಸರು - ಪುಣ್ಯಭೂಮಿ ಭಾರತ | ಈರಪ್ಪ ಹ. ಬಾಳಿಕಾಯಿ | 319 |
| 14. ಪಶ್ಚಿಮದ ಪುಷ್ಪ | ಸಪ್ತಮಿ.ಕೆ.ಎನ್ | 321 |


**********

# संस्कृतविभागः

# ईशावास्यम्

**आचार्यः महाबलेश्वर. पि. भट्टः**

निवृत्ताद्वैतवेदान्तविभागाध्यक्षः

**शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।**

**किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥**

आर्षपरम्परायां समागतानां भव्यदिव्यभारतजनपदनिवासिनामस्माकं वेदाः परमं प्रमाणमिति नास्ति सन्देहगन्धोऽपि । ते च वेदपदाभिधेया आम्नाया अपौरुषेयाः स्वतःप्रमाणभूता इत्यपि अस्मदीया श्रद्धा । दुर्लभं मानवं जन्म सफलीकर्तुं तथा चतुर्विधपुरुषार्थान् सम्पादयितुं च अलौकिकान् उपायविशेषान् निवेदयन्ति श्रुतिवचांसीति निश्चप्रचम् ।

यदि तर्हि वेदवचनेषु संशयो वा भ्रमो वा विरुद्धार्थो वा मन्दे मनसि जायते तर्हि स च दोषोऽस्मदीय एव भवेत् न तु वेदस्य । प्रत्यक्षादिप्रमाणागोचरं चक्षुरादीन्द्रियाविषयं धर्ममार्गं ब्रह्मात्मैक्यस्वरूपं च बोधयितुं प्रवृत्ता श्रुतिः नोपेक्षाम् अर्हति । शास्त्रविचक्षणैः महर्षिभिः सन्दर्शिते सनातनमार्गे दीर्घकालनैरन्तर्य-सत्कारासेविते मानवधौरेयस्य चेतसि श्रुत्यर्थः यथावत् संस्फुरति । इदमित्थमिति श्रौतं तात्पर्यं निर्णेतुमर्हति स महात्मा । अत एव इतिहासपुराणकाव्यनाटकादीनि चतुर्दशविद्यास्थानानि वेदार्थम् उपबृंहयितुं, निश्शङ्कं श्रुतिरहस्यं मनसि कर्तुम् उपकुर्वन्ति । विवेकिना मनुष्येण सर्वथा सर्वदा श्रुतिसरणिः अनुसरणीया अकृतसुकृतानां प्राणिनां सुदुर्लभं श्रुत्यैकसमधिगम्यं तत्त्वं मानवानामेव सुलभं समस्ति । अतः शास्त्रं नाम वेदः । स च हितं सुखं सुखसाधनं तथा अहितं दुःखं तत्साधनं च उपदिशति । श्रेयःप्रेयसोः तत्साधनयोः उपदेशकः । अभ्युदयनिःश्रेयससिद्धिः शास्त्रेति अपरनामधेयात् वेदादेव भवति । अतः प्रेक्षावता मनुष्येण शास्त्रानुसारेण कार्याकार्यनिर्णयो विधेयः । तदुक्तं भगवता श्रीकृष्णेन –

**तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥**[1]

[1] भगवद्गीता – १६.२४

ISSN: 2320-740X

इति । सति चैवं शास्त्रप्रपञ्चस्य विहङ्गमवीक्षणे क्रियमाणे शुक्लयजुर्वेदीयायां वाजसनेयिशाखायां समाम्नाता ईशावास्योपनिषद् मन्मानसासनमलङ्करोति । ईशावस्यमिति पदेनारब्धा सेयमुपनिषत् अष्टादशमन्त्रैः संवलिता ईशवास्योपनिषदिति प्रथिता शास्त्रविदां समाजे । भगवत्पादशङ्कराचार्याणां भाष्येण विभूषितासु दशसूपनिषत्सु विख्यातासु प्रथमगणनीया इयम् उपनिषत् । तथा च –

**ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।**

**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥**

इति । समग्रं वेदशास्त्ररहस्यम् एकस्मिन् पुरुषसूक्ते गुम्फितमिति शास्त्रमर्मज्ञाः शरीरकम्पमुररीकुर्वन्ति यत्र अष्टादशमन्त्राः समाम्नाताः । समग्रवेदशास्त्रसङ्ग्रहभूतं गीताशास्त्रं यतः 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः । या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता' । तस्मिन्नपि अष्टादश अध्यायाः । पञ्चमे वेदे महाभारताख्ये अष्टादश पर्वाणि प्रसिद्धानि। अतो **जय** इति नामन्तरं प्राप्तम् । अहमपि भावयामि अष्टादश मन्त्रसंवलिता अष्टादशी ईशोपनिषत् हृद्गता चेत् स च पुरुषः संसारविजयी भवेत् । सार्थकं तस्य जन्म भवेदिति ।

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**

**पूर्णस्य पुर्णमादाय पूर्णमेवावशिष्यते ॥**

इति शान्तिमन्त्रेण दुःखत्रैविध्यं दूरीकृत्य समाम्नातः प्रथमो मन्त्रवर्णः इत्थं श्रूयते –

**ईशावस्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**

**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ॥**[1]

**ईशावास्यमिदं सर्वं** पदत्रयं सकलं वेदावेदान्तरहस्यं समासतः समुपदिशति । एतादृशवाक्यकदम्बकं श्रुतिस्मृतिपुराणेषु वारं वारं श्रूयते स्मर्यते च। **सर्वं खल्विदं ब्रह्म, ब्रह्मैवेदं सर्वम्, आत्मैवेदं सर्वम्** इति श्रुतिः, **वासुदेवः सर्वम्, मया ततमिदं सर्वम्** इति भगवद्गीतासु **देव्या यया ततमिदं** इति पुराणे **भगवान् वासुदेव** इति महाभारते । एवं च सति श्रुतिस्मृतिपुरणादीनां वक्तव्यं, श्रोतव्यं मन्तव्यं निदिध्यासितव्यं रहस्यमेकमेव ईशावास्यमिदमिति । प्रत्यक्षादिप्रमाणसिद्धं नामरूपात्मना व्याकृतक्रियाकारकफलभेदभिन्नं दृष्टनष्टस्वरूपं मनसापि अचिन्त्यरचनारूपं स्थावरजङ्गमात्मकं दृश्यमात्रं जगत् इदं इति निर्दिष्टम् कारणव्यतिरेकेण कार्यं नाम परमार्थतो नास्ति । कारणमेव कार्याकारेण भासते । विवर्तवादे अधिष्ठानव्यतिरेकेण आरोपितं वस्तु वस्तुतो नास्ति । अविद्यया

[1] ईशावास्योपनिषत् - १

 ISSN: 2320-740X

वस्तु अवस्तुरूपेण प्रतीयते इति न्यायेन विवक्षति इदं सर्वम् ईशावास्यमिति ।

मृदुपादानकारणं घटः कार्यम्, मृत्सकशात् जायते मृदि तिष्ठति मृद्येव लीयते अतो मृदात्मा घटः, अस्या अवस्थाविशेषः । मृत्तिकामात्रं सत्यम् इत्थं जगतः जन्मस्थितिलयकारणं परमेश्वरः सच्चिदानन्दस्वरूपः । उपादानकारणं निमित्तकारणं च एक एव ईश्वरः । अविद्या सहकारि मात्रं कारणव्यतिरेकेण कार्यं नास्तीति हेतोः ईशवास्यमिदं सर्वम् , यतो वा इमानि भूतानि जायन्ते इत्याद्याः श्रुतयः उपादानकारणे प्रमाणम् । विश्वस्य कर्ता इति निमित्तत्वे प्रमाणम् । जन्माद्यस्य यतः पारमर्षं सूत्रं जगत्कारणत्वं सयुक्तिकं प्रतिपादयति । तदनन्यत्वमारम्भणशब्दादिभ्यः इत्यारम्भणाधिकरणं कारणानन्यत्वं कार्यस्य सूत्रभाष्यकृत्यां सप्रपञ्चं प्रपञ्चितम् । अतः ईशावास्यमिदं सर्वम् उपनिषन्मतम् इदं प्राथम्येन उदबोधयत् । अत्र भाष्यकारेण शङ्कराचार्येण प्रदत्तो दृष्टान्तः मर्मस्पर्शी विद्यते । यथा कश्चन चन्दनखण्डः जले निक्षिप्तः । मलिनजलजशैवालादिसम्पर्केण दुर्गन्धियुक्तो भवति । स्वाभाविकं सौगन्ध्यं लेशतोऽपि नानुभूयते । पुनः पुनः प्रक्षालनेन शुष्कीकरणेन निघर्षणेन च शुद्धः सन् नैजेन सुगन्धेन व्याप्तो भवति । एवं जीवः परमार्थतः इश्वरोऽपि सन् अविद्याकल्पितशरीरेन्द्रियमनोबुद्ध्युपाधिप्रयुक्तः कर्ता भोक्ता संसारीति भ्रमति । नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः सन् दीर्घकालं निरन्तरं सादरं सश्रद्धं सभक्ति गुरुमुखात् वेदान्तवचनानि श्रुत्वा मत्वा निदिध्यासनं च कृत्वा प्रत्यग्ब्रह्मस्वरूपम् ईश्वरम् अनुभवति सः जगत्सर्वम् ईश्वरस्वरूपेण पश्यति । अतो विद्वदनुभवं स्वात्मव्यतिरेकेण किमपि न पश्यति आत्मा च ब्रह्म कथयति ईशावास्यमिदम् यथा च –

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥**[1]

इति गीता गायति । अस्माकं दृष्ट्यनुसारं जगद्दृश्येत । शास्त्रीया दृष्टिः ईश्वरानुग्रहात् लब्धा चेत् सर्वं ईशावास्यमित्येवानुभवामः । सर्वात्मना सुमतिः गुरुकृपाविशेषेणैव लभ्या ।

एवं च सति नामरूपात्मकं स्थावरजङ्गमात्मकं सकलं ब्रह्मात्मना व्याप्तम् । तेन कारणेन पुत्रैषणां वित्तैषणां लोकैषणाञ्च परित्यज्य दृष्टानुश्रविकवितृष्णः सन् सर्वसङ्गपरित्यागेन आत्मयाथात्म्यज्ञानेन आत्मा रक्षणीयः । लौकिकसुखतत्साधनीं धनविषयाम् अन्यविषयाम् इच्छां मा कुरु । कस्यस्वित् धनम् इति स्वस्य वा परस्य धनापेक्षां

[1] भगवद्गीता – ६.३०

मा कुरु । परमार्थतः अतोऽन्यदार्तम् इति श्रुत्युपदेशानुसारं मिथ्याभूतं सर्वम् । आत्मव्यतिरेकेण न किमप्यस्ति । ईशावास्यमिदं सर्वम् । अनेन विवेकिनां ज्ञानमार्गः उपदिष्टः, कुर्वन्नेवेह कर्माणि इति कर्ममार्गः उपदिश्यते अज्ञानिनां कृते । विद्याञ्चाविद्याञ्च इत्यनेन उपासनापि उपदिश्यते । अधिकारितारतम्येन ज्ञानकर्मोपासनात्मकं मार्गत्रयम् उपदिष्टम् । कर्मणा चित्तशुद्धिः उपासनया चितैकाग्र्यम् । सर्वात्मज्ञानेन मोक्ष इति सर्वं समञ्जसम् ।

**********

 ISSN: 2320-740X

# अतोऽन्ये व्यञ्जनदोषाः

**आचार्यः हरिनारायणतिवारी**

नव्यव्याकरणविभागाध्यक्षः

पस्पशायां भगवान् पतञ्जलिः स्वरदोषान् गणयित्वा व्यञ्जनदोषविषयेऽतोऽन्ये व्यञ्जनदोषा इत्याह । तत्र के व्यञ्जनदोषा इति जिज्ञासायां चतुर्णां वेदानां प्रातिशाख्यग्रन्थान् अधीत्य ततो व्यञ्जनदोषाः संकलिताः सन्ति । एषां प्रकाशनक्रमे 'भारतीयदर्शनेषु शब्दार्थयोरवधारणे'ति ग्रन्थे सर्वेऽपि विषयाः श्रमक्रमाभ्यां विलिख्य प्रकाशिताः। तत्र वर्णानामात्मविशेषगुणा उक्ताः, इदानीं तेषां दोषविशेषाः क्रमशो निर्दिश्यन्ते । तत्र प्रथमं वर्णानामसम्यगुच्चारणे आयः, उपायः, व्यथनं चेति त्रयो दोषाः प्रादुर्भवन्ति ।

१. तत्र आयो नाम असतो वर्णस्योपजनः यथा “ह्वयामि” इत्यत्र पुरस्तादनुनादः। अर्थाद् 'ह्व' इत्यतः पूर्वम् ‘अव्' इत्याकारो ध्वनिः ॥

२. अपायो नाम सतोऽपकर्षः। यथा “ऊनयीः'' इत्यत्र यकारस्यानुच्चारणम् ।

३. व्यथनं नाम सतोऽन्यथा श्रवणम् । यथा “रथ्या” इत्यत्र थकारस्य सकारवच्छ्रवणम् ।

४. निरस्तो[1] नाम दोषः स्थानकरणयोरपकर्षे समुत्पद्यते । यथा-स्थानकरणाभ्यां वर्णा अपकृष्यन्ते । एवमेव वर्णादपि स्थानकरणे अपकृष्टे भवतः ।

५. स्थानकरणयोर्विस्तारे व्यासो[2] नाम दोषः समुत्पद्यते, तयोः संहारे पीडनं नाम दोषः सञ्जायते । व्यासोऽविवेकः ।

६. पीडनं द्विर्भावः ।

७. ओष्ठाभ्यां बद्धं यद् दुष्टं[3] तदम्बूकृतमित्युच्यते ॥

८. सुषिरेण मुखेन यदाह वक्ता, तद् दुष्टं शूनम्[4] इत्युच्यते ।

---

[1] निरस्तं स्थानकरणापर्षे । (ऋ.प्रा.१४.२)

[2] विहारसंहारयोर्व्यासपीडने । (ऋ.प्रा.१४.३)

[3] ओष्ठाभ्यामम्बूकृतमाह बद्धं दुष्टम् । (ऋ.प्रा.१४.४)

[4] मुखेन सुषिरेण शूनम् । (५.१४.प्रा.ऋ)

९. हन्वोर्नीचैर्भावः संदष्टं[1] नाम दोष उच्यते ॥

१०. हन्वोः सर्वतश्चलने विक्लिष्टं[2] नाम दोषः । विश्लिष्टमित्यस्य असंयुक्तमित्यर्थः ।

११. जिह्वामूलस्य स्तम्भने ग्रस्तं नाम दोषः ।

१२. नासिकयोर्यदा वर्णोऽनुषज्यते तदाऽनुनासिकत्वमुत्पद्यते[3] । स दोषस्तं परिवर्जयेत् । अयं हि दोषोऽनुनासिकेषु स्वरेष्वेव । यत्र हि केनचिच्छास्त्रेणानुनासिकत्वं न विहितम्, परं तत्रानुनासिकत्वं[4] वर्णानां क्रियते, तदैव दोषावहत्वम् । यथा साम्प्रतं पञ्चमवर्णेभ्यः परः स्वरः प्रायेणानुनासिकः क्रियते । तदुदाहरणं यथा- "मनुः" इत्यस्य स्थाने 'मँनुँ' इत्युच्चार्यते । अयं हि दोषः । अथ हि नहि केनापि सूत्रेण अकारस्य उकारस्य चानुनासिकत्वं विष्टं गीयते । परं 'हे राम' इस्यत्र तु "अणोऽप्रगृह्यस्यानुनासिकः" (अष्टा.८.४.५७) इति सूत्रेण मकारोत्तरस्याकारस्यानुनासिकत्वं विधीयते । तत्र च 'हे राम' इत्युच्चारयितुं शक्यते । तथा च अविहितानुनासिकत्वस्थलेऽनुनासिकोच्चारणं दोषस्तं परिहरेत् ॥

१३. ह्रस्वदीर्घप्लुतानामयथामात्रोच्चारणं दोषो भवति । स परिहरणीयः। प्रायेण हि दीर्घेषु ह्रस्वेषु च रक्तेषु अनुनासिकेषु मात्राधिक्यं कुर्वन्ति । तदाचार्येण निदर्शनार्थमुत्तरत्रोदाहृतम् । तथा च तत्र सूत्रम्-'रक्तं ह्रस्वं द्राघयन्त्युग्र ओकः" (ऋक्प्रा. १४.१५) अत्र हि उग्रँ इत्यस्य उग्राँ इत्युच्चारणं कुर्वन्ति । स च दोषः । सूत्रे वीर्यस्य रक्तस्य त्रिमात्रोच्चारणं नोदाहरणत्वेन सूत्रकृतोपात्तम् । तच्च स्वयमूहनीयम् ।

तत्र पूर्वं ये दोषास्तद्विषये सूत्रकारः सिंहावलोकनन्यायेनाह- संदंशव्यासपीडननिरासाः स्वराणां दोषा ज्ञेयाः[5]। ग्रासो नाम दोषः पूर्वमुक्तः । स च कण्ठ्ययोरकाराकारयोरुत्पद्यते। अनुनासिकानां वर्णानां संदष्टता विषमरागता वा दोष उक्तः । तत्र संदष्टता 'संदष्टं तु व्रीडन आह हन्वोः' (ऋक्प्रा.१४.६) इत्यनेन सूत्रेणोक्ता । तत्र रागं प्रत्याख्याय अनुनासिका न वर्तन्ते, तस्माद् विषमरागता दोषः। विषमरागता नाम

---

[1] संदष्टं तु व्रीडन आह हन्वोः । (ऋ(६.१४.प्रा.

[2] प्रकर्षणे तदु विक्लिष्टमाहुः । (७.१४.प्रा.ऋ)

[3] जिह्वामूलनिग्रहे ग्रस्तमेतत् । (८.१४.प्रा.ऋ)

[4] नासिकयोस्त्वनुषङ्गेऽनुनासिकम् । (९.१४.प्रा.ऋ)

[5] संदंशो व्यासः पीडनं निरासः । ऋ).प्रा(११.१४.

 ISSN: 2320-740X

मात्राधिक्येन अनुनासिकस्य स्वरस्योच्चारणम्। यथा "अक्रतँ एमि" (ऋक्प्रा१०.३४.५) अभ्र आँ अपः (ऋक्प्रा.५.४८.१) इत्यत्र। अत्र हि ह्रस्वं द्राघयन्ति, दीर्घञ्च प्लुतयन्ति चतुर्मात्रयन्ति वा।

१४. सान्तःस्थानां[1] वर्णानां क्वचिदादिलोपः क्वचिदन्तलोपः क्रियते, स दोषः । तत्र आदिलोपः पिबा निषद्य' (ऋ.१.१७७.४) इत्यत्र दकारलोपः। अन्तलोपः 'इन्द्रवाय्वोः' इत्यत्र।

इदानीं दोषाणां नामानि प्रातिशाख्ये नोपन्यस्तानि, अतो मयाऽपि तेषां नामोल्लेखमकृत्वा केवलं दोषा इत्येवोच्यन्ते। किञ्च[2] अस्थाने असद् व्यञ्जनमुच्यते, स दोषः। यथा "स्तोमैरभुत्स्महि" (ऋ०४.५२.४), 2 "उत्स्नाय' (ऋ.२.१५.५), 'विश्वप्स्त्यस्य' (ऋ.७.४२.६) इत्यत्र सकारात् परस्तकार उच्यते। यथा वा यक्ष्मं दोषण्यम्' (ऋ.१०.१६०.२), विष्णुः' इत्यत्र षकारादिकारोकारौ।

व्यञ्जनानामन्योन्येन सह विरागः क्रियते[3] | अन्योन्येन सह विरागो नाम एकस्यापरेण सह स्थानादिसाम्यापत्तिः । अयमपि दोषः । यथा "उपमा षड् द्वा द्वा' (ऋ०८.६८.१४) इत्यत्र उकारात् परस्य दकारस्य विरागः क्रियतेऽज्ञातृभिः । प्रयत्नशैथिल्येन व्यञ्जनानामुच्चराणम् अतिप्रयत्नेन वा[4] । तावुभावपि दोषः । पदादिस्थानां घोषवतां पुरस्तादनुनादो ध्वनिः क्रियते । अथवा तेषां घोषवतां धारणं नामानुपलब्धिः । यथा "ह्वयामि" इत्यत्र पुरस्तादधिकः शब्दः क्रियते । अथवा तस्य दोषस्य परिहरणार्थं हकारस्यानुलब्धिः क्रियते । एकस्य दोषस्य निरासार्थमपरः प्रयत्नोऽपि दोषायते । अपरे पुनर्धारणस्य नानुपलब्धिरर्थः, किन्तु धारणं नाम द्विर्वचनमिति मन्यन्ते। "ज्योतिष्कृत् (ऋ.१.५०.४) द्यावा द्वादश" इति॥

सोष्मणाम्[5] ऊष्मणाञ्च आदिस्थानां पुरस्तादनुनादः, अनादो वा क्रियते। तावपि दोषः, यथा अभिख्या। छायामिव (ऋ.६.१६.३८) श्चोतन्ति, स्तौति ऊष्मणाम्[6] त्वघोषाणां लोमश्यं नाम असौकुमार्यम् । क्ष्वेलनं नाम

---

[1] सान्तःस्थानामादिलोपान्तलोपौ। (१४.१४.प्रा.ऋ)

[2] अदेशे वा वचनं व्यञ्जनस्य। (ऋ.प्रा.१४.१५)

[3] अन्योन्येन व्यञ्जनानां विरागः। (ऋ.प्रा.१४.१६)

[4] लेशेन वा वचनं पीडनं वा। (१७.१४.प्रा.ऋ)

[5] सोष्मणामनुनादोऽप्यनादः । (१९.१४.प्रा.ऋ)

[6] लोमश्यं च क्ष्वेलनमूष्मणां तु। (२०.१४.प्रा.ऋ)

अधिको वर्णस्य ध्वनिः, तावुभावपि दोषौ स्तः । आद्येषु चतुर्षु वर्गेषु जिह्वाया विस्तारः क्रियते, स दोषः[1] ।

इदानीं दोषाणां नामानि प्रातिशाख्यरीत्या प्रदर्श्यन्ते –

१५.एतेषां वर्गाणां मुख्ये आद्ये वर्गे ग्रासो नाम दोषः सञ्जायते[2] ।

१६.एतेषामेव चतुर्थे वर्गे उच्चारणीये प्रतिहारो नाम दोषो भवति । प्रतिहारो नाम अतिप्रयत्नः[3] १७.रेफे मध्यमयोर्द्वयोर्वर्गयोश्चवर्गटवर्गयोश्च निरासो नाम दोषो भवति[4] ।

१८.चतुर्थ वर्गे उच्चारणीये करणे स्थाने चाविशति सति विक्लेशो नाम दोषो भवति[5] । रेफे अतिस्पर्शः असौकुमार्यं च दोषौ स्तः[6] ।

१९-२१.लकारस्य त्रयो दोषाः अतिस्पर्शः असौकुमार्यम्, जिह्वाग्रान्ताभ्यां वचनं च[7] ।

२२-२३.अधिकः श्वासः, अघोषसदृशत्वं वा हकारस्य दोषौ[8] ।

२४-२५.हकारभिन्नेष्वन्येषु ऊष्मसु शकारादिषु[9] निरासः पीडनं वा दोषौ स्तः ।

२६ स्वरात्परं विसर्जनीयं पूर्वस्य सस्थानं निरस्तमाहुः[10] । उक्तोऽयं टोषः- रथीः वधूः । किमुच्यते दीर्घादिति ह्रस्वादपि परो विसर्जनीयः पूर्वसस्थान एव श्रूयते - अग्निः वायुः । यद्यपि श्रवणं तुल्यम् ततोऽप्याचार्येण दीर्घग्रहणं कृतम् । तस्माद् दीर्घादेव पूर्वसस्थानत्वं दोषौ भवति, न ह्रस्वादपि दोषत्वं

---

[1] वर्गेषु जिह्वाप्रथमं चतुर्षु । (ऋ(२१.१४.प्रा.

[2] ग्रासो मुख्ये । (२२.१४.प्रा.ऋ)

[3] प्रतिहारश्चतुर्थे । (२३.१४.प्रा.ऋ)[3]

[4] सरेफयोर्मध्यमयोर्निरासः । (२४.१४.प्रा.ऋ)

[5] विक्लेशः स्थाने सकले चतुर्थे । (ऋ(२५.१४.प्रा.

[6] अतिस्पर्शो वर्वता च रेफे । (२६.१४.प्रा.ऋ)

[7] जिह्वान्ताभ्यां च वचनं लकारे । (२७.१४.प्रा.ऋ)

[8] श्वासोऽघोषनिभता वा हकारे । (ऋ.प्रा.१४.२८)

[9] निरासोऽन्येषुष्मसु पीलनं वा । (२६.१४.प्रा.ऋ)

[10] स्वरात्परं पूर्वसंस्थानमाहु(३०.१४.प्रा.ऋ) दीर्घान्निरस्तं तु विसर्जनीयम् । -

तस्येत्यवधेयम् । अपरेषां मते तु दीर्घग्रहणमुत्तरार्थम् । तथा च ह्रस्वादपि विसर्जनीयस्य पूर्वसस्थानत्वं दोषः ॥

यद्यपि शास्त्रान्तरे “कण्ठस्थानौ हकारविसर्जनाया (तै.प्रा.२.४६), “उदयस्वरादिसस्थानो हकार एकेषाम्” (तै.प्रा.२.४७), 'पूर्वन्तसस्थानो विसर्जनीयः' (तै.प्रा.२.४८) इति तेषां विसर्गः पूर्वान्तसस्थानो भवति, तस्मादपि युक्तम् । इह दोषसमुच्चयप्रकरणे दोषः स इति निश्चयः । तथा च ऋग्वेदे तथात्वं दोषो न तु वेदान्तरे । यथाऽनुनासिकपरादूष्मणः परः सस्थानमागमो भवत्येकेषाम् । यथा “अस्मे विष्णु इति । तदिहास्माकम् ऋग्वेदिनां प्रतिषिद्धम् ।

दीर्घात्[1] कण्ठ्यात् परं विसर्जनीयं पूर्वान्तसस्थानम्, यथा रेफवद् ऋकारात् परं जिह्वामूलीयं पूर्वान्तसस्थानं पूर्वान्तसस्थानं निरस्तं नाम दोषः, स विसर्जनीयः । 'देवाः सोमा' इति यथा दीर्घादिति कथनेन 'देवः सोमः' इत्यत्र पूर्वान्तसस्थानत्वेऽपि न दोषः । तथा च ह्रस्वात् कण्ठ्यात् परो विसर्जनीयो ह्रस्वसस्थान एव भवति । रक्तात्[2] कण्ठयाद् दीर्घात् परं विसर्जनीयं नासिक्यं नाम दोष । यथा “स्वतवाँ पायुः (ऋ.४.६.२) । एवं रक्ताद् दीर्घाद् ऋकारात् परं विसर्जनीयं नासिक्यं नाम दोषः, यथा “नः पतिभ्यः” (तै.पृ.१४२)

स्वरोपधात्[3] संयोगादेरूष्मणः पूर्वमधिकं विसर्जनीयमाहुः, स दोषो वर्जनीयः । “पावक ते स्तोकाश्चोतन्ति” (ऋ.३.२१.२) ऊष्मणः[4] अघोषाद रक्तपरात् परं यममाहुः, सोऽपि दोषो वर्जनीयः । “पृश्निः विष्णुः स्नात्वा” (ऋ.१०.७१.७)। घोषिणः[5] ऊष्मणो रक्तपरात् परं तेन घोषिणा तुल्यप्रयत्नम् ऊष्माणं वा यममाहुः, स दोषः, तं वर्जयेद् बुधः । ब्रह्म अह्ना शुनश्शेपो यमह्वद् गृभीतः ( ऋ.१.२४.१२) । “मानो मघेव निष्पपी परा दाः” (ऋ.१.१०४.५) इत्यादिषु शकारस्थाने षकारस्थाने च विसर्गोच्चारणं[6] दोषः । “अन्तर्महाँश्चरति रोचनेन” (ऋ.३.५५.९) “पीवो अन्ना रयिवृधः सुमेधाः' (ऋ.७.९१.३) "उत्पणीर्हतमूर्म्यामदन्ता” (ऋ.१.१८४.२),

---

[1] कठ्याद् यथा रेफवतस्तदाहुः । (३१.१४.प्रा.ऋ)

[2] रक्तातु नासिक्यमपीतरस्मात् । (ऋ.प्रा.१४.३२)

[3] संयोगादेरूष्मणः पूर्वमाहुर्विसर्जनीयमधिकं स्वरोपधात् । (ऋ.प्रा.१४.३३)

[4] परं यमं रक्तपरादघोषात् (३४.१४.प्रा.ऋ)

[5] ऊष्माणं वा घोषिणस्तत्प्रयत्नम् ।(ऋ.प्रा.१४.३५)

[6]शुनश्शेपो निष्पापी शास्ति निष्पाळ विक्रमा ब्रह्म विष्णुः स्म पृश्निः । (ऋ.प्रा.१४.३६)

“विदस्यूँर्योनावकृतः” (ऋ.१.६३.४) एतेष्वनुस्वारं कुर्वन्ति स दोषः । अर्थाद् अनुनासिकमकृत्वा अनुस्वारकरणं[1] दोषः स वर्जनीयः ॥

तिस्रो मातृंस्त्रीन् पितृन् (ऋ.१.१६४.१०), "कर्हिस्वित्तदिन्द्र यन्नृभिर्नृन्” (ऋ.१.१६४.१०) अत्र सरेफौ ऋ ॠ इत्येतौ उवर्णसदृशौ उच्चार्येते, स दोषः[2], स च वर्जनीयः । अस्यायं भावः- सर्वे हि दाक्षिणात्या औत्कलाश्च ऋवर्णं रूकारसदृशमुच्चारयन्ति । तथोच्चारणं तेषां दुष्टम् ॥

“दन्त्यान् सकारोपनिभानघोषान् रथ्यः पृथ्वी पृथिवी त्वा पृथीति” (ऋ.प्रा.१४.३९) । एतत्सूत्रस्य व्याख्याभेदेनोदाहरणानि प्रदर्श्यन्ते - तत्र केषाञ्चिन्मते सूत्रे । 'पृथिवी त्वा' इति त्वाग्रहणं त्वाघटितमन्त्रग्रहणार्थं पृथग् वा तदुदाहरणार्थमिति सन्देहः । तद्बीजं तु प्रायेण थकारे सकारसदृशो दोषः संलक्ष्यते, न तकारे इति मन्त्रविशेषग्रहणार्थमिति ॥

अपरे तु यदि थकारस्यैव स दोषः स्यात्, तर्हि कथं “थकारं सकारोपनिभम्” इति लघीयसा न्यासेन सिद्धे दन्त्यग्रहणम् अघोषग्रहणं च कुर्यात् । तेन पृथक् ग्रहणं मन्यन्ते । “अदितिः सिन्धुः पृथिवी उत द्यौः” (ऋ.१.९४.१६), 'त्वा यत् त्वा सूर्यं स्वर्भानुः' (ऋ.५.४०.५) ।

ऊष्मपरम्[3] अन्तःस्थापरं रेफपूर्वं च ह्रस्वं नोच्चारयन्ति । अथवा अविद्यमानं ह्रस्वं रेफात् परमुच्चारयन्ति । तत्र “अर्यमा” “अष्ट्याम्” इत्यनयोरविद्यमानं ह्रस्वमुच्चारयन्ति । यथा “अर्यमा यातयज्जनः” (ऋ.१.१३६.३) "आष्ट्यां पदं कृणुते अग्निधाने (ऋ.१.१५६.३) इत्यत्रासन्तमपि ह्रस्वम् “अरियमा अष्ट्रियाम् इत्येवमुच्चारयन्ति” ।

"याभिर्ध्वसन्ति पुरुषन्तिमावतम्” (ऋ.१.११२.२३), 'महोरायः पुरुवार प्रयन्धि' (४.२.२०) "पुरूवीराभिर्वृषभक्षितीनाम् (ऋ.६.३२.४) 'अतक्षद् ब्रह्म हरियोजनाय' (ऋ.६.३२.४) "वृचीवतो यद्धरि यूपीयायाम् (ऋ.६.२७.५), एषु सन्तमपि ह्रस्वम् “पुर्षन्तिम्” “पुर्वारम्” “पुर्वीरम्” 'हर्योजनाय”, "हर्यूपीयायाम्' इत्येवमुच्चार्य लुम्पन्ति । अत्र सूत्रे पुरूवीरशब्दो नास्ति । कथं नाम भाष्ये स शब्दो गृहीतः? एतद् विचार्यम् ।

---

[1]स्पष्मसन्धीन् स्पर्शरेफसन्धीनभिप्रायाँश्च परिपादयन्ति । (ऋ.प्रा.१४.३६)

[2]स्वरौ कुर्वन्त्योष्ठभिन्नौ सरेफौ तिस्नो मातस्त्रीन् पितृन् नृभिर्नृन् ।(ऋ.प्रा.१४.३८)

[3] ऊष्मान्तःस्थाप्रत्ययं रेफपूर्वं हुस्वं लुम्पत्याहुरथाप्यसन्तम् । पुरुषन्ति पुरुवार्यमाष्ट्यां हरियोजनाय हरियूपीयायाम् । (४०.१४.प्रा.ऋ)

 ISSN: 2320-740X

"हृणीयमानो अप हि मदैयेः" (ऋ.५.२.८), "वैयश्वस्य श्रुतं नरा" (ऋ.८.२६.११) अनयोर्यकारस्य[1] द्वित्वं कुर्वन्त ऐकारस्य स्थाने अकारमुच्चारयन्ति, तौ द्वावपि दोषौ । अर्थात् "मदय्येः", "वय्यश्वस्य" इत्येवमुच्चारयन्ति ।

एतद वैपरीत्येन[2] "ते रय्या संसृजन्तु नः" (ऋ.१०.१९.७) "परि प्रयन्तं वय्यं सुषंसदम्" (ऋ.९.६८.८) "श्रद्धा हृदय्यया कूत्या' (ऋ.१०.१५१.४) एतेषु त्रिषु रैया, वैयम्, 'हृदैयया' इत्येवमकारस्य स्थाने ऐकारं कृत्वा यकारं द्विर्नोच्चारयन्ति ।

अत्रेदं रहस्यम् - मया पूर्वम् ऐकारोच्चारणविषये द्वौ पन्थानौ समुद्दिष्टौ । तस्यैवोच्चारणस्यायं प्रभाव आपतितो यद ऐकारम् अय् रूपेणोच्चारयन्ति । अय् शब्दं च ऐरूपेणच्चारयन्ति । तेन क्वचिद् यकारस्य द्वित्वं कुर्वन्ति, क्वचित्तु सन्तमपि यकारद्वित्वं नोच्चारयन्ति ।

एवमेव "जरितुः काममूनयीः" (ऋ.१.५३.३), "यात्वाग्निर्ध्वनयीद् धूमगन्धिः" (ऋ.१.१६२.५), "दश कोशयीर्दशवाजिनोऽदात्" (ऋ.६.४७.२२) यत्र हि यकारेण सहित इकारो विद्यते, तत्र सयकारमीकारं नोच्चारयन्ति, किन्तु ततः पूर्वस्य अकारस्य स्थाने ऐकारमुच्चारयन्ति । तथा च बह्वक्षरमपि पदं द्व्यक्षरतां नयन्ति । एवमेवैतद्वैपरीत्येन "अभैष्माप तदुच्छतु" (ऋ.८.४७.१८) "अजैष्माद्यास- नाम च" (ऋ.८.४७.१८), "दूरं नैष्ट परावतः" (ऋ.८.३०.३) इत्येतेषु ऐकारस्थाने अकारं कृत्वा सयकारमीकारमसन्तमपि उच्चारयन्ति । अनयोर्द्वयोः स्थलयोः ऐकारोच्चारणशैलीप्रयुक्त एव भेदः ।

तथा हि ऐकारस्य यदा ऐ इति विवृततमत्वेनोच्चारणम्, तदा यीत्यस्य लोपः ।[3] यदा च ऐकारस्य प्राकृतभाषीयोच्चारणाभासः, तदा असतः सयकारस्य ईकारस्य च ततः पूर्वमकारस्य चोच्चारणम् । अनया रीत्या प्रातिशाख्यकाले ऐकारस्य औकारस्य च द्विविधम् उच्चारणमस्माकं परिषदि लब्धास्पदमभवत् । परं हिन्दीभाषायाम् एकारस्य हैं इत्येतादृशं विवृतमुच्चारणमद्यावधि अनुस्यूतं वर्तते । न हि तत्र प्राकृतोच्चारणस्य साम्राज्यमापतितं प्रत्युत संस्कृतभाषायामेव प्राकृतोच्चारणस्य प्रचारः प्राचुर्येण स्थानमलभत । "प्लुतावैच इदुतौ (अष्टा.८.२.१०६) एचोऽप्रगृह्यस्यादूरादूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ" (अष्टा.८.२.१०७) इति सूत्रयन् भगवान् पाणिनिः स्वसमयेऽपि

[1] ऐ पेरित्यैकारमकारमाहुर्वैथश्वेति क्रमयन्तो यकारम् । (ऋ(४१.१४.प्रा.

[2] तदेवान्येषु विपरीतमाहुस्तरप्या वार्य्यं हृदय्येति च । (४२.१४.प्रा.ऋ)

[3] तदेव चान्यत्र विपर्ययेण, कार्ये ऐत्वे सयमीकारमाः । द्यातोर्बिमभेतेर्जयतेर्नियश्च, भैष्म चाजैष्म नैष्टेति चैषु । (ऋ.प्रा.१४.४४)

तथोच्चारणं सूचयति । तत्रापि ऐतिकायनः “औपगवः” इत्यत्र ‘ऐ३तिकायन' 'औ३पगव” इत्येवं प्लुतश्चतुर्मात्रत्त्वसम्पत्तये 'आ ईतिकायन' 'आ ऊ पगव' इत्येवमुच्चारणमनुमन्यते, चतुर्मात्रावत्र ऐचो सम्पद्येते इत्युक्त्वा द्विमात्रस्य अकारस्य द्विमात्रस्य ईकारस्य च सत्तासूचनात् । किञ्च, तत्सूत्रीयभाष्यसमालोचनया समप्रतिमागपक्ष एवं सिद्धान्तो वर्तेते । यदा अर्द्धमात्राऽवर्णस्य अर्द्धमात्रा इवर्णवर्णयोः, तदा “सिद्धं तु इदुतोर्दीर्घवचनात्” इत्यनेन इदुतोर्दीर्घेऽर्द्धतृतीयमात्रः प्राप्नोति । अथ हि अध्यर्द्धमात्राऽवर्णस्य अर्द्धमात्रा इवर्णोवर्णयोः, तदा ‘सिद्धं तु इदुतोर्दीर्घवचनात्' इत्यनेन इदुतोर्दीर्घेऽर्द्धतृतीयमात्रः प्राप्नोति । अथ हि अध्यर्द्धमात्राऽवर्णस्य अर्द्धमात्रा इवणेवर्णयो, तदा इकारोकारयोर्दीर्घेऽर्द्धचतुर्मात्रः प्राप्नोति । सूत्रं च भिद्यते । यथान्यासमेवास्तु ।

ननु चोक्तं तत्रायथेष्टप्रसङ्ग इति, तत्र सौर्यभगवतोक्तम् अनिष्टिज्ञो वाडवः पठति । इष्यत एवं चतुर्मात्रः प्लुत इति भाष्योक्त्या चतुर्मात्रतापक्ष एव भाष्यसम्मतः, स च समप्रविभागपक्ष एव सम्भवति । “तयोर्य्वावचि संहितायाम् (अष्टा.८.२.१०८) इति सूत्रं च प्रातिशाख्येन संवदते ।

एवमेव इकारस्य स्थाने क्वचिद् ऋकारं कुर्वन्ति ।[1] यथा “पतरेव चचरा चन्द्रनिर्णिक्” (ऋ.१०.१०.६.८), 'अतः सहस्रनिर्णिजा (ऋ.८.८.११) इत्यत्र नि-घटकेकारस्य स्थाने ऋकारमुच्चारयन्ति । स हि दुष्टत्वाद् वर्जनीयः । “एवं सुशील्ये बृहती मही” (ऋ.९.५.६) इत्यत्र शिल्यघटकस्य इकारस्य स्थाने लृकारमुच्चारयन्ति, सोऽपि दोषः ।

एतद्वैपरीत्येन[2] ‘शिशीते श्रृङ्गे रक्षसे रक्षसे विनिक्षे” (ऋ.५.२.९), "यमीर्यमस्य बिभृयादजामि” (ऋ.१०.१०.९), 'पाशा आदित्या रिपवे विचृत्ताः” (ऋ.२.२.१६) इत्येतेष्वनन्तरे तालव्ये वर्णे सति ऋकारमुच्चारयन्ति इकारस्य स्थाने । अर्थात् ऋकारात् पूर्वः परो वा यत्र तालव्यो वर्णो भवति, तदा पूर्ववैपरीत्येन इकारस्थाने ऋकारोच्चारणं कुर्वन्ति । पूर्वं हि इकारस्थाने ऋकार उच्चारितः, अत्र तु ऋकारस्यैव स्थाने इकार उच्चार्यत इति तद्वैपरीत्यं सुतरामापतति ।

---

[1]इकारस्य स्थाने ऋकारमाहुर्लृकारं वा चन्द्रर्निर्णिक् सुशिल्ये (ऋ.प्रा.१४.४५)

[2] अनन्तरे तद्विपरीतमाहुस्तालव्ये शृङ्गे बिभृयाद् विचृताः । (४६.१४.प्रा.ऋ)

 ISSN: 2320-740X

एवं[1] शुनः शेषो यमह्वद् गृभीतः" (ऋ.१.२४.१२.). "प्रपाकं शास्सि प्रदिशो विदुष्टरः (ऋ.१.३१.१४) 'विशां ववर्जुषीणाम् (ऋ.१.१३४.६), "आजामिरत्के अव्यत" (ऋ.९.१०९.४). "विरप्शो गोमती मही" (ऋ.१.८.८) अत्र यकारादन्यस्तालुस्थानो वर्णो व्यञ्जनादुत्तरः 'शुनःशेपः' इत्यत्र शकारः, 'ववर्जुषीणाम्' इत्यत्र जकारः "अत्के" इत्यत्र एकारः, "विरप्शी" इत्यत्र शकारः । तत्र सयकारमुच्चारणं दोषः, स च वर्जनीयः ।

"इन्द्र ज्यैष्ठ्याय सुक्रतो" (ऋ.१.५.६), "संवारत्रकिरस्य मधानि" (ऋ.१०.१३२.३), "आपृच्छयं धरूणं वाज्यर्षति" (ऋ.९.१०७.५) "पृरूहूतो यः पुरुगूर्त शभ्वा" (ऋ.६.३४.२) अत्र[2] चतुर्षु व्यञ्जनादुत्तरं यकारं वकारं वा नोच्चारयन्ति स दोषः ।

दीर्घायुः[3], सूर्यः, रूशदीर्त्ते, ऊर्जम् एषु चतुर्षु रेफेण संसक्तम् अन्तर्व्यस्यन्ति, अर्थाद् रेफात् पृथक् कुर्वन्ति केनचित् स्वरेण व्यवदधतीत्यर्थः, स च दोषः ।

स्वस्तये[4] । अधायि । भूवना । इयम् । ऊवुः । एष्वन्तस्थां यकारं वकारं वा नोच्चारयन्ति । अत्र हि संस्थानात् स्वरात् पूर्वां परां वा अन्तस्थां लुम्पन्ति द्विरूच्चारयन्ति वा ।

"उगँ ओकः"[5] (ऋ.७.२५.४) इत्यत्र अनुनासिकमँकारं दीर्घं कुर्वन्तिः, स दोषो वर्जनीयः।

आपृच्छ्यम् [6]। तुच्छ्यान् । दध्याः ऋभ्वा । एषु सोष्मभिः छकारधकारभकारैः सहिताद् यकारादवकाराद्वा पूर्वं ये छकारधकारभकाराः सन्ति, ततः परं शकारं सकारमुपध्मानीयं चोच्चारयन्ति। एवमेव ह्वये, अह्य इत्यादिषु वकाराद् यकाराच्च पूर्वमपरं हकारमुच्चारयन्ति । स दोषो वर्जनीयः ।

---

[1] तालुस्थानोव्यञ्जनादुत्तरश्चेद् अयकारस्तत्र सयकारमाहुः । शुनःशेपः शास्ति ववर्जुषीणामत्के विरप्शीति निदर्शनानि ।
(४७.१४.प्रा.ऋ)

[2] लुम्पन्ति वा सन्मेवं प्वकारं ज्यैष्ठ्याय संवारन्नापृच्छयमृभ्वा (ऋ.प्रा.१४.४८)

[3]व्यस्यन्त्यन्तर्महतोऽव्यायतं तं दीर्घायुः सूर्यो रुशदीर्त ऊर्जम् । (ऋ.प्रा.१४.४६)

[4]लुम्पन्त्यनवस्थां क्रमयन्ति वैतां स्वरात् सस्थनावरां परां वा । ज्ञवस्तयेऽधायि भुवनेयमूवुः (ऋ.प्रा.१४.५०)

[5] रक्तं ह्रस्वं द्राघयन्त्युग्रँ ओकः । .१४.प्रा.ऋ)५१(

[6] हकारसोष्मोपहिताद् यकाराद् वकाराद्वा सर्वसोष्मोष्मपूर्वात् । (५२.१४.प्रा.ऋ)

"तृष्णुत"०[1] (ऋ.१.११०.१), "आप्नानम्" (ऋ.१०.११४.७), "औभ्नात" (ऋ.४.१९.४) इत्यादौ पवर्गेण संसृष्टाद् अनुनासिकात् पूर्वमन्यमधिकं यममुच्चारयन्ति, स दोषो भवति । अत्रेदं तत्त्वम्- ऋक्प्रातिशाख्यकाले "तृष्णुत" इत्यादौ पकारानन्तरं णकाराच्च पूर्वं पूर्ववर्णपकारसदृशमागमत्वेन प्रसिद्धं यममुच्चारयन्ति स्म । परं तदानीमेव तद्यमातिरिक्तमधिकं यममपि उच्चारयन्ति स्म वेदानामध्येतारः स च दोष इति, स वर्जनीयः । अर्थाद् एक एवं यमस्तत्र शास्त्रानुशिष्टः ।

अनुस्वारमुपधां वान्यवर्णाम्,
स्वरोपधात् सोमयमोदयश्चेत् ।
तङ्घ्नन्त्यज्जो जङ्घ्नत ईङ्स्वयन्तीः,
सज्ज्ञातरूपोऽथ सज्ज्ञानमिन्द्रः ॥ (ऋ.प्रा.१४.५४)

अस्यार्थः - यत्र ह्यनुनासिको वर्णः सोष्मपरको यमपरको वा भवति, तत्र स्वरोपधाद् रक्तात् पूर्वमनुस्वारमाहुः, उपधां वा अन्यवर्णाम् । अत्रायमर्थः- यथा 'तङ्घ्नन्ति' इत्यत्र 'तं घ्नन्ति' इत्यवस्थायाम् अनुस्वारस्य परसवर्णो 'तङ्घ्नन्ति' इत्यवस्थायामनुस्वारस्य परसवर्णो 'तघ्नन्ति' इति स्थितौ अकारोपधो रक्तो ङकारोऽस्ति । स च ङकारः सोष्मघकारपरकोऽस्ति । ततो ङकारात् पूर्वमनुस्वारं केचन उच्चारयन्ति तङ्नन्ति इत्येवम् । यद्वा अस्मिन्नेव स्थलेऽनुस्वारस्थानेऽपरं ङकारमुच्चारयन्ति । एतच्च उपधां वान्यवर्णामित्यनेन प्रतिपाद्यते ।

अस्यैव सूत्रस्य अपरा व्याख्या-अस्मिन् सूत्रे "तत् सस्थानं पूर्वम्" (ऋ.प्रा.१४.५२) इत्यस्मात् सूत्रात् पूर्वमिति नानुवर्तते । तथा चास्मिन् पक्षे स्वरोपधं रक्तमनुस्वारं कुर्वन्तीत्यर्थः । एतत् सर्वं दोषत्वेन परिगण्यते ।

भिन्नासु-भिन्नासु व्याख्यासु इमान्येवोदाहरणानि सन्ति, तानि यथा-'नकिष्टङ्घ्नन्त्यन्तितो न दूरात्' (ऋ.२.२७.१३) 'गोभिरञ्जमो मदाय कम्' (ऋ.९.४५.३), "पवमानस्य जङ्घ्नतः" (ऋ.९.६६.२५) 'ईङ्खयन्ती रपस्युवः' (ऋ.१०.१५३.१), 'सञ्ज्ञातरूपश्चिकेतदस्मै' (ऋ.१.६९.५), 'सञ्ज्ञानमिन्द्रश्चाग्निश्च' (ऋ.खि.१०.१९१.१), 'शर्मन् स्याम मरुतामुपतस्थे[2] (ऋ.खि.७.३४.२५) 'अस्मिन् स्वेतच्छकपूत एनः (ऋ.१०.१३२.५) 'सं यावप्नस्थो अपसेव जानछ्रधीयतः' (ऋ.६.६७.३) इति एषु स्थलेषु सान्तस्थस्य संयोगस्यादावनुनासिकं वर्णविलम्बेनोच्चारयन्तः परस्य

[1] पकारवर्गोपहिताच्च रक्तादन्यं यमं तृष्णुताप्नानमौनात् । (ऋ (५३.१४.प्रा.

[2] सान्तस्थादौ धारयन्तः परक्रमं शर्मन् स्यामास्मिन्सुजनाछ्रधीयतः ।(५५.१४.प्रा.ऋ)

 ISSN: 2320-740X

क्रमं द्वित्वं कुर्वन्ति ।

अनुनासिकैर्वर्णैः समवाये स्वराणां रागो नामानुनासिकत्वं क्रियते ।[1] स दोषो वर्जनीयः । यथा - 'न नूनमस्ति नो श्वः' (१.१७०.१), 'नृम्णं तद्धत्तमश्विना' (ऋ.८.९.२), 'नृमणा वीरपस्त्यः' (ऋ.५.५०.४) 'कर्हिंस्वित्तदिन्द्र यन्नृभिर्नॄन् (ऋ.६.३५.२) 'नूनम्, 'नृम्णम्' 'नृमणा' 'नॄन्' एषूदाहरणेषु स्वराननुनासिकानुच्चारयन्ति । इयं हि रीतिरन्यत्राप्यात्मसात्क्रियते ।

"दध्यङ् ह मे जनुषम्[2] (ऋ.१.१३९.९), 'देवान् हवत ऊतये' (ऋ.१.१०५.१७) 'दक्षसो महान् हि षः' (ऋ.८.१३.१) एष्वनुनासिकात् परो हकारः सोष्मा क्रियते । अर्थात् यद्वर्गीयो रक्तो वर्णस्तद्वर्गीयसोष्मवदुच्चार्यते, स दोषः ।

“संयोगानां स्वरभक्त्या व्यवाय विक्रमणं क्रमणं वा यथोक्तम्”[3] अस्मिन् ह्यष्टपञ्चाशत्तमे सूत्रे चत्वार उच्चारणदोषाः प्रतिपादिताः सन्ति । तत्र प्रथम दोषः क्वचित् संयोगानामविद्यमानया स्वरभक्त्या व्यवायः । क्वचिच्च विक्रमणम् । विक्रमणं द्विर्वचनाभावः । अर्थात् संयोगस्य मध्ये क्वचित् स्वरोत्पादनम् । अयं हि द्वितीयो दोषः । क्वचिच्चायथोक्तं क्रमणं द्वित्वमित्यर्थः । अयं हि तृतीयो दोषः । क्वचिद्विपर्ययः, विपर्ययो नाम विद्यमानायाः स्वरभक्तेरनुच्चाणम् । अयं हि चतुर्थो दोषः । इमे चत्वारो दोषाः संयोगस्य भवन्ति, ते च वर्जनीयाः ।

अत्र सूत्रे भाष्ये चतुर्णां दोषाणां नहि विशकलितयोपपादनं कृतम् । पूर्वत्र त्वविद्यमानया स्वरभक्त्या व्यवायः । अन्यस्य स्वरस्योच्चारणेन द्वित्वामावः । अनीप्सितं द्वित्वम् । क्वचिच्च विद्यमानायाः स्वरभक्तेरनुच्चारणम् ।

व्यत[4] तिल्विले, आज्मन् द्रप्सः, एषु चतुर्षूदाहरणेषु विक्रमणमेव दोषः प्रदर्शितोऽस्ति । तथा च व्यत तिल्विले, अज्मन्, इत्येतेषु स्वरभक्त्या व्यवाय इव भवति, अतो दिर्वचनाभावः ।

“द्रप्सः” इत्यत्रापि विक्रमणमेव, परमत्र स्वरेण व्यवायसत्वाद् द्वित्वाभावः । तथा च विक्रमणत्वेन ग्रहणे

---

[1] रक्तै रागः समवाये स्वराणां न नूनं नृम्ण नृमणा नृभिर्नॄन् । (ऋ.प्रा.१४.५६)

[2] रक्तात्तु सोष्मा क्रियते हकारो दध्यङ् न देवान् हवते महान् हि ऋ).प्रा(५७.१४.

[3] (५८.१४.प्रा.ऋ)

[4] विपर्ययो वा व्यत तिल्विलेज्मन् द्रप्सोऽजुघ्रन्सार्ङ्ग्योऽष्ट्रात् । (५८.१४.प्रा.ऋ)

त्रय एव दोषा भवेयुः । स्वरभक्त्या अन्येन वा स्वरेण व्यवाये इत्येवं विभागे चत्वारो दोषा भवेयुः । 'अजुष्रन्' इत्यत्र षकारात् परं टकारमिव किञ्चिदुत्पाद्य अयथोक्तं द्वित्वं कुर्वन्तीत्यर्थः । 'साञ्जर्य' इत्यत्र विद्यमानायाः स्वरभक्तेरनुच्चारणम् । 'अष्ट्राम्' 'नेष्ट्रात्' इत्येतेषु च क्रमणमेव ।

शूरो यो युत्सु तन्वं परिव्यत' (ऋ.२.१७.२), 'भद्रे क्षेत्रे निमिता तिल्विले वा' (ऋ.५.६२.७) 'विश्वो वो अज्मन् मयते वनस्पतिः । द्रप्सश्चस्कन्द पथमाँ अनुद्यून्' (ऋ१०.१७.१९) "स्वसारः श्यावी मरूषोमजुष्रन् (ऋ.१.७१.१), 'भरद्वाजान् सार्ञ्जयो अभ्ययष्ट' (ऋ.६.४७.२५) 'अष्ट्रां पूषा शिथिरामुद्वरीवृजत्' (ऋ.६.५८.२) 'प्रदेवं देव्या धिया' (१०.१७६.२) 'नेष्ट्रात् सोमं द्रविणोदः पिब ऋतुभिः' (ऋ.२.३७.३) इमान्युदाहरणानि प्रातिशाख्यभाष्ये संदर्शितानि ॥

"विवृत्तिषु प्रत्यवादेरदर्शनं यथा वा ऐच्छश्च य औशिजश्च" (ऋ. प्रा.१४.५६) । सेयं विवृत्तिः "स्वरान्तरं तु विवृत्तिः" (प.२-सू३) इत्यादिभिः सूत्रैर्लक्षिताः । सा वा स्वरभक्तिकाला' (प.२.सू४) इत्यनेन सूत्रेण तु स्वरभक्तिसमानकालत्वं विवृत्तेः प्रतिपादितमस्ति । तत्सूत्रे भाष्ये पूर्वसूत्रसारांशो वक्ष्यमाणः प्रतिपादितोऽस्ति । तत्रायं विवृत्तेर्विभागस्त्रिप्रकारः १–उभयतो ह्रस्वा पादमात्राकाला, २–एकतो दीर्घार्द्धमात्राकाला, ३–उभयतो दीर्घा पादोनमात्राकाला ।

इ उ[1] इत्येतयोः सन्धौ कासुचित् विवृत्तिषु सन्ध्यक्षरस्योच्चारणं परस्यादर्शनं च क्रियते, तौ दोषौ वर्जयेत् । यथा—"स इ दस्तेव प्रतिधादसिष्यन्" (ऋ.६.३.५), 'स इन्द्रचित्रां अभितृन्धि वाजान्' (ऋ.६.१७.२). "कस्त उषः कधध्रिये" (ऋ.१.३०.२०), 'त उत्स्नाय रयिमभि प्रतस्तुः" (ऋ.२.१५.५) ।

समानवर्णासु[2] विवृत्तिषु कासुचिद्विपर्ययः क्रियते, परस्यादेर्वा अदर्शनम् । विषर्ययो नाम पूर्वो वर्णः परः क्रियते परश्च पूर्व इति । यथा "आ न स्तुत उपवाजोरूती इन्द्रम्" (ऋ०.४.२६.१) *क आसतो वचसः सन्ति (१५.१२.४) "त आ गमन्तुं त इह" (ऋ.६.४६.१) "अच्छा यो गन्ता नाधमानमूती इत्था" (ऋ.४.२६.४), ऊती इन्द्र' इत्यत्र पूर्वं दीर्घोच्चारणमकृत्वा ह्रस्वोच्चारणं क्रियते । अथवा परस्य इन्द्रघटकस्य इकारस्य लोपः । एवमेव सर्वत्र योजनाः ।

---

[1] इ उ सन्धौ सन्ध्यवचनं च कासुचित् स इदस्ता कस्त उषो यथैते ।(६०.१४.प्रा.ऋ)

[2] समानवर्णासु विपर्ययो वा ययथा ह्यूती इन्द्रक आसतश्च । (ऋ(६१.१४.प्रा.

 ISSN: 2320-740X

'अभिव्यादानं च विवृत्तिपूर्वे कण्ट्ये ता आपोऽवसा एति दीर्घे' (१४.सूत्र ६२) । अस्मिन् सूत्रे विवृत्तिः पूर्वा अस्मात् स विवृत्तिपूर्वस्तस्मिन् विवृत्तिपूर्वे कण्ट्ये दीर्घ परे अभिव्यादानं नाम दोषः क्रियते । स वर्जनीयः इत्येवं सप्तमीनिर्देशेन 'क आसत' इति पूर्वसूत्रोदाहरणे "समानवर्णासु विपर्ययो वा" (ऋ.प्रा.१४.६१) इत्यनेन विपर्यय उक्तः, स च विरुध्येत । तस्मान्न सप्तमीनिर्देशः, किन्तु विवृत्तिः पूर्वाऽस्मादक्षरात् तद्विवृत्तिपूर्वमक्षरम् । विवृत्ते पूर्वमपि विवृत्तिपूर्वम् । द्वयोरेकशेषे द्विवचनान्तोऽयं प्रथमाविभक्त्यन्तः शब्दः । तथा च ते उभे कण्ठ्ये दीर्घे यदा भवतस्तदा कासुचिद् विवृत्तिषु अभिव्यादानं क्रियते, कासुचित् प्रत्ययादेरदर्शनं वा क्रियते, तौ दोषौ वर्जयेत् । अभिव्यादानं नाम विवृत्तेः कालात् पादमात्रमधिकं कालमपेक्षते यत्र तदभिव्यादानम् ।

यथा—ता आपो देवरिहयापयन्तु (ऋ.७.४६.१) स्वस्त्या गृहेभ्य आवसा आ विमोचनात (ऋ.३.५३.२०), 'या आपो दिव्याः' (ऋ.७.४६.२६) "ता आचरन्ति" (ऋ.४.५१.८) अत्र पादोनमात्राकाला विवत्तिः शास्त्रसम्मता । सैव यदि एकमात्रात्मकेन कालेनोच्चार्यते, तदा अभिव्यादानं नाम दोषो भवति ।

एते दोषा दिङ्मात्रेण दर्शिताः । एते च दोषाः स्वरेषुच्चार्यमाणेषु प्रदर्शिताः[1] । व्यञ्जनसंयोगजानां दोषाणां स्वरूपं तु न प्रदर्शितम्, यतो ह्युच्चावचाः प्रयोक्तारो नानास्थानकरणानुप्रदानस्वरोच्चारणाः, तथा नानाप्रकृतिस्वभावशीलसमाचाराः केषु केषु वर्णेषु कान् दोषान् जनयन्तीति ज्ञातुं न शक्यते ।

अस्माच्छास्त्राद[2] वर्णानां सम्यक् स्वरूपं ज्ञातुं शक्यते । यो हि मनोवाग्बुद्धियुक्तस्तत्त्वार्थदर्शी शिक्षालक्षणविदूहापोहवितर्कज्ञः शास्त्रागमकुशलो ध्यानपरोऽवितथाऽध्यवसायी, स हि सम्यगवर्णस्वरूपं बोद्धुम्, तथा यथावद् वर्णान् उच्चारयितुं च शक्नोति ।

अकारस्य[3] करणावस्थयाऽन्यान् ऋ ॠ इ ई उ ऊ इत्येदमाद्यानन्यानपि स्वरान् ब्रूयात्, तद्धि सम्पन्नं भवति। परान् ककारादीनपि वर्णान् व्यजनसञ्ज्ञकान् ऊकारपरकानिव विवक्षेत सर्वत्र वर्णानित्याहुराचार्याः– क का कि की

---

[1] न दोषाणां स्वरसंयोगजानामन्तो गम्यः संख्ययाप्येतराणाम् । (६१.१४.प्रा.ऋ)

[2] शक्यस्तु शास्त्रादधि साधु धर्मो युक्तेन कृत्स्नः प्रतिपत्तुमस्मात् १४.प).सू(६४.

[3] 'अकारस्य करणावस्थयाऽन्यान् स्वरान् ब्रूयात्' (प.१४.सू.६५) 'तद्धि सम्पन्नमाहुः' (प.१४.सू.६६) 'पकारानकारोदयवद् विवक्षेत् सर्वत्र वर्णानिति सम्पदेषा (प.१४.सू६७) 'शास्त्रापवादात् प्रतिपत्तिभेदान्निन्दन्त्यकृत्स्नेति च वर्णशिक्षाम् (प.१४.सू.६८)
एवं व्यञ्जनदोषा निरूपिताः सन्ति ।

कु कू इति यथा । सा सम्पदत्र व्याख्याता । अस्मिन् प्रातिशाख्ये शास्त्राणामपवादोऽस्ति । अर्थाद् वर्णोच्चारणप्रक्रियामुपपाद्य न हि कोऽपि वर्णो यथावदुच्चारयितुं शक्यते, इति हि प्रतिपादितम् । अन्यत्र शास्त्रेषु बहवो दोषाः पुनरुक्ता अविस्पष्टार्थता कष्टशब्दता अशक्यार्थतेत्येवमादयः सन्ति । अत्र त्वशक्यार्थता दोष जागर्ति। तस्मात् शास्त्रापवादाद् अप्रयोजना वर्णशिक्षेति "प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते" इति न्यायेनास्मिन् शास्त्रे न हि कोऽपि प्रामाणिकः प्रवर्तते ।

किञ्च, प्रतिपत्तिभेदादपि निष्प्रयोजनेयं वर्णशिक्षेत्यप्यव- धार्यताम् । प्रतिपत्तिभेदो नाम विरूद्धाभिधानम् । तथा हि 'आहुर्घोषं घोषवतामकारम्' (ऋ.प्रा.१३.१५) इत्युक्त्वा 'अत्रोत्पन्नावपरे ऊष्मघोषौ' (ऋ.प्रा.१३.१८) अनयोः सूत्रयोराद्यं सूत्रमनित्यतापक्षे संघटते । तच्च नास्माकमभीष्टम् । अतः 'अत्रोन्पन्नावसरे ऊष्मघोषौ' (ऋ.प्रा.१३.१८) इत्यनेन वर्णानित्यत्वाभिमानिनां मतेन ऊष्मघोषौ वायू उत्पद्यते इत्यपरेषां मतम् । तथा चैवं विरूद्धार्थाभिधानान्निष्प्रयोजनीयमिति चेत्, न, अन्येष्वपि शास्त्रेषु ग्रस्तनिरस्तादयो दोषा निर्दिश्यन्ते । सत्तु तेषु दोषेषु तानि शास्त्राण्यकृत्स्नानीति नोच्यन्ते; किन्तु तानि कृत्स्नान्येव भवन्ति । तद्वदिदमपि शास्त्रं कृत्स्नं भवेदित्याद्युक्तिशतानां जागरूकत्वात्, अन्येष्वपि शास्त्रेषु बहुविधानां विकल्पानां सद्भावात् तेषां चानिन्द्यत्वात् । तथा चेदमपि शास्त्रं सप्रयोजनम्, अनिन्द्यमिति च । एतच्छास्त्रं पठित्वा सर्वानपि विदुषोऽतिशेते ।

प्रातिशाख्येषु करणं द्विविधं प्रदर्शितम् एकं तु स्पृष्टतादिरूपम्, अपरं तु वर्णस्थानानि येन स्पृश्यन्ते तदिति। परमत्र ऋग्वेदे स्पृष्टतादिकमेव करणमुपनिबद्धम् । तथा च ऋग्वेदप्रातिशाख्ये -१.कण्ठः, २.उरः, ३. जिह्वामूलम्, ४.तालु, ५.मूर्धा, ६.दन्तमूलम्, ७.वर्स्वम्, ८.ओष्ठः, ९.नासिकेति नव स्थानानि । अत्र करणं तु "तद्विशेषः करणम्" (प.१३.सू.८) इति सूत्रेण लक्षितं प्रदानापरनामधेयं वेदितव्यम् । तानि च १.स्पृष्टम्, २. अपृष्टम्, ३. दुःस्पृष्टमितीमानि त्रीणि करणानि भवन्ति ।

**********

 ISSN: 2320-740X

# स्मार्तप्रयोगेषु मीमांसासिद्धान्तसमन्वयः

**आचार्यः सुब्राय वि. भट्टः**

मीमांसाविभागाध्यक्षः

धर्माधर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । सूत्रकारः भगवान्जैमिनिः **अथातो धर्माजिज्ञासा** इत्यादिना द्वादशसु अध्यायेषु धर्मं विचारयामास । क्वचित् अधर्मोऽपि विचारितः । धर्मस्य परिग्रहार्थमधर्मस्य च परित्यागार्थमुभयोः जिज्ञासा सङ्गच्छते ।

द्वितीये सूत्रे **चोदनालक्षणोऽर्थो धर्मः** इत्यनेन सूत्रेण **वेदबोधितश्रेयस्साधनताको धर्मः** इति धर्मलक्षणं प्रतिपादयामास । स च धर्मः यागादिरेव इति लक्ष्यनिर्देशोऽपि कृतः ।

**अग्निहोत्रं जुहुयात् स्वर्गकामः । चित्रया यजेत पशुकामः ।** इत्यादिभिः विधिवाक्यैः यागहोमादीनां स्वर्गादिफलसाधनत्वं सूचितम् । एतेषां यागादीनां वेदबोधितत्वात् स्वर्गादिफलसाधनत्वाच्च धर्मत्वं सिद्धम् । तदुक्तं भट्टपादैः वार्तिके –

**श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते ।**

**ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥**[1] इति ।

यागादेर्धर्मत्वेऽपि तेषामनुष्ठानद्वारेणैव स्वर्गादिफलं न केवलं ज्ञानमात्रेण । तदनुष्ठानबोधनार्थं प्रवृत्तः प्रयोगविधिः ।

अनुष्ठानप्रयोगनिरूपणार्थं प्रवृत्तानि कल्पसूत्राणि । कल्प्यते निरूप्यते प्रयोगस्वरूपमत्र इति कल्पाः । कल्पाश्च तानि सूत्राणि च कल्पसूत्राणि इति । तदुक्तं भट्टपादैः –

**सिद्धरूपप्रयोगो यैः कर्मणामनुगम्यते ।**

**ते कल्पाः लक्षणार्थानि सूत्राणीति प्रचक्षते ॥**[2] इति ।

श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्रणि इति मिलित्वा कल्पसूत्रशब्दप्रवृत्तिः ।

---

[1] शो.वा.चो.सू.14

[2] तं. वा. क. सू. अ

श्रौतकर्मानुष्ठानबोधकानि सूत्राणि श्रौतसूत्राणि । श्रौतकर्मानुष्ठानबोधकः श्रौतप्रयोगः । एवमेव गृह्यकर्मबोधकानि सूत्राणि गृह्यसूत्राणि । गृह्यकर्मानुष्ठानबोधकः प्रयोगः गृह्यप्रयोगः । गृह्यकर्मपदेन - गृह्याग्निसाध्यानि/गृह्याग्नौ क्रियमाणानि कर्माणि गृह्यन्ते ।

**गृह्याग्निः –** औपासनाग्निः स्मार्ताग्निः इति च कथ्यते । एकाग्निसाध्यकर्माणि इति यावत् । श्रौतकर्मणां त्रेताग्निसाध्यत्वात् ।

श्रौतेषु स्मार्तेषु वा कर्मानुष्ठानबोधकप्रयोगाः मीमांसासिद्धान्तानुसारेणैव निर्णीयन्ते । यागादिधर्मबोधनार्थमेव प्रवृत्तत्वात् मीमांसाशास्त्रस्य । प्रयोगं कल्पसूत्राणि सूचयन्ति चेदपि प्रयोगमार्गः मीमांसासिद्धान्तप्रदर्शित एव नान्यः ।

तादृशानि विशेषस्थानानि बहूनि लभ्यन्ते चेदपि क्वचिदत्र स्मार्तप्रयोगेषु प्रदर्श्यन्ते । तथाहि – **"क्षुते आचामेत्" इति स्मृत्या क्षुतादिनिमित्ते शुद्ध्यर्थमाचमनं विहितम् । वेदं कृत्वा वेदिं करोति इति श्रुतिः वेदकरणानन्तरं वेदिकरणमिति क्त्वाप्रत्ययेन क्रमं बोधयति । कदाचित् वेदवेदिकरणयोर्मध्ये क्षुत्प्राप्ते श्रुत्युक्तः क्रम एव अनुसर्तव्य उत स्मृत्युक्तमाचमनमिति सन्देहे – यद्यपि स्मृत्यपेक्षया श्रुतिः प्रबला । तथापि श्रुत्या पदार्थधर्मभूतः क्रमः बोध्यते स्मृत्या आचमनरूपः पदार्थः बोध्यते । प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य प्राबल्यात् प्रमेयगतं प्राबल्यमङ्गीकर्तव्यम् । "धर्मधर्मिणोर्मध्ये धर्मिणो बलवत्तरा" इति न्यायेन प्रकृते पदार्थबोधकत्वेन आचमनस्मृतिरेव प्रबलेति श्रुत्युक्तोऽपि क्रमः बाध्यते । अतः वेदकरणानन्तरं क्षुत्प्राप्तौ आचमनं कृत्वा वेदिकरणमिति निर्णयः स्वीकृतः ।** [1] एवं स्मार्तकर्मानुष्ठानमध्ये क्षुतादिप्राप्तौ तत्प्रायश्चित्तरूपेण शुद्ध्यर्थमाचमनस्थाने दक्षिणश्रवणस्पर्शनं विहितं स्मृतौ । यथा – **क्षुते निष्ठीवने चैव परिधानेऽश्रुपातने । न तु कर्मस्थ आचामेत् दक्षिणं श्रवणं स्पृशेत्** इत्यादिना ।

द्वादशलक्षण्यां द्वितीयाध्याये प्रथमपादे मन्त्रलक्षणप्रसङ्गात् - ऋगादीनां लक्षणं सूत्रकारैः सूत्रितम्।

**तेषामृग्यत्रार्थवशेन पादव्यवस्था ।** इति

पादव्यवस्थाविशिष्टाः मन्त्राः ऋचः इति । **गीतिषु सामाख्या** इति । गीतिविशिष्टमन्त्राः सामानि । **शेषे**

[1] द्वा-ल-1-3-4

 ISSN: 2320-740X

**यजुः शब्दः** इति - ऋक्सामभिन्नाः मन्त्राः - यजुर्मन्त्राः इति । वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिताः मन्त्राः यजूंषि इति सिद्धम् । प्रश्लिष्टपाठे एकं यजुः इति निर्णायकं गमकं किमिति प्रश्ने, आह भगवान् जैमिनिः –

**अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्** इति यद्विभागे साकांक्षम्, अविभागे च एकार्थम् - तदेकं वाक्यं तावता एकं यजुः इति निर्णीतम् । यथा - **देवस्य त्वा सवितुः प्रसवे, अश्विनोर्बाहुभ्याम्, पूष्णो हस्ताभ्याम्, अग्नये जुष्टं निर्वपामि** इति मन्त्रः । अत्र **अग्नये जुष्टं निर्वपामि** इति समूहे पृथक्कृते पूर्वो भागः देवस्य त्वा इति समूहः साकांक्षो भवति । एकीकृते तु समग्रस्यैव निर्वापोऽर्थः ।

**चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभि** इत्यत्र कथं व्यवस्था इति चेत् - अत्र अनुषङ्गः कर्तव्यः । तदुक्तम्- **अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्** इत्यनेन सूत्रेण । अत्र यद्यपि प्रथमयोः मन्त्रयोः आकाङ्क्षा नास्ति । तथापि शेषस्याऽऽकांक्षाऽस्ति । पवित्रेण रश्मिभिः इत्युक्तं करणत्वं क्रियामपेक्षते । क्रिया च पुनातु इति त्रिष्वपि मन्त्रेषु एका । तया क्रियया संबद्धः शेषः क्रियाद्वारा तृतीयमन्त्रे निरपेक्षेऽपि यथाऽन्वेति तथा पूर्वयोरप्यन्वेतुमर्हति इति अनुषङ्गेण वाक्ययोजना कर्तव्या इत्युक्तम् अनुषङ्गाधिकरणे ।

एवम् - अनारभ्य श्रूयते - **येन कर्मणा ईर्त्सेत् तत्र जयां जुहुयात् । राष्ट्रभृतो जुहोति । अभ्यातानान् जुहोति** इति । ईर्त्सेत्-ऋद्धिमिच्छेत् इत्यर्थः । चित्तं च स्वाहा इत्यादयो जयाः । ऋताषाड्-इत्यादयः राष्ट्रभृतः । अग्निर्भूतानाम् इत्यादयोऽभ्यातानाः ।

ऋद्धिमिच्छता क्रियमाणा एते होमाः वैदिकलौकिककर्मसाधारणा भवितुमर्हन्ति वा इति सन्देहे- **यदाहवनीये जुहोति तेन सोऽस्याभीष्टः प्रीतः** इति वाक्येन होमोद्धेशेन आहवनीयविधानात् वैदिकेष्वेव जयादिहोमः इति निर्णीतं तृतीयचतुर्थे ।

एवम्-**शेषात् स्विष्टकृते समवद्यति**-इति दर्शपूर्णमासप्रकरणे स्विष्टकृदवदानं विहितम् । तत्र आग्नेयादीनां त्रयाणां हविषां मध्ये यस्य कस्यचित् एकस्य हविषः शेषात् अवदाने कृते शास्त्रार्थानुष्ठानं सिद्ध्यति-इति चेत् उपयुक्तस्य हविषः संस्कारः स्विष्टकृद्धोमः । संस्कारश्च सर्वेष्वपि हविष्षु समानः । तस्मात् सर्वेभ्यः प्राकरणिकेभ्यः हविःशेषेभ्यः स्विष्टकृदनुष्ठेयः इति सिद्धान्तितं -तृतीयचतुर्थे-एकोनविंशेऽधिकरणे । तथा - एकस्यैव कर्मणः

नित्यत्वं काम्यत्वञ्च भवितुमर्हति वा इति चिन्तायां- वचनबलात् संभवति । यथा - एकस्यैव अग्निहोत्रहोमस्य – यावज्जीवमग्निहोत्रं जुहोति इति वचनेन- नित्यत्वम् । यथा-एकस्यैव अग्निहोत्रहोमस्य-यावज्जीवमग्निहोत्रं जुहोति इति वचनेन-नित्यत्वम् ।

अग्निहोत्रं जुहुयात् स्वर्गकामः इति वचनेन काम्यत्वञ्च । तादृशस्य संयोगपृथक्त्वम् इति व्यवहारः । तदुक्तं सूत्रे - **एकस्य तूभयत्वे संयोगपृथक्त्वम्** इति । अनुष्ठाने भेदो नास्ति । सङ्कल्पे परं भेदः । इति निर्णीतं – चतुर्थतृतीये ।

तथा – पुत्रजनने निमित्ते पुत्रगतफलोद्देशेन विहिते जातेष्टौ पितुः कर्तृत्वं कथं संभवति इति जिज्ञासायाम् अधिकारलक्षणमेवमुक्तं – प्रवृत्तिप्रयोजकफलेच्छा फलभोक्तृत्वान्यतरसमानाधिकरणत्वे सति कर्तृत्वम् इति । **जातेष्टौ पितुः फलभोक्तृत्वाभावेऽपि मम पुत्रस्य इदं फलं भवतु** इति इच्छायाः सद्भावात् पितुः अधिकारः सिद्ध्यति इत्युक्तं षष्ठप्रथमे ।

स्त्रीणां वैदिककर्मणि अधिकारः अस्ति न वा इति सन्देहे - स्त्रीणाम् अनुष्ठानापेक्षितवेदाध्ययनाभावेन स्वातन्त्र्येण अधिकारः नास्ति चेदपि - पत्युः सहाधिकारः सिद्धान्तितः । यजेत इत्यत्र कर्तृगतमेकत्वं विवक्षितम् । तत्र कर्तृत्वं - व्यासज्यवृत्तिकर्तृत्वम् । पतिनिष्ठं पत्नीनिष्ठञ्च कर्तृत्वमेकमेव । दम्पत्योः सहाधिकारः सिद्धान्तितः षष्ठप्रथमे चतुर्थे ।

एकस्मिन्वैदिककर्मणि बहूनां कर्तृत्वं संभवति वेति षष्ठद्वितीये विचारः कृतः । तथा हि – दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इत्यत्र स्वर्गकामः उद्धेश्यः । तद्गतमेकत्वं ग्रहैकत्ववत् अविवक्षितम् । तस्मात् एको द्वौ बहवो वा दर्शपूर्णमासयोरधिकारिण इति प्राप्ते स्वर्गकामगतस्य एकत्वविवक्षा न भवति चेदपि ‘यजेत’ इत्याख्यातगतस्य एकत्वस्य विधेयविशेषणत्वात् विवक्षा अस्ति । अत्र विधेया क्रिया । सा च क्रिया स्वसिद्धये कर्तारमाक्षिपति इति क्रियाद्वारा कर्तापि विधेय इति विधेयकर्तृगता एकत्वसंख्या विवक्षितेति वैदिककर्मसु कर्तुरेकत्वं नियम्यते । तच्च कर्तृत्वं व्यासज्यवृत्तीति दम्पतिनिष्ठं कर्तृत्वमेकमेव । अत एव दम्पत्योः सहाधिकारश्च ।

तथा-आरब्धकाम्यकर्मसु **कारीर्या वृष्टिकामो यजेत** इत्यादिवाक्यविहितकारीरीष्ट्यादौ कामनावशान् प्रवृत्तस्य पुरुषस्य समाप्तेः पूर्वमेव केनापि निमित्तेन तत्फलप्राप्तौ अग्रे कर्मानुष्ठाने प्रयोजनाभावात् समापनं न कर्तव्यमिति प्राप्ते प्रक्रान्तस्य कर्मणः असमाप्तौ निन्दाप्रायश्चित्ते श्रुते । **देवताभ्यो वा एष आवृश्च्यते यो यक्ष्ये**

 ISSN: 2320-740X

इत्युक्त्वा **न यजते त्रेधातवीयेन यजेत** इति तदुभयं श्रुतम् । तस्मात् आरब्धं कर्म समापनीयम् इति निर्णीतं षष्ठद्वितीये । एवम् - **यावज्जीवमग्निहोत्रं जुहोति** इत्यादौ, जीवने निमित्ते अग्निहोत्रादयः विहिताः । निमित्ते सति नैमित्तिकस्य अनुष्ठानमिति सातत्येन अनुष्ठानं कर्तव्यमिति जिज्ञासायां प्रातर्जुहोति, सायं जुहोति इत्यादिना कालविधानात् उक्तस्वकालविशिष्टे जीवने कर्म अनुष्ठेयमिति निर्णीतं षष्ठद्वितीये ।

तथा - दर्शपूर्णमासादिषु पात्रभेदनमाज्यादिस्कन्दनञ्च निमित्तीकृत्य 'भिन्ने जुहोति' इत्यादिना प्रायश्चित्तहोमः विहितः । इमे होमाः सकृत्कार्याः । तावतैव क्रतूपकारः सिद्ध्यति इति चेत्-भेदनस्य स्कन्दनस्य वा निमित्तस्य आवृत्तौ नैमित्तिकस्य होमस्यापि आवृत्तिः इति निमित्तावृत्तौ सकृद् होमानुष्ठानं न पर्याप्तमिति निर्णीतं षष्ठद्वितीये ।

एवम् – यावज्जीवमग्निहोत्रं जुहोतीत्यादिवाक्यविहितेषु अग्निहोत्रादिनित्यकर्मसु भावनांशस्य कथंभावस्य समुच्चितैः सर्वैः अङ्गैः परिपूरणेन सर्वाङ्गोपेतस्य प्रधानस्य फलवत्त्वमिति प्राप्ते-अग्निहोत्रादिप्रधानस्य स्ववाक्यगतजीवननिमित्तेन अन्वयात् जीवने सति प्रधानं कर्म त्यक्तुं न शक्यम् । वाक्यान्तरश्रवगतेषु अङ्गेषु अशक्यं किञ्चिदङ्गं परित्यज्यापि शक्यैरङ्गैरुपेतं प्रधानं कर्मानुष्ठेयम् इति निर्णीतं षष्ठतृतीये ।

ज्योतिष्टोमे-अग्नीषोमीयपशुयागे-अदितिः पाशं प्रमुमोक्त्वेतम् । अदितिः पाशान् प्रमुमोक्त्वेतान् इत्येवम् एकवचनान्तो एको मन्त्रः, बहुवचनान्तो अपरो मन्त्रश्च पाशविमोचने पठितौ । प्रकरणे एक एव पशुः । अतः पाशोऽपि एक एव । बहुवचनान्तस्य पाशमोचकमन्त्रस्य बहुपाशुके यागे उत्कर्षः कर्तव्यो वा इति सन्दिह्य प्रधाने लक्षणाकल्पना स्यात् । सा न युक्ता । अतः विकल्पेन मन्त्रयोः विनियोगः । तत्र बहुवचनस्य एकत्वे लक्षणा । अवयवगतं बहुत्वम् अवयविनि भासते इति समन्वयः प्रदर्शितः । स्मार्तप्रयोगे क्वचित् पवित्रे गृहीत्वा इति पठ्यते । किन्तु एकमेव पवित्रं स्वीक्रियते । तत्र अवयवगतं द्वित्वम् अवयविनि भासते इति समन्वयः प्रदर्शितः ।

एवम्- **अग्नये स्वाहा** इत्यादिमन्त्रकहोमेषु अग्न्यादिपदैरेव त्यागः वक्तव्यः उत तत्पर्यायाणां स्वरूपभेदेऽपि अर्थभेदाभावात् येन केनापि पर्यायेण त्यागः वक्तव्य इति जिज्ञासायां – यत्र अर्थैः कार्यमासाद्यते, तत्र शब्दः अर्थप्रत्ययनार्थो भवति । यत्र पुनः शब्द एव कार्यम्, तत्र कार्यसंबन्धार्थं शब्द एव उच्चारयितव्यः इति मन्त्रगतदेवताबोधकपदेनैव त्यागः वक्तव्य इति निर्णीतं दशमचतुर्थे ।

तथा – चतुरवत्तं जुहोति - इति कथं चतुरवदानं सम्पादनीयम् ? हविषः एव चतुरवदानं वा इति सन्देहे-

**द्विर्हविषोऽवद्यति** इति विधिना हविषः द्विरवदानविधानात् – उपस्तरण - अभिघारणाभ्यां चतुःसङ्ख्यासम्पादनम् । अतः उपस्तृणाति । हविषः सकाशात् द्विरवद्यति । उपस्तृणाति । चतुरवत्तं जुहोति इत्युक्तं कल्पकारैः ।

एवम् - भिन्नानाम् अनेकेषां वैदिककर्मणां युगपदनुष्ठानापेक्षायां तन्त्रेण अनुष्ठानं कर्तुं शक्यते-वा इति सन्देहे-अनेकोद्धेशेन सकृदनुष्ठानं तन्त्रमिति तन्त्रलक्षणमुक्तम् । तथापि-तत्र केचन नियमाः तन्त्राध्याये प्रदर्शिताः । यथा- कालैक्ये, कर्त्रैक्यै, देशैक्यै फलैक्ये च तन्त्रेणेनानुष्ठानमिति । कालभेदे, कर्तृभेदे, देशभेदे, फलभेदे च तन्त्रेणानुष्ठानं न संभवति इति तन्त्रानुष्ठानस्वरूपं प्रदर्शितं एकादशप्रथमे । अपि च अङ्गानामेव तन्त्रं न प्रधानानाम् इत्यपि च । तथा - काम्यकर्मणां कामनाभेदे सकृदनुष्ठानेन न सर्वे कामाः संभवन्ति । किन्तु कामनाभेदात् प्रयोगावृत्तिः इति एकादशप्रथमे सिद्धान्तितम् ।

एवमेव- वेदवाक्येषु यत्र केवलं बहुवचनं श्रूयते तत्र बहुत्वं त्रित्वे पर्यवस्यति । वसन्ताय कपिञ्जलान् आलभेत - इत्यत्र कपिञ्जलान् इति बहुवचनं श्रूयते । सङ्ख्यानिर्देशो नास्ति । तत्र प्रथमोपस्थिततत्वात्, प्रथमातिक्रमणे कारणाभावाच्च बहुत्वे शक्तस्य बहुवचनस्य त्रित्वे पर्यवसानमिति निर्णीतं एकादशप्रथमे । एवम् 'अग्नये स्वाहा' इत्यादौ अग्नौ आहुतिप्रदानसमये - मन्त्रैरेव मन्त्रार्थः स्मर्तव्य इति नियमेन कथं व्यवस्था इति जिज्ञासायां यथा-समकालमुत मन्त्रोच्चारणानन्तरं किञ्चित्कालं विलम्ब्य उत आहुतिं प्रदाय मन्त्रोच्चारणम् उत मन्त्रान्ते इति सन्देहे - मन्त्राणां करणार्थत्वात् मन्त्रान्तेन कर्मादिसन्निपातः स्यात्-इति सूत्रेण मन्त्रान्ते कर्मसन्निपातः विहितः । तत्र कारणं कृत्स्नमन्त्रजन्यार्थस्मरणं कर्मणोऽङ्गम् । तच्च मन्त्रसमाप्तेः पूर्वं नोदेति । विलम्बे तु उत्पन्नं स्मरणं विनश्यति । अतः मन्त्रान्ते कर्म सन्निपतेत् इति निर्णीतं द्वादशतृतीये ।

एवं तर्हि वसोर्धारायां कथमिति चेत्- 'सन्ततां वसोर्धारां जुहोति' इति विधानात्-द्वादश द्वादशानि जुहोति इति चयनप्रकरणे विहितवसोर्धारायां होमद्वादशकेषु मध्ये मध्ये विलम्बाभावः सान्तत्यम् । न तु मन्त्रकर्मणोः सहोपक्रमः । तस्मात् अत्रापि नास्ति कश्चिद्विघ्नः ।

एवं प्रकारेण पूर्वमीमांसाधिकरणसिद्धाः सिद्धान्ताः (न्यायाः) स्मार्तकर्मसु तत्र तत्र सन्दर्भेषु विनियुक्ता इति केचन एव अत्र प्रदर्शिताः । तथा च श्रौत-स्मार्तकर्मसु सर्वत्र अनुष्ठाने विद्यमानाः सन्देहाः सर्वेऽपि मीमांसान्यायद्वरा एव परिह्रियन्ते इति मीमांसाशास्त्रस्य अनुष्ठानौपयिकत्वं सिद्धम् ।

**********

# सामान्यम्

**आचार्यः का. इ. मधुसूदनः**

नव्यन्यायविभागाध्यक्षः

**वैशेषिकाः** अनुवृत्तबुद्धिनियामकतया सामान्यमङ्गीकुर्वन्ति । नित्यत्वे सति अनेकसमवेतत्वं तस्य लक्षणं च अभिदधति । प्रथममेकं गां दृष्टवतः पुंसः तत्सजातीयस्य द्वितीयगोः दर्शनेन प्रागनुभूतगोव्यक्तिस्मरणे जाते प्रागनुभूतगोव्यक्तिगतगोत्ववत्तया यत् प्रकृतगोव्यक्तिविषयकं 'अयमपि गौः' इत्याकारकं ग्रहणम् ,तदेव अनुवृत्तबुद्धिपदेन विवक्षितम् । तथा च अनेकवृत्तित्वप्रकारकबुद्धिविषयत्वं सामान्यं सिद्ध्यति । **धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्**[1] इति पदार्थान् उद्दिश्य **सामान्यं विशेष इति बुद्ध्यपेक्षम्**[2] इति सामान्यादिकं लक्षितवतः सूत्रकारस्य इदमभिप्रेतम् । तदिदं मतान्तरपरिशीलनपूर्वकं विशदीक्रियते निबन्धेऽत्र यथामति ।

**वैशेषिकमतम् - काणभुजानामयमभिप्रायः-** अस्ति तावत् घटादिषु विभिन्नेष्वपि अयं घटः ,अयं घटः इत्येकाकारा बुद्धिः सर्वेषाम् । तदेकत्वं च किन्निबन्धनम् ?न तावत् घटगतैकत्वनिबन्धनं तत् ,घटानां नानात्वेन विरोधात् ।

नापि **योगाचारमतरीत्या** प्रतीतिव्यवहारविषयतया सिद्ध्यतः वस्तुनः ज्ञानाकारत्वमेव युक्तम् , बहिरवभासमानस्य आन्तरत्वायोगात् । ज्ञाने अध्यस्तः तत्तादात्म्यापन्नः मिथ्याभूतः ज्ञानाकारः इति हि योगाचाररीतिः । सा च 'सोऽयं घटः'इत्यादिप्रत्यभिज्ञादिविरोधेन घटादीनां ज्ञानाकारत्वासंभवात् आत्मख्यातिनिरासेनैव निरस्ता ।

न च बाह्यार्थमात्रस्य अपलापासंभवेऽपि अनेकसमवेतस्य नित्यस्यैकस्यासंभवात् सामान्यस्य ज्ञानाकारत्वमस्तु इति वाच्यम् । रजतार्थिनः रजतत्वाश्रये एव प्रवृत्तिसंभवेन तदनाश्रये ज्ञानादत्यन्तभिन्ने रजतादिरूपे अर्थे प्रवृत्तेरनुपपत्तेः । बाह्यार्थस्य तन्मते रजतत्वानाश्रयत्वात् ।

---

[1]वै.सू.१-१-४

[2]१-२-३

न च बाह्यार्थे रजतत्वाश्रयज्ञानभेदाग्रहादेव प्रवृत्तिरिति वाच्यम् । रजतमहं जानामि इत्येवं ग्राह्यग्राहकसंवित्तीनां भेदेनैव अनुभवसिद्धत्वेन भेदाग्रहायोगात् ।

न च **माध्यमिकमतरीत्या** असद्रूपमेव तत् भवतु इति वाच्यम् । प्रत्यक्षादिविरोधात् । किञ्च असतः रजतत्वादेः असत्वेन यदि प्रतीतिरिष्यते ,तर्हि प्रवृत्त्यनुपपत्तिः । न हि कश्चित् अत्यन्तासत्त्वेन प्रतीते प्रवर्तते । यदि च तात्त्विकत्वेन प्रतीतिः ,तर्हि अन्यथाख्यातिप्रसङ्गः । न च घटत्वं नाम न कश्चित् भावपदार्थः ,किन्तु अघटव्यावृत्तिः ,पटत्वम् अपटव्यावृत्तिरित्येवंरूपेण अपोहात्मिकैव जातिः इति वाच्यम् । भावरूपेणैव प्रतीतेः । घटार्थिनः घटत्वप्रकारेणोपस्थिते एव प्रवृत्तिसम्भवेन जातेरपोहरूपत्वे प्रवृत्त्यनुपपत्तेः । न च अघटव्यावृत्तिव्यतिरिक्तस्य घटत्वस्याप्यभावात् नानुपपत्तिरिति वाच्यम् । अन्योन्याश्रयात् । घटत्वस्य अघटव्यावृत्तिरूपत्वेऽपि घटत्वेन घटज्ञाने घटत्वघटकीभूतस्य अघटस्य ज्ञानमपेक्ष्यते ,अघटस्य घटप्रतियोगिकभेदवद्रूपस्य ज्ञाने च प्रतियोगिज्ञानविधया घटज्ञानमपेक्ष्यते । भेदस्य सप्रतियोगिकत्वनियमेन निष्प्रतियोगिकभेदरूपत्वमपोहस्य दुर्वचम् ।

किञ्च तदितरभेदः अपोहः इत्यत्र तच्छब्देन एकघटव्यक्त्युपादाने तदितरभेदस्य तद्घटव्यक्तिमात्रविश्रान्ततया घटव्यक्त्यन्तरस्य घटत्वासंभवप्रसङ्गः । तावद्घटव्यक्तीतरभेदानाम् सर्वेषामेव घटत्वरूपत्वात् न व्यक्त्यन्तरस्य घटत्वाभावापत्तिरिति चेत् न, तावतापि अनुगतप्रतीतिव्यवहारनिर्वाहकस्य अनुगतस्य एकस्य धर्मस्य दुर्वचत्वतादवस्थ्यात् ।

न च सदृशसंस्थानात्मकमेव सामान्यं स्वीक्रियताम् ,किमतिरिक्तकल्पनया इति वाच्यम् । सदृशसंस्थानशब्देन हि किं स्वरूपेणानुगतमतिरिक्तं रूपं विवक्षितम् उत प्रतिव्यक्तिव्यावृत्तः अवयवसंयोगविशेषः ? आद्ये पक्षे नामान्तरेण अतिरिक्तजातेः स्वीकारात् सिद्धं नः समीहितम् । द्वितीये च अनुगतप्रतीतिनिर्वाहकत्वं तस्य न संभवतीति । तस्मात् अनुवृत्तं परमार्थभूतमतिरिक्तमेकं सामान्यमङ्गीकरणीयमिति ।

किञ्च सामान्यस्यानङ्गीकारे सकलधूमसाधारणस्य धूमत्वस्य सकलवह्न्यनुगतस्य वह्नित्वस्य चाभावेन तत्तदवच्छेदेन व्याप्यत्वव्यापकत्वयोः ग्रहासंभवात् धूमेन वह्न्यनुमानोच्छेदापत्तिः । एवं कार्यतावच्छेदकस्यैकस्य घटत्वस्य कारणतावच्छेदकस्यैकस्य दण्डत्वस्य चाभावे सर्वोपसंहारेण कार्यकारणभावग्रहो न स्यात् । व्यक्त्यपेक्षया नियतत्वञ्च यत्किञ्चिद्घटव्यक्तिनियतपूर्ववर्तिनि रासभेऽपि वर्तते इति तस्यापि घटकारणताप्रसङ्गेन विवक्षितुमशक्यम्।


ISSN: 2320-740X

घटत्वजातिविशिष्टापेक्षया नियतत्वविवक्षणेन तद्वारणं तु घटत्वस्य अनुगतजातिविशेषस्यानङ्गीकारे न शक्यते ।

किञ्च सर्वासु गोव्यक्तिषु अनुगतस्य गोत्वस्याभावेन सर्वगोव्यक्त्युपस्थितेः असम्भवात् गोपदस्य सर्वगोव्यक्त्युपसंहारेण शक्तिग्रहो न स्यात् । अनुगतजातिस्वीकारे तु चक्षुःसन्निकृष्टगोव्यक्तौ गोत्वेन गृह्यमाणायां तत्र प्रकारीभूतं गोत्वं प्रत्यासत्तीभूय सकलगोव्यक्तीरुपस्थापयिष्यतीति तथोपस्थितासु सकलगोव्यक्तिषु शक्तिग्रहः सुघटः इति नानुपपत्तिः । तस्मात् अनुगतजात्यनभ्युपगमे सर्वव्यवहारविलोपापत्तिः । अतः अनुगतजातिस्वीकारः आवश्यक एवेति ।

**सौगतकृतं जातिखण्डनम् -** वैशेषिकाभिमतजातिमित्थं खण्डयन्ति **ताथागताः – यदुच्यते** तार्किकैः गोत्वजातिः एका सर्वत्र गोषु स्थिता इति, **तत्रेदं वक्तव्यम्-** किं सा द्वयोः गवोः अन्तराले भूतलगगनादौ अस्ति, उत नेति । नाद्यः पक्षः युक्तः, अन्तरालप्रदेशे इदं गोभिन्नमित्येव प्रतीतेः सद्भावेन अनुभवविरोधात् । नापि द्वितीयः, तथात्वे गोत्वजातेः व्यक्तिभेदेन भिन्नत्वप्रसङ्गात् ।

किञ्च एकस्यां गोव्यक्तौ गोत्वं कात्स्न्र्येन वर्तते उत अंशतः? कात्स्न्र्येन तत्र वृत्तौ व्यक्त्यन्तरे तस्य वृत्तिः न स्यात् । अंशतः वृत्तौ च तत्र तत्र कात्स्न्र्येन जातिप्रतीत्यनुपपत्तिः । एकदेशेन गोत्वस्य वृत्तौ च इमे गौरिति वा इमे गावः इति वा प्रतीतिरेव स्यात्, न तु अयं गौरिति ।

किञ्च धर्मिणः गोः ध्वंसे तद्धर्मः गोत्वमपि नश्येत् , आश्रयाभावेन स्थित्यनुपपत्तेः । न च गोत्वजातेरन्यत्र गमनं सम्भाव्यते, क्रियारहितत्वात्, द्रव्यस्यैव क्रियावत्त्वात् । तदुक्तम् –

**न याति न च तत्राऽऽसीत् न चोत्पन्नं न चांशवत् ।**
**जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥** इति ।[1]

अद्रव्यत्वात् गोत्वस्य न गमनं शक्यम् । गोरुत्पत्तेः प्राक् भूतलादौ अविद्यमानस्य गोत्वस्य गोव्यक्तिसम्बन्धः दुर्वचः । न च गोत्वं प्रागासीत् इति सुवचम् । आश्रयत्वेनाभिमतायाः गोव्यक्तेरनुत्पन्नत्वात् भूतलादेश्च गोभिन्नत्वेन गोत्वाधारतानुपपत्तेश्च । न च गोव्यक्तिसमकालमुत्पत्तिस्वीकारात् गोत्वस्य व्यक्तिसंस्पर्शः इति वाच्यम् । तस्य अनादित्वोक्त्या अपसिद्धान्तापातात् । न च गोत्वस्य एकांशेन एकत्र स्थितिः, अन्यांशेनान्यत्र च गवि स्थितिरिति शक्यते वक्तुम्, गोत्वस्य निरवयवत्वात् । यदि च जीवत्येव गवि गोत्वं तं जह्यात्, तर्हि गोरप्यगोत्वापत्तिः । तस्मात्

[1] प्रमाणवार्तिकम्- ३-१५२,१५३

विकल्प्यमानांशेषु कस्यापि समाधानं वक्तुमशक्यमिति महती व्यसनसन्ततिः वैशेषिकाणाम् ।

तस्मात् जातिः न भावपदार्थः, तदाश्रयत्वेन अभिमतवस्त्वपेक्षया यान्यन्यानि तद्व्यावृत्तिरूपैव । सैव अन्यापोहशब्देनोच्यते । गोत्वं नाम गवेतरव्यावृत्तिः, तस्य सकलगोवृत्तित्वात् गवेतरेषु अवृत्तित्वाच्च । एवमश्वत्वं नाम अश्वेतरव्यावृत्तिरित्येवमेव युक्तम् ।

**तत्खण्डनम् - यदुक्तम**न्यापोह एव गोत्वादिरिति, **तदयुक्तम्,** अनुभवविरोधात् । अयं गौरिति स्वरूपेणैव प्रतीतेः , तदन्यव्यावृत्तित्वेनाप्रतीतेः । न च सा व्यावृत्तित्वेन प्रतीतिरेवेति वाच्यम् । अन्योन्याश्रयात् । तथा हि अयं गौरित्यत्र अश्वादिव्यावृत्तित्वेन अयमश्व इत्यत्र गवादिव्यावृत्तित्वेन च भानस्वीकारे गोप्रतीतेः नियमेन अश्वापोहबुद्ध्यपेक्षा अस्ति, अश्वप्रतीतेश्च नियमेन गवापोहबुद्ध्यपेक्षा वर्तते । ततश्च स्वोपेक्ष्यपेक्षित्वं स्वस्य ।

किञ्च गोपदार्थे अश्वपदार्थः घटकः, अश्वपदार्थे च गोपदार्थः घटकः इति आत्माश्रयः । अत एव गोत्वावच्छिन्नप्रतियोगिताकभेदावच्छिन्नप्रतियोगिताकभेदः एव गोत्वम्, अतो नानुगमः इति प्रत्युक्तम्, गोत्वस्य तादृशत्वे गोत्वज्ञाने गोत्वज्ञानस्यापेक्षणीयतया आत्माश्रयस्य दुष्परिहरत्वात् । न च तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटावच्छिन्नप्रतियोगिताकभेद एव गोत्वम् इति नाननुगमः । गोत्वस्य तच्छरीरे अप्रवेशात् नात्माश्रयोऽपि । अतो नातिरिक्तजात्यावश्यकता इति वाच्यम् । तत्तद्व्यक्तित्वानामसर्वज्ञदुर्ज्ञेयतया गोत्वग्रहानुपपत्तेः ।

न च गौरित्यादिप्रतीतौ गोत्वस्य स्वरूपत एव भानेन तत्तद्व्यक्तित्वादिग्रहस्य अनपेक्षिततत्वात् नानुपपत्तिरिति वाच्यम् । भेदवद्भेदस्य अतिरिक्तत्वेऽनवस्थाभयेन भेदप्रतियोगितावच्छेदकरूपतायाः आवश्यकत्वेन उक्तभेदस्य तत्तद्व्यक्तित्वरूपतायाः एव वाच्यतया तस्य चाननुगततया अनुगतप्रतीतिनिर्वाहकत्वासम्भवात् ।

न चैवमपि तादृशभेदत्वेनानुगतीकृतानां तेषामनुगतप्रतीतिनिर्वाहकत्वमुपपद्यत एवेति वाच्यम् । अयं घटः, अयमपि घटः, अयं गौः, अयमपि गौरित्याद्यनुगतप्रतीतौ घटत्वगोत्वादेः स्वरूपत एव भानेन स्वरूपतोऽनुगतानामेव तथाविधप्रतीतिनिर्वाहकत्वसम्भवात् । तस्मात् अतिरिक्तजातिस्वीकारः आवश्यकः ।

न च सर्वमपोहात्मकं शब्दार्थत्वात् असंशयादिशब्दार्थवदित्यनुमानेन अपोहसिद्धिः । अभिहितं हि **धर्मकीर्तिना –**

**विकल्पप्रतिबिम्बेषु तन्निष्ठेषु निबध्यते ।**

 ISSN: 2320-740X

**ततोऽन्यापोहनिष्ठत्वात् उक्तान्यापोहकृच्छ्रुतिः ॥**[1] इति

इति वाच्यम् । विपक्षे बाधकाभावेनाप्रयोजकत्वात्, सर्वं विधिरूपं शब्दार्थत्वात् स्वलक्षणशब्दार्थवदिति सत्प्रतिपक्षत्वात्, प्रमेयत्वादौ केवलान्वयिनि प्रमेयभिन्नाप्रसिद्ध्या प्रमेयभिन्नभेदरूपापोहात्मकत्वस्य वक्तुमशक्यतया व्यभिचाराच्च । तत्तद्व्यक्तिरूपस्य स्वलक्षणस्य अभावरूपत्वं तेषामनिष्टमित्यतः उक्तप्रत्यनुमाने स्वलक्षणशब्दार्थत्वस्य विधिरूपत्वे हेतूकरणमिति बोध्यम् । शेषमशेषं दिङ्नागधर्मकीर्तिशान्तरक्षितकमलशीलप्रज्ञाकरगुप्तज्ञानश्रीमित्ररत्नकीर्तिप्रभृतिभिरुक्तस्यापोहसाधकत्वाभिमतयुक्तिजातस्य खण्डनं उद्योतकरवाचस्पतिमिश्रकुमारिलभट्टपार्थसारथिमिश्रजयन्तभट्टोदयनाचार्य-मम्मटाचार्यभर्तृहरिप्रभृतिभिः विहितं तत्तद्ग्रन्थतोऽवसेयमिति विस्तरभीत्या नेह प्रपञ्च्यते ।

तार्किकमते उक्तानां दूषणानामुद्धारः परं प्राप्तावसरः । तत्र **यदुक्तम्** बहुधाविकल्पपूर्वकं 'न याति न च तत्रासीत्' इत्यादिना वैशेषिकाणां व्यसनसन्ततिरिति, **तत्रोच्यते** – अनुभवानुरोधेन सकलवस्तुस्वीकारे क्रियमाणे विकल्प्य दूषणमयुक्तम् । किञ्च एवं विकल्पने बौद्धानामेव व्यसनसन्ततिः स्फुटा भवति । तथाहि विन्ध्यहिमाचलयोः द्वित्वं सर्वानुभवसाक्षिकं तत्रोभयत्र वर्तमानं किं तयोः मध्येऽपि वर्तते न वा ? वर्तते चेत्, तस्य द्वित्वरूपत्वं कथम्, बहुषु वर्तमानत्वात् । न वर्तते चेत्, कथं तत् एकं भवितुमर्हति, द्वित्वद्वयस्यैवाभ्युपगमनीयत्वात्।

कृत्स्नैकदेशविकल्पोऽपि न युज्यते, निरंशे बौद्धाभिमतस्य कात्स्न्र्यस्य दुर्वचत्वेन अविद्यमानधर्ममादाय विकल्पाप्रसक्तेः । द्वित्वादिकस्य व्यासज्यवृत्तित्वात् एकाभावे अन्यत्रापि तस्य नाशः । किन्तु गोत्वादिकं नैवम् । तस्मात् अयं गौरित्येकत्र ग्रहणेनापि गोत्वं गृहीतं भवति ।

न च व्यक्त्युत्पत्तेः प्रागविद्यमानस्य गोत्वस्य पश्चात् व्यक्तिसम्बन्धः कथमिति शङ्क्यम् । नित्यस्य तस्य गवादिव्यक्तिमात्रे समवायेन वृत्तित्वमङ्गीक्रियते । अतः न गमनागमनविकल्पप्रसक्तिः । न च प्रलये आश्रयाशेषव्यक्तिनाशे सामान्यस्यापि नाशापत्तिरिति वाच्यम् । तदानीमपि तस्य स्वरूपेण सत्ताभ्युपगमात् । यथा हि काले रूपस्य विद्यमानत्वेऽपि कालो रूपीति न प्रतीयते, समवायसम्बन्धेन तद्वृत्तेरेव तत्र नियामकत्वात्, तथा काले स्वरूपेण (कालिकविशेषणतया) गोत्वादेः वृत्तावपि न तद्बुद्धिप्रसङ्गः ।

[1] प्र.वा.१६४

न च अन्तराले जातेरभावे गोत्वादेरनेकापत्तिभिया व्यापकत्वं स्वीकर्तव्यमिति अन्तरालप्रदेशेऽपि आकाशादौ गोत्वादिप्रतीत्यापत्तिरिति वाच्यम् । व्यापकत्वेऽपि पिण्डद्वयान्तराले पिण्डरूपोपलब्धिकारणाभावेन अनुपलम्भोपपत्तेः । न च पिण्डे एवोपलभ्यत्वेऽपि कुण्डे बदरस्येव विविक्ततया उपलम्भः स्यात्, नैवमुपलभ्यते, अतो नास्तीति वाच्यम् । कुण्डात् बदरस्येव पिण्डात् गोत्वस्य स्वावयवदेशविरहेण वैषम्यात् । न चैवमपि गोत्वादेरमूर्तत्वेन जातात् पिण्डात् जायमानं प्रति सङ्क्रमासम्भवात्, तत्र तदा जन्मनश्च अपसिद्धान्तापत्तिभिया अयोगात्, पश्चाच्च प्रतीतिबलात् सम्बन्धाङ्गीकारस्यावश्यकत्वात् च विरुद्धधर्माध्यासः दुर्वारः इति वाच्यम् । व्यापकस्य गोत्वादेः पिण्डोत्पत्तेः प्रागपि स्वरूपेण आकाशादिदेशसद्भावस्य प्रागुक्तत्वात् । गोत्वेन समवायाख्यसम्बन्धवत एव गौरितिप्रतीतिव्यवहारविषयत्वोपगमेन नाकाशादौ गौरितिप्रतीतिव्यवहारप्रसङ्गः । गोत्वसमवायस्य तत्र पिण्डोत्पत्तेः प्रागिव पश्चादप्यभावात् सामान्यसद्भावमात्रस्य चाकिञ्चित्करत्वात् । सामान्यस्य नित्यं सत्त्वेन न सत्त्वासत्त्वविरोधोऽपि । येन च पिण्डेन गोत्वं सम्बध्यते न तत्र कदापि तत् नास्ति इति न दोषः । तथा च यत्र पिण्डस्य उत्पत्तिः तत्रस्थमेव गोत्वं तेन सम्बद्ध्यते , जातः सम्बद्धश्च इत्येकः कालः इत्यङ्गीकारात् कीदृशे आश्रये गोत्वं वर्तते इत्यत्र यत्र प्रतीयते तत्रेति उत्तरम्, कुत्र प्रतीतिः इत्यत्र यत्र वर्तते तत्र इत्युत्तरम् । गोत्वसम्बन्धात् प्राक् सः पिण्डः कीदृश आसीत् इत्यत्र नासीत् इत्येव उत्तरम् इति **निर्गलितार्थः** ।

**मीमांसकमतम् - प्राभाकरमीमांसकाः** अतिरिक्तां जातिमभ्युपयन्तोऽपि द्रव्ये एव तामिच्छन्ति तस्याः अवयवसंस्थानमात्राभिव्यङ्ग्यत्वात् । गुणादेश्च निरवयवत्वात् न जात्याधारत्वम् इति । किन्तु द्रव्ये अनुगतप्रतीतेरेव सामान्ये प्रमाणत्वात् गुणकर्मणोरपि तस्याः जातिसाधिकायाः सत्त्वात् बाधकाभावाच्च सामान्योपगम एवोचितः । रुपरसादिव्यक्तीनामनेकत्वेन रूपत्वादिजातिषु व्यक्त्यभेदस्य जातित्वबाधकस्य, गुणत्वापेक्षया न्यूनव्यक्तिकत्वेन नीलत्वाद्यपेक्षया अधिकव्यक्तिकत्वेन च अन्यूनानतिरिक्तव्यक्तिकत्वरूपस्य तुल्यत्वस्य बाधकस्य, परस्परात्यन्ताभावसामानाधिकरण्ये सति जात्यन्तरेण सामानाधिकरण्याभावेन साङ्कर्यस्य बाधकस्य, रूपत्वादिगतसामान्यान्तरानभ्युपगमेन अनवस्थायाः, विशेषत्ववत् स्वरूपहानेः , समवाये समवायाभ्युपगमप्रयुक्तस्य असम्बन्धस्य च प्रकृते अभावात् ।

**कुमारिलभट्टाः तदनुयायिनश्च** सामान्यमतिरिक्तमङ्गीकुर्वन्ति । उक्तं हि-

**प्रत्यक्षबलसिद्धस्य सामान्यस्य कुतर्कतः ।**
**न शक्योऽपह्नवःकर्तुं सर्वं विजयते हि तत् ॥** इति ।

 ISSN: 2320-740X

गवादिषु सर्वेषु वस्तुषु इयं गौः, इयमपि गौः, अयं वृक्षः, अयमपि वृक्षः इत्यनुगतप्रत्यक्षं देशान्तरे कालान्तरे अवस्थान्तरे च उदीयमानं पश्चात् चाबाधितं तर्काभासं सर्वमेव विजित्य सामान्यमनुगतं व्यवस्थापयति । न हि ततोऽन्यत् बलवत्तरमस्ति प्रमाणम्, प्रमाणान्तराणां तन्मूलत्वेन तद्बाधसामर्थ्याभावात् ।

**यदाहुःजातिनिराकर्तारः** – जातेः व्यक्तितः पृथक्त्वे पृथगेव दृश्येत, अभेदे च व्यक्तिमात्रं स्यात् इति, **तत्राहुः पार्थसारथिमिश्राः**[1]**-** यद्वस्तु तत् भिन्नमभिन्नं वा भवति, सामान्यमपि यदि वस्तु स्यात् तर्हि तेनापि व्यक्तिभिन्नेन तदभिन्नेन वा भवितव्यम् । न च द्वेधाऽपि सम्भवति । तस्मादवस्तु इति पूर्वपक्षिभिः वक्तव्यम् । एवं वदद्भिश्च अवश्यं वस्तुत्वं सामान्यमङ्गीकर्तव्यम् । अन्यथा वस्तुत्वस्य भेदाभेदान्यतरव्याप्यत्वेन व्यापकाभावात् व्याप्याभावः कथं वक्तुं शक्य इति ।

एवं जातेः सर्वगतत्वव्यक्तिगतत्वविकल्पपूर्वकदूषणस्य उभयथापि समाधानमभ्यधायि । व्यक्तिगतत्वपक्षे जातेः कारणवशादेव उत्पन्नव्यक्तिसम्बन्धः । संयुज्यमानस्य वस्तुनः स्वदेशानन्तरदेशेन प्रथमं संयोगः ततस्तदनन्तरदेशेनेति क्रमेण देशान्तरसंयोगेऽपि समवायस्य अनन्तरदेशमनपेक्ष्यैव स्वकारणतो निष्पत्तिः इति स्वभावभेदस्वीकारात् न देशान्तरगमनचोद्यमवसरं लभते ।

वैशेषिकोक्तः सर्वगतत्वपक्षोऽपि पार्थसारथिमिश्रैः समर्थितः, व्यक्तीनामभिव्यञ्जकत्वमभ्युपेत्य सर्वत्रोपलब्धिप्रसङ्गश्च परिहृतः । सर्वगतमपि सामान्यं व्यक्तिसमवेतमेव । संयुक्तसमवायसन्निकर्षेण च सामान्यस्योपलम्भः । तेन च सन्निकर्षः व्यक्तिदेशे एव सम्भवति नान्यत्रेति न सर्वत्रोपलब्धिः इत्यप्युक्तम् । सामान्यस्य स्वरूपतो वा अवयवतो वा भेदाभावात् (एकत्वात् अनवयवत्वाच्च) भेदापेक्षं कार्त्स्न्यमवयवशो वृत्तिश्च न सम्भाव्यते । तस्मात् व्यक्तिषु जातिः वर्तते इत्येतावन्मात्रमेव प्रमाणतः वक्तुं शक्यते , न कार्त्स्न्यभागविभागः, प्रमाणाभावात् असम्भवाच्च । सामान्यं व्यक्त्यन्तरमनपेक्ष्यैव व्यक्त्यन्तरे वर्तमानं सत् स्वानुरूपां बुद्धिं जनयतीति प्रत्येकं वर्तते इत्युच्यते, न तु कार्त्स्न्येन वर्तते इति । अवयवी तु अवयवेषु व्यासज्य वर्तते इति ततो वैलक्षण्यम् इति ।

**द्वैतिनां मतम् - द्वैतिनस्तु** – अनुगतजातौ न किञ्चित्प्रमाणमस्ति । उपदेशव्यवहारभूयोदर्शनादिना शक्तिव्याप्तिग्रहकाले उपस्थिताः ये गवादिव्यक्तिविशेषाः तत्र स्थितेन

[1]शास्त्रदीपिका-पृ.सं९९

अतीतानागतादिसकलगवादिव्यक्तिप्रतियोगिकेन एकेन सादृश्येन सकलशक्यव्याप्यादि-व्यक्तीनामुपस्थितिसम्भवात् न तावत् तदन्यथानुपपत्त्या अनुगतजातिकल्पनं युक्तिमत् । तच्च सादृश्यं स्वरूपसदेव प्रत्यासत्तिः । पुरोवर्तिगोव्यक्तौ स्वगतसादृश्यप्रतियोगित्वाभावेऽपि प्रत्यभिज्ञायाम् इदमंशस्येव इन्द्रियसंयोगेनैव तस्याः उपस्थितिः सम्भवति । न च गवयस्यापि गोसादृश्यप्रतियोगित्वात् तस्यापि उपस्थितिः स्यात् इति वाच्यम् । सास्नादिमत्त्वगोत्वादिप्रयुक्तस्य गवयादिव्यावृत्तस्य पदार्थान्तररूपस्य अन्तरङ्गस्य सादृश्यस्यैव प्रत्यासत्तित्वोपगमेनादोषात् । उक्तं च न्यायसुधायाम् –'सादृश्यस्य व्यावृत्तत्वेऽपि प्रतियोगिनिरूप्यत्वेनानुगतफलसाधकत्वानुभवात्' इति । अनुगतफलं चात्र सर्वव्यक्त्युपस्थितिः । इत्थञ्च एकेन पदार्थान्तररूपेण सादृश्येन क्रोडीकृतासु व्यक्तिषु शक्तिव्याप्त्यादिग्रहः सम्भवति ।

**अथवा** पुरोवर्तिगोवृत्तिगोत्वानां ज्ञातानां स्वनिष्ठसादृश्यप्रतियोगिगोत्वान्तर-विशिष्टोपस्थापकत्वस्वीकारात् नानुपपत्तिः ।

**यद्वा** उपदेशव्यवहारादिपूर्वकशक्तिग्रहविषयनिष्ठं ज्ञातमुभयसम्बद्धमेकं सादृश्यं निमित्तीकृत्य अनेकगोत्वप्रकारावच्छिन्नासु अनेकगोव्यक्तिषु गोशब्दस्य शक्तिग्रहः सुकरः । अङ्गीक्रियते हि नैयायिकैरपि सर्वनामपदस्थले वक्तृनिष्ठां देवदत्तादिविषयिणीं ज्ञातामेकां बुद्धिं निमित्तीकृत्य तदुपलक्षित(तद्विषयतावच्छेदकत्वोपलक्षित) देवदत्तत्त्वाद्यनेकप्रकारावच्छिन्नेषु अनेकेषु देवदत्तेषु तच्छब्दादेः शक्तिग्रहः ।

**अथवा** आदौ स्वरूपसत् सादृश्यं प्रागुक्तरीत्या अतीतादिसकलव्यक्तीरुपस्थापयति । ततः सामग्रीसत्त्वात् अतीतादिप्रतियोगिकत्वेन ज्ञातं सत् उपलक्षणं भविष्यति इति स्वीकारादेवोपपत्तौ अनुगतजात्यभावे न कापि क्षतिः।

न चाननुगतेन अवयवसंस्थानरूपगोत्वेन नानाभूतेन व्युत्पत्त्यादिकं दुर्घटमिति वाच्यम् । भवन्मतेऽपि सुवर्णघटादौ तेजस्त्वादिना साङ्कर्यापत्त्या घटत्वादिजातेः पृथिवीत्वादिव्याप्यायाः नानात्वावश्यकतया घटादिशब्दव्युत्पत्त्याद्यसम्भवतौल्यात् ।

वस्तुतस्तु सादृश्यद्वारकपरम्परासम्बन्धेन (स्वसमवायिविषयत्वसम्बन्धेन) एकमात्रवृत्तिगोत्वं वा नानाव्यक्तिसम्बन्धिसादृश्यं वा गोमात्रानुगतमस्त्येव अस्मन्मते इति न व्याप्त्याद्यनुपपत्तिः **इत्याहुः** ।

**अत्रेदं प्रतिविधीयते** – अखण्डस्य पदार्थान्तररूपस्य सादृश्यस्य निष्प्रमाणकत्वात् न प्रथमः कल्पः


ISSN: 2320-740X

सम्यक् । तथा हि सादृश्यं प्रत्याश्रयं भिन्नम् । तस्यैकत्वे गवयनिष्ठगोसादृश्यस्य गर्दभनिष्ठाश्वसादृश्याभिन्नत्वेन गवयः अश्वसदृश इति प्रयोगापत्तेः । न च अश्वनिरुपितत्वविशिष्टसादृश्याधिकरणतायाः गवये बाधान्नोक्तापत्तिरिति वाच्यम् । एवमपि सादृश्यस्यैकत्वे तद्गतभूयोधर्मवति सौसादृश्यव्यवहारस्य तद्गताल्पधर्मवति मन्दसादृश्यव्यवहारस्य चानुपपत्तेः दुर्वारत्वात् । विरुद्धयोः एकत्रासम्भवात् । न च सादृश्यनियतानां साधारणधर्माणां यदा अल्पत्वज्ञानं तदा मन्दसदृशत्वधीव्यवहारौ इति न दोष इति वाच्यम् । बहुभिरल्पैश्च व्यज्यमाने घटादिनिष्ठसादृश्ये व्यञ्जकानामल्पत्वबहुत्वयोः सर्वत्र ज्ञातुमशक्यत्वेन तादृशव्यवहारानुपपत्तितादवस्थ्यात् । तद्गतभूयस्साधारणधर्मादेव सादृश्यव्यवहारोपपत्तौ अतिरिक्तसादृश्यासिद्धेश्च । व्यवहारस्यैव तत्कल्पकत्वात् । इत्थञ्च प्रत्याश्रयभिन्नत्वेन न सादृश्येन सकलव्यक्तिक्रोडीकारसम्भवः । नापि सादृश्यत्वेनानुगतानां सादृश्यानां तत्सम्भवः, सादृश्यत्वस्यापि असमवेतत्वेन स्वरूपतोऽप्रकारत्वेन च जात्यखण्डोपाध्यतिरिक्तत्वे सिद्धे स्वरूपसम्बन्धविशेषरूपतायाः आवश्यकत्वेन नानात्वस्य अवर्जनीयत्वात् ।

किञ्च प्रत्यक्षविषयगवादिव्यक्तिनिष्ठस्य सादृश्यस्य स्वरूपसतः व्यक्त्यन्तरोपस्थापकत्वे तन्निष्ठवैसादृश्यस्यापि विनिगमनाविरहेण तथात्वसम्भवात् अश्वादेरप्युपस्थितिप्रसङ्गः ।

अत एव न द्वितीयोऽपि पक्षः साधीयान् । प्रत्यक्षितगोत्वस्य गोत्वान्तरविशिष्टोपस्थापकत्वमित्यत्र उपस्थितिश्च कीदृशी अभिप्रेता न प्रत्यक्षरुपा, क्लृप्तसन्निकर्षाणां तत्राभावात् । नाप्यनुमित्यादिः व्याप्तिग्रहाद्यसम्भवात् । नापि स्मृतिः, तेषामननुभूतत्वात् ।

सादृश्यस्य एकस्याभावादेव तदुपलक्षितनानागोत्वविशिष्टनानागोव्यक्तिषु शक्तिग्रहः इति तृतीयोऽपि पक्षः प्रत्युक्तः । अतीतादिव्यक्तिज्ञानमन्तरा तत्प्रतियोगिकसादृश्यज्ञानासम्भवाच्च ।

**यदुक्तम्** – सन्निकृष्टपिण्डे वर्तमानपिण्डान्तरप्रतियोगिकसादृश्यज्ञाने सति अतीतादिपिण्ड-प्रतियोगिकसादृश्यस्यापि ज्ञातत्वमेव । अतीतादिप्रतियोगिकत्वेन पिण्डज्ञानस्यानपेक्षितत्वादिति ।

**तन्न**, तथा सति गोपदशक्तिग्रहोत्तरमपि एतद्गोव्यक्तिनिष्ठसादृश्यप्रतियोगिनः गोपदवाच्या न वा इति संशयापत्तेर्दुर्वारत्वात् ।

प्रथमपक्षस्य निरासात् आद्यपक्षोक्तरीत्या सादृश्यं स्वरूपसत् अतीतादिकमुपस्थाप्य पश्चात् सामग्रीसत्त्वेन अतीतादिप्रतियोगिकत्वेन ज्ञातमुपलक्षणं भवतीति चतुर्थः पक्षोऽपि निरस्तः ।

**यदपि** अननुगतेन अवयवसंस्थानेन गोत्वादिना व्युत्पत्त्यादिकं दुर्घटमित्यत्र सुवर्णघटादौ तेजस्त्वादिना साङ्कर्यात् घटत्वादेरप्यनुगतत्वाभावः इति प्रतिबन्द्यभिधानम् ।

**तत्रोच्यते** – साङ्कर्यं न जातिबाधकम् । न च परस्परपरिहारिण्योः जात्योरसमावेशस्यावश्यकत्वात् दूषणमेव तत् । परस्परपरिहारस्यासमावेशानिश्चायकत्वे गोत्वाश्वत्वयोरपि असमावेशनिश्चयाभावापत्त्या अश्वजातीयं गोजातीयेन विरुद्धम् (तादात्म्यायोग्यम्) इति या तज्जातीयानां विरोधप्रसिद्धिः सा उच्छिद्येत । ततश्च आप्तवाक्यात् तुरगत्वे अवगते तुरगत्वात् न स गौरित्याद्यनुमानपूर्वकव्यवहारो न स्यादिति वाच्यम् । काश्चित् जातयः परस्परपरिहारिण्यः क्वचिदपि न समाविशन्ति, काश्चित्तु तादृश्योऽपि समाविशन्ति इति यथाप्रमाणं निश्चित्य गोत्वादावप्युक्तरीत्योः एका आप्तवाक्यादितः ज्ञातुं शक्यते इति तन्मूलकव्यवहारोपपत्तेः ।

किञ्च जातीनां सर्वासामपि यत्किञ्चित्सामानाधिकरण्यसत्त्वेन क्वचिदपि जातौ सामानाधिकरण्यसामान्याभावासम्भवात् नासामानाधिकरण्यमात्रं दूषकताबीजम् । परस्परसामानाधिकरण्यमपि न तथा, परस्परशब्दार्थस्य अननुगतत्वेन तस्याननुगतत्वात् । एवमसामानाधिकरण्यावच्छेदकं परस्परात्यन्ताभावसामानाधिकरण्यमपि अननुगतम् । तथा च परस्परशब्दार्थानुसारेण गोत्वाश्वत्वादिषु पृथक् तेन तेन रूपेणासमावेशः ग्राह्यः इति घटत्वतेजस्त्वादिसङ्करे ना काचिदनुपपत्तिरिति **सङ्क्षेपः** ।

**अद्वैतिनां मतम्** - सन् गौः, सन् घटः, सन् पटः इति सत्तादात्म्यापन्नेषु गोघटपटादिषु सत्सामान्यातिरिक्तं गोत्वादिसामान्यं नाङ्गीक्रियते । तदभावेऽपि कार्यप्रयोजकत्वस्य निर्वाहात् । यैरपि गोत्वादिजातिः स्वीक्रियते तैरपि अनुगतकिञ्चिद्धर्मावच्छिन्नस्य गोत्वादिव्यञ्जकत्वास्वीकारात् गोत्वाद्यविशेषितानामननुगतानां गवादिव्यक्तीनामेव व्यञ्जकत्वमभ्युपेयम् । जातिनिष्ठलौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति स्वविषयसमवेतत्वसम्बन्धेन प्रत्यक्षस्य कारणतया जातिप्रत्यक्षप्रयोजकसम्बन्धघटकत्वात् व्यक्तीनाम् । यदि च गोत्वादिप्रत्यक्षे सास्नाद्यवच्छिन्नेन्द्रियसंयोगवत्समवायादेः विशिष्यैव हेतुता वाच्येति विभाव्यते, तदापि सास्नादिमत्त्वादिधर्मेणानुगतानां उक्तकारणतावच्छेदकघटकव्यक्तीनां गोत्वादिव्यञ्जकत्वं स्वीकार्यम् । तद्वदेव गोत्वाद्यनभ्युपगमेऽपि गवादितत्तद्व्यक्तिसंसृष्टरूपेण सत्तात्मकसामान्यस्यैव गौरित्यादिव्यवहारजनकत्वमुपपद्यते। तथा हि गोत्वजातिमत्त्वेन पराभिमताः यावत्यो व्यक्तयः तावदन्यतमोपरक्तसद्रूपमेव गौरित्याकारकव्यवहारे कारणम् ।

न च गवादिपदानां तत्तद्व्यक्तिविशिष्टसद्रूपे सद्रूपविशिष्टतत्तद्व्यक्तिषु वा शक्तेरावश्यकतया तेषां

नानार्थतापत्तिः । तत्तद्व्यक्तिघटितावच्छेदकभेदेन शक्तिभेदस्यावश्यकत्वादिति वाच्यम् । अनवच्छिन्नतावद्व्यक्तिधीजनकतारूपायाः शक्तेः सकलगोव्यक्तिसाधारण्याः एकत्वेनादोषात् । जन्यताजनकतयोरखण्डत्वस्वीकारात् । उक्तञ्च **लघुचन्द्रिकायाम्**[1] परिच्छिन्नत्वहेतुपरिष्करणावसरे 'सर्वगोव्यक्तिष्वेकस्या एव शक्तेः सम्भवेन नानार्थत्वाभावात्' इत्यादि । इदञ्च सर्वमुपपादनं स्वमतसिद्धं घटादीनां सातादात्म्यमुपजीव्य । घटत्वादिजातीनां सद्रूपतानङ्गीकारे तु घटव्यक्तिभिरवच्छिन्ना जलाहरणादिकार्यानुकूला मूलाज्ञानीया विक्षेपशक्तिरेव निर्विषयिका घटत्वम् । एवं पटत्वादिकमपि । आवरणशक्तेरेव सविषयकत्वात् इति निष्कर्षः- इति **अद्वैतिनो वदन्ति** ।

**तत्रेदमभिधीयते** – गौरित्यादिप्रतीतौ प्रकारीभूतं गोत्वं सद्रूपमेव, पराभिमताः यावत्यो व्यक्तयः तावदन्यतमोपरक्तसद्रूपस्यैव गौरित्यादिव्यवहारकारणत्वादित्युक्तमयुक्तम् । कारणतावच्छेदककोटौ प्रविष्टस्यान्यतमत्वस्य तावद्भेदावच्छिन्नभेदकूटवत्त्वरूपतया तद्घटकभेदानां विशेषणविशेष्यभावे विनिगमनाविरहेण तावदन्यतमोपरक्तसद्रूपे व्यवहारकारणतानामनन्तानां कल्पनप्रसङ्गेन महागौरवात्, तावद्भेदघटितधर्मावच्छिन्नकारणतायाः असर्वज्ञदुर्ज्ञेयत्वाच्च अतिरिक्तगोत्वादिजातिकल्पनस्यैव लाघवेन न्याय्यत्वात् ।

किञ्च तावदन्यतमोपरक्तं सद्रूपं कारणमुत तदुपरक्तप्रमेयत्ववस्तुत्वादिकं तथा इत्यत्र विनिगमनाविरहात् तस्यापि कारणताकल्पनाप्रसङ्गः दुर्वारः। उक्तान्यतमत्वस्य अखण्डस्य स्वरूपेण निवेशे तु तादृशान्यतमत्वस्यैव व्यवहारकारणताकल्पनमुचितमिति ।

**विशिष्टाद्वैतिनामभिप्रायः - विशिष्टाद्वैतिनस्तु** संस्थानविशेष एव गोत्वादिः, तस्य तदतिरिक्तत्वे मानाभावात् । तार्किकमते अतिरिक्तजातिव्यञ्जकत्वेनाभिमतानाम् आकृत्यपरपर्यायसंस्थानानां व्यक्तिभेदेन भिन्नतया एकजात्याक्रान्ततया अनुगतीकृतानामेव तेषां जातिव्यञ्जकत्वस्य वाच्यतया अनुगमकतज्जातेः व्यञ्जकान्तरस्वीकारापत्त्या तस्याप्यनुगतीकरणाय जात्यन्तरोपगमः आवश्यकः । तद्व्यञ्जकेऽपि तथा इत्येवमनन्तजातिकल्पनापत्तेः । यदि व्यक्तिभेदभिन्नस्यापि प्रथमसंस्थानस्य विनापि जातिं स्वयमेवानुगतत्वमिष्यते, तर्हि तद्व्यङ्ग्यत्वेनाभिमता जातिरपि न कल्पनीया, स्वयमनुगतसंस्थानेनैव अनुगतव्यवहारोपपत्तेः । स्वभावादेव

[1]पृ.सं.-३१७

ISSN: 2320-740X

व्यावृत्तानामपि संस्थानानां स्वगतजात्यभिव्यञ्जकत्वमिति स्वीकारापेक्षया तस्य स्वभावस्य अनुगतप्रतीतिनिर्वाहकत्वोपगमस्यैव लाघवेनोचितत्वात् । तथा चातिरिक्तजातौ न प्रमाणं किञ्चित् ।

किञ्च गृहीतसंस्थानसौसादृश्यबलात् संस्थानान्तराणामपि ग्रहणसम्भवात् अन्योन्यसहकृतसंस्कारजन्यैकस्मृतिविषयसंस्थानाश्रयत्वमेव एकजात्याश्रयत्वमिति व्यवह्रियते । अतः सन्निकृष्टधूमसंस्थानगतसादृश्यविशिष्टसंस्थानाश्रयत्वात् सर्वधूमग्रहणसम्भवेन न व्याप्तिग्रहानुपपत्तिः । न चैवं जातिस्थाने सादृश्योक्त्या नाम्नेव केवलं विवादपर्यवसानमिति शङ्क्यम् ।व्यावृत्तत्वेऽपि सादृश्येन निर्वाहोपगमात् । एकैकव्यक्तिगतस्य संस्थानस्यैव सामान्यरूपत्वमिष्यते । एकं गोसंस्थानमन्यैः गोसंस्थानैः स्वभावादेव सप्रतियोगिकम् । स्वभावो हि नाम प्रामाणिकस्वरूपमेव । यत् यथा प्रतीयते तथैव स्वीक्रियते इत्यतः सास्नादीनामेव परस्परं प्रतियोग्यनुयोगिभावः, न तु केसरादीनाम् ।तार्किकैरपि हि उपलम्भबलात् मूर्तत्वशरीरत्वेन्द्रियत्वाद्युपाधिरूपधर्मस्थले इयं जातिः, इयमपि जातिः इत्यनुगतजातिरूपधर्मस्थले चेत्थमेव नियमोऽङ्गीकार्यः । एवं घटाभावः घटप्रतियोगिकः एव, पटाभावस्तु पटप्रतियोगिकः एवेति उपलम्भादेव निषेध्यनिषेधकनियमः स्वीकर्तव्यः । न च तत्र तत्र वैशिष्ट्यनियामकं स्वरूपातिरिक्तं किञ्चित् स्वीक्रियते । एवमेव एकैकस्य सास्नादिधर्माः परस्परप्रतियोगिकत्वनियमेन सौसादृश्यशब्दार्थत्वं भजन्ते इति न दोषः ।

न चैवमाकृतियुक्तद्रव्यस्थले अनुगतप्रतीतिनिर्वाहेऽपि गुणेषु तथा निर्वाहासम्भवात् तत्र जात्यङ्गीकारः अवर्जनीयः इति वाच्यम् । तत्तद्वस्तुस्वभावनियमस्यैव सर्वत्र नियामकत्वात् । स्वभावतः सप्रतियोगिकत्वेन प्रमाणसिद्धं तत्तद्वस्त्वेव तत्तदनुवृत्तव्यवहारहेतुरिति नियमस्वीकारेण ससंस्थानेषु वस्तुषु संस्थानभेदस्य अनुवृत्तव्यवहारनियामकत्वेऽपि गुणादिषु तत्तदसाधारणलक्षणस्यैव तथात्वे न कोऽपि विरोधः । अन्यथा भवन्मतेऽपि व्यञ्जकाभावेन अनुगतजातेरप्यसिद्ध्यापत्तेः ।

**निष्कर्षस्तु** तत्तद्रूपव्यक्तिभेदकूटवदवृत्तिविषयतासम्बन्धेन प्रतीतिमत्त्वमेव रूपत्वं निखिलरूपसाधारणं रूपपदवाच्यतावच्छेदकम् । ज्ञानत्वं च व्यवहारहेतुताविशेषरूपः शक्तिविशेषः । तस्य च सर्वज्ञानानुगततया नित्यतया एकतया च स्वरूपत एव रूपपदवाच्यतावच्छेदकतावच्छेदकत्वं सम्भवति । न च नामान्तरेणातिरिक्तजातिस्वीकारः शङ्क्यः । ज्ञानस्य व्यवहारकारणतायाः सर्वसम्मतायाः एव ज्ञानात्वात्मकत्वोपगमेन अतिरिक्तजातिस्वीकाराभावात् । अतिरिक्तपदार्थत्वेन नव्यनैयायिकैः स्वीकृतायाः कारणताया एव सिद्धान्ते शक्तिपदेन विवक्षितत्वात् । तदादिपदस्थले नैयायिकादिवत्

शक्तिविशेषरूपज्ञानत्वोपलक्षितस्यैव रूपपदवाच्यतावच्छेदकतया रूपपदजन्यबोधे ज्ञानत्वभानासम्भवेन ज्ञानात्मकरूपत्वस्य च स्वरूपत एव भाननिर्वाहात् घटो रूपवान् इति प्रात्यक्षिकप्रतीत्यवैलक्षण्यमुपपद्यते इति – **इत्याचक्षते** ।

**तत्रेदमुच्यते** – यदुक्तं सौसादृश्यपदव्यपदेश्याः एकैकव्यक्तिगताः स्वभावादेव परस्परप्रतियोग्यनुयोगिभावापन्नाः अवयवसंस्थानविशेषाः व्यावृत्ताः अपि अनुगतप्रतीतिनिर्वाहकाः इति ।

तत्र सादृश्यं यदि एकरूपत्वं तर्हि जातिरङ्गीकृतैव स्यात्, परस्परविलक्षणानां व्यक्तीनामन्यस्य सादृश्यस्य असम्भवात् । यदि तासामपि किञ्चिदवयवसंस्थानादिसामान्यमुच्येत तर्हि गोसदृशोऽयमित्येव बुद्धिः स्यात् न तु गौरिति ।

न च अतिरिक्तजात्यङ्गीकारेऽपि तस्याः तुल्याकारबुद्धिजननशक्तिः कल्पनीया, ततो वरं व्यावृत्तानामेव उभयवादिसिद्धानां तथाविधबुद्धिजननशक्तिकल्पनम् इति वाच्यम् । यतः सर्वासु व्यक्तिषु सा शक्तिरेका वा प्रतिव्यक्ति भिन्ना वा ? व्यक्तिभ्यश्च अन्या वा अनन्या वा ? ग्राह्या वा अग्राह्या वा इति वक्तव्यम् । तत्र आद्यपक्षे जातिरेव शब्दान्तरेण अङ्गीकृता स्यात् । तस्या एव तादृशत्वात् । यदि अग्राह्या शक्तिः तर्हि सामान्यबुद्धेः निर्विषयत्वापत्तिः । विशेषाणां च भिन्नानामेकबुद्धिविषयत्वासम्भवात् । तेषां एकबुद्धिविषयत्वे तु भिन्नत्वं न स्यात् इति ।

न चैवमपि व्यक्तिविशेषसम्बन्धसिद्ध्यर्थमन्यान्यजात्यपेक्षायाः अवर्जनीयतया अनवस्थाप्रसङ्गः दुष्परिहरः इति वाच्यम् । यथा तालबीजमेकजातीयं परिणामपरम्परया तालजातिसम्बद्धां व्यक्तिमुपजनयति, सापि तथैव स्वकारणीभूतबीजसमानजातीयं बीजान्तरम्, तद्वत् एकजातीयात् शुक्रात् गोजातीयव्यक्तिनिष्पत्तिः, तस्यां च तज्जातीयशुक्रनिष्पत्तिरिति न दोषः ।

व्यञ्जकव्यवस्था च **कन्दल्यामि**त्थं प्रादर्शि – सास्नादिसंस्थानविशेषः गोत्वस्य व्यञ्जकः, केसरादिसंस्थानविशेषः अश्वत्वस्य, विशिष्टग्रीवादिसंस्थानविशेषः घटत्वस्य; प्रतीतिनियमात् । एते च संस्थानविशेषाः न सर्वेषु पिण्डेषु साधारणाः, अपितु प्रतिनियतेषु भवन्ति । तत्र यद्यपि सर्वं सामान्यं सर्वत्रोपजायमानेन स्वविषयेणेव पिण्डान्तरेणापि सम्बन्धुं क्षमते, तथापि यस्याभिव्यञ्जकं यत्र पिण्डे सम्भवति तस्य तत्रैव समवायः नान्यत्र । एवं सामग्रीनियमादपि सामान्यसम्बन्धनियमः । एष हि तन्त्वादीनां कारणानां स्वभावः

यदेतैरुत्पद्यमाने द्रव्ये पटत्वमेव समवैति नान्यत् । एष हि मृत्पिण्डादीनां महिमा यत् तैः क्रियमाणे द्रव्ये घटत्वमेव समवैति नान्यत् इति [1] ।

अनेन समवायनियमे प्रतीतिनियमः प्रमाणम्, प्रतीतिनियमे संस्थाननियमः प्रयोजकः, तत्र च कारणस्वभावः प्रयोजकः इति निष्कर्षः । अतो न काप्यनुपपत्तिरिति ।

**निगमनम् :-** प्रत्यक्षबलात् सामान्यमनुगतजातिरूपं सिद्ध्यति । तच्च अवयवसंस्थानतो भिन्नं स्वाश्रयव्यावर्तकं नित्यम् । गोत्वादिसामान्यं विभु गोमहिषादिषु सर्वत्र स्वरूपसम्बन्धेन सम्बद्धमपि गवादिव्यक्तिष्वेव समवायेन वर्तमानं तत्रैव अनुगताकारप्रतीतिनियामकमिति तार्किकेषु एव एकः पक्षः । केवलं गवादिमात्रे सम्बद्धं तत्रैवानुभवात् । विन्ध्यहिमवतोः द्वित्वस्येव गोत्वादेरपि मध्यदेशासम्बन्धोपपत्तिः इत्यन्यः पक्षः । भाष्यकन्दल्यादिषु द्वितीयपक्षः आदृतः । प्रथमपक्षः आत्मतत्त्वविवेकादौ व्यक्तः । परापरभेदेन द्विधा विभक्तं सामान्यम् । गोत्वादीनां सामान्यानां यथायथमवयवसंस्थानेन कार्यकारणादिना वा अभिव्यक्तिः । द्रव्यगुणकर्मसु अनुगतायास्सत्तायास्तु व्यक्तिमात्रव्यङ्ग्यत्वम् । शाब्दव्यवहारोऽपि सामान्येनैव निर्वहति । प्राणभृन्मात्रानुबन्धिनी प्रत्यक्षपूर्विका हिताहितप्राप्तिपरिहारार्था लोकयात्रैव भिन्नासु व्यक्तिषु सामान्यव्यवस्थापिका । उक्तञ्च **न्यायकन्दलीकारैः**[2]-

**भिन्नेष्वनुगताकारा बुद्धिर्जातेर्निबन्धनम् ।**
**अस्या अभावे नैवेयं लोकयात्रा प्रवर्तते ॥** इति ।

इति समासः । निबन्धेऽस्मिन् दोषान् सन्तो विपश्चितः क्षन्तुमर्हन्ति इति शम् ।

**********

[1] पृ.सं-६७७

[2] पृ.सं-६८३

# भ्वादिगणे विशिष्टधातूनां लट्लकारे रूपपरिचयः

**आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः**

सहाचार्यः, व्याकरणविभागः

भ्वादिगणे "भू = सत्तायाम्" इत्यारभ्य ऋतेरीयङ्(३-१-२९) "ऋति=जुगुप्सायाम् पर्यन्तं १०८० संख्याकाः धातवः सन्ति । दधातीति धातुः । अत्र गणे विद्यमानेभ्यः सर्वेभ्यो धातुभ्यः कर्तरि शप्(३-१-६८) शब् विकरणप्रत्ययो प्रवर्तते । केषुचित्स्थलेषु विशिष्य कथनात् ते प्रत्ययाः भवन्ति । शप्प्रत्यये शकारस्येत्संज्ञा, तेनायं प्रत्ययः शित् भवति । अयञ्च प्रत्ययः धात्वधिकारे प्रोक्तः, अतः तिङ्शित्सार्वधातुकम्(३-४-११३) इत्यनेन सार्वधातुकसंज्ञा भवति । अत इगन्तधातुषु अस्मिन् प्रत्यये परे सार्वधातुकार्धधातुकयोः (७-३-८४) इत्यनेन गुणो भवति । यथा - (भू=सत्तायाम्) भवति, (जि = जये) जयति, सृ = गतौ सरति । हलन्तधातुष्वपि इगुपधकेषु अस्मिन् प्रत्यये परे पुगन्तलघूपधस्य च(७-३-८६) इत्यनेन गुणो भवति । यथा - (मुद = हर्षे-मुद्)मोदते, (चिती = संज्ञाने, चित्) चेतते । परस्मैपदिषु तिप्, सिप्, मिप् प्रत्ययाः पितः भवन्ति, अन्येऽपितः भवन्ति । येऽपितः ते ङितः भवन्ति - सार्वधातुकमपित्(१-२-४) इत्यनेन । ङित्त्वस्य महानुपयोगः भ्वादिप्रकरणे नास्ति । अदादिषु महानुपयोगो वर्तते। यथा - युतः, ऊर्णुतः। यु+शप्+तस्, शपः अदिप्रभृतिभ्यः शपः(२-४-७२) इत्यनेन शपः लुक्, यु+तस् इति स्थिते तसः ङित्त्वाद् क्ङिति च(१-१-५) इति निषेधात् सार्वधातुकार्धधातुकयोः(७-३-८४) इत्यनेन गुणो न भवति । एवमेव वित्तः, रुदितः इत्यादिषु तसः ङित्त्वात् इगुपधलक्षणः पुगन्तलघूपधस्य च(७-३-८६) इति गुणो न भवति। प्रायः धातुस्वरूपं तत्तद्रूपेषु विद्यते । यथा - भूधातोः रूपेषु सर्वत्र भू, भव इत्येवमानुपूर्वी दृश्यत एव । एधधातोः रूपेषु सर्वत्र एध, ऐध इति वा श्रूयते। परन्तु केषुचित् स्थलेषु रूपस्य धातोश्च वैलक्षण्यं, क्वचिद्विकरणस्य वैलक्षण्यं च दरीदृश्यते । तादृशाः धातवोऽत्र प्रदर्श्यन्ते ।

१) उर्द = माने क्रीडायाञ्च । अस्य धातोः उपधायां च(८-२-७८) इत्यनेन दीर्घे ऊर्दते ऊर्देते ऊर्दन्ते इति रूपाणि भवन्ति। एवमेव कुर्दधातोः कूर्दते, खुर्दधातोश्च खूर्दते इति भवन्ति ।

२) धातुष्वादौ षकारो भवति चेत् तस्य सकारेण विपरिणामो विद्यते । यथा - षूद = क्षरणे, षह = मर्षणे, षिध = गत्याम्, अत्र सर्वत्र धात्वादेः षः सः(६-१-६४) इत्यनेन षस्य स्थाने सो भवति। सूदते, सहते, सेधति इति रूपाणि भवन्ति ।

३) धात्वादिषु विद्यमानस्य णकारस्य नकारविपरिणामोऽवलोक्यते । यथा - णद = अव्यक्ते शब्दे - नदति, णिदि = कुत्सायाम् - निन्दति, णम = प्रह्वत्वे शब्दे च – नमति । अत्र सर्वत्र णो नः(६-१-६५) इत्यनेन णकारस्य नः भवति ।

४) क्वचित् धातोरादेशाः भवन्ति केषुचिल्लकारेषु। तदानीं क्वचिल्लकारेषु भिन्नानि रूपाणि भवन्ति। यथा -

पा = पाने - पिबति,

घ्रा = गन्धोपादाने - जिघ्रति,

ध्मा = शब्दाग्निसंयोगयोः - धमति

ष्ठा = गतिनिवृत्तौ - तिष्ठति

म्ना = अभ्यासे - मनति

दाण् = दाने - यच्छति

दृशिर् = प्रेक्षणे - पश्यति

ऋ = गतौ - ऋच्छति

सृ = गतौ - धावति

शद्लृ = शातने - शीयते

षद्लृ = विशरणगत्यवसादनेषु – सीदति पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः(७-३-७८) इत्यनेनादेशाः शपि (इत्संज्ञकशकारादौ प्रत्यये परे) प्रोक्ताः। अतः लट्, लोट्, लङ्, विधिलिङ् लकारेषु आदेशाः एव श्रूयन्ते, न तु धातुः। अवशिष्टेषु लकारेषु धातोः श्रवणं भवति।

केषुचित्स्थलेषु अन्ये विकरणप्रत्ययाः, क्वचिद् धातोः अन्ये आदेशाः, क्वचिल्लोपादयोऽपि विहिताः। तादृशानां लट्लकारे रूपाणि सम्प्रति परिशील्यन्ते ।

१) वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः(३-१-७०) - एभ्यो धातुभ्यः कर्त्रर्थे सार्वधातुके परे श्यन् वा विहितः । क्रमु = पादविक्षेपे इति धातोरनेन वा श्यनि क्रम्+य+ति इति स्थिते क्रमः परस्मैपदेषु(७-३-७६) इत्यनेन धातोः दीर्घे "क्राम्यति' इति, श्यनभावे शपि क्रामति इति भवति। शम = उपशमे इति धातुः शमादिषु वर्तते,


ISSN: 2320-740X

अतस्तस्य शमामष्टानां दीर्घः श्यनि(७-३-७४) इत्यनेन दीर्घो भवति - शाम्यति, शमति। अन्येषां धातूनां विषये नास्ति विशेषः।

२) धिन्विकृण्व्योर च(३-१-८०) - धिवि = प्रीणने, कृवि = हिंसाकरणयोः इत्युभयोः शबपवादतया उप्रत्ययो विहितः, धातोरकारोऽन्तादेशत्वेन विहितः। इमौ धातू इदितौ, अत इदितो नुम्धातोः(७-१-५८) इत्यनेन नुमागमः प्रवर्तते। धिन+ उ+ ति, कृन+ उ+ ति इति स्थिते अतो लोपः(६-५-४८) इत्यनेन अकारलोपे सार्वधातुकार्धधातुकयोः(७-३-८४) इति गुणे धिनोति, कृणोति इति रूपे भवतः।

३) अक्षोऽन्यतरस्याम्(३-१-७५) - अक्षू = व्याप्तौ इति धातोः कर्त्रर्थे सार्वधातुके परे वा श्नुप्रत्ययः विहितः। अक्ष्+ नु+ ति  तिपं निमित्तीकृत्य सार्वधातुकार्धधातुकयोः(७-३-८४) इति गुणे णत्वे अक्ष्णोति, तदभावे अक्षति इति भवति।

४) तनूकरणे तक्षः(३-१-७६) - तक्षू = तनूकरणे इति धातोः तनूकरणेऽर्थे शब्विषये वा श्नुः विहितः। तक्ष्णोति - तक्षति वा काष्ठम्। स्थूलस्य काष्ठस्य कतिपयावयवापनयनेन सूक्ष्मीकरणं तनूकरणम्। तनूकरणभिन्नार्थे तु वाग्भिः सन्तक्षति, भर्त्सयतीत्यर्थः ।

५) श्रुवः शृ च(३-१-७४) - श्रु = श्रवणे इति धातोः अनेन सूत्रेण शबपवादतया श्नुप्रत्ययः, धातोः शृ इत्यादेशोऽपि विहितः। शृ+नु+ति इति स्थिते तिपं निमित्तीकृत्य सार्वधातुकार्धधातुकयोः(७-३-८४) इति गुणे णत्वे शृणोति इति रूपं भवति।

६) दंशसञ्जस्वञ्जां शपि(६-४-२५) - दंश = दशने, षञ्ज = सङ्गे, स्वञ्ज = परिष्वङ्गे एतेषां धातूनां शपि परे नलोपो भवति। अतः दशति. सजति, स्वजते इति रूपाणि भवन्ति।

७) रञ्जेश्च(६-४-२६) - रञ्ज = रागे इति धातोः शपि नलोपो भवति। रजति - रजते इति रूपे भवतः।

८) इषुगमियमां छः(७-३-७७) = गम्लृ = गतौ, यम = उपरमे इति धातू अत्र गणे पठितौ। अनयोः शिति परे छकारो विहितः । गछ्+ अ+ ति, यछ् अ ति इति स्थिते छे च(६-१-७३) इत्यनेन तुगागमे श्चुत्वे गच्छति, यच्छति इति रूपे भवतः। इष = इच्छायाम् इति धातुः तौदादिकः शप्रत्यये परे छकारादेशे इच्छति इति रूपं भवति ।

९) रधिजभोरचि(७-१-६१) - जभी = गात्रविनामे इति धातोः अचि परे नुमागमो विहितः । अत्र धातोः शपि नुमागमे जम्भते इति रूपं भवति । इदिद्भ्यः धातुभ्यः सामान्यतः इदितो नुम्धातोः इत्यनेन नुमागमः सर्वत्र

विहितः। ईदित्वेऽपि अच्यत्र नुमागमो विशेषः। रध = हिंसासंराद्ध्योः इति धातुः दिवादिगणे वर्तते। अचि परे विधानात् लटि न भवति। लिटि अजादिप्रत्ययपरकत्वात् नुमागमे ररन्ध इति भवति ।

१०) कृपो रो लः(८-२-१८) - कृपू = सामर्थ्ये इति धातोः अनेन सूत्रेण धात्ववयवस्य रेफस्य लकारे कल्पते इति रूपं भवति ।

क्वचिद् धातोः कस्मिंश्चिल्लकारे आत्मनेपदपरस्मैपदव्यत्यययोऽपि दृश्यते। यथा -

१) द्युद्भ्यो लुङि(१-३-९१) - द्युत = दीप्तौ इति धातुः अनुदात्तेत्, अतः आत्मनेपदी भवति। लटि द्योतते इति रूपं भवति। तस्य लुङ् लकारे अनेन सूत्रेण वा परस्मैपदं विहितम्। तदा पुषादिद्युताद्यॢदितः परस्मैपदेषु इति सूत्रेण अङि अद्युतत् इति रूपं भवति। एवमेव वृतु = वर्तने इति धातोः लटि वर्तते, लुङि अवृतत् इति भवति। आत्मनेपदे अद्योतिष्ट, अवर्तिष्ट इत्येवं रूपे भवतः। -

२) वृतु धातोः लृट्लकारेऽपि विशेषो वर्तते। वृद्भ्यः स्यसनोः(१-३-९२) - वृतु धातोः स्ये सनि च वा परस्मैपदं विहितम्। अतः वर्त्स्यति इति भवति, आत्मनेपदे वर्तिष्यते इति भवति।

३) केषाञ्चिद् धातूनां लटि शुद्धधातोः प्रयोग एव भवति। यथा -
गुपूधूपविच्छिपणिपनिभ्य आयः(३-१-२८) इति सूत्रेण आयप्रत्ययो विहितः। अतः गुपू = रक्षणे इत्यस्माद् आयः, अयम् आर्धधातुको भवति, अतः लघूपधगुणः प्रवर्तते। गोपाय इत्यस्य सनाद्यन्ता धातवः(३-१-३२) इत्यनेन आयप्रत्ययान्तस्य धातुसंज्ञायां लटि शपि गोपायति इति रूपं भवति। एवमेव धूपायति, विच्छायति, पणायति, पनायति इति रूपाणि भवन्ति।

४) कमेर्णिङ्(३-१-३०) - कमु = कान्तौ (इच्छा) इति सूत्रेण कमुधातोः णिङ् प्रत्ययः प्रोक्तः। णित्त्वात् धातोः अत उपधायाः(७-२-११६) इति उपधावृद्धिः प्रवर्तते। कामि इत्यस्य सनाद्यन्ता धातवः(३-१-३२) इत्यनेन णिङ्प्रत्ययान्तस्य धातुसंज्ञायां लटि शपि गुणे अयादेशे कामयते इति रूपं भवति।

इत्थं भ्वादिगणे विद्यमानेषु धातुषु लट्लकारे विशेषांशाः सङ्ग्रहेण सङ्कलिताः ।

**********

 ISSN: 2320-740X

# शैक्षिकानुसन्धाने प्राक्कल्पनायाः स्वरूपम्

**डा. चन्द्रकान्तः**

शिक्षाशास्त्रविभागाध्यक्षः

शैक्षिकानुसन्धानप्रक्रियायाः कश्चन प्रधानस्तम्भः भवति इयं प्राक्कल्पना । शैक्षिकानुसन्धानस्य वा मनोवैज्ञानिकानुसन्धानस्य स्वरूपं प्रयोगात्मकं वा सैद्धान्तिकं भवतु वैज्ञानिकरूपेण शोधसमस्यायाः चयनानन्तरं शोधकर्ता प्राक्कल्पनां प्रतिपादयेदेव । तथा हि शोधकर्ता प्राक्कल्पनां किमर्थं प्रतिपादयेत् ? तस्याः प्राक्कल्पनाया अर्थः कः ? , स्वरूपञ्च किं भवेदिति प्रश्नः स्वभावतः समुदेति । यदा अनुसन्धाता यां कामपि समस्यां चिनोति तदा तस्याः समस्यायाः समाधानमूहितुमारभते । तच्च समाधानमस्थायि वा परीक्षणयोग्यं भवितुमर्हति । एतादृशं परीक्षणयोग्यं सम्यगूहितं समाधानमेवानुसन्धानपरिभाषायां प्राक्कल्पनेति प्रोच्यते । उदाहरणार्थं - अधिगमस्योपरि पुनर्बलनस्य प्रभावः भवति किम्? इति काचित् समस्या अनुसन्धात्रा स्वीकृता चेत् तस्याः समस्यायाः कल्पितं समाधानम् अनुसन्धानकार्यारम्भात् पूर्वमेवं भवितुमर्हति यत् पुरस्काररूपेण पुनर्बलनेन अधिगमक्रियायां वेगस्य आधिक्यं जायते, दण्डनेनाधिगमक्रियायां मन्दता समायाति इति । एतत्समाधानं परीक्षितुमेव अनुसन्धानमग्रे प्रवर्तयत्यनुसन्धाता । एतादृशं तात्कालिकमस्थायि समाधानमेव प्राक्कल्पनेति गीयते । यदि प्राक्कल्पना पुष्टीकृता भवति तर्हि सार्था सत्ययुता इत्यङ्गीक्रियते । यदि प्राक्कल्पना तिरस्कृता वा न पुष्टीकृता भवति तर्हि सा प्राक्कल्पना तिरस्कृता इत्युच्यते । तदा तत्स्थाने अन्यायाः प्राक्कल्पनायाः (विकासः) प्रतिपादनं क्रियते ।

अस्मिन् विषये शोधविशेषज्ञः मेक्ग्यूगन्महोदयः अभिप्रैति यत् द्वयोः अथवा तदधिकचराणां मध्ये सम्भावितसम्बन्धविषये परिकल्पितं परीक्ष्यं कथनमेव प्राक्कल्पना भवति इति[1] ।

करलिङ्गर-महोदयानुसारं द्वयोः चरयोः वा तदधिकचराणां मध्ये विद्यमानसम्बन्धस्यानुमानिकं कथनमेव प्राक्कल्पना भवति । प्राक्कल्पनाः सर्वदा घोषवाक्यरूपेणाभिव्यक्तीक्रियन्ते । ताश्च चराणां परस्परं सामान्यं सम्बन्धं

---

[1] A testable statement of a potential relationship between two or more variables is called hypothesis.

वा विशिष्टं सम्बन्धं प्रतिपादयन्ति इति[1] ।

❖ प्राक्कल्पनायां द्वयोः चरयोः वा तदधिकानां चराणां परस्परं सम्बन्धः प्रोच्यते । यथा – पुरस्कारदानेन अधिगमप्रक्रिया तीव्रा जायत इति । अत्र पुरस्कारः प्रथमः चरः । अधिगमः द्वितीयः चरः । अनयोर्मध्ये कश्चन सम्बन्धः प्रोच्यत इत्यर्थः ।

❖ प्राक्कल्पनायां चराणां मध्ये परीक्षणयोग्यं वा निधरिणयोग्यं किञ्चित् कथनम् अभिव्यक्तीक्रियते यच्च कथनं परीक्षणकथनम् (Testable Statement) इत्युच्यते। अस्यायमर्थः यत् चराः मापयितुं शक्यन्त इति । यथा हि उपर्युक्ते उदाहरणे पुरस्काराधिगमौ अनायासेन मापयितुं शक्यौ वर्तेते ।

❖ प्राक्कल्पनायाः मुखेन चराणां मध्ये सामान्यः वा विशिष्टः सम्बन्धः अभिव्यज्यते इति । यथा पुरस्काराधिक्येन अधिगमवेगाधिक्यं, पुरस्कारन्यूनीकरणेन अधिगमवेगस्य ह्रास इति विशिष्टः सम्बन्धः ।

**अनुसन्धानसमस्याप्राक्कल्पनयोरन्तरम्**

अनुसन्धानसमस्या द्वयोः चरयोः वा तदधिकानां चराणां मध्ये किञ्चन प्रश्नरूपं कथनं भवति । परन्तु प्राक्कल्पना द्वयोः चरयोः वा तदधिकचराणां विषये प्रस्तुतस्य प्रश्नवाक्यस्य अस्थायि वा तात्कालिकं समाधानं (Tentative Solution) वर्तते ।

अनयोः समस्याप्राक्कल्पनयोर्मध्ये बहुष्वंशेषु समानता दृश्यते । यतो हि आभ्यां द्वाभ्यामपि चराणां मध्ये विद्यमानः सम्बन्धः अभिव्यक्तीक्रियते । अपि च द्वाभ्यामप्याभ्यां शोधकार्यार्थं दिङ्निर्देशः स्पष्टतया मिलति । तथापि अनयोः अन्तरमपि विस्तृतं विद्यते । यथा प्राक्कल्पना स्वयं साक्षात् परीक्षणयोग्यं कथनं भवति तथा समस्या स्वयं परीक्षणयोग्यं कथनं न भवति । समस्या तु प्रश्नात्मकं कथनं भवति । प्राक्कल्पना उद्घोषणवाक्यरूपं भवति । समस्यायाः द्वारा चराणां मध्ये विद्यमानः क्लेशः ज्ञायते । प्राक्कल्पना तु तादृशस्य क्लेशस्य समाधानं

---

[1] A Hypothesis is a conjectural statement of the relation between two or more variables, Hypothesis Hypothesis are always in declarative sentence form and they relate either generally or specifically variables to variables.

 ISSN: 2320-740X

प्रस्तौति । एतादृशं भेदमनयोर्मध्ये दर्शयितुं शक्नुमः ।

**उत्तमप्राक्कल्पनायाः काश्चन विशेषताः -**

यदा कश्चिदनुसन्धाता काञ्चित् समस्यां प्रतिपाद्य तस्याः समाधानान्वेषणे तत्परो भवति तदा समस्यासमधानरूपेण बहवः तात्कालिकप्रस्तावाः (Tentative Propositions) पुरतः समायान्ति । शब्दान्तरेण कथनीयं चेत् समाधानरूपेण बह्व्यः प्राक्कल्पनाः निर्मिताः भविष्यन्ति । अत्र प्रश्नः प्रादुर्भवति यत् – समभिमुखीकृतासु प्राक्कल्पनासु का वा प्राक्कल्पना उत्तमा वर्तते इति निर्णयं शोधकर्ता कथं करिष्यति इत्यस्मिन् विषये मनोविज्ञानिनः महत्त्वपूर्णं दृष्टिपातमकुर्वन् यत् शोधकर्ता उत्तमां प्राक्कल्पनां चेतुं समर्थो भवेदिति । तद्यथा –

1. प्राक्कल्पना तर्कसम्मता व्यापिका मितव्ययी च भवेत् ।
2. प्राक्कल्पना परीक्षणयोग्या भवेदेव ।
3. अध्येयक्षेत्रसम्बद्धान्यप्राक्कल्पनाभिः सह अध्ययनार्थं निर्मिताः प्राक्कल्पनाः सामञ्जस्यं स्थापयेयुः ।
4. प्राक्कल्पना अध्येयक्षेत्रस्थतथ्यैः सिद्धान्तैश्च सह सम्बद्धा भवेत्।
5. प्राक्कल्पनाधारेण वास्तविकसमाधानमनुमातुं शक्यं भवेत् । प्राक्कल्पनायाः स्वरूपमपि सरलं भवेत्।
6. उपलभ्यमानैः वैज्ञानिकैः उपकरणैः परीक्षणैश्च सह प्राक्कल्पना सम्बद्धा भवेत् ।
7. प्राक्कल्पना स्पष्टा शुद्धा भ्रान्तिरहिता निर्दिष्टा च भवेत् ।

एतादृशोत्तमगुणविशिष्टायाः प्राक्कल्पनायाः बहवः प्रकाराः अपि वर्तन्ते । तेषां नामानि यथासम्भवमत्र सूच्यन्ते ।

1. चराणां सङ्ख्याधारिता प्राक्कल्पना
2. साधारणप्राक्कल्पना
3. जटिलप्राक्कल्पना
4. चराणां मध्ये विशेषसम्बन्धयुक्ता प्राक्कल्पना
5. सार्वत्रिकप्राक्कल्पना
6. अस्तित्वात्मकप्राक्कल्पना
7. विशिष्टोद्देश्याधारिता प्राक्कल्पना
8. निदानात्मकप्राक्कल्पना
9. वर्णनात्मकप्राक्कल्पना
10. कार्यात्मकप्राक्कल्पना
11. शून्यप्राक्कल्पना
12. साङ्ख्यकीयप्राक्कल्पना

इत्येवं बहवः प्रकाराः वर्तन्ते । एतेषां समेषां प्रकाराणां स्वरूपादिकं लेख्यञ्चेद् अतिविस्तारः जायेत

अथवा शोधलेख एव सम्पद्येत । अतो हेतोः अत्रैवेनं लेखमुपसंञ्जिहीर्षामि ।

**उद्धरणानि (References)**

1. Mc Guigan – Experimental Psychology- 1990-P-27
2. Kerlinger – Foundations of Behavioral Research – 1986- P-17

**सहायकग्रन्थसूची**

1. मनोविज्ञान, समाजशास्त्र तथा शिक्षा में शोध विधियाँ – अरुण कुमार सिंहः, मोतिलालबनारसीदास, बनारस्, 2011
2. शैक्षिकानुसन्धानपद्धतिः – डा. चन्द्रकान्तः, चारुल् प्रकाशन, नागपुर, 2013
3. उच्चतरशिक्षामनोविज्ञान – डा. एस्. पी. गुप्ता & डा अलका गुप्ता, शारदापुस्तकभवन, इलाहाबाद, 2010
4. शैक्षिक अनुसन्धान विधियाँ – सरीन  एवं सरीन्, विनोदपुस्तक मन्दिर – आग्रा
5. शिक्षा में क्रियात्मक अनुसन्धान – आर्. एल्. चोपडा, अग्रसेन शिक्षाप्रकशन, राजस्थान, जयपुर ।

**********

 ISSN: 2320-740X

# सुकरातीस्-वर्यस्य उज्ज्वलजीवनगाथा

**डा. रामचन्द्रुल बालाजी**

सहाचार्यः, शिक्षाविभागः

प्रपञ्चेतिहासे धीरोदात्ततया जीवनं कुर्वाणाः नैके दृश्यन्ते । परन्तु धीरोदात्ततया जीवनयापनं कृत्वा धीरोदात्ततयैव मरणं प्राप्ताः अतिविरलाः वर्तन्ते । तादृशेषु महापुरुषेषु सुकरातीस्-वर्यः अन्यतमः भवति । सुकरातीस्-वर्यस्य जीवनं कियत् उत्तेजकं भवति तावदेवोत्तेजकं तस्य मरणं भवति । अयं स्वाङ्गीकृतसिद्धान्तार्थम् आत्मनः प्राणान् तृणप्रायेण अत्यजत् ।

सुकरातीस्-वर्यः क्री.पू. ४७०तमे वर्षे एथेन्स्-नामक-नगरे जन्म लेभे । तदानीं ग्रीक्-राज्येषु एथेन्सनगरम् उच्चस्थितौ वर्तते स्म । तत्कालात् पूर्वं पश्चाच्च पार्षियन्-जनेभ्यः ग्रीक्-प्रदेशानां विमुक्त्यर्थं सञ्जातयुद्धेषु विजयं सम्प्राप्य ग्रीक्-देशेषु एथेन्स् उन्नतस्थाने भवति स्म । पेरिक्लीसनायकत्वे एथेन्स्-नगरं ग्रीक्देशीयानां राजकीय-वाणिज्य-सांस्कृतिककेन्द्ररूपेण विभाति स्म । सुकरातीस्-वर्यस्य यौवनं सर्वं पेरिक्लीसकाले एव आसीत् ।

सुकरातीस्-वर्यस्य आगमनपर्यन्तम् एथेन्सनगरे तात्त्विकचिन्तनं किञ्चिदेव भवति स्म । प्रधानतया वाणिज्यकेन्द्ररूपेणैव आसीत् । प्रथमतया अनग्जागरस् वर्यादेव एथेन्स्-नागरिकाणां तात्त्विकसंस्कारः कश्चन आगतः, परन्तु अनग्जागरस्-वर्यः एथेन्सनगरोद्भूतः नासीत् । पेरिक्लीस्-आह्वानादेव एवोनिया देशादागत्य एथेन्स्नगरे स्थिररूपेण जीवनं यापितवान् । परन्तु एथेन्स्-नगरे एव जन्म प्राप्य तत्रैव जीवनं यापयित्वा तत्रैव मरणं प्राप्तानां प्रथमतत्त्ववेत्ता सुकरातीस्-वर्यः । अनेनैव कारणेन एथेन्स्-नगरं तत्त्वज्ञानस्य प्रधानकेन्द्रमभूत् । तस्य शिष्यः प्लेटोवर्योऽपि तत्रैव जन्म प्राप्य वर्धितः । प्लेटोवर्यस्य शिष्यः अरस्तोतिलवर्यस्य तु जन्मस्थलम् एथेन्स् नास्ति चेदपि तत्रैव उषित्वा तत्त्वाध्ययनकेन्द्रमस्थापयत् । पाश्चात्यतत्त्वचिन्तने एते त्रयः मूलस्तम्भाः भवन्ति । एतानेव पाश्चात्यतत्त्वशास्त्रऋषयः इति आमनन्ति ।

सुकरातीस्-वर्यस्य पिता सोफोनिस्कारस्-वर्यः वृत्तिरीत्या शिल्पी आसीत् । माता फीनारेटी प्रसवकर्त्री आसीत् । एते अधिकधनिकाः न सन्ति चेदपि न दरिद्राः । वंशपारम्पारिकरूपेण सुकरातीस्-वर्योऽपि शिल्पकलाम्

अभ्यस्तवान् चेदपि शिल्पकलायां न तावद्रुचिः आसीत् । रेखागणित-खगोलशास्त्राध्ययनमकरोत् चेदपि मानवजीविताध्ययने एव तस्य रुचिः प्रवृद्धा ।

सुकरातीस्-वर्यस्य जीवितलक्ष्यस्य जीवनप्रकारस्य च परिवर्तयित्री एका संघटना वर्तते । एकदा स्वमित्रेण साकं डेल्फी-समीपस्थम् अपोलोदेवालयं गतवान् । तत्र अपोलोदेवता तत्रस्थेन अर्चकेन प्रश्नानां समाधानं वाचयतीति, स्वकीयवाणीं श्रावयतीति प्रतीतिः । तत्र देवालयार्चकः देववाणीद्वारा (oracle) कः भवान् ? इति पृष्टवान्, अहं सुकरातीस्, अहम् एकमेव जानामि यत् अहं किमपि न जानामि इति उत्तरमदात् सुकरात्-वर्यः । सुकरात्-वर्यस्य मित्रम् अर्चकसमीपे प्रपञ्चे महाज्ञानी कः वर्तते ? इति पृष्टे सति देववाणी अर्चकमुखात् मानवेषु सुकरातीस्-सदृशः महाज्ञानी नास्ति इति अवदत् । अनन्तरं सुकरातीस्-वर्यम् उद्दिश्य **त्वं त्वां जानीहि (Know Thyself)** इत्युक्तवान् । देववाणीं श्रुत्वा सुकरातीस्-वर्यः आश्चर्यचकितः जातः । तदारभ्य आत्मनः अपेक्षया उत्तमज्ञानिनः अन्वेषणं कृत्वा डेल्फी अर्चकवाण्यां सत्यता नास्ति इति प्रमाणयितुं सुकरातीस्-वर्यः अन्वेषणम् आरब्धवान् । तादृशः निरन्तरान्वेषणमेव तस्य मरणाय हेतुः जातः ।

प्रातः आरभ्य वीथीषु सञ्चारं कुर्वन् दृष्टैः पण्डितजनैः साकं वादं करोति स्म । तस्य वादपद्धतेरेव गतितार्किकपद्धतिः **(Dialectics)** इति नाम । अस्यां पद्धतौ प्रश्नकरणम् आगतसमाधानानामाधारेण पूर्वपक्षरूपेण पुनः प्रश्नकरणम् अनुस्यूततया भवति । अत्यन्तमेधाविनोऽपि स्वकीयवादद्वारा पराजयति । वादे कदापि तस्य अपजयः नास्ति । आत्मनः अपेक्षया महाज्ञानिनः अन्वेषणरूपजीविताशयः तस्य जन्मनि नैव पूरितः ।

**टोटि** (Toti) – इति पदं सुकरातीस्-वर्यस्य मुखे सर्वदा भवति । तस्य अर्थः भवति "*किमेतदिति*"। अयं यं कमपि उद्दिश्य नीतिं जानामि- इति चिन्तयति किल, नीतेः निर्वचनं किम्? को नाम स्नेहः ? एवं प्रेम, न्यायः, धर्मः, ज्ञानम्, सौन्दर्यं, सत्यम्, देशभक्तिः, देवता इत्यादीनां स्पष्टनिर्वचनानि पृच्छति । तस्य मते ज्ञानं नाम कस्यापि विषयस्य उचितनिर्वचनकरणमेव । *ज्ञानमेव नीतिः* (Virtue is knowledge) । नीतिं मानवः जानाति चेत् कुनीतिं परिहृत्य नैतिकजीवनं यापयितुं शक्नोतीति सुकरातीस्-वर्यः मनुते । प्रेम, स्नेहः धैर्यम् इत्यादीनां सद्गुणानां मौलिकस्वभावज्ञानेन मानवः अवश्यम् उत्तमगुणाभ्यासं करोतीति तस्य विश्वासः ।

सुकरातीस्-वर्यः आत्मानं गोमक्षिकारूपेण (Gadfly) वर्णयति । यथा गोमक्षिका दंशनेन जनान् क्रियाशीलान् करोति तद्वदेव स्वकीयप्रश्नकरणद्वारा पीडां जनयित्वा सत्यान्वेषणं कर्तुं चोदनं दातव्यम् इति भगवता

आदिष्टः इति स्वयं वदति ।

सुकरातीस्-वर्यः कुरूपी इति प्रतीतिः । अयं वामनः, स्थूलकायः, खल्वाटः, कुम्भोदरः,विशालनासिकः, उन्नतनेत्रः भवतीति वदन्ति चेदपि एनं मानवोत्तमः इति तत्समकालिकाः अनन्तरकालिकाश्च कीर्तयन्ति । एथेन्स्-नगरे तस्य अनेकशिष्याः आसन् । ते सर्वेऽपि सुकरातीस्-वर्ये प्राणाधिकरूपेण स्निह्यन्ति स्म । एते सर्वेऽपि अस्मै देशिकोत्तमः इति आदरं यच्छन्ति स्म । एते सर्वेऽपि सुकरातीस्-वर्यं पुरवीथीषु गमनवेलायाम् अनुसरन्ति । तदानीं मेधाविपुरुषेण राजकीयप्रमुखेन वा कलाकोविदेन वा साकं वादं कृत्वा अनायासेन तान् यदा पराजितान् करोति तदा शिष्याः सर्वे सन्तोषातिशयेन करतालध्वनिं कुर्वन्तः भवन्ति स्म ।

सुकरातीस्-वर्यस्य श्वस्तनविषयकचिन्ता नास्ति । इच्छया दारिद्र्यम् वृणोति स्म । सर्वकारीयोद्योगकरणेन आत्मनः विश्वस्तनीतेः तिलोदकं दातव्यं भवति इति भीत्या सर्वकारीयोद्योगे नैव प्रविष्टवान्। सः वदति भोजनार्थमेव केचन जीवन्ति, अहं तु जीवनार्थमेव भोजनं करोमीति ।

**क्रोधमुखी भार्या –** सुकरातीस्-वर्यस्य विलम्बेन विवाहः जातः । भार्यायाः नाम जान्तिप्पी । इयं सर्वदा क्रोधमुखी भवति इति प्रतीतिः । भर्तारं सर्वदा दूषयति स्म । अस्मिन् विषये तस्याः दोषः नास्ति यतो हि भर्तुः उद्योगहीनस्थितिं गृहस्य पालनविषये निर्विकारञ्च दृष्ट्वा का वा क्रुद्धा न भवति ? सुकरातीस्-वर्यः अत एव अधिकतया गृहे नैव भवति स्म । देवालयसोपानस्योपरि वा चतुर्विधमार्गमेलनप्रदेशे वा जीवितसत्यानां निर्वचनं कुर्वन् वादं कुर्वन् अन्येषां मतस्य खण्डनं कुर्वन् दिनं यापयति स्म । यः कोऽपि आह्वयति चेत् तेन साकं गत्वा सुष्ठु भोजनं करोति, नास्ति चेत् निर्विचारम् उपवासदीक्षां वहति स्म ।

सुकरातीस् वर्यस्य एकं प्राचीनकञ्चुकं (Old Coat) भवति स्म । शीतकाले ग्रीष्मकाले वा तदेव धरति स्म । अन्तः युतकमपि नैव भवति । पादत्राणमपि नैव भवति । स्थितप्रज्ञस्य निर्वचनमूर्तिवत् भवति । सुकरातीस्-वर्यः कञ्चित्कालं सैनिकरूपेण कार्यम् अकरोत् । तदानीम् अत्यन्तशीतकाले हिमपातसमये सैनिकाः सम्पूर्णदेहस्योपरि वस्त्राणि धृत्वा विशिष्टपादत्राणानि धृत्वापि च अत्यन्तक्लेशेन चलनं कुर्वन्तः भवन्ति तदानीमपि अयं छिद्रकञ्चुकमात्रं धृत्वा अनायासेन हिमखण्डानामुपरि बहुदूरं चलनं करोति स्म ।

**ध्यान-समाधिः –** मध्ये मध्ये सुकरातीस्-वर्यः ध्यान-समाधिसदृशस्थितिं प्राप्नोति स्म । कदाचित्

ग्रामात् बहिः एकस्मिन् शुभोदये एकत्र अकस्मात् सुकरातीस्-वर्यः स्तगितः, तत्रैव बहुकालं तिष्ठन् आसीत् । कामपि जटिलसमस्यां चिन्तयन् बहुकालपर्यन्तं स्थाणुवत् स्थितः आसीत् । एतत् दृश्यं दृष्ट्वा बहवो हि जनाः समवेताः आसन् । एवमेव आरात्रं जनाः कदा सुकरातीस्-वर्यः जागरितः भवतीति प्रतीक्षायाम् आसन् परन्तु द्वितीये दिने समाधिस्थितितः जागरणं प्राप्य तत्रस्थान् जनान् अपश्यन्नेव येन केनापि साकं भाषणं विना स्वकीयमार्गे गतवान् । एतादृशसंघटनानि तस्य जीवने बहूनि आसन् ।

सुकरातीस्-वर्यः स्वकीयभावान् ग्रन्थस्थान् नाकरोत् । एतत् कार्यं तच्छिष्येण प्लेटोमहोदयेन साधितम् । प्लेटोवर्यः स्वकीयगुरोः भावान् जीवितविशेषांश्च ग्रन्थस्थान् अकरोत् । प्लेटोमहोदयः एकः उत्तमरचयिताऽसीत् । अयं संवादाः (Dialogues) इति प्रक्रियां स्वीकृत्य स्वगुरोः भावानां भाविजनेभ्यः सम्प्रेषणाय प्रयत्नमकरोत् ।

सुकरातीस्-वर्यस्य जीवितविशेषज्ञापकमुख्यसंवादाः ***चत्वारः*** प्रसिद्धाः वर्तन्ते ।

१) **सिम्पोजियम्** (Symposium) – अस्मिन् अगातननामक विषादान्तनाटककवेः गृहे सञ्जाते उपाहारसन्दर्भे जातायां रसवद्गोष्ठ्यां सुकरातीस्-वर्येण प्रेम, सत्यम्, शिवम्, सुन्दरम् इत्यादिविषयान् उद्दिश्य प्रकटिताभिप्रायाः सङ्कलिताः ।

२) **अपोलजी** (Apology) – अस्मिन् सुकरातीस्-वर्यः आत्मनः उपरि आगतानामभियोगानां कृते समाधानानि वदति ।

३) **क्रिटो** (Krito) – अस्मिन् मरणदण्डनस्य निर्णयानन्तरं सुकरातीस् वर्यस्य केनचित् प्रियशिष्येण क्रिटोनामकेन देशान्तरपलायनं भवत्विति सूचनादानं, सुकरातीस् वर्यस्य निराकरणञ्च वर्णितम् भवति ।

४) **फीडो** (Fheedo) – अस्मिन् सुकरातीस्-वर्यस्य मरणसन्निवेशः वर्णितः । इदं वर्णनं विषादान्तकाव्यस्थाय्यां भवति । अस्मिन् सुकरातीस्-वर्यस्य धीरोदात्तव्यक्तित्वम् अद्भूतरूपेण आविष्कृतं भवति ।

**सुकरातीस्-वर्यस्योपरि मेधाविनां द्वेषस्य कारणम् –** सुकरातीस्-वर्यः वादप्रियः । सः आदौ अन्यान् उद्दिश्य एकस्मिन् विषये भवतः अभिप्रायः कः इति पृच्छति, तेषाम् अभिप्रायकथनानन्तरम् तस्योपरि पूर्वपक्षं कृत्वा तस्य कथनं सम्यक् नास्ति इति प्रतिपादयति । परन्तु तद्विषये स्वकीयनिर्वचनं न वदति किमुत, यदि अहमेव

निर्वचनं जानामि, भवन्तं किमर्थं पृच्छामीति वितण्डवादं करोति । वस्तुतः सुकरातीस्-वर्यः महाविज्ञानी वर्तते । इतरेभ्यः अभिप्रायान् स्वीकृत्य इतोऽपि सत्यान्वेषणं कारयितुम् इयं वादप्रक्रिया अवलम्बिताऽनेन । एतद् एकं द्वेषस्य कारणम् ।

सुकरातीस्-विषये एथेन्सनगरराजकीयनायकानां केषाञ्चन पौराणामपि द्वेषः वर्तते । तस्य कारणम् अयम् एथेन्स्-नगराराध्यदेवताः ***ओलिम्पियन्*** देवताः उद्दिश्य विमर्शनं करोति । अनेन अयं नास्तिक इति नाम आगतम् । वस्तुतः सुकरातीस्-वर्यः नास्तिकः नास्ति । देवः एकः एव भवति, आत्मा अनश्वरं भवतीति विश्वासं वहति स्म । परन्तु तदानीन्तनधार्मिकविश्वासानां एतद्विरुद्धं भवतीति बहूनामयं द्वेष्यः जातः ।

प्रधानतया तदानीन्तनप्रजातन्त्रव्यवस्थायाः अयं व्यतिरेकी आसीत् । प्रजातन्त्रं समूहबलस्योपरि आधारितं भवतीत्यतः तस्यां सम्यग्विचिन्त्य निर्णयः नैव भवति, केवलम् उद्रेकपूरिताविवेकनिर्णयमात्रं भवितुमर्हति इति अस्य विश्वासः ।

क्री.पू. ३९९ तमे वर्षे एथेन्स्-नगराराध्यदेवतानां निराकरणम्, एथेन्स्-नगरयुवकान् कलुषितान् करोतीति दोषद्वयकारणात् सुकरातीसवर्यः अपराधी इत्यतः अस्य मरणदण्डनं भवत्विति निर्णयः जातः ।

सुकरातीस्-वर्यस्योपरि प्रथमतया अभियोगम् अनीटस्-वर्यः आनीतवान् । अयम् एथेन्स्-नगरे नूतनतया अधिकारं प्रति आगतः प्रजातन्त्रसर्वकारीयनायकः । तस्य पुत्रः सुकरातीस्-वर्यशिष्येषु अन्यतमः । सः पितरम् एव तिरस्कृतवान् । अतः अनीटस्-वर्यस्य सुकरातीस्-वर्यस्योपरि द्वेषः अतिशयः जातः । पञ्चशतनिर्णायकन्यायस्थाने अन्तिमः न्यायनिर्णयः जातः । तत्र २८०सदस्याः सुकरातीस्-वर्यस्य मरणदण्डनं भवतु इति २२०सदस्याः अयं निर्दोषी इति अभिप्रायमदुः । अन्तिमे मरणदण्डनस्य निर्णयः जातः । हेमलाकनामकविषपानेन मरणदण्डनं भवितव्यमिति निर्णयः जातः ।

**स्वच्छन्दतया मरणदण्डनम् -** तदानीन्तनएथेन्स्-नगरनियमानुसारं मरणदण्डनप्राप्तजनैः अन्यद्दण्डनं प्रार्थयितुम् अवकाशः वर्तते । उदाहरणार्थं – सुकरातीस्-वर्यः कारागारदण्डनम्, अपराधशुल्कं दत्त्वा विमोचनप्राप्तिः, अथवा देशान्तरगमनं वा प्रार्थयितुम् अवकाशः वर्तते परन्तु सुकरातीस्-वर्यः स्वेच्छापूर्वकमेव मरणदण्डनं स्वीकृतवान् । साधारणतया न्यायस्थाने मरणदण्डनं प्राप्तवन्तः स्वकीयसन्ततिं प्रदर्श्य दयाभिक्षां

याचितुमर्हन्ति, परन्तु तादृशनीचपद्धतिं नानुसरामि इति स्थैर्येण अवोचत् ।

सुकरातीस्-वर्यस्य चिन्तने मृत्युः नाम चैतन्यरहितशून्यस्थितिः । अथवा जीवात्मनः इहलोकात् परलोकपर्यन्तं प्रयाणम् । उभयथापि मृत्युः वाञ्छनीयः एवेति सुकरातीस् वर्यः वदति।

न्यायस्थाने मरणदण्डनिर्णयादनन्तरं तस्य कार्यान्वयः झटिति नैव जातः । तदानीं ग्रीक्-देशे एकमासात्मकपर्वदिनानि आसन्, इत्यतः रक्तपातेन न भवितव्यम् इति एकमासं यावत् कारागृहे यापनं कर्तव्यम् आपतितम् वर्यस्य । तदानीं सुकरातीस्-वर्यस्य मित्राणि श्रेयोऽभिलाषिणः च कारागृहात् बहिरानेतुं बहुविधमार्गाः वर्तन्ते इत्यतः तत्प्रयत्नं कर्तुं सुकरातीस्-वर्यस्य अङ्गीकारार्थं बहुप्रयत्नं कृतवन्तः । परन्तु सुकरातीस्-वर्यः अहं कैश्चित् सिद्धान्तैः नियमैः च बद्धः अस्मि इत्याह । तेषाम् एव प्रचारं कृतवान् । तत्कारणादेव मरणदण्डः विहितः वर्तते । अधुना प्राणानामुपरि प्रीत्या अहं दण्डनात् पलायनं करोमि चेत् मम सिद्धान्तानाम् उल्लङ्घनं भवति । तदपेक्षया मरणमेव वरमिति वदति ।

सः सूर्यास्तमयसमयः । कारागृहे सुकरातीस् वर्यः स्वकीयमित्रं क्रिटोवर्यमुद्दिश्य विषपात्रं सिद्धं चेत् शीघ्रतया आनयनाय भृत्यं सूचयतु इति वदति । कञ्चित्कालानन्तरं भृत्यः विषपात्रम् आनयति । तत्र विद्यमानकारागृहपालकस्य सूचनानुसारं विषपात्रं स्वीकृत्य मम परलोकयात्रा सुखमयी भवेदिति प्रार्थनां कृत्वा निर्भयतया मन्दहासपूर्वकं विषमपिबत् । तदानीं तत्रस्थानां मित्राणां रोदनं श्रुत्वा “मानवेन निश्चलचित्तेन प्रशान्ततया मरणं प्राप्तव्यम् इति ज्येष्ठाः वदन्ति । अतः धैर्येण भवन्तु” इति अवोचत् । विषपानानन्तरं यदा कटिपर्यन्तं विषप्रभावः जातः तदानीं सुकरातीस्-वर्यं स्वकीयमित्रं क्रिटोवर्यम् आहूय वदति अहं कदाचित् मम प्राणरक्षिकायै एनकीपिपस् देवतायै एकं कुक्कुटं दातुं सङ्कल्पितवान्, तद्ददाति वा – इति पृच्छति । एवमेव इतोऽपि किमपि वक्तव्यमस्ति वा – इति यदा पृच्छति, तदानीं निरुत्तरः निश्चलः सञ्जातः । एवं महाज्ञानिनः न्यायनिरतस्य उत्तमव्यक्तेः सुकरातीस्-वर्यस्य अस्तमयः जातः ।

**********

# नित्यकर्मणां मोक्षोपयोगित्वविमर्शः

**डा. गणेश ईश्वर भट्टः**

सहायकाचार्यः, अद्वैतवेदान्तविभागाध्यक्षः

**नित्यादिशुद्धचित्तो यद्ब्रह्म जिज्ञासते पुमान् ।**

**भारतीतीर्थहृत्पद्मवासं तं शङ्करं नुमः ॥**

सर्वकर्मसन्यासपूर्वकात् ब्रह्मात्मैक्यज्ञानादेव मोक्षः लभ्यते, न कर्मभ्यः न वा ज्ञानकर्मसमुच्चयात् इति वेदान्तानां सिद्धान्तः। अत्र केचिदेवं वदन्ति – सर्वकर्मसन्यासो नोपपद्यते, नित्यकर्मणाम् अवश्यानुष्ठेयत्वात्, तेषां त्यागे प्रत्यवायोत्पत्तिप्रसङ्गात् । यदि कर्मणां मोक्षसाधनत्वाभावेऽपि तानि अवश्यमनुष्ठेयानि, तर्हि अनिर्मोक्षप्रसङ्गः, कर्मफलानाम् अवश्यं भोक्तव्यतया स्थितत्वात् इति शङ्का स्यात् । तत्रोच्यते- मोक्षस्य नित्यत्वात् अयत्नसिद्धत्वाच्च नास्त्यनिर्मोक्षप्रसङ्गः । मोक्षप्राप्तिश्च एवं निरूपिता-

**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।**

**नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ॥**[1] इति ।

अयमर्थः- मोक्षो नाम बन्धनिवृत्तिः । बन्धः कर्मप्रयुक्तः । अतः मुमुक्षुणा कर्माभावः सम्पादनीयः । स च इत्थम्- काम्यं प्रतिषिद्धं च कर्म इष्टानिष्टरूपं फलं जनयतः । अतः मुमुक्षुः रागं न कुर्यात्, काम्ये कर्मणि च न प्रवर्तेत । प्रतिषिद्धं चापि न कुर्यात् । किन्तु नित्यं नैमित्तिकं च कुर्यात् । अन्यथा तयोः अकरणे उत्पद्यमानः प्रत्यवायः अनिष्टं जनयति । अतः नित्यादीनाम् अनुष्ठाने सति प्रत्यवायस्याप्यभावात् वर्तमानजन्मसमाप्तौ पुनः कर्मफलस्य अभावे सति ज्ञानं विनैव मोक्षः सिद्ध्यति ।

तथापि अतीतानेकजन्मसञ्चितानाम् अनारब्धफलानां कर्मणां सत्त्वात् तेषां क्षयः कथमिति चेत् उच्यते नित्यकर्मणाम् अनुष्ठानं तेषां फलं क्षपयति । नित्यकर्मणां फलाभावेऽपि आयासबहुलानि तानि कर्तव्यानि । तदानीं जायमानेन आयासेन पूर्वकृतकर्मणां फलं भुक्तं भवति । अथवा यथा प्रायश्चित्तानि पूर्वोपात्तदुरितक्षयार्थानि तथैव नित्यान्यपि भवितुमर्हन्ति ।

---

[1] श्लोकवार्त्तिकम् १-१-५-११०

उच्यते- **तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[1] इति श्रुतेः मोक्षं प्रति ज्ञानातिरिक्तः नास्ति कश्चिदुपायः । अस्मिन्नर्थे सन्ति अन्यानि बहूनि श्रुतिस्मृतिपुराणवाक्यानि । यश्च अनारब्धफलानां कर्मणां क्षयप्रकारः उक्तः सः अनुपपन्नः । यतः प्रतिषिद्धकर्मणाम् अशास्त्रीयत्वेन शास्त्रीयेन नित्यकर्मणा विरोधात् भवेन्नाम प्रतिषिद्धकर्मफलनिवृत्तिः । किन्तु सञ्चितानां पुण्यानामपि सत्त्वात् तेषां च नित्यकर्मभिः विरोधाभावात् कथं तेषां निवृत्तिः? न हि विरोधाभावे निवर्त्यनिवर्तकभाव उपपद्यते । अपि च रागादीनाम् अकरणं ज्ञानं विना न सम्भवति, ज्ञानाभावे अनुवर्तमानाज्ञानप्रभवानां रागादीनां वारणासम्भवात् । उक्तं च भष्ये **सुनिपुणानामपि सूक्ष्मापराधदर्शनात्**[2] इति । अपि च नित्यकर्माणि न निष्फलानि, श्रुतिस्मृत्योः तेषां फलवत्त्वनिर्देशात् । यथा **वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते**[3] इति ।

वस्तुतस्तु, प्रायणकाले अभिव्यक्तं कर्मैव अग्रे स्वफलदानाय प्रवर्तते, यद्धि प्रारब्धकर्मेत्युच्यते । कर्मणां फलदातृत्वरीतिरियम् – प्रारब्धकर्मसमाप्तौ सञ्चितकर्मणां मध्ये यत् बलवत् कर्म तत् स्वफलदानाय अङ्कुरीभूय वर्तमानदेहपाते नूतनं देहमारभते, अन्यानि दुर्बलकर्मणि तथैव सुप्तानि तिष्ठन्ति । तथा च स्मृतिः-

**कदाचित् सुकृतं कर्म कूटस्थमिह तिष्ठति ।**

**मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते ॥**[4] इति ।

अतः सुखं दुःखं वा यदिह जन्मनि अनुभूयते, तत् प्रारब्धकर्मण एव फलम् । अतः नित्यानुष्ठानेन सञ्चितकर्मफलं भुक्तं न भवति । तदा अन्यकर्मारब्धदेहे अन्यकर्मफलं भुक्तं स्यात् । तदा अग्निहोत्रकर्मारब्धे स्वर्गफल अनुभूयमाने नरकादिदुःखमपि प्राप्येत । अपि च दुरितफलानि अनेकानि अनेकविधानि अनेकनिमित्तपूर्वकाणि । तेषां सर्वेषां नित्यकर्मजन्य आयास एव समानं फलं भवितुं नार्हति । अन्यथा शिरसा पाषणवहनादिजन्यं रोगादिजन्यं च दुःखं प्राक्कृतदुरितानां फलं न स्यात् । तत् सुकृतफलं तु नैव भवति । किञ्च, अनारब्धफलानां कर्मणां क्षये उपपादनीये

---

[1] श्वेताश्वतरोपनिषत् ३-८

[2] ब्रह्मसूत्रभाष्यम् ४-३-५

[3] गौतमधर्मसूत्रम् २-२-२९

[4] मोक्षधर्मपर्व २९०-१८


ISSN: 2320-740X

नित्यानुष्ठानेन क्षय इति कथनम् असङ्गतम् । यतः नित्यानुष्ठानजन्य आयासस्तु कस्यचित् प्रारब्धकर्मण एव फलम्। यदि प्राचीनदुरितेषु प्रसूतफलम् अप्रसूतफलं चेति विशेषम् अनङ्गीकृत्य सर्वमपि प्रसूतफलमेव इत्युच्यते, तर्हि नित्यानुष्ठानजन्यदुःखम् अनारब्धफलानां कर्मणां फलमिति विशेषः अपि नोपपद्यते । अपि चास्मिन् पक्षे नित्यकर्मविधिः अनर्थकः स्यात् । यतः आरब्धफलानां कर्मणां भोगेनैव क्षयसम्भवात् तेषां क्षपणाय नित्यानुष्ठानं नापेक्षितम् । अपि च व्यायामगमनादिना अपि किञ्चित् दुःखं जायते । तद्यदि अन्यस्य दुरितस्य फलमिति नोच्यते, तर्हि नित्यानुष्ठानजन्यं दुःखम् अनारब्धकर्मफलमिति कल्पनमपि अयुक्तम् । यच्चोक्तं प्रायश्चित्तवत् नित्यानि दुरितक्षयकारणानि इति, तदप्ययुक्तम् । प्रायश्चित्ते हि पापकर्म निमित्तम् । नित्यकर्मणि तु जीवनादिकं निमित्तम् । एवं सति यदि प्रायश्चित्तानुष्ठानजन्यं दुःखम् स्वनिमित्तपापकर्मणः फलम्, तर्हि नित्यं कर्मापि स्वनिमित्तभूतजीवनादेरेव फलं स्यात् । अतः नित्यानुष्ठानायासजन्यं दुःखम् अनारब्धफलस्य कर्मणः फलं न भवितुमर्हति ।

अपि च काम्यस्य नित्यस्य चाग्निहोत्रस्य अनुष्ठानजन्य आयासः समानः । तदा नित्यानुष्ठानजन्य आयासः प्राचीनदुरितफलम्, न काम्याग्निहोत्रजन्य इति विशेषे नास्ति कश्चित् हेतुः । अन्यथा काम्याग्निहोत्रजन्य आयासोऽपि प्राचीनदुरितफलं स्यात् । नित्यानां निष्फलानि इति कथनमप्ययुक्तम्, विधानादेव तेषां सफलत्वावगमात्, नित्यानि सफलानि विहितत्वात् काम्यवत् इति । किञ्च प्रागुक्तपक्षाङ्गीकारे नित्यानि निष्फलानि प्राचीनदुरितफलानि चेति परस्परविरोधः । अपि च काम्याग्निहोत्रे अनुष्ठीयमाने नित्यमपि तन्त्रेण अनुष्ठितं भवति । तथा सति नित्ये अनुष्ठीयमाने तदायासेन काम्यस्यापि फलमुपक्षीणं स्यात् । यदि काम्यस्य स्वर्गादिकम् अन्यदेव फलम् अस्तीत्युच्यते, तर्हि तन्त्रेण अनुष्ठानेऽपि नित्यानुष्ठानजन्यायासातिरिक्तः काम्यानुष्ठानजन्य आयासः अस्तीति कल्पनीयं स्यात् । न च तथा दृश्यते । किञ्च भोजनमर्दनादि यत् लौकिकं शास्त्रेण अविहितं कर्म, तस्यैव कर्मानुष्ठानसमनन्तरमेव फलं जायते । यत्तु शास्त्रेण विहितं प्रतिषिद्धं वा कर्म तत् न अनुष्ठानानन्तरफलम् । यदि तथा स्यात् तर्हि स्वयमेव जनाः अग्निहोत्रादिषु प्रवर्तेरन्निति तत्र शास्त्रचोदना न स्यात् । अपि च कारणविशेषाभावे अग्निहोत्रानुष्ठानस्य साम्येऽपि काम्यमेव स्वर्गादिमहाफलम्, नित्यं तु प्राचीनदुरितफलम् इति विभागः अयुक्तः । फलकामित्वं विहाय अङ्गेतिकर्तव्यतादिविषये नित्यकाम्याग्निहोत्रयोः नास्ति कश्चित् विशेषः । किञ्च एवंविधकर्माभावसम्पादने न किञ्चित् शास्त्रप्रमाणमस्ति। मोक्षार्थी काम्यवर्जं नित्यनैमित्तिके कुर्यात् इति वचनं तु नास्त्येव । केवलं स्वमनीषया इदं तर्क्यते । तस्मात् नित्यकर्मानुष्ठानस्य प्राचिनकर्मफलक्षेपकत्वम् अयुक्तम् । तथा

च अशेषतः कर्मणां तद्धेतूनां रागादीनां च क्षयः कामकर्महेतुभूताविद्यानिवृत्त्यैव सम्भवति । अविद्यानिवृत्तिश्च ज्ञानेनैव ।

अपि च नित्यनैमित्तिकानाम् अनुष्ठानस्य फलं केवलं प्रत्यवायानुत्पादः, न तु तेषां फलान्तरमस्ति इति कथनम् अयुक्तम् । तयोः अनुष्ठानम् आनुषङ्गिकम् अन्यदपि फलं जनयति । यथोक्तम् आपस्तम्बाचार्यैः **तद्यथा आम्रे फलार्थे निर्मिते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणम् अर्थकामौ अनूत्पद्येते**[1] इति । नित्यानाम् अकरणं प्रत्यवायं जनयति इत्यपि अयुक्तम्, प्रत्यवायस्य भावरूपत्वात्, अकरणस्य अभावरूपत्वात्, अभावाद् भावोत्पत्तेः असम्भवात् । श्रुतिश्च **कथमसतः सज्जायेत**[2] इति ।

अत्राशङ्का- अकरणस्य प्रत्यवायजनकत्वं स्मृत्या अवगम्यते । तथा च स्मृतिः-

**अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति ॥**[3] इति ।

अत्र अकुर्वन् इति शतृप्रत्ययान्तस्य पदस्य प्रयोगात् अकरणस्य पतनहेतुत्वं ज्ञायते, हेतौ शतृप्रत्ययस्य विधानात् इति । उच्यते- अभावस्य भावहेतुत्वासम्भवात् प्राक्कृतानि पापान्येव प्रत्यवायशव्दवाच्यस्य दुःखस्य हेतवः । नित्यानाम् अकरणं तु प्राप्स्यमानस्य दुःखस्य ज्ञापकम् । काले नित्यकर्मणाम् अननुष्ठानं पुरुषस्य अग्रे दुःखं भविष्यति इति ज्ञापयति । अतः अत्र शतृप्रत्ययः ज्ञापनार्थे प्रयुक्तः, हेतौ इव ज्ञापकेऽपि शतृप्रत्ययस्य विधानात् । तथा च पाणिनीयं सूत्रम् **लक्षणहेत्वोः क्रियायाः**[4] इति । क्रियायाः ज्ञापके हेतौ चार्थे वर्तमानाद् धातोः शतृशानचौ भवतः इति तदर्थः । तत्र पश्यन् मुच्यते इत्यत्र हेतौ प्रत्ययः । शयाना भुञ्जते यवना इत्यत्र ज्ञापके प्रत्ययः । एवमेव प्रकृते अकुर्वन् इति पदे शतृप्रत्ययः ज्ञापनार्थे इति न किञ्चिदनुपपन्नम् । उक्तं च

**स्वकाले यदकुर्वंस्तत् करोत्यन्यदचेतनः । प्रत्यवायोऽपि तेन स्यान्नाभावेन स जायते ॥**[5] इति ।

अत्र प्रश्नः- अभावस्यापि हेतुत्वं वक्तव्यमेव । अत एव अकरणस्य प्रत्यवायलक्षणहेतुत्वं त्वयाऽपि स्वीकृतम् । भाट्टाः अनुपलब्धेः अभावप्रमाहेतुत्वं वदन्ति । तेनापि उपलब्धेः अभावस्य हेतुत्वमुक्तं भवति ।

---

[1] आपस्तम्बधर्मसूत्रम् १-७-२३

[2] छन्दोग्योपनिषत् ६-२-२

[3] मनुस्मृतिः ११-४४

[4] पाणिनीयसूत्रम् ३-२-१२३

[5] तन्त्रवार्तिकम्

 ISSN: 2320-740X

तार्किकाः प्रतिबन्धकाभावस्य कार्यसामान्यहेतुत्वम् इच्छन्ति । उक्तमपि **भावो यथा तथाऽभावः कारणं कार्यवन्मतः**[1] इति । तथा च कथं न अभावस्य हेतुत्वमिति । उच्यते- अस्माभिः अकरणस्य प्रत्यवायज्ञापकत्वं नोच्यते, किन्तु तज्ज्ञानस्य । तावता अकरणज्ञानस्य प्रत्यवायजनकत्वं नायाति । यदि तथा स्यात्, तर्हि अकरणाज्ञाने प्रत्यवायः नोत्पद्येत । तथा च अस्मन्मते अभावस्य हेतुत्वं नापद्यते । अनुपलब्धिस्थलेऽपि तज्ज्ञानम् अभावप्रमितिहेतुः । यदि अनुपलब्धिः सत्तामात्रेण प्रमां जनयेत्, तर्हि तज्जन्यज्ञानस्य प्रत्यक्षत्वापत्तिः, ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति तल्लक्षणात् । यच्च तार्किकैः प्रतिबन्धकाभावस्य कार्यसामान्यहेतुत्वम् उच्यते, तदयुक्तम्, अन्योन्याश्रयप्रसङ्गात् । कस्यचित् प्रतिबन्धकत्वे ज्ञाते सति तेन कार्यानुत्पत्तिः ज्ञायते, कार्यानुत्पत्तौ सत्यां तस्य प्रतिबन्धकत्वज्ञानम् इति अन्योन्याश्रयः स्फुटः । यच्च प्रागभावस्य कार्यहेतुत्वम् उच्यते, तत्रापि प्रागभावज्ञानस्य हेतुत्वम् । यस्मात् इदं प्राङ्नासीत् तस्मादिदं जातमिति प्रागभावः ज्ञाततया स्वजन्यज्ञापकः । एवं कुत्रापि अभावस्य हेतुत्वं नास्ति इति नित्याकरणं ज्ञापकं न तु कारकमिति सुस्थम् । फलं तु नित्यकर्मणां पुण्यलोकप्राप्तिः, **सर्व एते पुण्यलोका भवन्ति**[2] इति श्रुतेः । निष्कामस्य तु चित्तशुद्धिरेव फलम् । अतः नित्याद्यनुष्ठानात् काम्यादिवर्जनाच्च कैवल्यमिति पक्षः असाधुः । कैवल्यं तु ज्ञानादेव इति शम् ।

*********

[1] न्यायकुसुमाञ्जलिः १-१०

[2] छन्दोग्योपनिषत् २-२३-१

ISSN: 2320-740X 

# आध्यात्मयोगयोः परिणामः – एकं समीक्षणम्

**डा. हरिप्रसादः के.**

सहायकाचार्यः, शिक्षाविभागः

आधुनिके प्रपञ्चे भारतस्य साम्प्रतिकप्रधानमन्त्रिणः माननीयस्य नरेन्द्रमोदिवर्यस्य प्रयासेन राजनैतिकदृष्ट्या अत्यन्तं व्यापकतया योगस्य स्वीकृतिरभवत् इति सर्वे वयं जानीमः । योगस्य राजनैतिकस्वीकृतिः जगतीतले अत्यन्तं व्यापकं प्रभावं अजनयदिति पार्थक्येन वक्तव्यं नास्ति । यद्यपि सनातनधर्मावलम्बिनः जगतीतले बहुषु देशेषु व्यापृताः सन्ति तथापि १७० सङ्ख्याकेभ्योऽप्यधिकदेशेषु योगविषये तत्तद्देशस्य राजनेतारः अङ्ग्यकार्षुरिति अत्यन्तं प्रमोदस्य विषयः । योगस्य महिमानं ते सर्वेऽपि देशाः (तत्तद्देशस्य राजनेतारः) अज्ञासिषुरित्यतः तेषां अङ्गीकृतिः अन्ताराष्ट्रिययोगदिवसस्य विषये समपादीति प्रतिभासते। किन्तु योगस्य विषये पाश्चात्त्यदेशेषु स्वामिनः विवेकानन्दादारभ्य अद्यावधि सहस्रादप्यधिकाः योगिनः पाश्चात्त्यदेशेषु गत्वा प्रचारमकार्षुः । तस्मात् कारणात् योगविषये तेषु स्वाभाविकानुरक्तिः समुत्पन्ना वर्तते । किन्तु आश्चर्यस्य विषयः अयमस्ति यत् ओंकारमपि उच्चारयितुं ये निराकुर्वन्ति तादृशानां महम्मदीयानां देशाः अपि योगस्य प्रभावं अवगत्य तत्र आदरं प्रकटयन्तः सन्तीति । महम्मदीयानां तु तदीयमतसिद्धान्तविषये अप्रतिहता श्रद्धा भवतीत्यतः तदीयमतं सर्वेषु विषयेषु सनातनधर्मविरुद्धम् अस्तीत्यतश्च ते कथं वा योगमङ्ग्यकार्षुरिति आश्चर्यस्य बीजमस्ति ।

पाश्चात्यानां प्रवृत्तिः प्रायः आधिक्येन वैज्ञानिकरीत्या प्रमाणीकृतविषयेषु एव भवति । योगस्य प्रभावस्तु विज्ञानेन परीक्षितुं अशक्यः अस्ति । तथापि योगस्य चरमावस्थायाः परीक्षणं विज्ञानस्य परीक्षणतन्त्राद्बहिर्भवति चेदपि प्राथमिकाङ्गानां प्रभावस्य परीक्षणं कर्तुं पाश्चात्त्यवैज्ञानिकसमवायेन यन्त्राणि आविष्कृतान्येव सन्ति । एतद्बलेन ते योगस्य समाध्यन्ताङ्गानां प्रभावस्य विषये विश्वासं धारयितुं प्रवृत्ताः समवलोक्यन्ते । अत एव नरेन्द्रमोदिवर्याणां प्रस्तावः संयुक्तराष्ट्रसङ्घे पारित इति प्रतीयते ।

भगवतः विषये श्रद्धावन्तोऽपि पाश्चात्यजनाः भगवता सृष्टमिदं जगत् मानवस्य भोगाय एव इति मन्यन्ते । तदीयमतग्रन्था अपि तथैव प्रतिपादयन्ति । अतः जगत्यस्मिन् भौतिकसुखमेव परमसुखमिति मन्वानाः तत्प्राप्त्युपायानां विषये चिन्तयन्तः तत्साधयितुं प्रवर्तमाना दरीदृश्यन्ते । योगात् तु शरीरस्वास्थ्यादिप्रापञ्चिकं सुखं

 ISSN: 2320-740X

प्राप्यते इत्यतः तेषां पाश्चात्यानां स्वाभाविकी प्रवृत्तिः तस्मिन् उत्पद्यते इति निश्चप्रचम् ।

किमपि वा भवतु भारते तु योगदिवसविषये समग्रजगतः प्रतिक्रियामवलोक्य जनेषु योगप्रवृत्तिः जागरिता, विकसिता, प्रसृता चाभवत् इति ज्ञायते । तत्फलत्वेनैव सामान्यनागरकेभ्यः आरभ्य विश्वविद्यालयीयप्राध्यापकपर्यन्तमपि योगविषयकचिन्तनं कुर्वाणाः सन्ति । विश्वविद्यालयीयप्राध्यापकानां कृते सञ्चाल्यमानेषु पुनश्चर्यापाठ्यक्रमेष्वपि एतादृशविषयं केन्द्रीकृत्य बोधनं कर्तुम् आरम्भः कृत इति भारतस्य भाग्योदयस्य विषयः । यद्यपि ज्ञानात्मकदृष्ट्या समाजस्य श्रेष्ठकोटिषु विश्वविद्यालयीयप्राध्यापकाः अन्तर्भवन्तीति तथापि ते योगविषये नैतिकतायाः विषये, आध्यात्मिकतायाश्च विषये अजानन्तः तत्सर्वमपि अननुतिष्ठन्तो वर्तन्ते इति खेदस्य विषयः । एवं परिस्थितिरस्तीति कारणतः एव स्यात् प्रधानमन्त्रिणाम् आशयमनुरुध्य विश्वविद्यालयीयानुदानायोगपक्षतः पुनश्चर्यापाठ्यक्रमेऽपि ईदृशविषयः निक्षिप्यमाणो वर्तते ।

**आध्यात्मिकता** - आध्यात्मिकतायाः विषये जनानां रुचिः अल्पा एव भवति । किन्तु भारतस्य अभिज्ञानं जगतीतले आध्यात्मिकमार्गदर्शकत्वेनैव वर्तते । अत एव प्राचीनकालादारभ्य भारतं जगद्गुरुत्वेन विराजते । जगत्यस्मिन् भारतं विहाय नान्यत्र आध्यात्मिकतायाः कल्पना व्यधायि । आध्यात्मिकता तु भारतस्य भुवः प्रत्येकं कणेषु विलसति ।

बहूनां Secularism तः प्रभावितानां शिक्षितानां मनसि साम्प्रतं अयं भावः समुत्पन्नः यत् धार्मिकतायाः अनुसरणं कदाचित् मूढविश्वासः भवितुमर्हति । अतः अहं Spiritual अस्मि इति कथने आत्मनि गौरवभावं दधते। धार्मिकाचरणेषु मम विश्वासो नास्ति । किन्तु supreme Energy अस्ति इत्यस्मिन् विषये अहं विश्वसिमि । अतः ध्यानादिमाध्यमेन अहं आत्मसंतोषम् अनुभवामि इति केचन ब्रुवन्ति ।

धार्मिकाचरणानि वस्तुतः आध्यात्मिकं फलं न प्रयच्छन्ति तथापि चित्तशुद्ध्यादिमाध्यमेन आध्यात्मिकसाधनापथे औन्नत्यं साधयितुं सहकुर्वन्तीति शास्त्राणि कथयन्ति । अतः एतादृशक्रियासु अनादरवन्तः चित्तशुद्ध्यादिकं अकृत्वा ध्यानादिकर्मसु प्रवर्तन्ते चेत् अपेक्षितं फलं न प्राप्नुवन्तीति निश्चप्रचम् ।

किञ्च आध्यात्मिकमार्गानुसारिभिः धार्मिकतायाः पर्यायत्वेन ध्यानादिकर्माणि क्रियन्ते चेत् केवलं कापट्यप्रदर्शनमात्रं भवितुमर्हति, न तु तेन आध्यात्मिकश्रेयस्साधनम् । तर्हि आध्यात्मिकश्रेयः साधयितुं किमावश्यकमित्युक्ते –

शास्त्राणि इत्थं कथयन्ति – नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिसाधनषट्कसम्पत्तिः, मुमुक्षुत्त्वञ्चेति ।

नित्यं वस्तु किम् ? अनित्यं वस्तु किम् ? इति विवेकज्ञानं यस्य न भवति सः नित्यवस्तु प्राप्तुं अपेक्षितमार्गे न प्रवर्तेत । उपनिषद्भिरुक्तं ब्रह्म एव नित्यं अन्यत्सर्वम् अनित्यमिति यः न जानाति सः ध्यानादिकर्मसु प्रवर्तते चेत् अनित्यवस्तून्येव तस्य ध्येयपदार्थाः भवन्ति । ध्यानार्थम् उपविष्टः पत्नीपुत्रादीन् वा गृहसम्पदादिवृद्धिं वा, यशोराशिं वा, विजयश्रियं वा, शत्रुनिबर्हणं वा रोगविमुक्तिं वा, मनःशान्तिं वा ध्यायति । एतानि सर्वाणि ध्येयानि अनित्यानि सन्ति । कदाचित् नित्यं वस्तु किमिति जानाति चेदपि अनित्यवस्तूनां आकर्षणं एतादृशं भवति येन सः जनः प्रत्यावृत्य अनित्यवस्तुषु आनन्दमन्वेष्टुम् आरभते ।

किञ्च अस्मिन् लोके इतरत्र च यत् सुखं प्राप्यते तस्माद्विरक्तिः स्यात् । महम्मदीयाः स्वर्गे ७२ अप्सरसः ७२ दास्यश्च लभ्यन्ते इति धिया अत्र तत्कारणीभूतानि कानिचन कुकर्माणि(जिहाद्प्रभृतीनि) आचरन्ति । अस्मिन् लोके लक्षशः रूप्यकाणि मिलन्ति इति कारणतश्च बहूनि (लव् जिहाद्) कुकार्याणि कुर्वन्ति । एतादृशेभ्यः फलेभ्यः विरक्तिः स्यात् इति अभिप्रायः आधुनिकजगतः परिप्रेक्ष्ये भवितुमर्हति ।

किञ्च शमादिषट्कसम्पत्तिः मानवस्य आध्यात्मिकसाधनायै अपेक्षितं पूर्वरङ्गं सज्जीकरोति । तेन विना ब्रह्मज्ञानार्थं यत्नः परिपूर्णः न भवति ।

मुमुक्षुत्वं नाम मोक्षप्राप्तीच्छायाः भावः । यस्मिन् अयं भावः न भवति सः कथञ्चिदपि ब्रह्ममार्गे न प्रवर्तते । इत्थं साधनचतुष्टयसम्पन्नः कश्चन पुरुषः मोक्षार्थं/ब्रह्मज्ञानार्थं प्रवर्तेत । मोक्षो नाम जीवब्रह्मणोरैक्यम्।

**आत्मा/जीवः -** आत्मनः विषये सामान्यजनानां अत्यन्तं भ्रमो वर्तते । केचन चिन्तयन्ति – आत्मा शरीरमेव अस्ति इति, केचन शरीराद् भिन्नः इति, केचन मन एव आत्मा इति, केचन मरणात्परं अस्माकं देहात् यन्निर्गच्छति तदात्मा इति, केचन भूतपिशाचादयः आत्मा इति चैवं प्रकारेण मन्यन्ते । वस्तुतः आत्मा इत्युक्ते कः ? स्थूलशरीरं वा सूक्ष्मशरीरं वा जीवस्य स्वरूपं न , तथापि अत्यन्तं स्वाभाविकरूपेण स्थूलशरीरं अनुसृत्य सर्वोऽपि जनः "पुरुषोऽहम्" "योषिदहम्" "नपुंसकोऽहम्, काणोऽहम्, "खञ्जोऽहम्", इत्येवंरूपेण भावयति । इतोऽपि आभ्यन्तरं गत्वा बुद्ध्यादिभिः उपाधिभिः आत्मानं सुखिनं, दुःखिनं, बुद्धिमन्तं, मन्दमतिं, कामिनं, कोपिष्टं, पुण्यवन्तं अज्ञानिनं योगिनं चेति मन्यते । अयं जीव इत्युच्यते ।

वस्तुतः अयं जीवः कीदृशः इति "न जायते म्रियते वा कदाचित्...." इत्यादिभिः गीतापद्यैः ज्ञायते ।

**ब्रह्म -** "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्मेति" "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात् पुरुषः" इत्यादिभिः तैत्तिरीयश्रुतिवाक्यैः ब्रह्म अस्य जगतः कारणमिति प्रतिपादितम् । तद्बलेनैव ब्रह्मलक्षणं (तटस्थलक्षणम्) च प्रतिपादितम् ।

एतादृशयोः सर्वज्ञकिञ्चिज्ज्ञादिभेदयुक्तयोः ब्रह्मजीवयोः अभेद एव मोक्ष इत्युच्यते । अयं मोक्षः ब्रह्मज्ञानेनैव सम्भवति, नान्येन विधिना इति श्रुतिरेव प्रतिपादयति "नान्यः पन्था अयनाय विद्यते" । एतादृशं ब्रह्मज्ञानं यः प्राप्नोति सः कथं भवतीति सोदाहरणं प्रतिपिपादयिषामि छान्दोग्योपनिषदः "एकविज्ञानेन सर्वविज्ञानम्" इति प्रकरणमाध्यमेन । तदित्थमस्ति -

उपनयनात्परं चतुर्विंशतिवर्षपर्यन्तं साङ्गं वेदमधीत्य गर्वेण अप्रणतो भूत्वा स्थितं स्वपुत्रम् उद्दिश्य उद्दलकारुणिः अपृच्छत् –

**यन्नु सोम्य इदं महामना अनूचानमानी स्तब्दोऽस्युत तमादेशमप्राक्ष्यः ? इति।** (स्तब्दः = अप्रणतस्वभावः गर्वी) **येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति [1]।**

तदा सः निर्गताहङ्कारो भूत्वा पितरमेव तज्जिज्ञासुः पृच्छति - **कथं नु भगवः स आदेशो भवतीति ।** तदा उद्दलकारुणिः तद्रहस्यं कथयति -

**यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् इति[2] ।** इत्यादिभिः त्रिभिः[3] मन्त्रैः । इत्युक्ते यथा प्रकृतिभूतस्य मृत्पिण्डस्य ज्ञानेन तद्विकाराणां सर्वेषामपि घटशरावादीनां ज्ञानं भवति तथा एकस्मिन् ब्रह्मणि विज्ञाते सर्वमिदं विज्ञातं भवति इति । यतो हि अस्य सर्वस्यापि

---

[1] छान्दोग्योपनिषदि षष्ठाध्यायः

[2] छान्दोग्योपनिषदि षष्ठाध्यायः

[3] यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् इति ॥
यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥
यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सोम्य स आदेशो भवतीति ॥

चराचरप्रपञ्चस्य कारणं ब्रह्म वर्तते । तदेकं ब्रह्म जानीमः चेत् अन्यत् किमपि ज्ञातव्यं नावशिष्यते इति ।

एतत्तु अर्वाचीनोदाहरणद्वयेन इतोऽपि स्पष्टं भवेत् –

**तदुदाहरणन्तु रोगर् डियनेट्टी रमणमहर्षि इत्यनयोः वर्तते ।**

रोगर् डियनेट्टी तु अमेरिकादेशीयः द्वितीयविश्वयुद्धावसरे सैन्ये कृतकर्मा कश्चन विमानचालकः । सः न्यूगिनी इत्यत्र विमानचालनावसरे जापान्देशीयसैन्येन घातितः सन् ध्वस्तविमानात् अरण्ये पतितः । जापानीयाः विजयं प्राप्य, आत्मानं गृहित्वा चित्रहिंसां प्रदद्युः इति भीत्या अरण्यात् बहिरेव न अगच्छत् । इत्थं द्विपञ्चाशद्वर्षाणि तत्रैव यापयित्वा १९९७ तमे क्रैस्तसम्वत्सरे आष्ट्रेलियादेशीयैः बद्धो भूत्वा पश्चात् स्वदेशे नीतः । तस्मिन् समये सः वाक्शक्तिविहीनः आसीत् । इत्युक्ते अरण्ये ५२ वर्षाणि स्थित्वा मनुष्यैः सह भाषणं कर्तुम् अवसरं अप्राप्य भाषणासमर्थः सम्पन्नः ।

रमणमहर्षिः तु स्वीये चतुर्दशे एव वयसि विरागी सन् गृहान्निर्गतः तमिळदेशस्य अरुणाचले सुबहूनि वर्षाणि यावत् तपश्चचार । पश्चात् पौल् ब्रण्टन्[1] सदृशाः अनेके वैदेशिकाः देशीयाश्च तं दृष्ट्वा उपदेशं प्राप्तुं तमुपसर्पन्ति स्म । मितभाषी चेदपि रमणमहर्षिः रोगर् डियनेट्टीवत् बहुकालं यावत् मानवसम्पर्कशून्यश्चेदपि पश्चात् आगतैः सह पूर्वानधिगतभाषायामपि संलपितुं समर्थः आसीत् । तस्य ईदृशं सामर्थ्यं तु एकस्मिन् ब्रह्मणि विज्ञाते सर्वमिदं विज्ञानं भवतीति वेदान्तसिद्धान्तानुसारेणासादितमिति पार्थक्येन वक्तव्यं नास्ति । रोगर् डियनेट्टी तु केवलं उदरपूरणार्थं अरण्ये जीवति स्म, जापानीयेभ्यः भीत्या च जीवति स्म, न तु ब्रह्मज्ञानप्राप्त्यर्थमिति कारणात् पूर्वस्थितापि वाक्शक्तिः तस्य निर्गता ।

एकविज्ञानेन सर्वविज्ञानं मानवं परिपूर्णं विधत्ते इति स्पष्टम् ।

इत्थम् आध्यात्मिकता मानवं परिपूर्णं विधत्ते । योगश्च तद्दिशि महत्साहाय्यमाचरतीति रामकृष्णपरमहंस-विवेकानन्द-परमहंसयोगानन्द-रमणमहर्षि-युक्तेश्वरगिरि-लाहिरिमहाशय-स्वामिराम प्रभृतीनां हिमालये सम्प्रत्यपि स्थित्वा योगसाधनायां निरतानां परमयोगिनाञ्च योगसाधनाः अवलोक्य वयम् अवगन्तुं शक्नुमः ।

**सन्दर्भाः**

1. छान्दोग्योपनिषद्भाष्यम् 2. तैत्तिरीयोपनिषद्भाष्यम् 3. भगवद्गीताभाष्यम् 4. ब्रह्मसूत्रशाङ्करभाष्यम्

**********

[1] "रमणमहर्षिः" पौल् ब्रण्टन्


ISSN: 2320-740X

# वैशेषिकसिद्धान्तपरिशीलनम्

**डा. नवीनहोळ्ळः**

सहायकाचार्यः, नव्यन्यायविभागः

वेदप्रामाण्यम् अभ्युपगम्य प्रवृत्तेष्वपि न्याय-वैशेषिक-साङ्ख्य-योग-पूर्वोत्तरमीमांसादर्शनेषु न्यायवैशेषिकयोः युक्तिप्रधानतया लोकानां सन्निहितत्वात् प्राथम्यमङ्गीकृतं शास्त्रकृद्भिः । तत्र पुनः न्यायदर्शनं प्रमाणतत्त्वविवेचनपुरस्सरं, वैशेषिकदर्शनं तावत् पदार्थतत्त्वविवेचनमुखेन च निश्श्रेयसहेतु – आत्मदर्शनसाधनेषु श्रवणमनननिदिध्यासनेषु अन्यतमस्य मननस्य[1] अनुमितिरूपस्य निष्पादने उपयुज्यते ।

“धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानात् निश्श्रेयसम्“इति कणादोपज्ञं वैशेषिकसूत्रम् । अत्र उद्दिष्टेषु पदार्थेषु अयुतसिद्धयोः द्रव्यगुणयोः द्रव्यकर्मणोः द्रव्यसामान्ययोः द्रव्यविशेषयोः अवयवावयविनोश्च सम्बन्धः समवायः । युतसिद्धयोस्तु सम्बन्धः संयोगः यथा घटभूतलयोः कुण्डदध्नोः इति वैशेषिकसिद्धान्तः ।

अत्र प्रत्यवतिष्ठन्ते केचन - नन्वत्र अयुतसिद्धत्वं किम् अपृथक्देशत्वम् उत अपृथक्कालत्वम् आहोस्वित् अपृथक्स्वभावत्वम् । आद्ये स्वसिद्धान्तविरोधः । पटस्य तन्तुदेशत्वं, पटारब्धानां शौक्ल्यादिगुणानां पटदेशत्वमिति पटतद्गतगुणयोः पृथग्देशवृत्तित्वस्य वैशेषिकैः सिद्धान्तितत्वात् । द्वितीये सव्यदक्षिणयोरपि गोविषाणयोः अयुतस्सिद्धत्वं प्रसज्येत । तृतीये द्रव्यस्य गुणादिभ्यः भेदो विलीयेत । तथा च गुणादीनां द्रव्यात्मकता स्यात् इति ।

अत्रोच्यते – युतसिद्धेरभावः अयुतसिद्धत्वम् । युतसिद्धिः द्विविधा । जन्ययोः कुण्डदध्याद्योः तावत् सम्बन्धिभ्याम् अन्यदेशत्वं युतसिद्धिः । न हि कुण्डदध्नोः समानदेशता वर्तते । अतः तयोः सम्बन्धः संयोगः ।

---

[1] चतस्रो हि प्रतिपत्तयः प्रमेये आत्मादौ । प्रथमा तावदागमाद्, यामाचक्षते श्रवणमिति । द्वितीया तु श्रुतस्य परीक्षा न्यायेनैवावस्थापनं, यामाहुर्मननमिति । सा चान्वीक्षिक्यामायतते । आन्वीक्षिकी च संशयादितत्त्वज्ञापनं प्रमाणतत्त्वज्ञापनायोपादत्ते, प्रमाणतत्त्वज्ञापनं च हेयोपादेयभेदव्यवस्थितप्रमेयतत्त्वपरिज्ञापनाय । (न्यायवार्तिकतात्पर्यटीका)

नित्ययोस्तु द्वयोः तदन्यतरस्य वा पृथग्गतिमत्त्वं युतसिद्धिः । यथा परमाण्वोः परमाण्वाकाशयोः । अत एव तयोः सम्बन्धः संयोगो भवति । युतसिद्धिशून्यत्वम् अयुतसिद्धिः गुणगुणिनोः शौक्ल्यपटाद्योः सम्भवति । शौक्ल्यस्य पटदेशत्वात् । न च उक्तस्य युतसिद्धिलक्षणस्य आत्माकाशयोः अव्याप्तिः, तदन्यतरस्मिन्नपि गतिविरहादिति वाच्यम् । विभुद्वयसंयोगविरहेण आत्माकाशयोः युतसिद्ध्यभावेपि क्षतिविरहात् । न च आकाशम् आत्मसंयोगि मूर्तसंयोगित्वात् पटवदिति अनुमानेन आत्माकाशसंयोगस्य सिद्धत्वात् उक्ताव्याप्तिप्रसङ्गो दुर्वार एवेति वाच्यम् । उक्तानुमाने मूर्तत्वस्य उपाधित्वात् । न चैवमपि आकाशम् आत्माश्रितसंयोगेन संयोगि मूर्तसंयोगित्वात् इत्यनुमानं निर्दुष्टं सम्भवति, आत्माश्रितसंयोगेन संयोगित्वस्य आत्मन्यपि विद्यमानत्वात्, तत्र अविद्यमानतया मूर्तत्वस्य साध्याव्यापकत्वेन उपाधित्वासम्भवात् इति वाच्यम् ।

आत्माश्रितसंयोगेन संयोगित्वरूपस्य साध्यस्य आत्मानुयोगिकसंयोग-प्रयुक्तसंयोगानुयोगितापर्यवसितस्य आत्ममात्रवृत्तितया निरुक्तानुमाने बाधव्यभिचारयोः दुर्वारत्वात् । आत्माकाशसंयोगाङ्गीकारे भवतां स्वसिद्धान्तविरोधस्य[1] दुष्परिहरत्वाच्च । न चैवमपि युतसिद्धेः द्वैविध्येन अननुगमात् अयुतसिद्धत्वम् अनुगतं दुर्वचम् । अन्यदेशत्वपृथग्गतिमत्त्वान्यतरत्वेन अनुगमे तस्य युतसिद्धलक्षणस्य अवयवावयविनोः तन्तुपटयोः अतिव्याप्तिः दुर्वारा । पृथग्गतिमत्त्वस्य तत्र अक्षतत्वात् इति वाच्यम् ।

परस्परावधिकपृथक्त्वाश्रयत्वस्य अनुगतस्य युतसिद्धत्वस्य सुवचत्वात् । न हि अवयवावयविनोः तन्तुपटयोः परस्परावधिकं पृथक्त्वमस्ति, अतो न तत्र अतिव्याप्तिः । कुण्डदध्नोस्तु तदक्षतमेव । न चैवं सति विभुद्वयसंयोगो दुर्वारः, आकाशे आत्मनि च परस्परावधिकपृथक्त्वस्य अक्षतत्वादिति वाच्यम् । संयोगासाधारणकारणस्य क्रियायाः विरहादेव तस्य वारणसम्भवात् ।

नचैवमपि गुणकर्मणोः अयुतसिद्धत्वापत्तिः । तत्र निरुक्तयुतसिद्धतायाः विरहस्य अक्षतत्वात् इति वाच्यम् । समवायप्रतियोगिताश्रयतन्निरूपितानुयोगिताश्रयपर्याप्तोभयत्वरूपस्य तदन्यतरत्वरूपस्य वा अयुतसिद्धत्वस्य निर्दुष्टत्वसम्भवादिति ।

अन्ये पुनः प्रत्यवतिष्ठन्ते - ननु परमाणूनां नित्यत्वं निरवयवत्वमिति वैशेषिकसिद्धान्तो न विचारसहः ।

---

[1] "तस्मान्न संयोगः सम्भवी नापि विभागः"(तत्त्वदीपिका)

"नापि संयोगस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेण अस्तित्वे किञ्चित् प्रमाणमस्ति"(ब्रह्मसूत्रभाष्यम्)

 ISSN: 2320-740X

तेषां परिच्छिन्नत्वात् यावत्यो दिशः षट् अष्टौ दश वा तावद्भिः अवयवैः परमाणवः सावयवाः स्युः । ततश्च अनित्याः । अयमत्रानुमानप्रयोगः – परमाणवः सावयवाः परिच्छिन्नत्वात् यथा घटादयः । अपरिच्छिन्नत्वे तु परमाणूनाम् अणुत्वमेव न स्यात् । अत्र प्रयोगः – विमताः परमाणुत्वशून्याः अपरिच्छिन्नत्वात् यथा आकाशमिति ।

अत्रायं समाधिराकलनीयः – उपदर्शितयोः अनुमानयोः आद्यम् असिद्धिदोषकबलितम् । परिच्छिन्नत्वस्य अपकृष्टपरिमाणवत्त्वरूपस्य परमाणुषु विरहात् । द्वितीयं साध्याप्रसिद्धिग्रस्तम् । पक्षादन्यत्र परमाणुत्वस्यैव अप्रसिद्धेः । न च अणुत्वशून्यत्वमेव साधयामः । द्व्यणुके प्रसिद्धस्य अणुत्वस्य अभावः आकाशादौ प्रसिद्ध्यत्यतो न साध्याप्रसिद्धिरिति वाच्यम् । विमतेषु द्व्यणुकावयवेषु अणुत्वाभावसाध्यकानुमानस्य धर्मिग्राहकमानेन बाधात् । तस्यानुमानस्यैव तिरस्कारे अत्रानुमाने आश्रयासिद्धेः दुर्वारत्वात् । तस्मात् युक्तिसह एव परमाणुवादः ।

इदमत्र तत्त्वम् – द्रव्यारम्भकावयवधारायाम् अन्तिमत्वेन परमाणूनां सूक्ष्मतमत्वेपि ततोऽपि सूक्ष्माः कणाः भवन्त्येव । सूर्यं परितः स्वकक्षासु ग्रहा इव परमाणोः केन्द्रबिन्दुं परितः महता वेगेन इमे कणाः स्वकक्षासु परिभ्रमन्ति । अमीषां स्पन्दः सूक्ष्मः । सूक्ष्मतरः पुनः जीवीयो भावस्पन्दः । सूक्ष्मतमस्तु ईश्वरीयस्पन्दः । इत्थम् ईश्वरवादानुगृहीतोऽयं कणवादसिद्धान्तः ।

स्मर्यते च परमाणुवादः –

**चरमः सद्विशेषाणाम् अनेकोऽसंयुतः सदा ।**
**परमाणुः स विज्ञेयो नृणाम् ऐक्यभ्रमो यतः ॥**
**अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः ।**
**जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥इति।(श्रीमद्भागवतपुराणम्** 3.11.15)

द्वौ परमाणू अणुः स्यात् । त्रयोऽणवः त्रसरेणुः । स एव गवाक्षप्रविष्टेषु सूर्यरश्मिषु अतिलघुत्वेन अवगतः प्रत्यक्ष एव (श्रीधरीयटीका) ।

श्रूयते च "**एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च मे एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च मे** " इत्यादिना परमाणूनां सूक्ष्मकणानां च सङ्ख्याभेदमनुसृत्य विविधावयविनां समुद्भवः ।

| | |
|---|---|
| **1** | अस्य वर्गमूलसङ्ख्या – 1 |
| (1+**3**)=4 | अस्य वर्गमूलसङ्ख्या – 2 |
| (4+**5**)=9 | अस्य वर्गमूलसङ्ख्या – 3 |
| (9+**7**)=16 | अस्य वर्गमूलसङ्ख्या – 4 |
| (10+**9**)=25 | अस्य वर्गमूलसङ्ख्या – 5 |
| (25+**11**)=36 | अस्य वर्गमूलसङ्ख्या – 6 |
| (36+**13**)=49 | अस्य वर्गमूलसङ्ख्या – 7 |
| (49+**15**)=64 | अस्य वर्गमूलसङ्ख्या – 8 |
| (64+**17**)=81 | अस्य वर्गमूलसङ्ख्या – 9 |
| (81+**19**)=100 | अस्य वर्गमूलसङ्ख्या – 10 |
| (100+**21**)=121 | अस्य वर्गमूलसङ्ख्या – 11 |

**आकरग्रन्थाः**

ब्रह्मसूत्रभाष्यम्

प्रशस्तपादभाष्यम्

भामती

वेदान्तकल्पतरुः

श्रीपादश्रीवल्लभचरितामृतम्

**********

 ISSN: 2320-740X

# रुद्रौ वा रुद्ररुद्राण्यौ ?

**डा. चन्द्रशेखरभट्टः**

सहायकाचार्यः, नव्यव्याकरणविभागः

अथावयन्त्येव समे पञ्चतय्यो वृत्तयः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा इति । प्रत्यर्थं शब्दनिवेश[1] इत्युक्तेः एकमर्थं प्रत्याययिष्यामीत्येकः शब्दः प्रयुज्यते । एवमनेकार्थबुबोधयिषया अनेकशब्दप्रयोगे प्राप्ते एकशेष आरभ्यते । तद्विधायकं च सूत्रं सरूपाणामेकशेष एकविभक्तौ(१.२.६४) इति । एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषु एक एव शिष्यत इत्यर्थः । यथा घटश्च घटश्च घटौ, घटश्च घटश्च घटश्च घटाः इति। सरूपाणामेकशेष एकविभक्तौ, वृद्धो यूना तल्लक्षणश्चेदेव विषेषः, स्त्री पुंवच्च, पुमान् स्त्रिया, भ्रातृपुत्रौ स्वसृदुहितृभ्याम्, नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्, पिता मात्रा, श्वशुरः श्वश्र्वा, त्यदादीनि सर्वैर्नित्यम्, ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री इत्येवं दशभिः सूत्रैः एकशेषो व्यवस्थापितः भगवता पाणिनिना। तत्र रुद्रौ इत्यादिशब्दानां साधुत्वमस्ति न वेति पुमान्स्त्रिया(१.२.६७) इति सूत्रसन्दर्भमाश्रित्य विचार्यते।

स्त्रिया सहोक्तौ पुमान् शिष्यते इत्यर्थः पुमान्स्त्रिया इति सूत्रस्य । हंसश्च हंसी च हंसौ । अत्र च शिष्यमाणो लुप्यमानार्थाभिधायीति[2] न्यायेन शिष्टः हंसशब्द उभयोर्बोधकः । ननु हंसश्च वरटा च इत्यत्रापि एकशेषेण भाव्यम् । नैतदस्ति, अस्यापि सरूपाश्रयत्वात् । न चात्र मानाभावः, भ्रातृपुत्रौ स्वसृदुहितृभ्याम्(१.२.६५)ति सूत्रारम्भस्यैव मानत्वात् । इह वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति सूत्रात् तल्लक्षणश्चेदेव विशेष इति वर्तते । लक्षणशब्दोऽत्र निमित्तपर्यायः । तच्छब्देन स्त्रीपुंसयोः परामर्षः । चेच्छब्दो यद्यर्थे । एवशब्दोऽवधारणे । विशेषो वैरूप्यम्। स्त्रीपुंसकृतमेव वैरूप्यमाश्रीयते नान्यत् । एवञ्च सारूप्ये सति तल्लक्षणविशेष एव एतत्प्रवृत्तिः । यथा ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ ।

नन्वेवं रुद्रश्च रुद्राणी च, इन्द्रश्च इन्द्राणी च, वरुणश्च वरुणानी च इत्यादावप्येकशेषः प्राप्तः स्त्रीपुंसकृतवैरूप्यस्यैव सत्वात्। परम् अस्मिन्नर्थे रुद्रौ, इन्द्रौ, वरुणौ इत्यादिप्रयोगाः साधुतां न भजन्ते। तथा हि

---

[1] महाभाष्यम् १.२.६४ पृ. ७३

[2] प्रौढमनोरमा पूर्वार्धम् पृ. ३८६

रुद्रस्य स्त्री, इन्द्रस्य स्त्री, वरुणस्य स्त्री इत्यर्थे पुंयोगलक्षणङीष्सन्नियोगेन इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (४.१.४९) इति सूत्रेण आनुगागमो विधीयते । पूर्वोक्तेषु स्थलेषु एकशेषघटितः प्रयोगः शिष्टसम्मतो नास्ति । अत एव तल्लक्षणश्चेदेव विशेषः इत्यनुवर्तितम् । या पुमाख्या पुंयोगद्धेतोः स्त्रियां वर्तते ततः ङीष् विधीयते । अस्ति चात्र स्त्रीपुंसलक्षणव्यतिरेकेण पुंयोगरूपं विशेषान्तरमिति एकशेषाभावः । उक्तं च काव्यालङ्कारसूत्रकृता वामनेनापि पञ्चमाधिकरणस्य द्वितीयेऽध्याये 'रुद्रावित्येकशेषोऽन्वेष्य'[1] इति।

स्यादेतत् । गोशब्दः पुन्नपुंसकयोः सरूपः । गौरयं, गौरियम् एतौ गावौ इत्येकशेषो न स्यात् स्त्रीपुंसलक्षणकृतवैरूप्यस्याभावात्। नैष दोषः, सरूपाणामेकशेष इति सिद्ध्यति । नैतदस्ति । एवं हि कदाचित् स्त्रीवाचकस्यापि शेषे एते गावावित्यप्यापद्येत । न चेष्टापत्तिः; कैयटग्रन्थविरोधात्। 'पदान्तरगम्येऽपि तल्लक्षणविशेषे पुमान् स्त्रिया इत्येकशेषो भवति यथा गौश्चायं गौश्चेयमित्येतौ गावौ चरत इति' इति भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति सूत्रे[2] कैयटः । न च 'त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि, सा च देवदत्तश्च तौ, सा च कुण्डे च तानि'[3] इति त्यदादीनि सर्वैर्नित्यम्(१.२.७२) इति सूत्रस्थवार्तिकभाष्याभ्यामेतावित्यस्य नियमेन सिद्धिः, गावौ इत्यत्र तु रूपे विशेषाभाव इति न दोषः इति वाच्यम् ; अद्वन्द्वतत्पुरुषविशेषणानामिति[4] वार्तिके द्वन्द्वपदेन तदपवादैकशेषस्याप्युपलक्षणेन तदप्राप्तेः ।

अत्रोच्यते – तल्लक्षणश्चेदेव विशेष इत्यस्य तदितरकृतविशेषाभावे इत्यर्थे तात्पर्यम् । अयञ्चार्थः चेदेवशब्दोपादानसामर्थ्याल्लभ्यते । विशेषश्चेत्तल्लक्षणे एव तदितरनिमित्तविशेषश्चेन्नेत्यर्थः । एतौ गावौ इत्यत्र तदितरकृतविशेषाभव इत्येतावता एकशेषः सिद्ध्यति । उपपादितञ्चैतत् दीक्षितनागेशाभ्यां प्रौढमनोरमायाम्[5] मुद्योतग्रन्थे[6] च । पुमान्स्त्रिया इति सूत्रभाष्यं व्याचक्षाणः कैयटस्तु पदान्तरगम्येऽपि तल्लक्षणविशेषे पुमान्स्त्रिया

---

1 .काव्यालङ्कारसूत्रम् ५.२.१ पृ. १५६

2 महाभाष्यम् १.२.६७ पृ.१०३

3 महाभाष्यम् १.२.७२ पृ. १०७

4 महाभाष्यम्

5 प्रौढमनोरमा उत्तरार्धम् पृ.९३५

6 महाभाष्यम् १.२.६८ पृ १०४

इत्येकशेषो भवतीत्याह[1] । तत्र हि भाष्ये हंसश्च वरटा च इत्यत्र एकशेषमापाद्य 'यत्रोर्ध्वं प्रकृतेः स्यात्तल्लक्षण एव विशेषः तत्रैकशेषो भवती'ति समाधायि । यत्र प्रकृतिः समाना, वैरूप्यं तु तदन्यकृतं तत्रैकशेषः । प्रकृत्यतिरिक्तशब्दकृत एव चेत्तद्रूपो विशेष इत्यर्थः । प्रकृतिश्च स्त्रीत्वाद्यर्थकप्रत्ययस्य गृह्यते । यथा हंसश्च हंसी च हंसौ । हंसश्च वरटा च इत्यत्र तु प्रकृतिकृतमेव वैरूप्यमिति नैकशेषः । एवमपि इन्द्रेन्द्राण्यौ, रुद्ररुद्राण्यावित्यादावेकशेषो दुर्वारः स्यात् प्रकृत्यतिरिक्तस्त्रीप्रत्ययकृतवैरूप्यस्यैव सत्वात् इति चेन्न, ङीषा सह आनुकोऽप्यत्र विधानात्तस्य च प्रकृत्यवयवत्वेन प्रकृतेरेव विकारत्वेन तदतिरिक्तविकारत्वाभावात् । किञ्च ऊर्ध्वं प्रकृतेस्तल्लक्षण एव विशेष इति यथाश्रुते स्वारस्याभावात् एवशब्दमन्यथा योजयित्वा ऊर्ध्वं प्रकृतेः विशेषश्चेत्तल्लक्षण एव इत्यर्थं सम्पाद्य तदितरकृतविशेषविरहरूपे विशिष्टाभावे तात्पर्यमवधारणीयम् । रुद्रर्द्राण्यौ इत्यत्र प्रकृतेरूर्ध्वं स्त्रीपुंसेतरस्य पुंयोगस्य सत्वान्नैकशेषः। तस्मात् रुद्रश्च रुद्राणी च रुद्ररुद्राण्यौ इति द्वन्द्व एवाश्रयितव्यः न तु रुद्रावित्येकशेषः। एवं च शर्वौ, इन्द्रौ, भवौ, मृडौ, वरुणौ इत्यादिप्रयोगाः पुमान्स्त्रिया इति सूत्रमूला इति भ्रान्तिरेव । स्याच्चेदत्र सविवक्षा शर्वशर्वाण्यौ, इन्द्रेन्द्राण्यौ, भवभवान्यौ, मृडमृडान्यौ, वरुणवरुणान्यौ इत्येव प्रयोगः कार्यः । रुद्रश्च रुद्रश्च रुद्रौ इति तु भवत्येवेति शिवम् ।

**परामृष्टा ग्रन्थाः –**


१.वैयाकरणसिद्धान्तकौमुदी

२.काशिका(पदमञ्जरी-न्याससहिता)

३.प्रौढमनोरमा

४.महाभाष्यम्

५.महाभाष्यप्रदीपव्याख्यानानि

६.लघुशब्देन्दुशेखरः

७.लघुमञ्जूषा

८.काव्यालङ्कारसूत्रम्


**********

[1] महाभाष्यम् १.२.६८ पृ. १०३

# कर्णाटकेषु यक्षगानपरम्परा कृष्णभक्तिश्च

**डा. राघवेन्द्रभट्टः**

साहित्यविभागाध्यक्षः

**कर्णाटकेषु भक्तिपरम्परा**

भारतवर्षे पुरुषार्थसाधनोपायत्वेन ज्ञानमार्गः कर्ममार्गः उपासनामार्गः भक्तिमार्गश्चेति अनेके मार्गा लोककल्याणकारिभिः महर्षिभिः प्रवर्तिताः । तत्र भक्तिमार्गः अन्यैः मार्गैः सह सम्पृक्तोऽस्तीति अस्य वर्तते इतरेभ्यो वैशिष्ट्यम् । **मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी** इति शङ्करभगवत्पादा आहुः। का नाम भक्तिरिति चेत् स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते इति ते वदन्ति । स्नेहो भक्तिरिति मध्वाचार्याः । भगवति पुरुषोत्तमे विद्यमानो भक्तस्य स्नेह एव भक्तिरिति तेषाम् आशयः । कर्णाटकेषु भक्तिपरम्परा विशिष्टा परिलक्ष्यते ।

शैवाः, वीरशैवा, वैष्णवाः, श्रीवैष्णवाः तत्र प्रमुखतया वर्तन्ते । शैवाः शाङ्कराः, वीरशैवाः लिङ्गायताः, वैष्णवा माध्वाः, श्रीवैष्णवाः रामानुजीयाः इत्येते समग्रं कर्णाटकं व्याप्य निजपरम्परां रक्षन्ति । तत्र मठाः आश्रमाः मन्दिराणि च भक्तिपरम्परायाः संवर्धने प्रधानकेन्द्राणि भवन्ति। गोकर्णमहाबलेश्वरमन्दिरम् आदिचुञ्चनगिरिकालभैरवेश्वरमन्दिरम्, दक्षिणाम्नायशृङ्गेरी-शारदापीठम्, रामचन्द्रापुरमठः, स्वर्णवल्लीमठः, कृष्णराजपुरमठः, मैसूरुगणपतिसच्चिदानन्दाश्रमः, वरदहळ्ळ्याश्रमः इत्येतेषु मठेषु आश्रममन्दिरेषु शाङ्करभक्तिपरम्परा सुदृढा वर्तते । सुत्तूरु-सिद्धगङ्गा-मूरुसाविरमठेषु वीरशैवभक्तिपरम्परा वर्तते । उडुपिकृष्णमन्दिरम्, उडुपिस्था अष्टौ मठाः, मन्त्रालयस्थः राघवेन्द्रस्वामिमठः, उत्तरादिमठः, सोसलेव्यासरायमठश्च गौडसारस्वतपर्तगाळिमठश्च माध्वमतावलम्बिनां कृष्णभक्तेः प्रसाराय वर्तन्ते। मेलुकोटे चलुवनारायणमन्दिरम्, मैसूरुपरकालमठश्च रामानुजीयसिद्धान्तप्रचारकेन्द्रं विष्णुभक्तिं प्रसारयति। अन्या अनेका धार्मिकसंस्थाः देवीगणपत्यादिदेवतामन्दिराणि भक्तिस्थानानि सन्ति। दासपरम्परायां पुरन्दरदासः कनकदासश्च प्रसिद्धौ कर्णाटकीयौ याभ्याम् अनेकानि भक्तिगीतानि विष्णुपरकाणि लिखितानि प्रसिद्धानि । अद्यापि मन्दिरेषु तानि श्राव्यन्ते । कर्णाटक-केरल-आन्ध्र-तमिलुनाडुराज्येषु एतानि गीतानि प्रचुरतया गीयन्ते । तत्र कनकदासस्य मोहनतरङ्गिणी कृतौ सर्वाणि कृष्णपराणि गीतानि प्रसिद्धानि ।

 ISSN: 2320-740X

एतैः सह कर्णाटकेषु भक्तिश्रद्धाकेन्द्रेषु तदितरस्थानेषु च भक्तिपरम्परायाः संवर्धनाय प्रवचनम्, हरिकथा, सङ्गीतगमकयक्षगानादिकला आश्रिता दृश्यते। मन्दिराणाम् उत्सवस्यावसरे, धार्मिककार्यक्रमेषु एते कलाप्रकारा अनुष्ठीयन्ते। तत्र यक्षगानकलाया अस्ति विशिष्टं स्थानम्।

त्रिवर्गसाधनं नाट्यम् इति आचार्यो भरतमुनिराह। भारतभूमिः बह्वीनां कलानां जननदात्री पोषणकर्त्री च वर्तते। रामलीला, रासलीला, ओडिस्सी, कथक्, कूचुपुडी, कूतु, कूडियाट्टम्, कथक्कळी, कृष्णनाटम्, यक्षगानम् इति प्रदेशभेदेन विद्यमानानां नानाभारतीयकलाप्रकाराणां केवलं मनोरञ्जनम् लक्ष्यं न वर्तते। ते नीतिं धर्मं च बोधयन्तः पुरुषार्थसाधने साहाय्यमाचरन्तीति तत्परम्परापरिशीलनेन ज्ञायते।

**कर्णाटकेषु यक्षगानकलाया आरम्भः विकासश्च**

क्रिस्तात् १२तमे शतके शिवशरणाः वैष्णवदासाश्च यक्षगानकलाविदां समूहं ग्रामाद् ग्रामं नीत्वा यक्षगानं नाटयन्ति स्म इति डा. राघवनम्बियार् अभिप्रैति। यक्षगानस्य प्राचीनः प्रसिद्धश्च कविः पार्तिसुब्बः क्रिस्तात्परं १५९०-१६३० काले आसीदिति कारणेन ततः पूर्वमेव इयं कला विकासं प्राप्ताऽऽसीदिति ज्ञायते।

यक्षगानकलाया अपरा काचित् ऐतिहासिकपृष्ठभूमिः मनागिव अवलोकनीया येन भक्तेः धार्मिकाध्यात्मिकमौल्यानां प्रचारे अस्य यक्षगानस्य पात्रं किमिति ज्ञायते। कर्णाटकस्य यक्षगानकलायाः अष्टशतस्य वर्षाणामितिहासो वर्तते। त्रयोदशशताब्दः द्वैतदर्शनस्य अद्वैतदर्शनस्य च प्रचारकालः आसीत्। कर्णाटके द्वयोर्दर्शनयोरनुयायिमुख्याः स्वमतप्रचारविषये मिथः स्पर्धमाना आसन्। तदा विशेषतः कर्णाटकस्य दक्षिणभागे राजा द्वितीयः जयसिंहः उभयोरपि दर्शनयोः समन्वयदृष्ट्या केरलकर्णाटकयोः सीमनि विद्यमाने **कुम्बळे** नामके ग्रामे उभयदर्शनप्रमुखान् पण्डितान् समाहूय अनेकवारं मार्गदर्शनं व्यधात्। तत्परिणामात् उभयेषां मनःकषायभावः दूरङ्गतः। उभयसम्प्रदायसाधारणतया 'भागवतसम्प्रदायः' प्रादुरभूत्। विष्णोः भक्ताः शिवस्य भक्ताश्च सम्भूय धर्माधर्मविवेकसाधिकां भगवद्दर्शनमुख्योपायभूतां भक्तिम् अवलम्बमानाः सन्तः, धार्मिकाध्यात्मिकविचाराणां प्रचारं कर्तुमारभन्त। मन्दिरेषु रामायणभारतभागवतादिप्रवचनं व्यापकतया समजायत। तस्मिन् काले सर्वेषामपि जनानां धार्मिकमौल्यानां सुष्ठु अवगमनार्थमेव यक्षगानकला जनिमलभत। इत्थं भक्तेः प्रसाराय कर्णाटके यक्षगानम् आरब्धम् इति ज्ञायते।

अस्य कलाप्रकारस्य यक्षगानम् इति नामकरणे किञ्चित् कारणं वर्तते। तत्र अनेके अभिप्राया वर्तन्ते।

तथा हि यक्षगानस्य मूलम् आन्ध्रप्रदेशः। तत्र गुण्टूरुप्रदेशे सङ्गीतनर्तनादौ निरतः जक्कलु अथवा यकरुनामको जनवर्ग आसीत्। ततः जक्कलपाटु इत्यभूत् । ततः यक्षगानं प्रादुरभवत् इति वेतूरुप्रभाकरशास्त्री अभिप्रैति। गान्धर्वगानमिव विशिष्टशैल्या प्रस्तूयमानस्य अस्य कलाप्रकारस्य यक्षगानमिति कर्णाटाभिजनाः तन्नाम कृतवन्तः स्युरिति ज्ञानपीठपुरस्कारभाक् डा. शिवरामकारन्तः प्रत्यपीपदत् । यक्षगानं गीतवाद्यनृत्यवाचिकाभिनयैः युक्ता सम्मिश्रजानपदकला इति कैश्चिदुच्यते। केचन 'कश्चित् प्रबन्धरचनाप्रकारं यक्षगानम् इति वदन्ति यस्मिन् प्रकारे गेयता भवति । अतः आदौ तत्र आर्यादिच्छन्द इव विषयस्य गेयतया प्रकाशनार्थं यक्षगानमवलम्ब्यते स्म । स्मरणार्थं सौकर्यं भवतीति औषधनिर्माणस्य कृषिकर्मणः सम्बद्धा नानाविषया यक्षगानरचनाविधानेन रच्यन्ते स्म । तथा सङ्गीतनर्तनादावपि अस्य प्रयोगः क्रियते स्म। विजयनगरसाम्राज्यम् आन्ध्रकर्णाटकयोर्विस्तृतमासीत् । तस्मिन् काले असौ प्रकारः आन्ध्रदेशात् कर्णाटकमागत्य क्रमेण रूपान्तरं प्राप्नोत्' इति मन्वते । किन्तु यक्षगानस्य ऐतिहासिकभूमिकायाः संशोधकेषु अन्यतमः डा. राघव नम्बियार् इत्थं वदति - यक्षगानम् इत्यत्र यक्षपदं जानपददैवसूचकम् । दैवाराधनं कर्णाटकेषु प्राचीनकालाद् वर्तते। तत्र विग्रहेषु दैवं सम्भावयन्तः जनाः तदुत्सवमाचरन्ति स्म । तस्मिन् काले गीतं नृत्यञ्च प्रस्तुवन्ति स्म। तत्र नटा वेषं धृत्वा भगवतो महिमानमवलम्ब्य अभिनयं कुर्वन्तः यक्षं सेवन्ते स्म । कथावस्तुनः गानम् तस्य अभिनयश्च नटैः क्रियते स्म । एवं यक्षस्य आराधनपरतया आरब्धः कलाप्रकारः यक्षगानम् इति प्रथते' इति । एवं यक्षगानस्य आरम्भवादः अनेकैः अभिप्रायैः संवलितो वर्तते। तेषु अभिप्रायेषु डा. राघवनम्बियारस्य अभिप्रायो युक्ततम इति प्रतिभाति। तथापि एते सर्वे विचारा यक्षगानस्य प्राचीनतासमर्थने सहाया एव सन्ति । यक्षगानस्य एवमारम्भविकासक्रमस्य परिशीलनेन असौ कला भक्तेः नैतिकमौल्यानाञ्च प्रचाराय प्रारब्ध इति ज्ञायते ।

**यक्षगानस्य स्वरूपम्**

यक्षगानम् आङ्गिकवाचिकसात्त्विकाहार्याख्यैः चतुर्विधैरभिनयैः परिपोषङ्गतः एकः कलाप्रकारः । तौर्यत्रिकम्- गीतम्, नृत्यम्, वाद्यम् च अस्मिन् समाविष्टं भवति । वाद्यानि मृदङ्गः चण्डा, स्वरसङ्गमनाय हार्मोनियं च भवन्ति । अत्र चण्डामृदङ्गयोः द्वयोः चर्मवाद्ययोः उपयोगः क्रियते । भारतीयकलाप्रकारेषु एकस्मिन् प्रकारे द्वयोः चर्मवाद्ययोः प्रयोगः अतिविरलो वर्तते । रामायणभारतभागवतान्यवलम्ब्य निर्मितं गेयसाहित्यं यक्षगानस्य कथावस्तु । चतुरस्रा अर्धचन्द्राकारा वा रङ्गवेदी भवति । रङ्गपीठे गायकः मार्दङ्गिकः चण्डावादकश्च उन्नतासने उपविशन्ति । प्रकरणानुसारं नटाः तत्तद्भूमिकामालम्ब्य गायकस्य वामपार्श्वस्थे द्वारे वेदिकां प्रविश्यताललयाश्रयं

नृत्यन्ति । अभिनयं कुर्वन्तः ते नृत्योत्तरं गायकेन गीतं वस्तु परस्परं वाचिकाभिनयद्वारा प्रस्तुत्य मञ्चस्य पुरतः आसीनेषु सामाजिकेषु रसास्वादं सम्पादयन्ति नीतिं धर्मं भक्तिञ्च ज्ञापयन्ति। यक्षगाने वाचिकाभिनयः **अर्थ** इत्यभिधीयते। कथावस्तु **प्रसङ्ग** इति कथ्यते । गायकेन प्रस्तुतं कथावस्तु समाश्रित्य नटाः सम्भाषणं कुर्वन्ति । कथक्कळी, ओडिस्सी, मोहिनीयाट्टम् इत्यादिप्रकारेषु सम्भाषणं न भवति। यक्षगाने तद् भवतीति इतरेभ्यः अस्य एकं वैशिष्ट्यम् । किन्तु तस्मादेव कारणात् यक्षगानं कर्णाटकराज्यादन्यत्र प्रचारं विशेषरूपेण न प्राप्नोदिति अस्य तद् नैयून्यमपि । वाचिकोत्तरं पुनः गीतनृत्ये पुनः वाचिक इति पर्यायेण प्रवर्तते । एवं रीत्या नटाः साङ्गोपाङ्गं यक्षगाननाट्यं प्रस्तुवन्ति । पूर्वं सप्ताहकालं यावत् निरन्तरम् एकं कथावस्त्ववलम्ब्य यक्षगानं प्रवर्तते स्म । साम्प्रतं जनानां समयस्य न्यूनताकारणात् एकरात्रसाध्यत्वेन घण्टात्रयसाध्यत्वेन वा प्रवर्तते ।

**यक्षगानस्य प्रकाराः व्यापकता च**

यक्षगाने देशभेदात् शैलीभेदः, नामभेदश्च वर्तते। अस्मिन् कलाविशेषे मुख्यतया मूडलपायः पडवलपायश्चेति द्वौ प्रकारौ वर्तेते।

**१. मूडलपायः** मूडलपायः कर्णाटकस्य उत्तरभागे मैसूरुप्रदेशे च प्रवर्तते । अस्मिन् प्रकारे दोड्डाटः, सण्णाटः पारिजातश्चेति त्रयः प्रकारा वर्तन्ते। तत्र **दोड्डाट** इति प्रकारे विशालः रङ्गमञ्चः भवति । पात्रधारी पुरुषः बृहत्किरीटं धरति। अस्मिन् प्रकारे अभिनये गाने वाद्यादिप्रयोगे च जानपदीयो धर्मः भूयान् वर्तते । **सण्णाट** इति प्रकारे गाने 'लावणी''कव्वाली' चेति कन्नडजानपदीया शैली आद्रियते। गाने भागवतेन (गायकेन) सह पात्रधारिणः अपि स्वरसंयोगं कुर्वन्ति । अत्र पात्राणाम् अङ्गरागो वैकल्पिकः । नाटकप्रभावः अत्र महान् दृश्यते । तत्र तालः, सारङ्गी, दप्पु इत्यादिवाद्यप्रयोगः भवति। **पारिजात** इति प्रकारः यद्यपि यक्षगानस्यैव अथापि अत्र गीतनाटकच्छाया भूयसी वर्तते। श्रीकृष्णपारिजातम् इति अपराळतम्मण्णनामकेन कविना रचितं काव्यं नटा अभिनयन्ति। अत्र नटा अपि गायन्ति । तबला, हार्मोनियम्, सारङ्गी इत्यादिवाद्यानां प्रयोगो भवति । उत्तरकर्णाटके असौ प्रकारः जनप्रियो वर्तते।

**२. पडुवलपायः** कर्णाटकस्य समुद्रतीरप्रदेशे अयं प्रभेदः प्रवर्तते । अस्मिन् नाना परिष्काराः सञ्जाता वर्तन्ते । साम्प्रतं लोकविश्रुततया कर्णाटककला इति एष प्रकारः ख्यातो वर्तते । अत्र द्वौ प्रकारौ तेङ्कु तिट्टु बडगुतिट्टु चेति **तेङ्कु तिट्टु** (दक्षिणशैली)इति कर्णाटकस्य दक्षिणभागे प्रवर्तते । उडुपि-दक्षिणकन्नड-कासरगोडुमण्डलेषु असौ प्रकारः प्रसिद्धः । अस्मिन् चण्डावादकः भागवतस्य वामपार्श्वे स्थितः सन् चण्डां वादयति। वीररसाभिव्यञ्जकस्य

नृत्यस्य प्राशस्त्यम्। भूताराधनस्य कथक्कळीकलायाः प्रभावः अत्र महान् दृश्यते। गानशैल्याम्, आहार्ये अङ्गरागे च वैविध्यं वर्तते। कर्णाटकस्य मध्यभागे, उत्तरभागे च **बडगुतिट्टु** (उत्तरशैली) इति प्रकारः प्रवर्तते। उडुपि-उत्तरकन्नड-शिवमोग्गमण्डलेषु प्रसिद्धः एष प्रकारः शैल्या तेङ्कुतिट्टु प्रकाराद् भिद्यते। रङ्गपीठे चण्डावादकः भागवतस्य दक्षिणभागे उपविश्य चण्डां वादयति। नर्तनं लास्यप्रधानं भवति। भरतनाट्यप्रभावः अत्र दृश्यते। आहार्ये भेदः वर्तते। कच्छविन्यासे, किरीटे, अन्येषु आभूषणेषु वैलक्षण्यं वर्तते। गानशैली भिद्यते। अथ च केवलवाचिकाभिनयरूपः प्रकारः **ताळमद्दळे** इति प्रसिद्धः। असौ प्रकारः तेङ्कुतिट्टु बडगुतिट्टु चेति द्वयोः प्रकारयोः प्रवर्तते। गीतवाद्यप्रस्तुतिः तत्तच्छैलीमवलम्ब्य भवति। यक्षगानस्य सर्वप्रकारेषु क्वचित् नाट्यधर्मी प्रचुरतया अवलम्ब्यते क्वचिच्च लोकधर्मी। एवम् प्रतिप्रकारम् उभयधर्मीसामञ्जस्यं वर्तते।

**यक्षगाने तालरागौ**

यक्षगानस्य तालरागभागः अत्यन्तं दृढो वर्तते। तालस्य मूलं भगवत्तत्वमेव प्रतिपादयति।

**तकारः शङ्करः प्रोक्तो लकारः पार्वती स्मृता।**
**शिवशक्तिसमायोगात्ताल इत्यभिधीयते॥**

तालस्य महत्त्वम्- **गीतं वाद्यञ्च नृत्तञ्च सर्वं ताले प्रतिष्ठितम्।**
**न तालेन विना किञ्चित् तस्मात्तालस्य मुख्यता॥** इति शिवतत्त्वरत्नाकरे प्रोक्तम्।

यक्षगाने, विशेषतः पडवलपायप्रकारे प्रयुज्यमानाः तालाः -

**धृवो मट्यं रूपकञ्च झम्पा त्रिपुट एव च।**
**आटतालैकताले च सप्ततालाः प्रकीर्तिताः॥**

धृवतालः, मट्यतालः, रूपकतालः,झम्पातालः, त्रिपुटतालः, आटतालः, एकतालश्चेति ते सप्त भवन्ति। तत्र धृवतालस्य प्रयोगः सम्प्रति न दृश्यते। अष्टतालसञ्ज्ञकः अन्यः तालः प्रयुज्यते।

कलाप्रकारेषु सर्वत्र तालस्य महत्त्वं वर्तते। यक्षगाने कर्णाटकसङ्गीतसम्बद्धा रागाः प्राचुर्येण अवलम्ब्यन्ते। तथापि तत्प्रस्तुतिक्रमस्य अत्यन्तं भिन्नता वैशिष्ट्यञ्च वर्तते। तत्र यक्षगानस्यैव निजगुणः परिलक्ष्यते। यक्षगानप्रस्तुतेः प्रारम्भः नाटिः, मध्यमावती, सौराष्ट्रः, भैरवी इत्येतेषु अन्यतमेन क्रियते। समाप्तिः बिलहरी,

मोहनः, सावेरी इत्येतेषु अन्यतमेन क्रियते । तत्तद्रसानुकूलतया शङ्कराभरणम्, बेगडे, कल्याणी, आरभिः, काम्बोधिः, मुखारिः, तोडिः, तुजावन्तुः, अठाणः, देवगान्धारी, काफी, हिन्दोलः, सुरुटिः, खरहरप्रियः, नवरोजुः, पन्तुवरालिः, हंसानन्दी, देशः, फूवभूपालिः, भेहाग् ,चान्द्, कानड इत्यादयः रागाः प्रसिद्धाः प्रयुज्यन्ते । यक्षगाने अशीत्यधिकाः रागाः सन्ति ।

यक्षगाने, विशेषतः पडवलपायप्रकारे अभिनेतृगणः (नाट्यदलम्) **मेळ**नाम्ना कथ्यते । केचन गणा वृत्तिपरतया अभिनयन्ति, अन्ये प्रवृत्तितया । साम्प्रतं कर्णाटकेषु ४५ मेळाः वर्तन्ते । तत्र वृत्तिपरा रात्रौ आप्रातः डिसेम्बर् मासतः मेमासपर्यन्तं प्रतिदिनं भिन्ने निर्दिष्टे देशे (प्रातः प्रस्तुतेः समाप्तेः परं सर्वैः रङ्गसामग्रीभिः सह तस्मात् प्रदेशात् प्रदेशान्तरं गत्वा कर्मचारिणः तत्र प्रदर्शनानुकूलं रङ्गभवनं निर्मान्ति) रङ्गवेदीं निर्माय यक्षगानं प्रस्तुवन्ति । जून्मासतः मुम्बई-देहलीप्रभृतिषु प्रदेशेषु गत्वा अभिनयन्ति । विदेशान् गत्वा कानिचन नाट्यदलानि यक्षगानं प्रस्तुवन्ति। यद्यपि यक्षगाने नटाश्रयः वाग्व्यापारः कन्नडमाध्यमेनैव पूर्वमारब्धः किन्तु साम्पृतं तुळु-हिन्दी-कोङ्कणी- आङ्ग्लभाषामाध्यमेनापि तत्र तत्र अस्य प्रदर्शनं प्रवर्तते । यक्षगानस्य संस्कृतभाषयापि प्रयोगा भवन्तीति विशेषः। एवम् सम्प्रति कर्णाटककला यक्षगानं देशे विदेशेषु च प्रसिद्धा वर्तते । साम्प्रतं अस्य कलाप्रकारस्य प्रभावः कर्णाटके भारतीयनाटकरङ्गमञ्चे दृश्यते । अन्यत्र कलाप्रकारेषु च अस्य प्रभावः परिलक्ष्यते । एवमेव यक्षगानम् इतरैः कूडियाट्टम्, भरतनाट्यम्, कथक्कळी, इत्यादिभिः कलाप्रकारैः प्राप्तप्रभावकं वर्तते ।

**यक्षगानं कृष्णभक्तिप्रसारे साधनम्**

यक्षगानं पुरुषार्थप्रवृत्तिसाधनोपायत्वेन कर्णाटके प्रसृतिं प्राप्नोदिति पूर्वं प्रोक्तम् । धर्मः, परोपकारः, भक्तिः, पातिव्रत्यम्, मोक्षः इत्येतानि भारतीयमौल्यानि एव यक्षगानकाव्येषु निरूपितानि वर्तन्ते । परापराभ्यां द्विविधा भक्तिस्तु प्रतिकाव्यं साक्षात् व्यञ्जनामर्यादया वा प्रतिपाद्यते। विशेषतया अपरा भक्तिः तत्रापि पुनः विष्णुभक्तिः

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥**

इति नारदभक्तिसूत्रोक्ता नवविधा यक्षगानकाव्यैः अभिव्यज्यमाना दृश्यते।

कर्णाटकेषु यक्षगानं विष्णुभक्तेः कृष्णभक्तेः वा प्रसारे प्रमुखतया उपायत्वेन स्वीकृतम् इति विषये बहूनि

प्रमाणानि उपलभ्यन्ते । तानि यथा

१. **दशावतारी मेळ इति नाम** – पूर्वं भगवतः विष्णोः दशावतारकथाः एव मुख्यतया प्रस्तूयन्ते स्म । अतः यक्षगानप्रस्तुतिदलस्य **दशावतारी** इति नाम आसीत् ।

२. **गायकस्य भागवत इति अभिधानम्** – केरलस्य कृष्णनाटम् इति कलाप्रकारे गायकः भागवत इत्युच्यते। तत्र भगवतः कृष्णस्य कथा भवति। तथा यक्षगानेऽपि सः भागवत इत्यभिधीयते ।

३. **यक्षगाने पूर्वरङ्गः** – यक्षगाने, विशेषतः पडवलपाये पूर्वरङ्गः अतिविशिष्टम् अङ्गम्। एष सभालक्षणम् इत्यपि कथ्यते। 'तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्' इति नाट्यशास्त्रोक्तः क्रमः अत्र अनुस्रियते।

**यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।**

**कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥**

यक्षगाने पूर्वरङ्गः सर्वेषु प्रसङ्गेषु प्रायः समानो भवति । कथाप्रसङ्गस्य प्रारम्भात् प्राक् कोडङ्गी, बालगोपालः, कोक्के चिक्कः, पीठिकास्त्रीवेषः, इत्येते क्रमशः रङ्गं प्रविश्य स्वीयं पूर्वरङ्गकर्म विधाय निवर्तन्ते । तत्र बालगोपालस्य पीठिकास्त्रीवेषस्य च अभिनयार्थं पद्यानि शिवकथाप्रसङ्गेऽपि विष्णुपरकाणि एव भवन्ति । यथा बालगोपालस्य

**रागः मारविः, एकतालः**

हरे रमण गोविन्द ।
नारायण केशव माधव कृष्ण मुकुन्द मुरारे ॥
ता तागडतक तरगड ताम्
ता तागडतक तरगड ताम्
तरगड ताम् तरगड ताम् तक्कधिक्कुतक दधिन्ना दधिगिणधेम्

**रागः केदारगौळः, एकतालः**

हरि नारायण गोविन्द। अच्युतानन्त गोविन्द ॥
मत्स्यावतार गोविन्द। कूर्मस्वरूप गोविन्द ॥
क्रोडाकार गोविन्द नरहरि वामन गोविन्द ।


ISSN: 2320-740X

अनन्तमहिम गोविन्द भार्गवराम गोविन्द ॥

दशरथनन्दन गोविन्द  वसुदेवात्मज गोविन्द ।

बौद्धावतार गोविन्द कल्किस्वरूप गोविन्द ॥

ताधिं ताधिं ताधिंताननान्ततरिता

पीठिकास्त्रीवेषस्य अभिनयार्थं पद्यानि यथा

**रागः नाटी, आदितालः**

राधालोल।  बालगोपाल ॥

बालगोपाल। राधालोल ॥

मलगिरलु अम्बर। सेळेदोय्व सुन्दर ॥

तिळिदु ई परि दूर। जार ॥ राधा

चण्डबलनु एन्न। दुण्डु कुचगळन्नु ।

कण्डु पिडिदवन्यारे । नीरे । राधा

मारन लीलेयेल्ल । तोरिद जगकेल्ल।

मारसुन्दर सुकुमारन पित । ईत ॥ राधा

**रागः कल्याणी, आदितालः**

एन्दिगे काणुवे ना। सुन्दरन माधवन ।

एन्दिगे काणुवे ना ।

जाणे केळिदे ना । प्राणकान्तन मन ।

काणदे निल्ललारे ना । सुन्दरन एन्दिगे

अङ्गजजनक श्री । मङ्गळ महिमन ।

गङ्गाधरन प्रियन । सुन्दरन ॥ एन्दिगे

दिट पार्थसारथि । विठल नम्मोडेयन ।

कपटनाटक सूत्रन । सुन्दरन ॥ एन्दिगे

४. **आहार्यसाम्यम्** - यक्षगाने किरीटम्, पगडि, मुण्डासु इत्यादीनि पुरुषवेषाणाम् शिरोभूषणानि भवन्ति। तेषाम्

अधोवस्त्रं कच्छम्। प्रायः तत् समानरूपं भवति। शिरोभूषणं तत्कच्छं च पण्डरापुरस्य भगवतः विठलस्य वेषभूषासाम्यं धत्ते।

विष्णोरनुयायिनां सर्वेषामपि पात्राणाम् ऊर्ध्वपुण्ड्रं तिरुपतेः वेङ्कटेशस्य पुण्ड्रेण भृशं साम्यं धत्ते।

५. **विष्णुपरकं यक्षगानसाहित्यम्** – रामायणमहाभारतभागवतादिकथामवलम्ब्य रचितानि यक्षगानकाव्यानि १५००संख्याकानि वर्तन्ते। तत्र अर्धांशादधिकानि विष्णुपरकाणि ।

**वेदे रामायणे चैव पुराणे भारते तथा ।**

**आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥**

इत्युक्तरीत्या वेदादिवाङ्मये सर्वत्र भगवान् विष्णुरेव प्रतिपाद्य इत्यतः तत्परतयैव यक्षकाव्यानि बहूनि विरचितानि इति भाति ।

६. **लक्ष्मीशकवेः जैमिनिभारतम्** – कृष्णचरितमाश्रित्य जैमिनिभारतं कविना लक्ष्मीशेन कन्नडभाषया विरचितं विशिष्टं काव्यम् । वार्धकषट्पदी इति च्छन्दःप्रकारमवलम्ब्य विरचितम् । एतत् छन्दः यक्षगाने गेयतायाम् अत्यन्तमनुकूलं भवति । अत एव अस्य काव्यस्य महान् प्रभावः यक्षगानसाहित्ये वर्तते। इदं काव्यं बहूनां यक्षगानकाव्यानाम् उपजीव्यकाव्यम् । अद्यापि ग्रामजना जैमिनिभारतं पठन्ति ।

७. **मूडलपायस्य पारिजातः** - मूडलपायस्य पारिजात इति कर्णाटकस्य उत्तरभागे अभिनीयमाने यक्षगानप्रकारे प्रायेण **श्रीकृष्णपारिजातम्** इति प्रसङ्गः अभिनीयते ।

८. **यक्षगानसाहित्ये कृष्णनाटस्य प्रभावः** - यक्षगानसाहित्यस्य अग्रमान्यः कविः अनेकयक्षगानकाव्यकर्ता पार्तिसुब्बः कर्णाटककेरलसीमप्रदेशीयः केरलानां नृत्यप्रकारेण कृष्णनाटम् इत्यनेन प्रभावित आसीदिति तत्काव्ये विद्यमानानि **केळिकोट्टु, तेरे, पुरप्पाडु** इत्यादिमलयाळभाषापदानि प्रमाणयन्ति । पार्तिसुब्बेन कृष्णचरितमाश्रित्य अनेकानि यक्षकाव्यानि रचितानि ।

९. **भक्तिभावव्यञ्जका रागाः** – यक्षगाने उपयुज्यमानेषु रागेषु अधिकाः भक्तिव्यञ्जकाः सन्ति ।

१०. **मुक्तरङ्गवेदी** – यक्षगाने मुक्तरङ्गवेदी एव प्राचुर्येण भवति। एषा सामूहिकभक्तेः संसूचिका वर्तते ।

११. **जनानां भगवद्भक्तिः** - कर्णाटकेषु जननाम् आस्तिकबुद्धिः, भगवद्भक्तिः, भगवदुपासना, दैवाराधना

धार्मिकश्रद्धा च विशिष्टा विलोक्यते । तत्र  यक्षगानस्य प्रभावो भूयान् वर्तते ।

| प्रसिद्धाः केचन विष्णुचरिताश्रिता यक्षगानप्रसङ्गाः (यक्षगानकाव्यानि) | | |
|---|---|---|
| **क्र.सं** | **कृतिः** | **लेखकः** |
| १ | कृष्णसन्धान | देवीदासः |
| २ | भीष्मार्जुनकाळग | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३ | अभिमन्युकाळग, सैन्धववध | देवीदासः |
| ४ | द्रोणपर्व | उडुपिराजगोपालाचार्यः |
| ५ | कर्णपर्व | गेरुसोप्पशान्तप्पय्यः |
| ६ | गदापर्व | अज्ञातकर्तृकम् |
| ७ | साहसभीमविजय | के. पि. वेङ्कप्पशेट्टी |
| ८ | कर्णार्जुनकाळग | पाण्डेश्वरवेङ्कटः |
| ९ | विराटपर्व | अजपुरविष्णुः |
| १० | भीष्मोत्पत्ति, भीष्मविजय | हलसिनहळ्ळि नरसिंहशास्त्री |
| ११ | आदिपर्व | अज्ञातकर्तृकम् |
| १२ | द्रौपदीस्वयंवर | हट्टियङ्गडिरामभट्टः |
| १३ | सुभद्राकल्याण | हट्टियङ्गडिरामभट्टः |
| १४ | राजसूयाध्वर | बिष्टप्पः |
| १५ | इन्द्रकीलक | ब्रह्मापुरविष्णुभागवतः |
| १६ | घोषयात्रा | देवीदासः |
| १७ | सुधन्वार्जुनकाळग | वेङ्कटेशभक्तः |
| १८ | बभ्रुवाहनकाळग | देवीदासः |
| १९ | श्रीकृष्णपरम्धाम | के वि गोविन्दभट्टः |
| २० | हिरण्याक्षवध | कु. रामकृष्णय्यः |

| | | |
|---|---|---|
| २१ | वराहचरित | जत्ति ईश्वरभागवतः |
| २२ | प्रह्लादचरित | मैर्पाडिवेङ्कटरमणय्यः |
| २३ | वामनचरित | हलसिनहळ्ळि नरसिंहशास्त्री |
| २४ | श्रीकृष्णबाललीले | होस्तोटमञ्जुनाथभागवतः |
| २५ | कंसवध | होस्तोटमञ्जुनाथभागवतः |
| २६ | त्रिजन्मकंसकैवल्य | बेळसलिगे गपतिहेगडे |
| २७ | श्रीविष्णुलीले | वि. डि वि होळ्ळः |
| २८ | राधाविलास | मट्टिवासुदेवप्रभुः |
| २९ | वीरमणिकाळग | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३० | कृष्णचरित | पार्तिसुब्बः |
| ३१ | यादवाभ्युदय | पेरडालकृष्णय्यः |
| ३२ | रुक्मिणीस्वयंवर | मलेनाडकविः |
| ३३ | श्रीकृष्णविवाह | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३४ | जाम्बवतीकल्याण, सत्यभामापरिणय | चोराडिवेङ्कटरमणभट्टः |
| ३५ | पारिजातप्रसङ्ग | अजपुरसुब्बः |
| ३६ | नरकासुरवध | बलिपनारायणभागवतः |
| ३७ | कर्णावसानम् (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ३८ | ययात्युद्धरणम् (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ३९ | कुन्तीसन्तापः (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ४० | सुधन्वार्जुनीयम् (संस्कृतम्) | डा. महेशकाकत्करः |
| ४१ | कंसवधः (संस्कृतम्) | डा. महेशकाकत्करः |
| ४२ | लवकुशीयम् (संस्कृतम्) | डा. महेशकाकत्करः |
| ४३ | सत्यसेनवधः (संस्कृतम्) | राघवेन्द्रपुराणिकः |

एतेषां काव्यानां प्रयोगाः पडवलपायप्रकारे प्राचुर्येण भवन्ति।

त्रयोदशशतके कर्णाटकेषु प्रवृत्ते भक्तेरान्दोलने यक्षगानकलायाः महद्योगदानम् आसीदिति इतिहासावलोकनेन स्पष्टं भवति । किञ्च अद्यापि कर्णाटकेषु गृहेषु आबालवृद्धाः पौराणिककथासु चर्चां कुर्वन्ति । वालिवधः, सीतापरित्यागः, अम्बाविवाहः, द्रौपदीवस्त्रापहारः इत्यादिविषयेषु सयुक्तिकं संवादं कुर्वन्ति । जनानां विशेषतया आस्तिकता भगवद्भक्तिश्च दृढतया वर्तते । एवं कर्णाटकेषु कृष्णभक्तेः प्रसारे यक्षगानस्य विशिष्टं पात्रमस्तीति शुभम् ।

**सहायकग्रन्थाः**

1. यक्षगानपदकोश – डा. एम्. प्रभाकरजोशी, प्रा.जा.र. अध्ययनकेन्द्र, उडुपि(१९९४)
2. यक्षगान मत्तु चित्रकले – मूडुबेळ्ळे उपाध्यायः, कलागङ्गोत्री, सोमेश्वर(१९९५)
3. यक्षान्दोळन -अमृतसोमेश्वरः, कर्णाटकललितकला एकाडेमी, बेङ्गलूरु(२००४)
4. यक्षगान कलादर्शन – प्रो.टि. केशवभट्टः, कन्नडसाहित्यपरिषत्, बेङ्गलूर्(२००४)
5. रङ्गवैखरी – पादेकल्लुनरसिंहभट्टः, मित्तनड्क(१९८१)
6. यक्षगान परिशीलन –जि.एस्.भट्टः, कर्णाटक जानपद मत्तु यक्षगान एकाडेमी, बेङ्गलूरु(१९९५)
7. विलोकन – डा. के. एम्. राघव नम्बियार्, इळाप्रकाशन, बेङ्गलूरु(१९९८)
8. यक्षगान सभालक्षण – श्रीमन्मध्वसिद्धान्तग्रन्थालयः,(२००२)
9. सङ्क्षिप्तनाट्यशास्त्रम् – प्रो. राधावल्लभत्रिपाठी,वाणीप्रकाशन,नई दिल्ली(२००९)
10. Vaisnavism in Indian Arts and Culture -Ratan Parimoo (Ed) Book & Books Publishers & Distributors, New Dehli(1987)
11. www.bayalata.com
12. www.kanaja.in

**********

# करुणविप्रलम्भरसः - एकं विवेचनम्

**डा. चन्द्रकला आर् कोण्डी**

सहायकाचार्या, साहित्यविभागः

काव्यस्यात्मा रसः नवसङ्ख्याक इत्येतत् 'नवरसरुचिरा कविभारती'[1] 'नव काव्ये रसाः स्मृताः'[2] - इत्याद्युक्तिभिः शान्तस्य रसत्वाङ्गीकारेण भक्तिवात्सल्यादीनाञ्च भावान्तर्गतत्वाङ्गीकारेण च प्रमाणितं वर्तते । तत्र च नवरसेषु करुणोऽन्यतमः । शृङ्गारश्च तथा । शृङ्गारे सम्भोग-विप्रलम्भाख्यौ द्वौ भेदौ अङ्गीकृतौ । तयोः करुण-विप्रलम्भशृङ्गारयोः अत्यन्तं सूक्ष्मः भेदः दृश्यते । तयोर्मध्ये करुणविप्रलम्भाख्यः कश्चन रस आलङ्कारिकैः कैश्चित् अङ्गीक्रियते । अस्य नाम्नैव ज्ञायते यत् द्वयोरपि रसयोः लक्षणसमन्वयस्तस्य भवतीति । रुद्रट-भोज-विश्वनाथादिभिः पृथग्रूपेणैव अस्य चर्चा कृता वर्तते । करुणविप्रलम्भस्य लक्षणं प्रतिपादयन् रुद्रटः वदति-

**करुणः स विप्रलम्भो यत्रान्यतरो म्रियेत नायकयोः ।**
**यदि वा मृतकल्पः स्यात्तत्रान्यस्तद्गतं प्रलपेत् ॥** [3]

नायिकानायकयोः अन्यतरस्य मरणे जाते जीवितेन क्रियमाणप्रलापेन जायमानो रसः करुण इति तदभिप्रायः। सरस्वतीकण्ठाभरणे भोजः एतद्विषये स्वाभिप्रायमेवं प्रस्तौति-

**लोकान्तरगते यूनि वल्लभे वल्लभा यदा ।**
**भृशं दुःखायते दीनः करुणः स तदोच्यते ॥** [4]

यदा युवा वल्लभः लोकान्तरं गच्छति, तदा च तस्य वल्लभा भृशं दुःखमनुभवति तदा अयं रसः वक्तव्यः । अस्य मते करुणविप्रलम्भस्य स्वरूपम् एवं वक्तुं शक्यम् -

द्वयोः प्रिययोर्मध्ये अन्यतरस्य मरणं सञ्जातम्, कालान्तरे च तयोः पुनर्मिलनमपि सञ्जातम् दैवात् यदि तदा मरण-पुनर्मिलनयोर्मध्ये अन्यतरेण जीवितेन अनुभूयमानेन महद्दुःखेन जायमानो रसः करुणविप्रलम्भः । तथैव

---

[1] काव्यप्रकाशः-मङ्गलश्लोके

[2] नाट्यशास्त्रम्

[3] रुद्रटकाव्यालङ्कारः-१४/३४

[4] सरस्वतीकण्ठाभरणम्-५/५०

यद्यपि अन्यतरस्य मरणं न सञ्जातं, तथापि मरणं जातमित्येव भावयित्वा अन्यतरेण अनुभूयमाने दुःखेऽपि स एव रसो वक्तव्यः ।

वस्तुतो विचार्यमाणे एते काव्यशास्त्राचार्याः करुणविप्रलम्भं करुणरसस्य सीमायामेव दृष्टवन्तः । प्रेमिणो लोकान्तरगमने प्रेमिणः करुणविप्रलम्भो यद्युच्यते तर्हि करुणस्य स्थलं किमिति प्रश्न उदेति । यतः तादृशसन्दर्भे तत्र रतिस्थायिभावस्य स्पर्शोऽपि न भवति । यत्र सम्पूर्णं नैराश्यमेव भवति तत्र करुण एव भवति, न पुनः करुणविप्रलम्भः । भरतमुनिः करुण-विप्रलम्भयोः प्रसङ्गे तयोर्भेदं स्पष्टतया प्रतिपादयति-

**करुणस्तु शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाशवधबन्धनसमुत्थो निरपेक्षभावः । औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भकृतः । एवमन्यः करुणः, अन्यश्च विप्रलम्भ इति** [1]।

विप्रलम्भस्य स्थायी रतिः प्रवृत्तिमूला ; किन्तु करुणस्थायी शोकः निवृत्तिमूल इति महान् भेदस्तयोः । करुणे पूर्णतया निरपेक्षभावस्य अर्थात् नैराश्यस्य अवस्था भवति । यतः द्वयोर्मध्ये लोकान्तरगतः पुनर्नायातीति अन्यः जानात्येव । अतस्तस्यागमनस्य प्रतीक्षा नैव भवतीति नैरपेक्ष्यम् । किन्तु विप्रलम्भे समागमस्य आशाबन्धः भवतीति सापेक्षं तत् । इदं तथ्यं विश्वनाथेन सूक्ष्मतया प्रस्तुतमस्ति साहित्यदर्पणे-

**यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।**
**विमनायते यदैकस्ततो भवेत् करुणविप्रलम्भः ॥** [2]

यदि द्वयोर्मध्ये अन्यतरः लोकान्तरगतः, तदा अन्यः दुःखमनुभवति, किन्तु

१. अस्मिन्नेव जन्मनि अग्रिमकाले समागमस्य आशा वर्तते, तर्हि सः करुणविप्रलम्भः ।
२. पुनः समागमस्याशा नास्ति चेत्, जन्मान्तरे समागमस्याशा अस्ति चेदपि करुण एव-**'पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः'** ।

इति व्यवस्था करुणस्य करुणविप्रलम्भस्य च । विश्वनाथस्य मतं यदि अवलोकयामः तर्हि 'पुनरलभ्ये करुणाख्यः रस' इत्येतत् सङ्गच्छते, किन्तु 'शरीरान्तरेण लभ्येऽपि करुण एव' इत्येतत् भरतमुनेरभिप्रायस्य विरुद्धमिति ज्ञायते । यतस्तत्र पुनस्समागमस्याशा भवति, तेन रतिस्थायिनः प्रसक्तिरस्ति अतः सापेक्षत्वं वर्तत इति तत्रापि करुणविप्रलम्भस्यैवाङ्गीकार उचितः ।

---

[1] नाट्यशास्त्रम्-अध्याय-६

[2] साहित्यदर्पणम्-३/२०९

ISSN: 2320-740X

शृङ्गारप्रकाशे भोजः करुणस्य करुणविप्रलम्भस्य च मध्ये चतुरान् भेदान् दर्शयति हेतु-फल-विषय-स्वरूपभेदेन ।

रत्येकहेतुः करुणः प्रीतिदयाद्यनेकहेतुः शोकः

पुनः सङ्गमफलः करुणः अपुनः सङ्गमफलः शोकः ।

स्त्रीपुंसविषयः करुणः अस्त्रीपुंसविषयः शोकः

स प्रत्याशारूपः करुणः निष्प्रत्याशारूपः शोकः ॥ [1]

अत्र 'करुण' इति शब्दः 'करुणविप्रलम्भ'वाचकः, 'शोक'शब्दः 'करुणरस'वाचकः ।

अनेन करुणविप्रलम्भविषये एवं वक्तुं शक्यं यत् शोकस्य प्रकृत्या युक्तस्यापि करुणविप्रलम्भस्य विरहेऽन्तर्भावः भवतीति । यतः तस्य मूलं रतिस्थायिभाव एव । कादम्बर्यां पुण्डरीकस्य मरणानन्तरं महाश्वेतायाः कपिञ्जलस्य च विलापः करुणमेवाभिव्यनक्ति, किन्तु आकाशभाषितश्रवणेन महाश्वेतायाः हृदि पुण्डरीकस्य पुनर्मिलनाशा जागर्ति । तत्क्षणमेव तत्र शोकस्य स्थाने रतिभाव उदेति, तेन करुणरसः करुणविप्रलम्भत्वेन परिणमति । साहित्यदर्पणे इदमेवं विवृतम्-

**"किञ्च आकाशसरस्वतीभाषानन्तरमेव शृङ्गारः, सङ्गमप्रत्याशया रतेरुद्भवात् । प्रथमं तु करुण एव इत्यभियुक्ता मन्यन्ते" ।** इति ।

एतादृशसन्दर्भः करुणविप्रलम्भस्य विषय इत्यत्र समेषामालङ्कारिकाणां सहमतिर्नास्ति । आचार्यविश्वेश्वरः एनं सन्दर्भम् अद्भुतरसस्य विषयं मन्यते । पुण्डरीकस्य मरणानन्तरं पुनस्तस्य जीवितप्राप्तिः कविकल्पितैव । किन्तु घटनाया दृष्ट्या यदि विचारयामस्तर्हि मृत्योरनन्तरं करुणस्यैव स्थितिः वक्तव्या । यतः मृतः कश्चन जीवतीत्येतन्न सम्भवनीयम् । पुनर्जीवनमित्यनेन एतदेव वक्तुं शक्यं यत् 'मृत इति सम्भावितमासीत्, किन्तु न मृत' इति । उत्तररामचरितनाटके रामः सीतापरित्यागानन्तरं कस्यचित् मृगस्य आहारो भूत्वा सा मृतेत्येव मनसि निश्चयं कृतवानासीत् । किन्तु सीता नैव मृता । एतादृशसन्दर्भ एव करुणविप्रलम्भस्य विषयो भवति। मृत एव उज्जीवितश्चेत् तत्र अद्भुत एव रस इति तस्याभिप्रायः ।

किन्तु अद्भुतरसस्य क्षेत्रमत्यल्पम् । यदा दिव्यपुरुषः नभोमण्डलादवतीर्य द्वयोरपि पुनर्मिलनस्य भविष्यं

[1] शृङ्गारप्रकाशः


ISSN: 2320-740X

वदति तदा अद्भुतम् । अतः व्यभिचारिमात्रं तदिति वक्तव्यं भवतीति विश्वेश्वराचार्यस्य मतं किञ्चिदसङ्गतं भाति ।

धनञ्जय-शारदातनयादय आचार्याः पूर्वोक्ते पुण्डरीकमरणप्रसङ्गे प्रवासविप्रलम्भं मन्यन्ते । किन्तु तदपि न समीचीनम्, यतः प्रवासे सशरीरं देशान्तरगमनं भवति यत्र करुणे केवलं प्राणानां लोकान्तरगमनं भवति-**"नन्वेवं प्रवासकरुणयोः को भेद इति चेदुच्यते । शरीरेण देशान्तरगमने प्रवासः प्राणैर्देशान्तरगमने करुण इति** ।[1] एवंरीत्या पुण्डरीकमरणानन्तरं महाश्वेतादिभिः करणीयः विलापः करुणस्यैव विषयः, न तु विप्रलम्भस्य । मरणानन्तरं दैवप्रभावात् पुनर्जीविते सति मिलनस्य प्रत्याशा जायत इति हेतोः तत्र करुणविप्रलम्भोऽङ्गीकरणीयः । यतः एतादृशसन्दर्भे जायमाना रसानुभूतिः करुणे नान्तर्भवति, न वा विप्रलम्भे । अतः करुणविप्रलम्भस्य अङ्गीकारः समुचित इति भाति ।

उत्तररामचरितनाटके रामेणानुभूतस्य सीतावियोगद्वयस्य स्वयं राम एव एवं वर्णयति-

उपायानां भावादविरतविनोदव्यतिकरैः
विमर्दैः वीराणां जगति जनितात्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरयं त्वत्प्रतिविधिः ॥ [2]

रामेण सीतावियोगजन्यदुःखं द्विवारमनुभूतम् ; रावणेन तस्या अपहरणे, लोकापवादहेतोः स्वेनैव तस्यास्त्यागे च । तयोः द्वयोरपि वियोगस्य भिन्नस्वरूपं राम एवं वदति-प्रथमवारं यदा रावणेन साऽपहृता तदा वियोगः सावधिकः अर्थात् रिपुनाशावधिक इति वियोगः प्रतीकारक्षम आसीत् रिपुनाशरूपोपायस्तत्र आसीदिति । अतः समागमाशा जागर्ति स्म । किन्तु इदानीं तस्या वियोगः निरवधिकः । सा कदा पुनः प्राप्यते, प्राप्यते न वा इत्यादीनां प्रश्नानां नास्त्येवोत्तरम् इति । तां पुनः प्राप्तुं कोऽप्युपायोऽपि नास्ति ।

अत्र प्रथमवियोगः विप्रलम्भस्य, द्वितीयश्च करुणस्य विषयः । करुणस्य करुणविप्रलम्भस्य च भेदस्य सूक्ष्मत्वात् हेमचन्द्र-मम्मटाचार्यादिभिः अयं करुण एवान्तर्भावितः । मम्मटाचार्येण प्रतिपादितेषु विप्रलम्भस्य पञ्चप्रकारेषु [3] करुणविप्रलम्भः नोक्तः ।

---

[1] रसार्णवसुधाकरः-२/२१९ (वृत्ति)

[2] उत्तररामचरितम्-३/४४

[3] अभिलाष-विरह-ईर्ष्या-प्रवास-शापजाः ।

पण्डितराजजगन्नाथः करुणविप्रलम्भस्य पृथक्तया सत्तां नाङ्गीचकार, किन्तु तस्य अंशतः करुणे, अंशतश्च विप्रलम्भेऽन्तर्भावं दर्शितवान् । यदा स्त्रीपुरुषयोर्वियोगाद्वैकल्यं भवति तदा अवश्यं तत्र शोको भवत्येव । किन्तु सः शोकः करुणस्यैव स्थायीभावः भवतीति वक्तुं न शक्यते । स शोकः तदैव करुणस्य स्थायीभावो भवितुमर्हति यदा सः (शोकः)प्रेमपात्रस्य मरणज्ञानेन सह भवति । यतः तदैव तस्य शोकस्य प्राधान्यं सङ्गच्छते । यदि 'मम प्रियः/प्रिया पुनः जीवति' इति ज्ञानं वर्तते तर्हि शोकेन पुष्टा रतिरेव तत्र प्राधान्यं प्राप्नोति, न तु केवलशोकः । तदा तत्र विप्रलम्भ एव-**"स्त्रीपुंसयोस्तु वियोगे जीवित्वज्ञानदशायां वैक्लव्यपोषिताया रतेरेव प्राधान्यात् शृङ्गारो विप्रलम्भाख्यो रसः, वैक्लव्यं तु सञ्चारिमात्रम्** [1]**।"** यदा प्रेमपात्रस्य मरणज्ञाने सति स्त्रीपुरुषवियोगेन उत्पन्ना व्याकुलता प्राधान्यं भजते तदा रत्या पुष्टः भवति शोकः, तदा करुणरसः-**"मृतत्वज्ञानदशायां तु रतिपोषितस्य वैक्लव्यस्येति करुण एव** [2]**।** मृतस्य दैवप्रभावात् पुनरुज्जीवनप्रसङ्गे जगन्नाथः विप्रलम्भमेव मन्यते-**"यदि तु सत्यपि मृतत्वज्ञाने; देवताप्रसादादिना पुनरुज्जीवनज्ञानं कथञ्चित् स्यात्; तदालम्बनस्य आत्यन्तिकनिरासाभावात् चिरप्रवास इव विप्रलम्भ एव, न स करुणः"** [3]।

एवं यद्यपि जगन्नाथः तादृशसन्दर्भे विप्रलम्भमेव वदति तथापि करुणविप्रलम्भमतमपि उपन्यस्यति । तस्मिन् विषये स्वस्य असहमतिं **केचिदिति**पदेन सूचितवान्- **"केचित्तु रसान्तरमेवात्र करुणविप्रलम्भाख्यमिच्छन्ति"** ।

श्रीमदभिनवगुप्तपादैः अभिनवभारत्यां विप्रलम्भशृङ्गारे अभिलाषादारभ्य मरणपर्यन्तं दश अवस्थानां वर्णनं कृतम् । मरणस्य वर्णनम् विप्रलम्भ इव इष्टनाशजन्यकरुणेऽपि क्रियते । तर्हि विप्रलम्भे दृश्यमानस्य मरणस्य, शोके वर्तमानस्य मरणस्य च को भेदः ? एनां समस्यां विश्वनाथः परिहृतवान् । तन्मते -

१. प्रथमतः करुणविप्रलम्भे मरणस्य वर्णनमेव वर्जितम्, रसविच्छेदात् ।
२. यदि तस्य वर्णनमत्यन्तमावश्यकम्,तदा सम्पूर्णतया मृत्योः अर्थादात्यन्तिक प्राणवियोगस्य वर्णनमकृत्वा मृतप्रायावस्थाया वर्णनमेव करणीयम्।
३. तस्य च मरणस्य वर्णनं केवलम् अभिलाषरूपेणैव भवेत्, न तु व्यावहारिकी परिणतिस्तत्रापेक्षितं भवेत् ।

---

[1] रसगङ्गाधरः-प्रथमाननम्

[2] रसगङ्गाधरः-प्रथमाननम्

[3] रसगङ्गाधरः-प्रथमाननम्

४. यदि वास्तविकी मृतिरेव अपेक्षिता तर्हि मरणानन्तरं पुनरुज्जीवनस्य अवधिः अत्यल्पं भवेत्, न तु दीर्घा ।

एतत्सर्वमपि विश्वनाथेन एवमुक्तम्-

**रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते**

**जातप्रायं तु तद्वाच्यं चेतसाकाङ्क्षितं तथा ।**

**वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः ॥** [1]

ध्वन्यालोककारोऽपि अस्मिन् विषये स्वस्य सहमतिं प्रकटितवान्-**"शृङ्गारे वा मरणस्य अदीर्घकालप्रत्यापत्तिसम्भवे कदाचिदुपनिबन्धो नात्यन्तविरोधी । दीर्घकालप्रत्यापत्तौ तु तस्यान्तरा प्रवाहविच्छेद एव इत्येवंविधेतिवृत्तोपनिबन्धनं रसबन्धप्रधानेन कविना परिहर्तव्यम् "**।

शृङ्गारे यदि शीघ्रं मिलनं भवति तदा मरणं तस्य विरोधी न भवति । किन्तु दीर्घकालानन्तरमेव यदि मिलनं भवति तदा मध्ये दीर्घकालं यावत् रसप्रवाहस्य विच्छेदो भवति । अत एव तत्र मरणानन्तरं पुनर्मिलनम् अल्पावधौ एव साध्यते चेत् सहृदयानां रसास्वादे विच्छेदो न जायते । तेन शृङ्गाररसस्य अविच्छिन्ना प्रतीतिर्जायते ।

आनन्दवर्धनेन प्रतिपादितोऽयं विचारः रघुवंशे अजविलापसन्दर्भे दृश्यते । इन्दुमत्याः मरणानन्तरं रतिभावस्य विच्छेदो यथा न स्यात्तथा निर्वहति कविः तं सन्दर्भम् । इन्दुमत्याः मरणानन्तरं शीघ्रमेव अजोऽपि मरणमाप्नोति, येन देहान्तरेण इन्दुमत्या सह समागमस्तस्याभूत्, येन च रतेर्विच्छेदो न जातः । अतः नैरन्तर्येण तत्र रतिरनुभूयत एव सहृदयैः । अत एव अर्थात् शृङ्गारस्य अविच्छिन्नप्रतीत्यर्थमेव कविस्तत्र 'मरण'शब्दस्य प्रयोगमकृत्वा 'देहन्यास' इत्यमुं शब्दं प्रयुक्तवान् । अन्यथा शोकात्मकः करुण एव अभिव्यज्यते स्म ।

अन्ततः निष्कर्षरूपेण एतदेव वक्तुं शक्यते यत् करुणविप्रलम्भे यद्यपि द्वयोरपि रसयोः लक्षणयोरन्वयो भवति, तथापि विप्रलम्भस्यैव अंशस्तत्र अधिकः, प्रधानश्च भवति । यतस्तत्र आत्यन्तिकवियोगाभावात् 'करुण' इति वक्तुमेव न शक्यते । अतः करुणविप्रलम्भस्य प्रवृत्तिमूलकत्वं सापेक्षत्वं च अङ्गीकरणीयमेव भवति । किन्तु स रसत्वेनाङ्गीकरणीयो न वेति विचारः विवादश्च आलङ्कारिकेषु वर्तत एव इति शम् ।

**************

[1] साहित्यदर्पणम्-३/१९३-९४

# सामाजिकानां संस्कृताभिमुखीकरणे विद्यमानाः मनोवैज्ञानिकोपायाः

**डा. गणेश ति पण्डितः**

सहायकाचार्यः, शिक्षाविभागः

प्रत्येकमपि व्यक्तिविशेषः संस्थाविशेषो वा तदितरेषां सुखदुःखेषु कियता प्रमाणेन भागं गृह्णाति, पुनः कियता प्रमाणेन अन्येषाम् आवश्यकतानां पूर्त्यवसरे स्वीयं योगदानं ददाति, पुनरितरे कियता प्रमाणेन एनं व्यक्तिविशेषम् अभिलषन्ति अवलम्बन्ते च इत्येतत्सर्वमपि सामाजिकसमायोजनस्य विषयविशेषः वर्तते । यस्य व्यक्तिविशेषस्य संस्थाविशेषस्य वा सामाजिकसमायोजनक्षमता विकसिता उत्कृष्टा चास्ति तस्यैव वचांसि कार्याणि च इतरेभ्यः सामाजिकेभ्यः प्रेरणाप्रदानि जायन्ते । किञ्च धनात्मकः सामाजिकविकासः यस्मिन् व्यक्तिविशेषे परिदृश्यते तमेव लोकः (समाजः) पुरस्करोति तद्वचनानि सश्रद्धं शृणोति च ।

सदाचारशीलता, वार्तालापक्षमता, समूहप्रीतिः, परमाणुरूपाणामपि परेषां गुणानां पर्वतीकरणक्षमता, मैत्रीपूर्णः व्यवहारः, उत्तरदायित्वनिर्वहणचातुर्यम्, सभासु सङ्घटनेषु च सक्रियभागग्रहणसामर्थ्यम्, सहोद्योगिभिः कार्यकर्तृभिर्वा सुसामञ्जस्यसंस्थापनक्षमता, सहयोगभावना, सहवासबुद्धिः, उत्तरदायित्वनिर्वहणे व्यक्तिरियं योग्या इत्यस्य भावस्य (समाजे) जागरणक्षमता, समाजं प्रति धनात्मकदृष्टिः इत्यादयः गुणाः गुणविशेषाः वा सामाजिकान् समाकृष्टुं विद्यमानाः अनिवार्योपायाः सन्ति ।

प्रत्येकमपि व्यक्तिविशेषस्य आत्मविश्वासं तदीयं लक्ष्यं तदीयं शारीरिकं मानसिकं सौष्ठवं च तं परितः वर्तमानाः सामाजिकाः सर्वादौ परीक्षणबुद्ध्या एव परिशीलयन्ति । वास्तविके प्रपञ्चे स्थित्वा न कोऽपि मानवः क्षणाभ्यन्ते समाजप्रियः भविष्यति । एवं सामाजिकानां समाकर्षणं तेषां लक्ष्योन्मुखीकरणं वा दिनसाध्यं माससाध्यं वा कार्यं नास्तीति निश्चप्रचम् ।

सामाजिकानां संस्कृतभाषोन्मुखीकरणप्रसङ्गेऽपि एते एव गुणविशेषाः प्राथम्यं भजन्ते । संस्कृतभाषाप्रचारान्दोलनरतेषु व्यक्तिविशेषेषु संस्थाविशेषेषु एते एव गुणविशेषाः विलसेयुरपि । संस्कृतस्य महिमवर्णनेन उपदेशमात्रेण प्रवचनमात्रेण कक्ष्यास्वीकरणपुरस्सरं कालांशानुगुणं बोधनमात्रेण वा सामाजिकानां समाकर्षणं कर्तुं सुतरां नैव शक्यते इत्यत्र समाकलनीयम् ।

संस्कृतक्षेत्रं तु अतीव व्यापकं क्षेत्रं वर्तते । केवलम् अस्य सम्भाषणपक्षमात्रस्य आहोस्वित् मौखिकरूपमात्रस्य प्रचारोऽपि नातिसरलं कार्यं वर्तते । विभिन्नमतीनां विभिन्नविचाराः विभिन्नधोरण्यः विभिन्नाभिरुचयश्च ऐक्यमत्यसम्पादने एकाभिप्रायसङ्ग्रहणे वा नूनं बाधां जनयति । संस्कृतभाषायाः व्यापकप्रसारार्थं प्रचारार्थं च समाजस्य सामाजिकानां च पात्रम् अत्यधिकं वर्तते । समाजस्य अंशभूताः संस्कृतविद्यालयविश्वविद्यालयादयास्तु औपचारिकशैक्षिकव्यवस्थायाः सञ्चालने एव (पठनप्रवचनप्रक्रियानिर्वहणे) आधिक्येन निमग्नाः भविष्यन्ति सदा । किञ्च औपचारिकशैक्षिकव्यवस्थायां विभिन्नाः सीमाः सन्तीत्यतः औपचारिकसंस्थाभिरेव सामाजिकानां समाकर्षणदायित्वं वोढव्यमित्युक्ते तत् कष्टसाध्यमेव । एवमेव संस्कृतक्षेत्रे वर्तमानाः संस्कृतमन्नं भुञ्जानाः आचार्योपचार्यसहाचार्यप्रभृतयः एव सर्वदा “**पठत संस्कृतं वदत संस्कृतम्**” इति जपन्ति चेत्तर्हि समाजे नाधिकः प्रभावः स्यात् । उदाहरणार्थं – विपण्यां वर्तमानः कश्चन पदार्थविक्रेता सर्वदा उच्चैः कथयति यत् – मदीयं क्रय्यं वस्तुजातं सर्वमपि अद्वितीयं श्रेष्ठं चास्तीति । परन्तु क्रेतारः विक्रेतुर्वचने झटिति विश्वासं नैव कुर्वन्ति । विपण्यां विद्यमानान् इतरान् अवलोक्य पारिपार्श्विकस्य स्यूतमपि परिशील्य अन्ततोगत्वा क्रेतव्यं वा न वा इति निर्धारयन्ति । भाषाप्रसङ्गेऽपि एवमेव । यदि यन्त्रज्ञाः तन्त्रज्ञाः वैद्याः प्रशासकाः वा संस्कृतस्य विषये विशेषादरं प्रकटयन्ति भाषाप्रसाराय च आत्मानः नियोजयिष्यन्ति तर्हि तस्य परिणामोऽपि समाजे अद्वितीयः एव भविष्यति । परं भाषाप्रचारस्य सूत्रधाराः नेपथ्ये स्थित्वा प्रतिपदं कार्यरतेभ्यः मागदर्शनं कुर्युरेव । किञ्च जननायकाः (प्रधानमन्त्री राष्ट्रपतिः शासकादयः) संस्कृतेन भाषन्ते चेदपि तेषां विषये समाजः सामाजिकमाध्यमानि च आमासं चर्चयन्ति । भाषाप्रसारावसरे एते विषयाः अवश्यं मनसि धर्तव्या एव ।

सामाजिकानां भावनाः अवगन्तुं शक्तेन समाजस्य मध्ये अहर्निशं स्थितवता समुदायस्याभिप्रायस्वीकरणे तिरस्करणे च युक्तिसङ्गतं मतमुपस्थापयता व्यक्तिविशेषेण संस्थाविशेषेण वा लक्ष्योन्मुखीकरणकार्यं सुचारुरूपेण सम्पादयितुं शक्यते नान्यैरिति समाजमनोविज्ञानिनां राद्धान्तः । यस्य सामाजिकसम्पर्कः यादृशोऽस्ति तस्य सर्वाण्यपि कार्याणि तदनु सफलानि विफलानि वा जायन्ते । धनात्मकसामाजिकसम्पर्कैः सामाजिकाः समाकृष्टाः ऋणात्मकैश्च अपकृष्टाश्च भविष्यन्ति इति तेषां पिण्डितोऽर्थः ।

लोकेऽस्मिन् कस्यचित् प्रौढस्य अपरिपक्वं व्यवहारं दृष्ट्वा कश्चित् सामाजिकः कथयति यत् – “किं भोः ! बालवत् चेष्टसे त्वम्” इति । बालस्य चेष्टा बालाय युज्यते न तु प्रौढाय इत्यत्रेङ्गितोऽर्थः । तन्नाम प्रौढस्य चेष्टासु अथवा सामाजिकव्यवहारे परिपक्वता नैव दृश्यते इति अनेन सिद्धम् । “सामाजिकापरिपक्वता” सामाजिकानां

लक्ष्योन्मुखीकरणप्रसङ्गे विघ्नमुत्पादयति इत्यनेन दृष्टान्तेन अवगम्यते । सामाजिकपरिपक्वता, सामाजिकगतिशीलता, सामाजिकस्तरः, अनुरूपता इत्यादीनि मनोवैज्ञानिककारकाणि इत्युच्यन्ते । एतेषां सम्प्रत्ययाः अवश्यं सर्वैरपि भाषाविद्भिः भाषाप्रचारकैश्च विज्ञेयाः।

मानवः लोकादेव लोकाचारम् अधिगच्छति । किञ्च प्रत्येकमपि लोकस्य भाषाचारविचारपरम्पराः अधिगन्तुम् अपेक्षिता मानसिकक्षमता तस्मिन् सहजरूपेण निवसत्येव ।सत्यामपि क्षमतायां केचन लोकाचारं नाधिगच्छन्ति उपेक्ष्यन्ते वा । सामाजिकपरिपक्वतायाः निम्नमुखी अवस्था एषा । समाजेन सह तादात्म्यभावसंस्थापनम्, सामाजिकसमायोजनम् इत्यादिकं व्यक्त्यायत्तमेव विद्यते । समाजेन सह सामान्यसामञ्जस्यसंस्थापनाय प्रत्येकमपि मानवे विद्यमानः सामाजिकप्रविधिरेव (Social Technique) पर्याप्तोऽस्ति ।मानवे आबाल्यात् (सामाजिकीकरणप्रक्रियायां वर्तमाने) अर्जितः एतादृशः सामाजिकप्रविधिरेव कालान्तरे सरलात् जटिलातिजटिलमपि कार्यसम्पादने प्रतिपदं साहाय्यमाचरति । अर्जितप्रविधेः अनुप्रयोगबुद्धिर्बहुषु जनेषु अद्यत्वे नैव दृश्यते इति तु कलिकालस्य प्रभावं द्योतयति इति मन्यामहे ।

अनुरूपता (Conformity) इति शब्दः सामाजिकमनोविज्ञाने बहुधा श्रूयते । अयमेकः व्याख्यातुम् अशक्यः जटिलो वा शब्दः वर्तते । अतः उदाहरणापुरस्सरं स्पष्टीकर्तुं प्रयते ।

एकस्य समुदायस्य (व्यक्तिः ⇨ परिवारः ⇨ समुदायः ⇨ समाजः) अधिकाधिकानाम् अभिप्रायः एकस्मिन् विषयविशेषे समानः एव वर्तते इति चिन्त्यताम् । परं तत्समुदायस्थः कश्चन व्यक्तिविशेषः (द्वित्राः अपि) स्वीयं विरुद्धमेवाभिप्रायम् असम्मतिं वा तद्विषये प्रकटयेत् । व्यक्तिविशेषस्यास्य प्रत्यक्षानुभवः तार्किकक्षमता च विरुद्धाभिप्रायप्रकटने तं चोदयतितराम् । कदाचित् एवमपि जायेत यत् संस्थायाः समुदायस्य विषये विद्यमानः प्रीत्यतिशयः अन्धानुरागो वा क्वचित् इतरसम्मताभिप्रायस्य अनुमोदनाय विरुद्धाभिप्रायं प्रकटितवन्तं प्रचोदयेत् । अथवा व्यक्तिविशेषः स्वगतं चिन्तयेत् यत् इतरेभ्योऽपि यदि मुक्तावसरः स्वाभिप्रायप्रकटनवेलायां लभ्येत तर्हि तेऽपि स्वीयं स्वीयं व्यक्तिगताभिप्रायं मुक्तकण्ठेन उद्घोषयेयुरिति । परं "देवो दुर्भलघातकः" इत्युक्त्यनुसारं सामुदायिकाभिप्रायस्वीकरणावसरे बहुधा व्यक्तिगताभिप्रायाः दमिताः जायन्ते अथवा नैव परिलक्ष्यन्ते ।

भाषाप्रसङ्गे अनुरूपता इत्यस्य सम्प्रत्ययस्य स्पष्टीकरणाय उदाहरणान्तरं स्वीक्रियते । तद्यथा – एकः व्यक्तिविशेषः (चैत्रः) कथयति यत् पूर्वसूचनां विना हठात् सामाजिकानां मध्ये प्रविश्य संस्कृतभाषाप्रचारकर्मणि

आत्मनः विनियोजयामो वयमिति । अतिथिरूपेण समाजं प्रविश्य संस्कृतकार्यं कुर्महे इति इङ्गितोर्थः । अपरः (मैत्रः) समुदायस्थः कथयति यत् पूर्वमेव समाजे सर्वत्र सूचनां प्रसार्य संस्कृतभाषायाः सरलरूपं भाषिकवैशिष्ट्यं च निरूप्य ततः निर्दिष्टे दिने समये च समाजं गत्वा पाठयेम संस्कृतमिति । संस्कृतज्ञः अभ्यागतरूपेण समाजं प्रविशेत् न तु अतिथिरूपेण इति अपरस्य तात्पर्यम् ।

चैत्रमैत्रयोः वादं श्रावं श्रावं चर्चाप्रसङ्गेऽस्मिन् उपविष्टेषु पञ्चाशत्प्रतिशतं जनाः कथयन्ति यत् - नैव, नैव, अतिथित्वेन समाजे प्रवेशः मास्त्विति । यदात्र पञ्चाशत्प्रतिशतं जनाः एवमभिप्रयन्ति तदा तावत्पर्यन्तं ये तत्र तूष्णिकाः आसन् तेऽपि बहूनाम् अभिप्रायमेव पुरस्कृत्य (अभ्यागतपक्षमवलम्ब्य) तत्रैव अस्माकं रुचिरिति वदेयुः । स्वाभिप्रायं बहुमताभिप्रायानुरूपं परिवर्तयेयुः । किञ्च एतादृशसन्दर्भेषु चर्चासु वा ८0% जनाः बहुमतमेवाश्रयन्ति । परन्तु शिष्टाः (चैत्रः तत्सदृशाः वा) स्वीयाभिप्रायात् (तर्कात्) न कदापि विचलिताः दृश्येरन् । सामान्यतः एतादृशानां बुद्धिरपि तीक्ष्णा एव तिष्ठति । अहं भावोऽपि वर्तत एव एतादृशेषु । सामूहिकाभिप्रायम् अमूदृक्षाः तिरस्कुर्वन्ति इत्युक्ते एते एतेषां वादाश्च समीचीनाः इत्यपि न असमीचीनाः इत्यपि वक्तुं नैव शक्यते । 'वादे वादे जायते तत्वबोधः' इत्युक्तिरत्र स्मर्तव्या । विविधाभिप्रायाः मतभेदाश्च क्वचित् वास्तविकीं स्थितिमेव चित्रयेयुः । किञ्च अनुरूपः व्यवहारःव्यक्त्याश्रितोऽस्ति इत्यतः सा व्यक्तिः प्रत्यक्षानुभवाभ्यां स्वतार्किकचिन्तनबलेन च क्वचित् विपक्षे तिष्ठेत् क्वचिच्च सामूहिकपक्षमाश्रयेत् । पूर्वोक्ते संस्कृतभाषाप्रचारसम्बद्धे उदाहरणे चैत्रः (अत्यल्पाः) हठादेव समाजं प्रविश्य भाषाप्रचारकार्यमारम्भणीयम् इति अवदत् इति तु स्पष्टम् । अस्मिन् चर्चाप्रसङ्गे अध्यक्ष्यस्थानीयः भाषाप्रचारसमितेरध्यक्षो वा चैत्रादीनां विषये तन्नाम बहुमतविरोधिनां विषये कीदृशं भावं वहति कीदृशीं प्रतिक्रियां च प्रकटयति इत्येतत् अतीव प्रधानं वर्तते । यदि अध्यक्षस्थानीयः चैत्रादीनां मतमपि सश्रद्धं शृणोति किञ्च कुशाग्रमतिरस्ति तर्हि अभिप्रायप्रकटनाय पुनरपि मुक्तावसरं कल्पयति न तु तेषां विचारान् दमयति । सामाजिकानां लक्ष्योन्मुखीकरणावसरे नेतुः निर्णयाः (प्रतिक्रियाः) प्राथम्यं भजन्ते ।

समाजे नेतृत्वनिर्वहणक्षमता सर्वेषु नैव दृश्यते । येषु च दृश्यते ते सर्वेऽपि मनोवैज्ञानिकानाम् आहाराय कल्पन्ते ।तन्नाम एतादृशानां व्यक्तिवृत्ताध्ययने समाजमनोविज्ञानिनः अनवरतं प्रयतन्ते । ते कथयन्ति यत् यस्य नेतृत्वस्थानीयस्य सङ्घटनमन्त्रिणः वा उपरि सामाजिकव्यावहारस्य प्रभावः यावान् जायते ततोप्यधिकः (द्विगुणितो वा) तदीयव्यवहारस्य प्रभावः सामाजिकानाम् उपरि निपतति चेत्तर्हि सः लक्ष्योन्मुखीकरणे (स्वाभिमुखीकरणे) समर्थः भविष्यति इति ।

पुनः बहवो हि जल्पन्ति यत् संस्कृतभाषा अतीव प्राचीनभाषा अस्ति इति । आधुनिकलोकस्तु लोकोपयोगिनीं नित्यजीवनोपयोगिनीम् आधुनिकीमेव भाषामालिङ्गति न तु प्राचीनभाषामिति । एतादृशी समस्या लोकस्य न लोकोद्बोधकानामिति (संस्कृतोद्बोधकानाम्) मनोवैज्ञानिकाः स्पष्टयन्ति । योगासनानि आयुर्विद्याशास्त्राणि च अद्यत्वे द्रुतगत्या समाजे सामाजिकमाध्यमेषु विलसन्ति । कथमेवं सञ्जातम्? कारणं स्पष्टमेवास्ति अत्र यत् – योगशास्त्रप्रचारकैः एकस्मात् दशकात् एतद्विषये समाजे यथेष्टं प्रसारः कृतः इत्येव । योगविद्याप्रचारकाः सर्वादौ समाजं प्रविश्य कोटिशः जनान् उद्बोधितवन्तः प्रशिक्षितवन्तश्च । एतदर्थं तैः सामान्यजनाः अपि प्रशिक्षणपुरस्सरं बहुत्र प्रचाराय प्रेषिताः । एतादृशानाम् अविरतपरिश्रमस्य फलस्वरूपेणैव अद्यत्वे बहुषु देशेषु विश्वयोगदिनं (जून्-२१) सवैभवम् आचर्यते । योगप्रचारकाणाम् एकस्य दशकस्य परिश्रमफलम् अद्यत्वे सर्वैः अनुभूयते । न केवलं योगस्य अपि तु संस्कृतभाषाप्रचारान्दोलनस्यापि दशकचतुष्टयस्येतिहासो वर्तते । तत्फलस्वरूपेण संस्कृतभाषा अपि आविश्वं व्याप्ता अस्ति । अनेन स्पष्टं यत् यावता वेगेन संस्कृतभाषायाः प्रचारं प्रसारं च समाजे कुर्मः तावता वेगेन संस्कृतभाषा अपि प्रवृद्धिपथे पदानि निक्षिपति इति ।

सामाजिकानां लक्ष्योन्मुखीकरणसन्दर्भे परिवर्तनशीलता अपि अवश्यं दृष्टव्या । यतोहि परिवर्तनशीलता प्रत्येकमपि समाजस्य लक्षणं वर्तते । परिवर्तनशीले समाजे स्थितवद्भिः भाषाप्रचारकैरपि स्वीयसिद्धान्तेषु क्रियाकलापेषु च कालानुगुणं परिवर्तनानि समानेतव्यानि । उदाहरणार्थम् – कश्चन समाजः राष्ट्रयुद्धसन्दर्भे यादृशम् अधिनायकं राष्ट्रहिताय रक्षणाय च वाञ्छति न तादृशाभिवृत्तिमन्तं युद्धोत्तरकाले वाञ्छति । अराजके राष्ट्रे यः कोपि लब्धावसरः राजा भविष्यति चेदपि समाजः अहो भाग्यम् ! अस्माकम् इति प्रलपति । परन्तु निष्क्रिये अपरिवर्तनशीले असहिष्णौ वा तस्मिन् राज्ञि नाधिककालं जनानां रुचिर्जागर्ति । अनेन सिद्धं यत् परिस्थित्यनुरूपं कालानुरूपं सामाजिकानाम् अपि मनोवृत्तयः परिवर्तन्ते इति । सामाजिकानां चित्तवृत्यनुरूपं ये व्यवहरन्ति ते एव स्वीये कर्मणि साफल्यं विन्दन्ति इति अनेन उदाहरणेन स्पष्टम् । उदाहरणमिदं संस्कृतभाषाप्रचारकर्मणि अपि नूनमन्वेति । एकयैव पद्धत्या पौराणिकसिद्धान्तविधीनामेव समाश्रयणेन वा वयं सामाजिकान् समाकृष्टुं सर्वेषु कालेषु देशेषु च नैव शक्नुमः । "पुराणमित्येव न साधु सर्वम्" इत्युक्तिरत्र स्मर्तव्या । यदि भाषाप्रचारकाणां निर्णयेषु विधिषु प्रविधिषु च परिस्थित्यनुरूपाणि देशानुरूपाणि समाजसम्मतानि सामाजिकमनोवृत्यनुरूपाणि च परिवर्तनानि दृश्यन्ते चेत्तर्हि लक्ष्योन्मुखीकरणं सुलभायते अन्यथा तु विषमायते इत्यलं विस्तरेण ।

 ISSN: 2320-740X

**परिशीलितग्रन्थसूची**

1. हमारी शिक्षा – गणेशप्रसादसिंहः
2. नया जीवन – कुमारिया आर्. आर्.
3. Dewey John – Democracy and Education
4. Principles of Social Psycology – Green H. K.
5. The Society – Frame A. H.

**********

# रामायणस्य सार्वकालिकत्वम्

**डा. वेङ्कटरमण भट्टः**

सहायकाचार्यः, शिक्षाविभागः

संविद्रते सर्वेऽपि लोकाः विदितवेदितव्याश्च विद्वांसो अप्रतिमप्रतिभाप्रतिभावितबृहस्पतिना तपः प्रभावितनिर्मलमतिना महर्षिकुलपतिना प्राचेतसेन भूतभविष्यवर्तमानकालदर्शिना आदिकविना वाल्मीकिना महाकाव्यमिदं व्यरचि इति । ज्ञानवर्षिदेवर्षिनारदरदच्छदनिर्गतमूलकथावस्तु प्रमाणीकृत्य क्रौञ्चद्वन्द्ववियोगोद्भूतशोकोद्गतश्लोकात्मकोद्गारसूचितकरुणार्द्रहृदयेन कविना इदं व्यलेखि । पितामहप्रेरणया रचितमिदं कुशलवाभ्यां गीतमिदम् आदिकाव्यं सर्वत्र सङ्कीर्त्यते ।

पुरातनमपि इदं काव्यं क्षणे क्षणे नवनवायमानमनोऽभिरामरामणीयकस्य निधानं वर्वर्ति । रचनावैचित्र्येण रमणीयं, भणितिवैचित्र्येण सहृदयचेतोहारकं, शब्दार्थोभयालङ्कारयुतत्वेन आलङ्कारिकाणां मनोह्लादकं, प्रसादादिगुणभूयिष्ठेन पठितॄणाम् आसक्तिवर्धकं, परवर्तिकाले प्रादुर्भूतानां समेषामपि कवीनां काव्यलेखने उद्दीपकमिदं नवरसरुचिरं महाकाव्यं विजयतेतरां नितराम् ।

**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**
**तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥**[1]

श्लोकेनानेन ज्ञायते यत् पृथिव्यां यावत्पर्यन्तं पर्वतनदीनदादयः भविष्यन्ति तावत्पर्यन्तं लोकेषु जनमानसेषु च रामायणकथा भविष्यति ।

**रामायणं वेदसमं पवित्रम्** इत्युक्तत्त्वात् समग्रश्रुतिसंवेद्यश्रीरघुवरचरितमयत्वादवतरणमिदं महाकाव्यम् आम्नायसमम् ।

**चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।**
**एकैकमक्षरं पुंसां महापातकनाशनम् ॥**[2]

---

[1] रामायणम् – १-२-३६

[2] रामरक्षास्तोत्रम् – श्लो.१

 ISSN: 2320-740X

सर्वविधजनानां समुद्धरणसाधनमिदम् । शरणागतानाम् आयतनम्, सद्गुणसद्वृत्तराशीनां आकरजम् इदम् । लिङ्गजातिवर्गभेदमन्तरा सर्वैरपि सेवनयोग्यमिति हेतोः अस्य सार्वकालिकत्वं प्रतीयते । सार्वकालिकत्वमिति विषये किञ्चित् परिशील्यते । रामायणं वेदसममिति परिकीर्तितम् । वेदः नित्यः इति विदितचर एव । यथा वेदस्य नित्यत्वं तथैव रामायणस्यापि नित्यत्वमभ्युपगन्तव्यम् । रामायणस्य सार्वकालिकत्वनिरूपणावसरे नित्यत्वं सर्वादौ अङ्गीकर्तव्यम् । यः नित्यः सः सार्वकालिकः इति न्यायेन अस्य नित्यत्वमङ्गीकृत्य यद्वस्तु नित्यं वर्तते तस्य सर्वप्राणिप्रयोजकत्वम् अवश्यं ज्ञातव्यमेव ।

रामायणम् आदिकाव्यं रसकाव्यम् आदर्शकाव्यमिति च सङ्कीर्त्यते । अत्र यानि मूल्यानि प्रोक्तानि सन्ति तानि सार्वकालिकानि विराजन्ते । रामायणे आध्यात्मिकमूल्यानि धार्मिकमूल्यानि नैतिकमूल्यानि सामाजिकमूल्यानि जीवनमूल्यानि च निहितानि सन्ति । तानि सर्वैरपि मनुष्यैः आत्मसात्कर्तव्यानि वर्तन्ते । एतेषु न्यूनातिन्यूनं किमप्येकं मूल्यं कश्चिदात्मसात्कृत्य स्वजीवने आरोपयति चेत् तस्य जीवनं सार्थकं भवति । अत्र प्रतिपादितानि मूल्यानि सार्वकालिकानि । यश्च पारस्परिकः सम्बन्धः निगदितः सः सार्वकालिकः । यानि उदाहरणानि परिकीर्तितानि तानि आदर्शभूतानि विलसन्ति । ये च दृष्टान्ताः निरूपिताः ते स्वारस्यपूर्णाः वर्तन्ते।

रामायणं रसकाव्यं कुत इति चेत् शृङ्गारवीरकरुणशान्तादीनां सङ्गमोऽत्र अवलोक्यते । मनसि जातस्य शोकस्य श्लोकत्वेन प्रादुर्भूतमिदं काव्यं **क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः** इत्युक्त्या प्रथते । न केवलम् एक एव रसः अत्र दृष्टिगोचरो भवति अपि तु रामरावणयोः युद्धप्रसङ्गः वीररसस्योत्तमः दृष्टान्तः । **गगनं गगनाकारं सागरः सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिव** इति श्लोकेन तत् ज्ञायते । आदिकविर्वाल्मीकिः । तेन रचितमिति इदमादिकाव्यम् । अनन्तरमागतानां समेषामपि काव्यानां मूलं स्रोतः रामायणम् । कालिदासभारविभवभूतिप्रभृतयः रामायणमेव आधारीकृत्य काव्यानि व्यलेखिषुः । तेषां सर्वेषामपि काव्येषु रामायणस्य छाया विशेषेण प्रतिभाति ।

रामायणमिदं सर्वेषामपि आदर्शकाव्यम् । मानवजीवनेषु आदर्शः व्यवहारः प्रमुखं स्थानं बिभर्ति । आदर्शमयजीवनयापनेन सर्वोऽपि नरः पुनीतो भवति । अत्र यानि पात्राणि चित्रितानि तानि सर्वाणि आदर्शभूतानि वर्तन्ते । आदर्शः जनकः दशरथः । आदर्शः पुत्रः श्रीरामः । आदर्शः राजा श्रीरामः । आदर्शसोदरौ भरतलक्ष्मणौ । आदर्शनारी सीता । आदर्शः स्वामिनिष्ठः हनूमान् । आदर्शनगरी अयोध्या । किं बहुना अत्र विद्यमानाः सर्वेऽप्यंशा

आदर्शप्राया एव ।

अद्यत्वे समाजशास्त्रज्ञाः स्वीयविषयाणामुपस्थापने रामायणमेव स्वीकुर्वते । रामायणस्य बहून् अंशान् दृष्टान्तत्वेन उदाहरणत्वेन वा स्वीकुर्वन्ति । आदर्शसमाजस्य प्रतिपादने रामायणमेव शरणीकुर्वन्ति । समाजः समजः इति पदद्वयं स्मर्यते । मानवानां समूहः समाजः । पशूनां समूहः समजः इति समाजसमजयोर्महदन्तरं विद्यते । यत्र वृथा कलहः, निद्रा, व्यसनं, द्यूतम् इत्यादिगुणैर्युक्ताः जनाः भवन्ति स च समूहः समजः इति कथ्यते । यत्र च मधुरा शुद्धा च भाषा, विनयः, आचारः, शालीनता इत्यादिगुणयुक्तजनाः विलसन्ति स च समूहः समाजः इति निगद्यते । उत्तमसामाजिकस्य व्यवहारं वाल्मीकिः रामायणे हनूमद्व्यवहारकौशलं श्रीराममुखेन निस्सारयति । तद्यथा -

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।**
**बहुव्याहरतानेन न किञ्चिदपभाषितम् ॥**
**अविस्तरमसंदिग्धम् अविलम्बितमद्रुतम् ।**
**उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ॥**
**संस्कारक्रमसम्पन्नाम् अद्रुतामविलम्बिनीम् ।**
**उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥**[1]

इत्थं सामान्यभाषणेऽपि समाजोपयोगिलक्षणं परीक्ष्यते । सर्वविधव्यवहारकुशलता सम्पन्नानां समूहः समाजः इति मन्यते ।

रामायणे समाजमपि अवलोकयामः समजमपि अवलोकयामः । राक्षसानां समूहः पशुतुल्यः इति हेतोः स च समूहः समज इति मन्यते । रामादीनां समूहः समाजः इति परिकीर्त्यते । आदर्शनगर्याम् अयोध्यायां प्रजासमूहोऽपि आदर्शप्राय आसीत् । यथा –

**तस्मिन् पुरवरे दृष्टाः धर्मात्मानो बहुश्रुताः ।**
**नरास्तुष्टाः धनैः स्वैः स्वैरलुब्धाःसत्यवादिनः ॥**[2]

अस्यामयोध्यायां प्रजापरिवारः सुखी आसीत् । सर्वा अपि प्रजाः धर्मात्मानः आसन् । तैः प्राप्तसम्पत्त्या सर्वे नराः

---

[1] रामायणम् – ४-३- ३०,३२,३३

[2] रामायणम् – १-६-६

 ISSN: 2320-740X

प्रसन्नचित्ता अभूवन् । सर्वेऽपि धनमन्तः वृत्तिसन्तृप्त्या जीवनं यापयन्ति स्म । गोसम्पत्तिः प्राचुर्येणासीत् ।

**कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ।**

**दृष्टुं शक्यमयोध्यायां न विद्वान् न च नास्तिकः ॥**

**सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।**

**मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥**[1]

नगर्यामस्यां न कोऽपि कामी, न कश्चिदपि चोरः, न हि कश्चित् परवित्तापहारी, न कोऽपि कृपणः, न कश्चन मूर्खः आसीत् । अस्तिकता सर्वेष्वपि आसीदिति वैशिष्ट्यम् । रामायणे प्रतिपादितम् उत्तमसमाजपरिकल्पनं सार्वकालिकं वर्तते । तच्च रमणीयं परिकल्पनम् आधुनिकाः समाजशास्त्रज्ञा अपि अभ्युपगच्छन्तीति रामायणस्य सार्वकालिकत्वप्रभावं सूचयति ।

समग्रं रामायणम् उपदेशकाव्यं विद्यते । **रामादिवद् वर्तितव्यम् न रावणादिवत्** इति उपदेशवाक्यं सर्वेऽपि कवयः स्वीयकाव्येषु प्रत्यपीपदन् । रामायणे कथं व्यवहारः परस्परं करणीयः इति उपदिष्टं वर्तते । धर्मर्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः प्रथिताः । पुरुषार्थचतुष्टयम् आध्यात्मिकमूल्येषु अन्तर्भवति । एतेषु चतुर्षु पुरुषार्थेषु धर्मः प्रथमः । ध्रियते अनेन इति धर्मः । न्यायसम्मतः व्यवहारः धर्मः इति व्यपदिश्यते । **धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः ।** मोक्षसाधनभूतः धर्मः ।

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[2]

अयोध्यायां सर्वाः प्रजाः धर्ममार्गेण जीवनं यापयन्ति स्म । प्रजापालकः श्रीरामः साक्षात् धर्मविग्रहः आसीत् । यथा –

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।**

**राजा सर्वस्य लोकस्य देवानामिव वासवः ॥**[3]

श्रीरामः स्वयमेव धर्मात्मा आसीत् । सः धर्मपुरुषः । **यथा राजा तथा प्रजाः** इत्यभियुक्तवचनानुसारेण

---

[1] रामायणम् – १-६-८,९

[2] मनुस्मृतिः – ६-९२

[3] रामायणम् – ३-३७-१३

राज्ञः व्यवहारः प्रजासु प्रतिफलति । राजाप्रजयो बिम्बप्रतिबिम्बभावं वयम् अवलोकयामः ।

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**[1]

इति मनुस्मृतेः वचनेन समेऽपि मनुष्याः श्रेष्ठजनानां सकाशात् जीवनोपयोगिनं व्यवहारम् आत्मसात्कृत्वा स्वजीवनमद्यत्वे यापयेयुः ।

**धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम् ।**

**धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥**[2]

**धर्मो हि परमो लोके धर्मे सर्वं प्रतिष्ठितम् ।**

अतः धर्मस्य उत्कृष्टं स्थानं रामायणे प्रकल्पितं वर्तते । सर्वेऽपि धर्ममार्गेण प्रवर्त्तेरन् इति महान्तम् उपदेशं सार्वकालिकं लोकाय रामायणं प्रायच्छत् ।

**सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ।**

**विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे॥**[3]

धर्मसम्मतानि इमानि मूल्यानि श्रीरामे सम्मिलितान्यासन् । लोकान् अपि सन्मार्गे प्रेरयित्वा स्वयं सः धर्मात्मा भूत्वा सार्वकालिकं धर्मं प्रसारयामास भगवान् श्रीरामचन्द्रः । अर्थसेवनं कथं कर्तव्यमिति रामायणे बहुत्र उल्लेखः दरीदृश्यते । रामस्य वनगमनानन्तरं तस्यानुजः भरतः रामस्य पादुके सिंहासने संस्थाप्य राज्यं शशास । भरतं प्रति रामः राज्यस्य पालनं कथं कर्तव्यमिति निगदति । आयव्यययोः विषये तं सूचयति । व्ययः यावान् वर्तते तद्वत् आयः सम्पादनीयः । व्ययस्यापेक्षया आयः यदा न्यूनं भवति तदानीं क्लेशः आपतति । प्रसङ्गेऽस्मिन् अर्थशास्त्रं स्मर्यते - Expenditure should not exceed our income । एतदुक्तं यथा –

**धर्मार्थकामाः सममेव सेव्याः योऽह्येकभक्तः स नरो जघन्यः ।**

**द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो योऽभिरतस्त्रिवर्गे ॥**[4]

---

[1] मनुस्मृतिः – २-२०

[2] रामायणम् – ३-९-३०

[3] रामायणम् – २-१२-३०

[4] महाभारतम् – शान्तिपर्व – १३२-४०


ISSN: 2320-740X

कामः कथं सेवनीय इत्युक्तौ इन्द्रियाणि नियम्य कामस्य स्वीकारः कार्यः । पुरुषार्थेषु तुरीयः परमोत्कृष्टश्च वर्तते मोक्षः । रघुवंशीयानां तनुत्यागः कीदृश आसीत् इत्यत्र कालिदासस्य पद्यमिदं प्रमाणम् । तद्यथा –

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**

**वार्धक्ये मुतिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥**[1]

योगमार्गेण रघुवंशस्य राजानः शरीरं त्यजन्ति स्म इति श्लोकेनानेन प्रतीयते । रामायणे जटायुमोक्षः उल्लिखितः । वालिनः शबर्याश्च मोक्षोऽपि उल्लिखितः वर्तते । इत्थं रामायणे प्रतिपादितानि आध्यात्मिकमूल्यानि सार्वकालिकानीति मन्यन्ते अस्तिकाः ।

रामायणे निरूपितः पारस्परिकसम्बन्धः अद्यत्वे सर्वैरस्माभिः अनुसर्तव्यः । पारस्परिकसम्बन्धजालमेव समाज इति मन्वते आधुनिकाः समाजशास्त्रज्ञाः । पितापुत्रसम्बन्धस्य पद्यमिदं प्रमाणम् रामायणस्य । तद्यथा –

**सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः ।**

**स्वशरीराद्विनिष्क्रान्ताश्चत्वार इव बाहवः ॥**[2]

दशरथमधिकृत्य कवेः उक्तिरियम् । रामलक्ष्मणभरतशत्रुघ्ना दशरथस्य चत्वारः पुत्राः । यथा अवयवात् अवयविनं विभक्तुं न शक्यते तथा तस्य शरीरस्य चत्वारः बाहवः इव वर्तन्ते दशरथस्य चत्वारः पुत्राः । अनेन जनकपुत्रयोः घनिष्ठः सम्बन्धः प्रतीयते यश्च सम्बन्धः सार्वकालिकः । अधुना सामान्यैः लौकिकैरपि एषः सम्बन्धः अनुकरणीयो वर्तते । रामलक्ष्मणयोः भ्रातृप्रेम वाल्मीकिः इत्थम् उपवर्णयति-

**गोप्ता हि रामं सौमित्रे लक्ष्मणं चापि राघवः ।**

**अश्विनोरिव सौभ्रात्रं त्रिषु लोकेषु विश्रुतम् ॥**[3]

रामः लक्ष्मणं रक्षति, लक्ष्मणः रामं रक्षति । अनयोः सहोदरयोः भ्रातृप्रेम अश्विनीकुमारयोरिव इति वाल्मीकिः तयोः मध्ये औपम्यं प्रदर्शयति ।

**न च तेन विना निद्रां लभते पुरुषोत्तमः ।**

**मृष्टमन्नमुपानीतम् अश्नाति न हि तं विना॥**[1]

---

[1] रघुवंशः

[2] रामायणम् – २-१-५

[3] रामायणम् – २-३१-५

अद्यत्वे पितापुत्रसम्बन्धः सर्वत्र विघटितो वर्तते । अनेके पुत्राः जन्मदातारं विस्मृत्य वृद्धाश्रमं प्रेषयन्तः सन्ति । वस्तुतः वार्धक्ये पुत्राणां प्रीतिः तेषामपेक्षते । तादृशानां कृते एषः उत्तमः सन्देशः । राममन्तरा लक्ष्मणः मृष्टान्नभोजनमपि न कुरुते । निद्रा अपि नागच्छति रामं विना लक्ष्मणस्य ।

लक्ष्मणविषयकं रामस्य प्रेम यथा –

**लक्ष्मणे मां मया सार्धं प्रशाधि त्वं वसुन्धराम् ।**

**द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता॥**[2]

दशरथमहाराजः श्वः प्रातः पुष्यनक्षत्रमुहूर्ते श्रीरामस्य पट्टाभिषेक इति निश्चिनोति । तत्सन्दर्भे लक्ष्मणमुद्दिश्य श्रीरामस्येयमुक्तिः – हे लक्ष्मण ! त्वं मया सह इमां वसुन्धरां प्रशाधि । त्वं च मम द्वितीयोऽन्तरात्मा ! इयं श्रीः त्वामुपस्थिता इति ।

अत्र रामस्य पट्टाभिषेको निश्चितः । एतादृशप्रसङ्गे रामः अतीवसन्तुष्टः भवेत् । परं रामः लक्ष्मणम् अविस्मरन् लक्ष्मणं प्रति त्वं च मम द्वितीयः अन्तरात्मा, मया सह वसुन्धरां प्रशाधि इति वदति । अनेन लक्ष्मणविषयकः रामस्य प्रेमातिशयः भूयोभूयो दृष्टिपथम् आयाति । लोके साम्प्रतं सहोदरयोर्मध्ये क्षुल्लककारणेनापि कलहः तत्र तत्र जायमानो दृश्यते । एतादृशकाले रामायणस्य भ्रातृप्रेमपाठः लौकिकानां कृते सार्वकालिकः आदर्शमयश्च वर्तते ।

रामं प्रति लक्ष्मणस्य उक्तिरियं यथा –

**न देवलोकाक्रमणं नामरत्वमहं वृणे ।**

**ऐश्वर्यं वाऽपि लोकानां कामये न त्वया विना ॥**[3]

पातिव्रत्यधर्मस्य परिकल्पनं रामायणे अद्भुतरूपेण प्रदर्शितमस्ति । यथा –

**स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ।**

**नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ॥**[1]

---

[1] रामायणम् – १-१८-३०

[2] रामायणम् – २-४-४३

[3] रामायणम् – २-३१-५

 ISSN: 2320-740X

**नातन्त्री वाद्यते वीणा नाचक्रो विद्यते रथः ।**

**नापतिः सुखमेधेत यास्यादपि शतात्मजा ॥**[2]

रामायणे अहल्यासीतातारामन्दोदरी चेति चतस्रः पतिव्रतास्त्रियः उल्लिखिताः । **भर्तृभाग्यन्तु भार्यैका ।**[3] (Behind an every successful man there is a woman) धार्मिकक्रियासु दम्पत्योः सहाधिकारः इति शास्त्रवचनमस्ति । सीतायाः अभावे श्रीरामेण अश्वमेधयागः कर्तव्यः आपतितः । तदा सः हिरण्मयसीताविग्रहं कारयित्वा यज्ञं चकार इति प्रतीयते । अनेन परिपत्न्योः भावः आदर्शमयः अवलोक्यते ।

**********

---

[1] रामायणम् – २-११७-२४

[2] रामायणम् – २-४०-४७

[3] रामायणम् – २-३९-२९

# सन्दंशन्यायः

**डा. सूर्यनारायणभट्टः**

सहायकाचार्यः, मीमांसाविभागः

महर्षिजैमिनिप्रणीतायां द्वादशलक्षण्यां **कर्तृगुणे तु कर्मासमवायात् वाक्यभेदः स्यात् साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण"** इति तृतीयाध्यायस्य प्रथमे पादे दशमाधिकरणे विद्यमानपूर्वपक्षसिद्धान्तपराभ्यां सूत्राभ्याम् अभिक्रामं जुहोतीति वेदवाक्यमाश्रित्य अङ्गाङ्गिभावविचारः क्रियते । तत्र प्रकृते अवान्तरप्रकरणेन विनियोगविचारः उच्यते । अयमेव सन्दंशन्याय इत्यपि च कथ्यते।

**विषयोपक्रमः**

दर्शपूर्णमासप्रकरणे प्रयाजसमीपे **अभिक्रामं जुहोतीति** वाक्यं श्रूयते । अभिक्रम्य आहवनीयसमीपं गत्वा होमं कुर्यात् इति वाक्यार्थः । अर्थात् दर्शपूर्णमासयोः पञ्चसु प्रयाजेषु यष्टव्येषु प्रथमप्रयाजहोमः आहवनीयाद्दक्षिणतः कियतिचन दूरे स्थित्वा कार्यः। द्वितीयप्रयाजहोमोऽपि तथैव । एवमेव पूर्वपूर्वप्रयाजापेक्षया उत्तरोत्तरप्रयाजानुष्ठानार्थं किञ्चित् किञ्चिदिव अग्निसमीपं गत्वा होमः अनुष्ठेयो भवति - इदमेव अभिक्रमणमित्युच्यते ।

इदं च अभिक्रामं जुहोतीति वाक्यं होमोद्देशेन अभिक्रमणविधायकं वर्तते । अत्र होमो नाम एका क्रिया । अभिक्रमणमपि अपरा काचित् क्रियैव । अत्र अभिक्रमणं किं प्राकरणिकसर्वहोमाङ्गम् उत प्रयाजहोममात्राङ्गमिति विचारः निरूप्यते । इयं च अभिक्रमणक्रिया साक्षात् तस्याः क्रियायाः उपकारिका भवितुं नार्हति । अतः द्रव्यपरिच्छेदः कश्चन अपेक्षितः । तदा द्रव्यद्वारा उपकारकत्वं वक्तुं शक्यते । तर्हि अभिक्रमणं स्वाश्रयकर्तृरूपद्रव्यद्वारा होमक्रियायाः उपकारकमिति वक्तव्यम् । तदा विधेयस्य अभिक्रमणस्य उद्देश्यतावच्छेदकं प्रकृतहोमत्वं वा उत प्रयाजहोमत्वं वा इति सन्दिह्य विवेचनीयं भवति ।

**अत्र पूर्वपक्षः -** अभिक्रमणं नाम कश्चन अमूर्तपदार्थः । तस्य होमं प्रति उपकारकत्वं साक्षात् नास्ति । जुहोत्युपात्ते होमे अन्वयो न सम्भवति । तर्हि एतादृशसन्दर्भे अरुणाधिकरणन्यायेन द्रव्यद्वारा अन्वयो वक्तव्यो भवति तद्वदेवात्रापि द्रव्यद्वारा इति वक्तव्यम्। किमत्र द्रव्यमिति चेत् कर्ता – अतः कर्तृद्वारा इति स्वीकर्तव्यम् । परं अरुणवाक्ये एकहायनीरूपं परिच्छेद्यद्रव्यमुपात्तं वर्तते । अतः तद्द्वारा क्रयोपकारकत्वं सुलभम् । प्रकृते तु वाक्ये

पदेन उपात्तं द्रव्यवाचकं पदं नास्तीति कृत्वा कर्तृद्वारा अभिक्रमणं होमोपकारकमिति वक्तुं न शक्यते। अतः प्रयाजं विच्छिद्य अस्मिन् प्रकरणे ये ये होमाः होमत्वावच्छिनोद्देशेन इदमङ्गम्। उपात्तकर्तृद्वारैव।

ननु एकस्यैव होमस्य अङ्गं भवितुं यदि नार्हति तर्हि सर्वहोमाङ्गं कथं भवेत् कर्तृद्वारा। कर्तृद्वारा इत्युक्ते कीदृशः उपकारः सम्पद्यते। होमः आहवनीये करणीयः। तदर्थं कर्तुः आहवनीयस्य समीपे अवस्थानमावश्ययकम्। दूरे स्थितेन अध्वर्युणा होमः कर्तुं न शक्यत एव। अतः अभिक्रमणं कृत्वा आहवनीयसमीपं गच्छति तथा सति आहवनीयप्रत्यासत्तिसम्पादनम् अभिक्रमणेन भवति। एतादृशः उपकारः सर्वैः होमैरपेक्षितः। अतः आहवनीयप्रत्यासत्तिसम्पादनं सर्वहोमाङ्गम् इति होममुद्दिश्य अध्वर्युकर्तृकम् अभिक्रमणमत्र विधीयते। आहवनीयसामीप्यमेव फलम् इति पूर्वपक्षः।

**सिद्धान्तः** – यद्यपि कर्तुः वाचकं पदं वाक्ये न श्रूयते। परं तु **आख्यातलक्ष्यः कर्ता** इति वर्तते तस्मात् लक्षणया कर्तुः उपात्तत्वं वर्तत एव। अतः स्ववाक्योपात्तं यदा द्वारं लभ्यते तदानीम् उद्देश्यतावच्छेदकं सर्वसाधारणं भवितुं नार्हति तस्मात् स्ववाक्योपात्तः यः होमः तदुद्देशेनैव अभिक्रमणं विधीयते इति भाष्यकारसिद्धान्तः। परमियं युक्तिः न योग्या इति प्रकारान्तरेण निरूप्यते वार्तिककारैः – अभिक्रामं जुहोतीत्यत्र अभिक्राममिति णमुलन्तम् अव्ययं च इदं पदम्। क्त्वाप्रत्ययार्थे णमुल् प्रत्ययः विहितः। तर्हि पौर्वापर्यं द्वयोः क्रिययोः वक्तव्यम्। अभिक्रमणं कृत्वा होमं कुर्यादिति। अतः अभिक्रमणस्थहोमेन सह अनन्वयः शङ्कितुमेव न शक्यते। नो चेत् अभिक्रमणोत्तरक्रिया का इति आकाङ्क्षा न शाम्यति। अतः होमेन सह अन्वयम् अनुक्त्वा सर्वहोमार्थत्वं वक्तुं नैव शक्यते। किञ्च यथा सर्वहोमर्थत्वं वक्तुं न शक्यते – तथैव प्रयाजाङ्गत्वमपि वक्तुं प्रमाणाभावात् नैव शक्यते। यदा किञ्चिद्वारैव अमूर्तस्य उपकारकत्वं वाच्यं – तदानीं स्ववाक्योपात्तं द्रव्यमेव द्वारीक्रियत इति अरुणाधिकरणन्यायः। तद्द्रव्यं शक्त्या उपात्तं भवतु लक्षणया वा उपात्तं भवतु स्ववाक्ये उपात्तं भवेदेव। तर्हि आख्यातगम्यः कर्ता अत्र वर्तते चेत् तं परित्यज्य अन्यत्र गन्तव्यं न भवति। एवम् अरुणाधिकरणन्यायेन गतप्रायः अयं विचारः भवति इति वार्तिककाराः भिन्नरीत्या व्याख्यान्ति। यद्यपि पूर्वोत्तरपक्षयोः व्यत्यासः नास्ति युक्तिः अन्यथा व्याख्यायते।

**अभिक्रामं जुहोतीत्यत्र** होमोद्देशेन अभिक्रमणं विधीयत इत्यत्र नास्ति सन्देहः। तर्हि अत्र वेद्यां हवींषि आसादयति इति हविरासादनोद्देशेन अथवा हविरुद्देशेन वेदिः विहिता भवति। हविः इत्यनेन न केवलं प्रधानम् अपि तु अङ्गप्रधानसाधारणहविर्मात्रमुद्दिश्य वेदिर्विधीयते अर्थात् अङ्गहवींषि प्रधानहवींषि सर्वाण्यपि वेद्यामेव आसादनीयानि भवन्ति। एवं च तस्य यथा अङ्गप्रधानसाधारण्येन वेद्याः अङ्गत्वमुपकारकत्वं तद्वदेव

अङ्गप्रधानसाधारण्येन सर्वहोमोपकारकत्वमभिक्रमणस्य दृष्टद्वारैव सम्भवति । प्रयाजीयहोममात्रोद्देशेन इति सङ्कोचे प्रमाणं नास्तीत्यतः प्रकृतप्रकरणगतसर्वहोमोद्देशेन अभिक्रमणं विधीयते इति आक्षेपः ।

ननु अत्र सन्दंशस्य सत्वात् तथा वक्तुं न शक्यते प्रकरणेन वाक्यस्य सङ्कोचः कर्तुं न शक्यते प्रकरणापेक्षया वाक्यं प्रबलं प्रमाणम् । तर्हि अवान्तरप्रकरणस्थले सर्वत्र एवमेव स्थितेः कुत्रापि प्रयोजनं नस्ति वा इति चेत् यदि 'अभिक्रमति' इत्येव उक्तं चेत् अवान्तरप्रकरणं तत्र सार्थकं भवितुमर्हति । जुहोतिपदं विना यत्र विधेयमात्रं निर्दिष्टं तत्र अवान्तरप्रकरणेन उद्देश्यस्य निर्णयो जायते । यत्र उद्देश्यमपि निर्दिष्टं तत्र अवान्तरप्रकरणेन उद्देश्यस्य सङ्कोचः कर्तुं न शक्यते । अतः अभिक्रमणमात्रं विहितं तदा किमुद्देशेन विहितमिति न ज्ञायते तस्यां दशायां पूर्वोतराङ्गयोः यदुद्देशेन विधानं तदुद्देशेन विधानम् अवान्तरप्रकरणेन निर्णयो भवतु यत्र उद्देशवाचकं पदं वर्तते तत्र तु सङ्कोचः अन्याय्यो भवति ।

अपि च अङ्गभावनायाः इतिकर्तव्यताकाङ्क्षा न भवति । यतो हि फलवतः एव इतिकर्तव्यताकाङ्क्षा एव प्रकरणशब्देन गृह्यते । फलवतः या इतिकर्तव्यताकाङ्क्षा अफलस्य च या फलाकाङ्क्षा – इयमेव उभयाकाङ्क्षा प्रकरणशब्देन गृह्यते । एवं च प्रयाजानां फलं न श्रूयत इति कृत्वा तत्र इतिकर्तव्यता नास्तीत्यतः इतिकर्तव्यताकाङ्क्षालक्षणं प्रकरणं तत्र सम्भवत्येव । अन्यथा फलाभावेऽपि इतिकर्तव्यताकाङ्क्षायाः प्रकरणस्वरूपमङ्गीक्रियते चेत् अनुयाजभावनायां कर्तव्यतात्वेनान्वय इति साङ्कर्यं स्यात् । अतः फलवत इतिकर्तव्यताकाङ्क्षा एव प्रकरणम् अङ्गभावनायाः इतिकर्तव्यताकाङ्क्षा नास्त्येवेति वक्तव्यम् ।

ननु फलवतः एव इतिकर्तव्यताकाङ्क्षा इति कथ्यमाने **समानयत उपभृत तेजो वा...** इति यत् समानयनरूपं विहितं तस्यापि प्रयाजाङ्गत्वं न स्यात् प्रयाजस्य फलाभावात् इतिकर्तव्यताकाङ्क्षा नास्तीत्यतः समानयनस्य कथमङ्गत्वम् इति चेत् – समानयनस्य प्रयाजाङ्गत्वं न प्रकरणप्रमाणेन अपि तु तदपेक्षया प्रबलप्रमाणेन वाक्येन वा श्रुत्या वा । **प्रयाजेभ्यः तत्** इति श्रुतिः । श्रुत्याङ्गत्वकथने एतदङ्गविधानबलादेव तत्र इतिकर्तव्यताकाङ्क्षा कल्प्यते । प्रकरणस्थले तु इतिकर्तव्यताकङ्क्षा न कल्प्यते स्थिता सा प्रकरणत्वेन स्वीक्रियते । एवं च तत्र प्रकरणापेक्षया प्रबलप्रमाणेन समानयनस्य प्रयाजाङ्गत्वं सिध्यतीति न विप्रतिपत्तिः । अतः अभिक्रमणस्य ग्रहणार्थं सा आकाङ्क्षा नानुवर्तते इति प्राप्ते अभिधीयते ।

अङ्गभावना प्रधानभावना इति विना भेदं सर्वत्र भावनायाः इतिकर्तव्यताकाङ्क्षा भवत्येव । परं तु अङ्गभावनायाः इतिकर्तव्यताकाङ्क्षा प्रबलया प्रधानेतिकर्तव्यतया प्रतिबद्धा भवति । अत एव प्रयाजस्य

इतिकर्तव्यताकाङ्क्षया अनुयाजा न गृह्यन्ते इति परस्परम् अङ्गाङ्गिभावोऽपि न विद्यते ।

यदा एवं सन्निध्याम्नातमङ्गं किमपि ग्रहीतुं न शक्यत इति स्थितिः तदा तस्या आकाङ्क्षायाः निवृत्तिः स्वरूपनिष्पादनेन भवति क्वचिदतिदेशेन भवति । यत्र तु सन्दंशः यथा प्रथममेकं प्रयाजाङ्गं पठितम् – पश्चात् अभिक्रमणम्-पुनः एकं प्रयाजाङ्गम् इति अत्र आकाङ्क्षाद्वयोपस्थापनं मास्तु गौरवात् । द्वयोः आकाङ्क्षयोः उत्पादनं विनाश इति गौरवात् आद्येन अङ्गेन उत्थापिता आकाङ्क्षा अन्तिमेन शाम्यति । अतः प्रयाजस्य उत्थिता आद्याकाङ्क्षा तिष्ठतीति तया अभिक्रमणस्य ग्रहणं भवति ।

ननु अत्रापि उत्थिता आद्याकाङ्क्षा फलवत आकाङ्क्षया प्रतिबद्धा स्यादेव इति चेत् गौरवात् तदत्र न स्वीक्रियते । अपि च अवान्तरप्रकरणस्थमहाप्रकरणापेक्षया बलवत्त्वात् सन्दंशपतितस्य अङ्गस्य विषये प्रधानेतिकर्तव्यतकाङ्क्षा न प्रवर्तते । अतः अभिक्रामं जुहोतीति वाक्यविहितमभिक्रमणं प्रयाजेतिकर्तव्यताकाङ्क्षायामेवान्वितम् । यतो हि भाव्याकङ्क्षा इतिकर्तव्यताकाङ्क्षा इति परस्परमाकाङ्क्षा वर्तत इति अन्वयः युज्यते ।

प्रकृते तु वैयर्थ्यपरिहाराय अपूर्वसाधनत्वलक्षणा स्वीकार्या तर्हि दर्शपूर्णमासापूर्वापूर्वसाधनत्वं वा लक्ष्यताम् अथवा प्रयाजापूर्वसाधनत्वं लक्ष्यताम् इति चेत् वाचनिकाङ्क्षसन्दंशेन अस्यैव उपस्थितिः वर्तत इति कृत्वा प्रयाजापूर्वसाधनत्वमेव लक्षणया उपस्थाप्यते । अतः प्रयाजापूर्वसाधनीभूतहोमोद्देशेन अभिक्रमणमङ्गमिति सिध्यति । सन्दंशेन उपस्थितं प्रयाजापूर्वसाधनमिति अभिक्रमणस्य प्रयाजाङ्गत्वं न तु प्रधानेन परस्परेण प्रधानाङ्गत्वं वा सवे होमाङ्गत्वं लक्षणया बोध्यते जुहोतिना इति सिद्धान्तः ।

ननु प्रयाजविधायकवाक्ये तु यजतीति श्रूयते तस्य होमत्वं कथमिति जिज्ञासायां – यद्यपि देवतोद्देश्येन द्रव्यत्यागः यागशब्दार्थः । परं तु प्रक्षेपाङ्गकः तादृशः यः त्यागः स एव यजि शब्देन अभिधीयते इत्यत्र प्रमाणं वृद्धव्यवहारः । यजतीत्युक्ते देवतोद्देशः द्रव्यत्यागः अग्नौ प्रक्षेपश्च इति सर्वं प्रतीयते । क्वचित् वचनबलात् प्रक्षेपांशः त्यज्यते । परं तु यजतीति श्रवणेऽपि प्रक्षेपः अङ्गतया अवश्यं प्रतीयते । अतः प्रयाजेष्वपि होमत्वं सम्भवति । तादृशहोमोद्देशेन अभिक्रमणं विधीयते इति अभिक्रमणं प्रयाजाङ्गमेव इति सर्वं सुमङ्गलम् ॥

**आकरग्रन्थाः**

1. भाट्टदीपिका 2. मीमांसाकौस्तुभः 3. जौमिनीयन्यायमाला

**********

# क्रियाविशेषणवाचकपदोत्तरद्वितीयोपपत्तिः

**डा. एस्. वेङ्कटेश ताताचार्यः**

सहायकाचार्यः, मीमांसाविभागः

विषयोऽयं बहुषु शास्त्रेषु चर्चितः, अत्यन्तं गम्भीरः, महतैव प्रबन्धेन सम्यङ् निरूपयितुं शक्यश्च । अत्र तु संक्षेपेण खण्डदेवाचार्यकृतभाट्टरहस्योक्तरीत्या निरूप्यते ।

**ओदनं पचती**त्यादौ ओदनादेः **कर्तुरीप्सिततमं कर्मे**ति कर्मत्वात् **ओदनादिपदोत्तरं कर्मणि द्वितीये**त्यनुशासनेन द्वितीया सिद्ध्यति । **शुक्लमोदनं पचती**त्यत्र कर्मकारकविशेषणीभूतार्थवाचकात् शुक्लपदादपि द्वितीया उपपादयितुं शक्यते । यद्यपि तत्रौदनस्य भावनायां कर्मत्वेन तस्यां पुनः शुक्लस्य कर्मत्वेन अन्वयो न संभवति, मीमांसकाभिमतस्य भावनाया एककर्मकत्वनियमस्य भङ्गापत्तेः । नापि भावनाकर्मभूते ओदने शुक्लस्य अभेदेन अन्वयः । शुक्लशब्दवाच्यस्य शुक्लगुणस्य तद्गतजातेर्वा ओदनादभिन्नत्वाभावात् । लक्षणया शुक्लपदस्य गुणिबोधकत्वेऽपि स्वोत्तरविभक्त्यर्थे क्लृप्तान्वयस्य नामार्थस्य अन्यत्र अन्वयायोगाच्च । अतः शुक्लमोदनमिति पदद्वयेन शुक्लगुणविशिष्टौदनगतकर्मत्वं लक्षणया बोध्यते । मीमांसकैः पदसमुदायेऽपि लक्षणास्वीकारात् । तथा च शुक्लस्य न भावनायां कर्मत्वेनान्वयः, न वा तत्कर्मभूते अभेदेनान्वयः येन शुक्लपदोत्तरं **कर्मणि द्वितीये**ति[1] द्वितीया स्यात्, तथापि **विशेषणानां चाजातेरिति** [2] सूत्रे महाभाष्योक्तात् **गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ती**त्यनुशासनात् विशेषणे विशेष्यगतलिङ्गसङ्ख्ययोरतिदेशेन विशेषणवाचकपदोत्तरं विशेष्यगतलिङ्गसङ्ख्याबोधकप्रत्ययः लभ्यते । तत्र च प्रथमादिषु सप्तसु विभक्तिषु प्रसक्तासु उपस्थितत्वाद्विशेष्यवाचकपदोत्तरविभक्तिरेव प्रयोक्तव्या ।

एवं कर्मकारकविशेषणवाचकपदोत्तरं द्वितीयोपपत्तावपि क्रियाविशेषणवाचकेभ्यः **मृदु पचति, स्तोकं**

---

[1] पा.सू. – २. ३. २

[2] पा.सू - १. २. ५२

 ISSN: 2320-740X

**पचती**त्यादिवाक्यगतमृदुस्तोकादिपदेभ्यः कथं द्वितीया स्यात् **क्रियाविशेषणानां नपुंसकत्वमि**त्यनुशासनेन [1] तत्र क्लीबत्वप्रयुक्तकार्यबोधनेऽपि न हि द्वितीयाप्रापकं शास्त्रं किञ्चिदस्ति ।

किञ्च मृद्वादीनां क्रियाविशेषणत्वेन धात्वर्थे (फले) अभेदेनान्वयः स्वीकार्यः । तथा च नामार्थस्य स्वोत्तरविभक्त्यर्थे क्लृप्तान्वयस्य अन्यत्र (धात्वर्थे) अन्वयार्थं व्युत्पत्त्यन्तरं कल्पनीयम् । **ग्रामं गच्छती**त्यादौ हि ग्रामादिप्रातिपदिकार्थस्य आधेयत्वसंसर्गेण विभक्त्यर्थकर्मत्वाद्यन्वयदर्शनात् **विशेष्यतासम्बन्धेन तन्नामार्थप्रकारकशाब्दबोधं प्रति विशेष्यतासम्बन्धेन तदुत्तरविभक्तिजन्यार्थोपस्थितिः कारणम्** इति व्युत्पत्तिः कल्पिता । **मृदु पचती**त्यादौ मृद्वादेः धात्वर्थेऽन्वयस्वीकारे तु **धात्वर्थफलाभिन्ननामार्थ-प्रकारकशाब्दबोधं प्रति धातुजन्यफलोपस्थितिः कारणमि**ति व्युत्पत्त्यन्तरं कल्प्यं, पूर्वोक्तव्युत्पत्तौ नामार्थस्य धात्वर्थफलभिन्नत्वेन सङ्कोचश्च कार्य इति गौरवम् ।

क्वचित्तु क्रियाविशेषणानामभेदेनाप्यन्वयो न सम्भवति । **सुखं स्वपिति, सुखमास्ते, सुखं गच्छतीत्यादौ** सुखस्य स्वप्यादिधात्वर्थाभेदाभावात् । एवञ्च कथं क्रियाविशेषणानामन्वयो वाच्य इत्यपि चिन्तनीयम् ।

**वैयाकरणमतेन द्वितीयोपपादनम्**

अत्र पदमञ्जरीकारेण [2] द्वितीयोपपादनमेवं कृतम् – पचतीत्यस्य विक्लित्तिमुत्पादयतीति विवरणात् विक्लित्त्युत्पत्त्यनुकूलव्यापारः पचधात्वर्थः । विक्लित्तेः क्रियाजन्योत्पत्तिरूपफलाश्रयत्वात् कर्मत्वम् । अतस्तद्विशेषणस्य मृद्वादेरपि कर्मत्वात् मृद्वादिपदोत्तरं द्वितीया सिद्ध्यति । **सुखं स्वपिती**त्याद्यकर्मकधातुस्थलेऽपि शरीरलाघवादिफलमन्तर्भाव्य तदुत्पत्त्यनुकूलव्यापारस्य धात्वर्थत्वस्वीकारेण शरीरलाघवादेः कर्मत्वमुपपद्यते । तेन तद्विशेषणस्य सुखपदलक्षितसुखसाधनस्यापि कर्मत्वात् सुखपदोत्तरं द्वितीया तल्लक्षितसुखसाधनस्य अभेदेन शरीरलाघवादौ अन्वयश्चोपपद्येते इति ।

---

[1] इदमनुशासनस्वरूपं भाट्टरहस्ये उद्धृतम् । एतस्य मूलं मृग्य । सीरदेवकृतपरिभाषावृत्तेः ठक्पादे तु "क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता चे" ति परिभाषा पठिता । साप्याकरग्रन्थे क्वाप्यस्तिवेति द्रष्टव्यम् ।

[2] क्रियाविशेषणानां कर्मत्वोपपादनं वैयाकरणकृतं भाट्टरहस्ये एवमनूदितम् । तत्र वैयाकरणाः वृत्तिपदमञ्जरीकारा इति व्याख्यातारः । "तत्प्रत्यनुपूर्वमीपलोमक्लम्" (पा.सू.४/४/२८) इति सूत्रस्थकाशिकापदमञ्जरीग्रन्थाभ्यामुन्नीय भाट्टरहस्ये वैयाकरणमतमनूदितम् । यथाश्रुतवृत्तिपदमञ्जरीग्रन्थयोस्तु सङ्गतिः विचारणीया ।

न चैवं सति स्वपित्यादेरकर्मकत्वं न स्यादिति वाच्यम् । स्वव्यधिकरण(उत्पत्तिरूप)-फलाश्रयकव्यापारवाचित्वस्यैव सकर्मकत्वेन स्वपित्यर्थव्यापारस्य च उत्पत्तिरूपफलाश्रयीभूत-शरीरलाघवादिसमानाधिकरणत्वेन अकर्मकत्वाक्षतेः ।

एवमुत्पत्तिरूपफलाश्रयत्वेन [1] फलस्य कर्मत्वसिद्धेः फलवाचकधातुसमानाधिकरणपदात् द्वितीयाया उपपत्तेः **क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता चे**ति अनुशासनेन पूर्वोक्तक्रियाविशेषणविषये नपुंसकत्वमात्रं बोध्यते, कर्मत्वं तु पूर्वोक्तप्रकारेण सिद्धमेवानूद्यते । वस्तुतस्तदपि नपुंसकत्वं नापूर्वतया बोध्यते[2] किन्तु अनियतलिङ्गानां सामान्यतः प्राप्तमेव अनूद्यते। नियतलिङ्गानां तु तत्तल्लिङ्गत्वमेव। यथा – **आदिं पचती**ति ।

ननु स्तोकादेः कर्मत्वे तस्य कर्मणि विहितेन लकारेण उक्तत्वात् **स्तोकमोदनः पच्यते** इत्यत्र स्तोकादिपदोत्तरं द्वितीया न स्यात्। एवं कृद्योगे **स्तोकमोदनस्य पक्ता** इत्यादौ कर्मणि **कर्तृकर्मणोः कृती**ति[3] षष्ठी चापद्यत इति चेन्न। **लः कर्मणि चे**त्यत्र [4] **कर्तृकर्मणोरि**त्यत्र च कर्मशब्देन धातुवाच्यमुख्यफलाश्रयरूपकर्मण एव ग्रहणेन उत्पत्तिरूपामुख्यफलाश्रयविक्लित्त्यभिन्नस्तोकादिकर्मणि लकारस्य, तद्वाचकस्तोकादिपदोत्तरं षष्ठ्याश्च आपत्त्यभावात्। स्तोकादिकर्मणोऽपि **लः कर्मणी**त्यत्र कर्मपदेन ग्रहणे तत्र अकर्मकपदं व्यर्थं स्यात्, उक्तरीत्या सर्वस्यापि धातोः स्तोकादिकर्मसत्त्वेन अकर्मकस्यैवाभावात्।

**वैयाकरणमते अनुपपत्तयः**

परन्तु स्तोकादिकर्मणि लकारषष्ठ्योर्वारणाय धात्वर्थमुख्यफलाशयरूपकर्मण्येव लकारषष्ठ्यौ इति स्वीकारे **आस्यते मासः, सुप्यते रात्रि**रित्यादौ कर्मणि लकारो न स्यात् । मासादेः धात्वर्थमुख्यफलाश्रयत्वरूपकर्मत्वाभावात्। मासादिष्वव्याप्तेरेव कर्मत्वमपि न धात्वर्थफलाश्रयत्वरूपं,

---

[1] अत एव तादृशविषय एव **क्रियाविशेषणानां नपुंसकत्वमित्यादिना नपुंसकत्वमि**ति भाट्टरहस्यवाक्यस्य भावार्थोऽयम् । पूर्वमवतरणिकायां **क्रियाविशेषणानां नपुंसकत्वमि**त्येव अनुशासनस्वरूपं दर्शितम्। अस्मिंस्तु वाक्ये वैयाकरणमतानुवादसन्दर्भस्थे **नपुंसकत्वमित्यादिने**त्यादिशब्दप्रयोगेण **क्रियाविशेषणानां कर्मत्वं चे**ति वैयाकरणसम्मतमनुशासनस्वरूपमिति सूच्यते।

[2] अयं"**तच्चानियतलिङ्गविषयमि**ति पङ्क्तेर्भावः ।

[3] पा.सू. – २. ३. ६५

[4] पा.सू. – ३. ४. ६९

 ISSN: 2320-740X

तत्समनियताखण्डोपाधिरूपं वा, किन्तु किमित्याद्याकाङ्क्षापूरकत्वसमनियताखण्डोपाधिरूपम् । अस्ति च **आस्ते** इत्युक्ते **कमि**त्याकाङ्क्षायां तत्पूरकं मासस्येति सम्भवति तस्य तत्समनियतं कर्मत्वम् । **स्तोकं पचति, सुखं स्वपिती**त्यादौ तु स्तोकादेः न किमित्याकाङ्क्षापूरकत्वं किन्तु कथमित्याकाङ्क्षापूरकत्वमेवेति न तस्य कर्मत्वसम्भवः। कथं तर्हि कर्मत्वाभावेऽपि स्तोकादिपदोत्तरं द्वितीयानियम इति चेदुच्यते-

**मीमांसकमतेन द्वितीयोपपादनम् अन्वयप्रकारश्च**

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।**
**द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥**

इत्यनुशासने अन्यपदस्य प्रतिपदोक्तादुभयत इत्यादियुक्तादन्यभूतक्रियाविशेषणपरत्वेन क्रियाविशेषणेभ्यो द्वितीयासिद्धिरिति । अनेन वार्तिकेन द्वितीयामात्रस्यैव विधानेन स्तोकादेः कर्मत्वस्यैव अभावात् न तत्र लकारषष्ठ्योरापत्तिः । स्तोकं पचतीत्यत्र आधेयत्वं द्वितीयार्थः । तत्र स्तोकपदार्थस्य स्तोकत्वस्य आधेयत्वेनान्वयः आधेयत्वस्य च तात्पर्यानुरोधेन स्वनिरूपकफलानुकूलव्यापारजनकत्वेन, स्वनिरूपकव्यापारजनकत्वेन, स्वनिरूपकत्वेनैव वा भावनायामन्वयः । सुखं स्वपितीत्यत्र जनकत्वं द्वितीयार्थः । सुखजनकस्वापानुकूलभावनेति च बोधः ।

**********

# काव्ये भ्रान्तेरपि प्रमात्वम्

**डा. कोम्पेल्लि विनयकुमारः**

प्राध्यापकः, साहित्यविभागः

व्यक्तिविवेककारः महिमभट्टः सामाजिकैरास्वाद्यमानान् रसादीन् भ्रान्तिरूपेण स्वीकरोति । यतो हि नाटकादिसम्बन्धिरसादिभिः सहृदयसामाजिकानां भाव एव न यथार्थपरकः । लोके कथञ्चित् लिङ्गात् अनुमीयमानेषु शोकादिषु नानुमातुः सुखादिलवः प्राप्यते । परं काव्ये न केवलं रत्यादि-हास्यादिभिः सुखोपलब्धिः अपि तु शोकादिभिरपि सुखं लभ्यते । तेन रामादिगताः शोकादयो न सामाजिकानां स्युरिति सामाजिकैरनुमीयमानः रसादिः वस्तुतः भ्रान्तिरूपः ।

यथाऽऽह श्रीशङ्कुकः - "नटे अभिनेयबुद्धिः सम्यङ्-मिथ्या-संशय-सादृश्यप्रतीतिभ्यो विलक्षणा एव। चित्रतुरगन्यायेन प्रतीयमाने नटे कारणकार्यसहकारिणां कृत्रिमानां तथाऽनभिमन्यमानानां विभावादिशब्दव्यपदेश्यानां संयोगात् गम्यगमकभावरूपात् अनुमीयमानोऽपि वस्तुसौन्दर्यबलात् रसनीयत्वेन अन्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावः तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रसः" इति ।

यथा चित्रतुरगविषये न तुरगो नातुरगः इति विलक्षणबुद्धिः, तथैव नाट्ये अभिनेतृविषये 'रामोऽयम्', 'न रामोऽयम्' इत्यादिभ्यो विलक्षणा बुद्धिः अभिनेतरि विभावानुभावादीन् गृह्णाति । पुनश्च तैः कृत्रिमैः विभावानुभावव्यभिचारिपदसंज्ञितैः कारणकार्यसहकारिभिः रसः अनुमीयते। विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिभावाः सहकारीणि, तैः 'अयं रामः सीताविषयकरतिमान्', 'इयं सीतारामविषयकरतिमती' इति अनुमीयते । तेनैव सामाजिकाः स्ववासनानुसारं रसास्वादं प्राप्नुवन्ति इति श्रीशङ्कुकः रसास्वादविषये महिमभट्टमतं समर्थयते ।

वस्तुतः रसादयः अभिनेयविषयकाः, अभिनेतारः तान् शिक्षाभ्यासबलात् अनुकुर्वन्ति। सामाजिकाः भ्रान्तिवशात् तान् रसादीन् अभिनेतृगतानिति मन्यन्ते। एतर्हि रामादिविषकरत्यादिभिः सामाजिकैः सम्बन्धोऽस्वीकार्य एव । अभिनेतारस्तु विभावादीन् शिक्षाभ्यासवशात् अनुकुर्वन्ति । अभिनेया रामादयोऽपि नाट्याभिनयकाले तत्रासत्त्वात् तैरपि रससम्बन्धोऽनुपयुक्त एव ।

 ISSN: 2320-740X

सामाजिकानां विभावानुभावादिभिरसम्बद्धत्वात् रसचर्वणा भ्रान्तिजन्या एव। यथा - घनान्धकारभूतायां रज्जौ सर्पभ्रान्त्या पथिकः चीत्करोति पलायते च तथैव काव्ये नाटके वा भ्रान्तिजन्यरसचर्वणकाले सामाजिकः आनन्दमनुभवति इति रसस्वरूपं भ्रान्तिजन्यमेवेति।

लोके सर्वं (कारणं कार्यञ्च) अकृत्रिमं भवति। तत्र सुखास्वादः तिलमात्रमपि द्रष्टुं न शक्यः। किन्तु काव्ये कृत्रिमैः विभावादिभिः कृत्रिमा एव अनुभावादयः प्रतीयन्ते। तत्र सुखास्वादः सहृदयहृदयप्रमाणवेद्यः। एष एव लोकात् काव्यस्य अतिशयसाधकांशः। एवं लोकात् काव्यस्यातिशये सिद्ध एव, सुखास्वादरूपप्रयोजनार्थं व्यङ्ग्यत्वस्य उपचारः सङ्गच्छते।

इत्थं कृत्रिमैः विभावैः अनुभूयमानः रसः कृत्रिमः भ्रमात्मकश्च वर्तते। एवञ्च काव्यमपि भ्रमात्मकं भवति। तर्हि भ्रमात्मकस्य काव्यस्य प्रमाणता कथं सिद्ध्यति। भ्रमात्मके काव्ये प्रमाणाभावेन कस्यापि प्रवृत्तिरेव न स्यात्। प्रत्युत सर्वेषां सहृदयानां काव्ये प्रवृत्तिः दृश्यते। काव्यादिषु प्रतीयमान एव परमार्थः आत्यन्तिकरूपेणोद्दिष्टः न तु वाच्यः। प्रतीयमानेनैव विनेयेषु रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादिविधिनिषेधानां ज्ञानं भवति। अतः वक्तुं शक्यते यत् काव्यस्य प्रमाणता वर्तते इति। तदेव व्यक्तिविवेककारः महिमभट्टः भणति यत् - "**प्रतीयमानपरमार्थं हि काव्यादि, तावतैव विनेयेषु विधिनिषेधव्युत्पत्तिसिद्धेः**"। तदुक्तम् - "**भ्रान्तिरपि सम्बन्धतः प्रमा**" इति। भ्रान्तिर्नाम अयथार्थज्ञानम्। तदपि सम्बन्धविशेषेण प्रमा = यथार्थज्ञानम् (अर्थक्रियाकारिणी) भवति इति अनुभवोऽस्ति। काव्यस्य प्रतीतिमात्रसारत्वं प्रसिद्धमस्ति। प्रतीतिसमये एव यत् सत्यमस्ति ततः पूर्वं पश्चात् वा यत् सत्यं नास्ति तदेव काव्यम्। अतः काव्यस्य अनुमेयगतं वास्तवत्वम् अवास्तवत्वं वा अप्रयोजकं भवति। काव्यं वास्तवम् अवास्तवं वा अस्तु, उभयथापि चमत्कारत्वप्रतीतिरूपा अर्थक्रिया सिद्ध्यति। अवास्तविकादपि कार्यलाभो भवतीति समर्थयितुं स्पष्टीकर्तुं च व्यक्तिविवेककारेण महिमभट्टेन बौद्धदार्शनिकेषु अन्यतमेन धर्मकीर्तिना विरचिते प्रमाणवार्तिके ग्रन्थे स्थितम् उदाहरणं सङ्गृहीतम्। तद्यथा -

**मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।**
**मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति** ॥ इति ॥

पदपदार्थस्तु - मणिप्रदीपप्रभयोः = एकरीत्या दृश्यमानयोः (मणिप्रभायां प्रदीप्रभायां च), मणिबुद्ध्या= अयं मणिरिति बुद्ध्या, अभिधावतोः = धावनं कुर्वतोः द्वयोः पुरुषयोः (मणिप्रभां प्रदीपप्रभां च), मिथ्याज्ञानाविशेषेऽपि = मिथ्याज्ञानरूपाभेदेऽपि (तुल्यत्वेऽपि), विशेषः अर्थक्रियां प्रति = कार्यलाभं प्रति भेदः

अस्तीति कारिकार्थः। इतोऽप्यधिकं विश्लेषणं ध्यानदीपे ग्रन्थे एवं कृतमस्ति -

**संवादिभ्रमवत् ब्रह्मतत्त्वोपास्त्यापि मुच्यते ।**

**उत्तरे तापनीयेऽतः श्रुतोपास्तिरनेकधा ॥**

**मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।**

**मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥**

**यथा तथाऽयथार्थत्वेऽप्यनुमानस्तदोभयोः।**

**अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम्** ॥

**प्रदीपोऽपवरकस्यान्तर्वर्तते तत्प्रभा बहिः ।**

**दृश्यते द्वार्यथाऽन्यत्र तद्वद्दृष्टा मणेः प्रभा ॥**

**दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ।**

**प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ॥**

**न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता ।**

**प्रभायां धावतावश्यं लभ्यतैव मणिर्मणेः ॥**

**दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमस्ततः ।**

**मणिप्रभा मणिभ्रान्तिः संवादिभ्रम उच्यते ॥** इति ।

अर्थात् दूरे एकस्य मन्दिरस्य द्वारनिकटे अभ्यन्तरे विद्यमानस्य दीपस्य प्रभा पतति । अन्यस्य मन्दिरस्य द्वारसम्मुखे अभ्यन्तरे विद्यमानस्य मणेः प्रभा पतति । दूरे स्थितौ द्वौ पुरुषौ प्रभाद्वयं दृष्ट्वा अयं मणिरिति बुद्ध्या धावतः । अत्र द्वयोरपि भ्रान्तिरेव। यतो हि मणिप्रभापि न मणिः, प्रदीपप्रभापि न मणिः । अतः भ्रान्तिविषये तयोः समानतैव । उभयोरपि मणिज्ञानं भ्रान्तिमूलकम् अथवा मिथ्या वर्तते । उभावपि प्रभामेव दृष्ट्वा धावतः न तु मणिम् । उभयोरपि मिथ्याज्ञानस्य तुल्यत्वेऽपि यः पुरुषः मणिप्रभां दृष्ट्वा अयं मणिरिति मिथ्याज्ञानेन धावति तस्मै मणिप्राप्तिः भवति । येन मणिर्लब्धः तस्य भ्रमः संवादिभ्रमः इत्युच्यते। अतः अस्मै मिथ्याज्ञानात् अपि अर्थक्रियाकारित्वं जायते । परम् अन्यः यः प्रदीपस्य प्रभां दृष्ट्वा अयं मणिरिति बुद्ध्या धावति तस्मै मणिप्राप्तिः न भवति । येन दीपशिखायां मणिर्न लब्धः तस्य भ्रमः विसंवादिभ्रमः । यतो हि तेन मणिर्न लब्धः । परन्तु धावनकाले उभयोराशा आसीत् यत् मणिः लब्धव्यः इति । प्रथमस्य फलसंवादिभ्रान्तिः, द्वितीयस्य तु फलविसंवादिभ्रान्तिरिति

मणिलाभरूप-अर्थक्रियायां भेदः। अनेन प्रकारेण अयथार्थात् अपि ज्ञानात् अभीष्टप्राप्तिः लोके दृश्यते एव । तद्वत् अयथार्थात् अपि काव्यात् यथार्थस्य चमत्कारस्य प्रतीतिः निर्दुष्टैव इति महिमभट्टस्य सिद्धान्तः । इत्थं काव्यम् अयथार्थेन ज्ञानेन चमत्कारं जनयित्वा, आकृष्य विनेयेभ्यः प्रवृत्तेः निवृत्तेश्च उपदेशं ददाति। अतः काव्यं प्रमाणं विद्यते ।

काव्यविषयेऽपि अयं दृष्टान्तः समीचीनतरः। काव्ये यः आनन्दः लभ्यते, सः सम्वादिभ्रमवत् भवति । वस्तुतः तत्र सत्यवृत्तान्तो नास्ति। अतः तत्र जायमानः आनन्दः भ्रान्तिमूलकः । एतत् विचार्य महिमभट्टेन उपन्यस्तं यत् "**भ्रान्तिरपि सम्बन्धतः प्रमा**" इति । अर्थात् केनचित् सम्बन्धेन सम्बन्धिता भ्रान्तिरपि प्रकृष्टं प्रमाणं भवति । रसास्वादस्य इयं भ्रान्तिरपि प्रमाणं भवति ।

इत्थं कथयति पुनः महिमभट्टः यत् - **"तेनात्र गम्यगमकयोः सचेतसां सत्यासत्यत्वविचारो निरुपयोग एव। काव्यविषये च वाच्यव्यङ्ग्यप्रतीतीनां सत्यासत्यत्वविचारो निरुपयोग एवेति तत्र प्रमाणान्तरपरीक्षा उपहासायैव सम्पद्यते"** इति ।

अर्थात् लोके गम्यगमकयोः सत्यम् उत असत्यमिति विचारः सहृदयानाम् अप्रयोजन एव। लोकवत् काव्यविषयेऽपि स विचारः निष्प्रयोजन एव । तत्र शास्त्रान्तराधारेण काव्यविषयाणां परीक्षा उपहासायैव सम्पद्यते ।

वाच्य-प्रतीयमानौ लोककाव्यसमानौ । काव्ये यथा तथैव लोकेऽपि वाच्यापेक्षया प्रतीयमानं सुन्दरमिति उक्तमेव। किन्तु लोके प्रतीयमानं क्वचिदुपयुज्यते, काव्ये तु तदेव परमार्थभूतम् । रामायणादिषु रामस्य पितृवाक्यपरिपालन-वनगमन-रावणहननादिभिः रावणस्य परदारापहरणादिभिश्च ज्ञायमानेन वाच्यार्थेन न किमपि प्रयोजनम् । किन्तु अन्ते सत्यधर्मादय एव जयं प्राप्नुवन्ति, न त्वधर्म इति यः प्रतीयमानार्थः भवति तेनैव जिज्ञासूनां मनस्सु रामादिवद्वर्तितव्यमिति विधेः रावणादिवन्नेति निषेधस्य च ज्ञानं भवति । अनेन प्रतीयमानेन एतादृशप्रयोजनसिद्धौ तस्य सत्यासत्यत्वविचारेण किं प्रयोजनम् । केवलं सत्यभूतादेव प्रयोजनमस्तीति नास्ति जगति । भ्रान्तेरपि प्रयोजनं भवति फलरूपसम्बन्धेन ।

एवम् अभीष्टलाभः यथार्थज्ञानजप्रवृत्त्यैव भवतीति नास्ति स्थितिः, किन्तु अयथार्थज्ञानज-प्रवृत्त्याऽपि तद्भवति। भासमानां शुक्तिं दृष्ट्वा रजतबुद्ध्या तत्प्रति धावति कश्चन। सा प्रवृत्तिः भ्रान्त्यैव, न तु प्रमया। अन्ते यद्यपि तेन रजतरूपाभीष्टं न सिद्ध्यति तथापि इदं रजतं नेति यथार्थज्ञानं तु भवत्येव। एतादृशलौकिकस्थलेषु भ्रान्त्या

अभीष्टलाभः कदाचित् न भवेत्, किन्तु काव्ये अवश्यं भवत्येव। काव्यं, रसः यद्यपि मिथ्यैव तथापि आस्वादरूपफलसम्बन्धतः प्रमात्वमेव प्राप्नोति। पूर्वोक्तविधिनिषेधादिज्ञानं मानवजीवनस्य अत्यावश्यकमेव। कृत्रिममपि काव्यं तत्सम्पादयतीत्यनेन तस्य यथार्थता सिद्धैव। रामादीनां चरित्रं किं सत्यम् उत मिथ्या इत्यादिविवेचनेन किं प्रयोजनम् ? काव्यसमर्पितेभ्यः रामादिभ्यः जीवनावश्यकं किमपि लब्धं चेत् तस्य मिथ्यात्वमपि प्रयोजनकरमेव भवतीति गम्य-गमकादीनां सत्यासत्यविचारः निष्प्रयोजनः ।

रसगङ्गाधरे पण्डितराजः जगन्नाथोऽपि रसस्वरूपव्याख्यानावसरे भणति यत् - "**काव्ये नाट्ये च, कविना नटेन च प्रकाशितेषु विभावादिषु, व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायाम् अनन्तरं च सहृदयोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मनि अज्ञानावच्छादिते शुक्तिकाशकले रजतखण्ड इव समुत्पद्यमानः अनिर्वचनीयः साक्षिभास्यशकुन्तलादि-विषयकरत्यादिरेव रसः**" इति ।

अर्थात् सहृदयः यदा शकुन्तलाविषयकरतिमता दुष्यन्तेन आत्मानम् अभिन्नं भावयति, तदा स्वात्मानमेव शकुन्तलाविषयकरतिमन्तं मन्यते । तदा दुष्यन्तस्य प्रियतमात्वेन वर्तमाना शकुन्तला स्वप्रियतमात्वेन भाव्यते तेन। भावनारूपदोषवशात् कल्पितदुष्यन्तत्वावच्छादिते सहृदयात्मनि कल्पितशकुन्तलाविषयकरतिरपि भासते । दूरस्थशुक्तौ चाकचिक्यरूपदोषवशात्, शुक्तिविषयकाज्ञानवशाद्वा अनिर्वचनीयं रजतं तस्मिन् उत्पद्यते । तथैव भावनारूपदोषमहिम्ना सहृदयस्य हृदयमपि कल्पितदुष्यन्तत्वेन अवच्छाद्यते, तदा तस्मिन् सहृदये अनिर्वचनीयकल्पितशकुन्तलाविषयकरतिरपि उत्पद्यते । एवं कल्पितदुष्यन्तत्वेन आच्छादितः सहृदयस्यात्मा 'अहं शकुन्तलाविषयकरतिमान्' इति भावयति ।

दूरे वर्तमानायां शुक्तौ रजतत्वज्ञाने कारणीभूतानि चाकचक्यादीनि यथा दोषाः भवन्ति, तथैव स्वात्मनि अवर्तमानं दुष्यन्तत्वं भावयित्वा, 'अहं शकुन्तलाविषयकरतिमान्' इत्यवास्तवज्ञानस्य कारणीभूतत्वात् भावनाविशेषः दोष इत्युक्तः ।

यद्यपि सहृदयेषु शकुन्तलादीनां रतिः वास्तविकतया न भवति, तथापि चाकचिक्यदोषेण शुक्तौ रजतभानमिव अस्य दोषस्य महिम्नैव साक्षी आत्मा तादृशभानं जनयति ।

आत्मनि दुष्यन्तत्वादिभानं शुक्तौ रजतत्वज्ञानं च अनिर्वचनीयम्। यतः कल्पितत्वादसत्, प्रत्यक्षतया

 ISSN: 2320-740X

दृश्यमानत्वात् सदिति रीत्या सदसद्रूपत्वात् तस्य अनिर्वचनीयत्वम् ।

एवम् उक्तभावनारूपदोषविशेषस्य महिम्ना सहृदयस्य स्वात्मनि शकुन्तलादिरत्यादिमद्दुष्यन्तादिभ्रमे प्रतिभासमानः रत्यादिः रसत्वं लभते ।

अतः रसास्वादः एकः भ्रान्तिमूलकः प्रक्रियाविशेषः । शुक्तिकाशकले रजतज्ञानमिव नटे रामादीनां ज्ञानं भ्रान्तिमूलकम्। आहार्यादिबलेन तत्र रामादीनां ज्ञानं भवति । वस्तुतः नटः न रामः, अतः नटादौ रामादिज्ञानं भ्रान्तिमूलकत्वेऽपि वास्तविकमिव जायते। अत्र जायमाना भ्रान्तिः केनचित् सम्बन्धेन प्रमा अपि भवति। अत एव काव्यं सहृदयहृदयप्रमाणकम्। तेनैव प्रमाणेन काव्यविषया निर्णेयाः, न तु शास्त्रान्तरविषयाधारेण । शास्त्रान्तराणां स्वरूपं भिन्नं काव्यस्वरूपं भिन्नमेव। रसः कृत्रिमः भ्रान्तिरूपश्च । किन्तु आनन्दानुभूतिपर्यन्तं गत्वा अकृत्रिमानुभवदानेन प्रमा एव। एतत्तु आनन्दलाभरूपफलसम्बन्धेन। भ्रमश्चेदपि संवादित्वात् स्वीकारयोग्य एव । इत्थं काव्यस्य भ्रान्तित्वमपि ।

**आधारग्रन्थाः –**

1. व्यक्तिविवेकः 2. प्रमाणवार्तिकम् 3. ध्यानदीपः 4. रसगङ्गाधरः
5. व्यक्तिवेकविमर्शः

**********

# मनुष्यालयचन्द्रिकोक्तः खण्डीकरणविधिः

**डा. मुरलीकृष्णः टि**

प्राध्यापकः, फलितज्यौतिषविभागः

**प्रस्तावना –** गृहनिर्माणार्थं बृहत्क्षेत्रमस्ति इति चिन्तयन्तु । तदा कस्मिन् स्थाने गृहं निर्मातव्यमिति जिज्ञासा समुदेति । तदर्थं कश्चन उपाय एवास्ति खण्डीकरणविधिः । प्रायः वास्तुशास्त्रीयग्रन्थेषु खण्डीकरणविधिरिति नामाङ्कनं न दृश्यते । किन्तु केरलेषु स्थपतय अमुं विधिं तन्नाम्ना शब्दापयन्ति । मनुष्यालयचन्द्रिकायां वास्तुविद्यायाञ्च खण्डीकरणे चतुःखण्डः षोडशखण्डश्चेति द्विधा क्रमः प्रस्तुतः । स एव विचारः अत्र विस्तरेण निरूप्यते ।

**1. चतुःखण्डः -** गृहनिर्माणक्रमे आदौ वास्तुशास्त्रोक्तविधिना भुवः परीक्षां विधाय तत्परिग्रहः कर्तव्यः । ततः परं शङ्कुस्थापनेन पूर्वापरदिशः ज्ञानं कर्तव्यम्। शङ्कुस्थापनया प्राप्तां पूर्वापरदिग्रेखां ब्रह्मसूत्रमिति तथा दक्षिणोत्तरदिग्रेखां यमसूत्रमिति च कथयन्ति वास्तुशास्त्रज्ञाः । तदुक्तं मनुष्यालयचन्द्रिकायाम्-

**एवं क्षेत्रस्य मध्ये सुविहितमिह यत् ब्रह्मसूत्रं तदाहु-**
**स्तन्मध्येऽन्योन्यमन्तर्गतमपि रचयेत् वृत्तयुग्मं च धीमान् ।**
**तद्योगात् तिर्यगुद्यज्झषजठरसुषुम्नाध्वना सूत्रमेकं**
**याम्योदग्गामि सूक्ष्मं रचयतु यमसूत्रं तदित्यामनन्ति ॥**[1] इति ।




**चित्रम् - १ :** गृहनिर्माणक्षेत्रे शङ्कुस्थापनेन पूर्वापरदिशौ दक्षिणोत्तरदिशौ च क्रमशः प्राप्येते । तयोः स्पष्टावगमाय स्थपतिः सूत्रं प्रसारयति । अत्र पूर्वापरयोः प्रसारितं सूत्रं **ब्रह्मसूत्र**मिति दक्षिणोत्तरयोः प्रसारितं सूत्रं **यमसूत्र**मिति च उच्यते ।

[1] मनुष्यालयचन्द्रिका - २अ. ५१लो. & द्रष्टव्यं चित्रम् - १

 ISSN: 2320-740X

एते ब्रह्मयमसूत्रे चतुरश्रक्षेत्रं चतुर्धा समानाकारेण विभाजयतः। एवं सम्प्राप्ते चतुःखण्डे ईशान्यदिशि विद्यमानः खण्डः मानुषसंज्ञकः । नैर्ऋत्यां दिशि विद्यमानः खण्डः देवसंज्ञकः । आग्नेयदिग्गतः खण्डः अग्निसंज्ञकः अथवा यमसंज्ञकः इति । वायव्यां विद्यमानः खण्डः वायुसंज्ञकः अथवा असुरसंज्ञकः ।

इह प्राप्तेषु चतुःखण्डेषु देवमानुषखण्डौ अर्थादीशान्यनैर्ऋत्यखण्डौ शुभौ । तयोः स्थानयोः गृहनिर्माणात् यथाक्रमं अभिवृद्धिः, इष्टप्राप्तिरिति फले भवतः। अतः तौ द्वौ खण्डौ ग्राह्यौ । तदुक्तं मनुष्यालयचन्द्रिकायां यथा –

**धात्रीतलेऽब्ध्यंशिनि मानुषाख्यं गृहाभिवृद्धिप्रदमैशखण्डम् ।**
**देवाह्वयं नैर्ऋतमिष्टदं स्यादुभे शुभे गेहविधौ नराणाम् ॥**[1] इति ।

यमखण्डे गृहनिर्माणेन मृत्युः जायते इति फलमुक्तम् । अतः तत्सर्वैर्वर्ज्यम् । असुरखण्डोऽपि दूषितत्वात् तत्त्याज्यम् । इदं स्थानं (असुरखण्डः) क्वचिद् वैश्यानां गृहनिर्माणाय युज्यते इति मनुष्यालयचन्द्रिकायाः उक्तिः । सामान्यतः एतदुभयं गृहनिर्माणार्थं निन्द्यमेव । अत्र मनुष्यालयचन्द्रिकाकारो यथाह–

**आग्नेयखण्डं यमसंज्ञितं स्यान्मृतिप्रदं चाखिलवर्ज्यमेतत् ।**
**वायव्यमप्यासुरसंज्ञितत्वान्निन्द्यं विशां क्वापि च गृह्यते तत् ॥**[2] इति ।




**<u>चित्रम् – २:</u> चतुःखण्डः –** गृहनिर्माणक्षेत्रस्याल्पत्वे चतुःखण्डविधिः आश्रीयते । एतेषु चतुर्षु खण्डेषु मानुषदेवखण्डौ गृहनिर्माणाय योग्यौ ।

---

[1] मनुष्यालयचन्द्रिका - २अ. ८श्लो. & द्रष्टव्यं चित्रम् - २

[2] मनुष्यालयचन्द्रिका - २अ. ९श्लो. & द्रष्टव्यं चित्रम् - २

ISSN: 2320-740X

**2.षोडशखण्डः –** पूर्वं चतुःखण्डः विहितः । तत्फलञ्च निरूपितम् । किन्तु चतुर्धा विभक्ते खण्डे ग्राह्यखण्डस्य विस्तृत्याधिक्ये सति अयं क्रमः समुचितः । प्रत्येकस्मिन् खण्डे समानाकारेण चत्वारः खण्डाश्चिन्त्यन्ते तर्हि एकस्मिन् चतुःखण्डे चत्वारः उपखण्डाः स्युः । तथा चतुःखण्डिते क्षेत्रे एकैकस्मिन् क्रमशः चत्वारस्तर्हि मिलित्वा षोडशोपखण्डाः उपलभ्यन्ते । आग्नेय्यां वायव्याञ्च विद्यमानौ यमासुरखण्डौ त्याज्यौ । अतः गृहनिर्माणार्थं षोडशखण्डेषु अष्टौ खण्डौ कथञ्चित्त्याज्या एव । अवशिष्टे देवमानुषाख्ये खण्डद्वये अष्टौ उपखण्डास्सन्ति । उभयत्रापि ईशान्यर्ऋत्यदिग्गतौ खण्डौ प्रशस्तौ । तन्नाम ईशान्यखण्डे ईशान्यनैर्ऋत्योपखण्डौ, निर्ऋतिखण्डे निर्ऋतीशानोपखण्डौ शुभप्रदौ भवतः। तदुक्तं अज्ञातकर्तृकायां वास्तुविद्यायाम् –

**अथवा समचतुरश्रं षोडशपदमेव कल्पयेत्क्षेत्रम् ।**
**तत्र च नैर्ऋतनिर्ऋतौ मन्दिरमुदितञ्च दैविके खण्डे ॥**
**निर्ऋतावैशे कुर्यादीशेशानं तदुत्तमं स्थानम् ।**
**मानुष्येऽपि च खण्डे निर्ऋतिपदं वेश्मयोग्यमेव भवेत् ॥**[1] इति।




**चित्रम् – ३:** षोडशखण्डः – गृहनिर्माणक्षेत्रस्य विस्तृत्याधिक्ये अयं क्रमः आश्रीयते । ईशान्यखण्डे ईशान्यनैर्ऋत्योपखण्डौ, निर्ऋतिखण्डे निर्ऋतीशानोपखण्डौ शुभप्रदौ भवतः ।

विषयेऽस्मिन् मनुष्यालयकारोऽपि अमुमेवाभिमतं प्रास्तौत् यथा-

**सूत्रे प्रागुदगग्रके क्षितितले कृत्वा चतुःखण्डिते**

[1] वास्तुविद्या - ५अ. ६-७श्लो. & द्रष्टव्यं चित्रम् - ३

 ISSN: 2320-740X

**खण्डे कल्पयतु द्विजादिवसतिं शार्वेऽथवा नैर्ऋते ।**

**क्षेत्रे विस्तृतिरस्ति चेत्पुनरपि श्रुत्यंशते गृह्यते**

**शैवे नैर्ऋतखण्डमेव निर्ऋतौ शैवं शुभं चोभयोः ॥**[1] इति ।

**उपसंहारः –** चतुःखण्डे षोडशखण्डे वा खण्डीकरणेन प्राप्तेषु शुभखण्डेषु गृहनिर्माणं शुभाय कल्पते । अशुभखण्डेषु वासगृहस्यैव त्याज्यत्वात् वासगृहान्तराणि वाणिज्योपकारकाणि भवनानि निर्मातुं शक्यन्ते ।

साम्प्रतिककाले अल्पक्षेत्रेष्वेव गृहनिर्माणं प्रचलति । एवञ्चेत् वास्तुशास्त्रे एतस्य लाभः कः? इति प्रश्नः समुदेति । राजवीथीनां (Streets) पार्श्वे यदि गृहनिर्माणं कर्तुमिष्यते तदा अनेन विधिना वयं बहूपकृताः भवामः । यदि उत्तरदक्षिणगतो पूर्वपश्चिमगतो वा राजमार्गः तदा तत्र गृहनिर्माणं कर्तव्ये सति ईशाननिर्ऋतिखण्डयोरन्यतरे स्थाने गृहनिर्माणं क्रियते तर्हि शुभाय कल्पते । चित्रे यथा -




अन्येषु खण्डेषु गृहनिर्माणं क्रियते तर्हि तत्र मालिन्याधिक्यम्, जनसम्मर्देन मानसिकी अशान्तिः, एकान्ततायाः भङ्गः, अशुद्धवायुसञ्चारश्चेति बह्व्यः समस्याः सहजतया भवितुमर्हन्ति । एतादृशसमस्यानां दूरीकरणाय अयमेकः उत्तमः उपायः । वास्तुशास्त्रे एतादृशाः बहवो विचाराः स्युः । किञ्च साम्प्रतिककाले तेषां विचाराणां समन्वये शास्त्रज्ञेन विविधाः युक्तयः अन्वेषणीयाः । अतस्तेन न केवलं वास्तुशास्त्रज्ञः अपि तु समस्तलोकः शास्त्रस्यास्य पूर्णं प्रयोजनं प्राप्नोति ।

**********

[1] म. च. - २अ. ७श्लो.

# मिथ्यात्वस्य मिथ्यात्वविचारः

**डा. श्रीकरः जि. एन्.**

प्राध्यापकः, अद्वैतवेदान्तविभागः

सिद्धान्तलेशसङ्ग्रहस्य द्वितीयपरिच्छेदे केषाञ्चिदाचार्याणां मतानुसारेण सृष्टिदृष्टिवादः निरूपितः । 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'[1] इत्यादिश्रुत्युक्तक्रमेणैव ब्रह्मणा जगदिदं सृष्टम् । तच्च जगत् अज्ञातसत्तायुक्तं तत्तद्विषयकप्रमाणेन आवरणभङ्गे सति तत्तद्विषयकापरोक्षावभासः दृष्टिः भवतीति सृष्टिदृष्टिवादिनामभिप्रायः । ननु वादेऽस्मिन् प्रपञ्चस्य श्रुतिसिद्धत्वेन कल्पितत्वाभावात् 'प्रपञ्चः सत्यः श्रुतिसिद्धत्वात् ब्रह्मवत्' इत्याद्यनुमानेन तस्य सत्यत्वापत्तिः । अपि च प्रत्यक्षादिप्रमाणसिद्धार्थक्रियाकारित्वादपि प्रपञ्चस्य सत्यत्वापत्तिः । तथा च अनुमानं 'प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् सृष्ट्याद्यर्थक्रियाकारिब्रह्मवत् इति शङ्कामुद्भाव्य ज्ञानैकनिवर्त्यत्वरूपस्य सदसद्विलक्षणत्वरूपस्य प्रतिपन्नोपाधिगतत्रैकालिकनिषेधप्रतियोगिरूपस्य वा मिथ्यात्वस्य प्रपञ्चे समन्वयात् ब्रह्मवत् न तस्य सत्यत्वम् । किन्तु पारमार्थिकसत्यत्वविरुद्धमिथ्यात्वमेवाभ्युपगतमिति । एतदनु प्रपञ्चस्य मिथ्यात्वे तस्य अर्थक्रियाकारित्वं कथमिति चेत् स्वप्नवदुपपद्यते इति उपपादितम् । तदनन्तरं च प्रकारान्तरेण प्रपञ्चस्य सत्यत्वं शङ्कते – ननु मिथ्यात्वस्य प्रपञ्चधर्मस्य सत्यत्वे ब्रह्माद्वैतक्षतेः तदपि मिथ्यैव वक्तव्यमिति कुतः प्रपञ्चस्य सत्यत्वक्षतिः ? इति । अर्थात् प्रपञ्चस्य मिथ्यात्वं बाध्यमबाध्यं वा । आद्ये 'प्रपञ्चः सत्यः मिथ्याभूतमिथ्यात्मकत्वात्' इत्याद्यनुमानेन प्रपञ्चसत्यत्वापत्तिः । तथा च ब्रह्माद्वैतव्याघातः । मिथ्यात्वमबाध्यमिति द्वितीयकल्पस्वीकारेऽपि सदन्तरस्वीकारेण ब्रह्माद्वैतहानिः इति । अपि च सिद्धान्तिना एकस्मिन् ब्रह्मणि प्रपञ्चतादात्म्यरूपप्रपञ्चत्वस्य प्रपञ्चात्यन्ताभावरूपनिष्प्रपञ्चत्वस्य च अङ्गीकारेऽपि प्रपञ्चात्यान्ताभावस्य पारमार्थिकत्वाभ्युपगमात् यथा सप्रपञ्चत्वनिष्प्रपञ्चत्वयोः एकत्र ब्रह्मणि अविरोधः तथा प्रपञ्चेऽपि मिथ्याभूतमिथ्यात्वस्य सत्यत्वाविरोधः इति ।

अत्र मिथ्यात्वधर्मः मिथ्याभूतः इति पक्षमेव परिगृह्य अद्वैतदीपिकाकाराणां समाधानं यथा – मिथ्यात्वं प्रपञ्चसमानसत्ताकम् । प्रपञ्चस्य व्यावहारिकत्वात् मिथ्यात्वस्यापि व्यावहारिकत्वम् । तथा च व्यावहारिकसत्ताकं मिथ्यात्वं स्वधर्मिणः प्रपञ्चस्य सत्यत्वविरोधीत्यभ्युपगन्तव्यम् । यतः धर्मस्य स्वविरुद्धधर्मविरोधित्वे धर्मिसमानसत्ताकत्वं प्रयोजकम् । न तु धर्मस्य पारमार्थिकत्वमिति उभयवादिसम्मतं मतम् । पारमार्थिकस्य ब्रह्मणः सप्रपञ्चत्वस्य

[1] तैत्तिरीयोपनिषत् १\१\१

 ISSN: 2320-740X

व्यावहारिकत्वात् तस्य धर्मिसमानसत्ताकत्वाभावेन न निष्प्रपञ्चत्वविरोधित्वम् इति एकं समाधानम् ।

अथवा 'घटः सन्' इत्यादिव्यवहारे सर्वत्र ब्रह्मसत्तैव प्रतीयते न तदतिरेकेण व्यावहारिकं प्रातिभासिकं वा सत्त्वमिति मते पूर्वोक्तधर्मस्य स्वविरुद्धधर्मविरोधित्वे धर्मिसमानसत्ताकत्वं प्रयोजकमिति समाधानं न सम्भवतीति समाधानान्तरमुच्यते – यः धर्मः स्वाश्रयसाक्षात्कारे सति अनिवर्त्यः सः स्वधर्मिणि स्वविरुद्धधर्मप्रतिक्षेपकः । यथा शुक्तिरजतभ्रमस्थले शुक्तिसाक्षात्कारे सति शुक्तित्वधर्मस्य निवृत्त्यभावात् तस्य अशुक्तित्वविरोधित्वम् । तत्रैव शुक्तौ विद्यमानस्य रजतत्वधर्मस्य शुक्तिसाक्षात्कारेण निवर्त्यमानत्वात् न तस्य शुक्तित्वविरोधित्वम् । तथा च धर्मस्य स्वविरुद्धधर्मविरोधित्वे स्वाश्रयसाक्षात्कारे सति अनिवर्त्यमानस्य मिथ्यात्वस्य प्रपञ्चसत्यत्वविरोधित्वं सिद्धम् । ब्रह्मणः सप्रपञ्चत्वं तु ब्रह्मसाक्षात्कारेण निवर्तत इति न तस्य निष्प्रपञ्चत्वविरोधित्वम् ।

अत्र पुनः शङ्कते – रूपाद्यभावात् प्रत्यक्षादिप्रमाणागोचरत्वात् ब्रह्मणः शब्दैकप्रमाणगम्यत्वमभ्युपगतम् । 'सत्यं ज्ञान'[1]मित्यादिश्रुतिवाक्येन ब्रह्मणः सत्यत्वाङ्गीकारे ब्रह्मविषयकशाब्दप्रामाण्यस्य वाक्यनिष्ठयोग्यतयाश्च सत्यत्वं वक्तव्यम् । तात्पर्यविषयीभूतसंसर्गाबाधः योग्यता । सा च शाब्दबोधे कारणम् । 'अग्निहोत्रं जुहोति' इत्यादिव्यावहारिकयोग्यतावता अनाप्तवाक्येन व्यावहारिकार्थस्य वा सिद्ध्यभावात् वाक्यार्थवाक्यनिष्ठयोग्यतयोः समानसत्ताकत्वं नियमेन स्वीकर्तव्यम् । एवमेव अर्थाबाधरूपप्रामाण्यस्य मिथ्यात्वे अर्थस्याऽपि मिथ्यात्वापत्तिः । तथा च ब्रह्मातिरिक्तानां योग्यतादीनां सत्यत्वेन द्वैतापत्तिरनिवार्या इति ।

अत्रोच्यते – वेदान्तवाक्यनिष्ठयोग्यतायाः सत्यत्वं तस्याः शाब्दबोधरूपार्थक्रियाकारित्वसिद्ध्यर्थमपेक्ष्यत उत ब्रह्मणः सत्यत्वसिद्ध्यर्थम् । नाद्यः व्यावहारिकप्रपञ्चस्य अर्थक्रियाकारित्वाभ्युपगमात् व्यावहारिकयोग्यतावता वेदान्तवाक्येनापि सत्यब्रह्मणः शाब्दबोधः भवति। द्वितीयविकल्पे वाक्यनिष्ठयोग्यतायाः सत्यत्वाभावेऽपि 'सत्यं ज्ञानमनन्तं ब्रह्म'[2] इत्यादितात्पर्यवती श्रुतिः ब्रहमणः सत्यत्वमुपदिशति । अग्निहोत्रादिवाक्ये तु सत्यादिपदाभावेन तदर्थस्य धर्मस्य व्यावहारिकत्वमेव । न तु 'यो वै स धर्मः सत्यं वै तत्' इति धर्मेऽपि सत्यपदं श्रूयत इति चेत् न उपक्रमोपसंहारादि-तात्पर्यलिङ्गानामभावेन प्रबलया अद्वैतश्रुत्या बाधाच्च पूर्वोक्तवाक्येन ब्रह्मवत् न धर्मस्य सत्यत्वसिद्धिः । मानाभावात् वाक्यार्थवाक्यनिष्ठयोग्यतयोः समसत्ताकत्वमिति न नियमः । अपि च अखण्डार्थपरवेदान्तेषु ब्रह्मगोचरशाब्दज्ञानप्रामाण्यस्यापि ब्रह्ममात्रत्वेन प्रामाण्यस्य सत्यत्वेऽपि न ब्रह्मातिरिक्तसत्यवस्तुसिद्धिः । इति शम् ।

**********

[1] तैत्तिरीयोपनिषत् १\१\१

[2] तैत्तिरीयोपनिषत् १\१\१

# लक्षणावृत्तिविचारः

**डा. श्यामसुन्दरः ए.**

प्राध्यापकः, न्वयन्यायविभागः

न्यायशास्त्रानुसारेण लक्षणावृत्तिविचारः किञ्चित् प्रस्तूयते । लोके हि श्रूयमाणैः सर्वैरपि शब्दैः सर्वेषां सर्वदा न शाब्दप्रतीतिर्जायते । किन्तु कैश्चिदेव शब्दैः कदाचित् केषाञ्चन एव जायते इत्यनुभवः । एतदनुरोधेन अन्वयव्यतिरेकाभ्यां वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिरेव शाब्दधीहेतुरिति कल्प्यते । अतः यस्य पुरुषस्य यदा तादृशी उपस्थितिः तस्य तदा शाब्दप्रतिपत्तिरुत्पद्यते ।शाब्दबुद्धौ च पदार्थाः प्रकारतया विशेष्यतया संसर्गतया च भासन्ते । तत्र प्रकारतया विशेष्यतया च भानन्तु वृत्त्या पदोपस्थापितानामेव । यथाकथञ्चिदुपस्थितानां तथा भाने तु गामानयेत्यादिवाक्यजन्यशाब्दबोधे उदासीनानां गगनादीनामपि भानापत्तिः । तत्र गगनादेः समवायेन गवादिशब्दाश्रयतया उपस्थापनात् । तत्र आधेयतादीनां संसर्गतया भानन्तु आकाङ्क्षाप्रयोज्यम् । तदुक्तं भट्टाचार्यैः **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते**[1] इति । पदार्थ – पदार्थतावच्छेदकसम्बन्धस्य भानं तु वृत्तिप्रयोज्यम् इति विवेकः । वृत्तिश्च शाब्दबोधौपयिकः पद-पदार्थयोः सम्बन्धविशेषः । सा च सङ्केतलक्षणाभ्यां द्विधा । तदुक्तं शक्तिवादे – **सङ्केतो लक्षणा चार्थे पदवृत्तिः । वृत्त्या पदप्रतिपाद्य एव अर्थः पदार्थ इत्यभिधीयते । इदं पदममुमर्थं बोधयत्विति, अस्माच्छाब्दाद् अयमर्थो बोद्धव्य इति वा सङ्केतरूपा वृत्तिः**[2] इति । स च सङ्केतः तात्पर्यनिर्वाहकत्वात् मुख्या वृत्तिः । शक्यार्थसम्बन्धरूपा लक्षणा च वृत्त्यन्तरं पदार्थोपस्थितिहेतुत्वात् । तदुक्तं मणिकारैः – **अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्यसम्बन्धो लक्षणा** इति । यत्र क्वचित् पदार्थान्तरे वाच्यार्थस्य अन्वयबाधात् अन्वयानुपपत्तिः तात्पर्यानुपपत्तिः वा प्रतिसन्धीयते तत्र शक्यार्थसम्बन्धात्मिकया लक्षणयोपस्थापितस्य अर्थस्य अन्वयबोध उपगम्यते । यथा **गङ्गायां घोषः** इत्यादौ गङ्गापदशक्यार्थस्य प्रवाहस्य वृत्तित्वं घोषादौ बाधितान्वयकमिति तत्र गङ्गादिपदस्य तीरादौ लक्षणा स्वीक्रियते । तदुक्तं –

**वाच्यास्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः ।**

---

[1] व्युत्पत्तिवादः, प्रथमकारकम्

[2] शक्तिवादः, सामान्यकाण्डः

**तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥** इति ॥

तथा च अत्र गङ्गापदं तीरलाक्षणिकं तीरादिश्च लक्ष्यार्थः इत्यभिधीयते ।

लक्षणास्थलेऽपि शक्त्यैव निर्वाहसम्भवे लक्षणा न वृत्त्यन्तरम् इति केचन । तेषामयमाशयः - शक्तिग्रहोपायस्य वृद्धव्यवहारादेः मुख्यभाक्तसाधरणत्वात्, व्यवहारेण गङ्गादिपदस्य तीरादौ शक्तिग्रहोत्पत्तौ शक्त्यैव तीरोपस्थितिसम्भवात् । **पदानां च सम्भूयवाच्यार्थान्वयबोधकत्वम्** इति व्युत्पत्तेः, पदानां लाक्षिणिकत्वे तु अननुभावकतया तद्व्युत्पत्तिविरोधः स्यात् । शब्दानां स्वजन्योपस्थितिद्वारा शाब्दधीहेतुत्वात्, उपस्थितेश्च शक्तिसाध्यत्वात्, तीरादेः शक्त्योपस्थितिं विना पदार्थान्तरान्वयोऽनुपपन्न एव । गङ्गापदं तीरपरम् इति तीरे तात्पर्ये निश्चिते सति तात्पर्यनिर्वाहकत्वेन शक्तिरेवाङ्गीकरणीया अन्यत्र शक्तेः तात्पर्यनिर्वाहकत्वस्य क्लृप्तत्वात् । एवं च हर्यादिपदवत् गङ्गादिपदमपि प्रवाहतीरादिनानार्थशक्तमेवेति लक्षणायाः वृत्त्यन्तरत्वं नावश्यकम् इति ।

परन्तु लक्षणायाः वृत्त्यन्तरत्वमावश्यकमेव । यतो हि गङ्गादिपदस्य तीराद्यनेकेषु पदार्थेषु शक्तिकल्पने सति तज्ज्ञानार्थं तत्र सर्वत्रापि प्रत्येकं वृद्धव्यवहारादिकं कल्पनीयमिति गौरवम् । सत्यनुभवे कल्पनं न गौरवाय, परन्तु न तथा प्रामाणिकोऽनुभवः । अनेकार्थेषु शक्यसम्बन्धरूपा लक्षणा चैकैव । अनेकवृद्धव्यवहारनिरपेक्षा चेति लाघवं लक्षणायाः वृत्त्यन्तरत्वस्वीकारे । एवं च विना शक्तिं, लक्ष्यार्थस्य तीरादेरन्वयबोधोऽप्युपपद्यत एव । आप्तोच्चारितवाक्यश्रवणानन्तरं गङ्गादिपदात् शक्त्या उपस्थितमुख्यार्थान्वयबाधे ततः स्वार्थसम्बन्धज्ञानात् आकाङ्क्षितस्य योग्यस्य तीरादेः स्मृतौ तस्य च इतरपदार्थेन घोषेण साकम् अन्वयबोधः अबाधित एव । अत्र च गङ्गादिलाक्षणिकपदात् गङ्गासम्बन्धित्वेन रूपेण न तीरस्य स्मृतिः । सम्बन्धिज्ञानजन्यस्मृतेः सम्बन्धतत्सम्बन्ध्युभयाविषयकत्वात् । किन्तु वस्तुगत्या यत् प्रवाहसम्बन्धि भवति तदेव तीरत्वेन रूपेण उपस्थाप्यते । यथा च एकसम्बन्धिनः हस्तिनः दर्शनेनोत्पद्यमाना हस्तिपकोपस्थितिः हस्तिनं तत्सम्बन्धञ्च न विषयीकरोति । अन्यथा पदज्ञानाज्जायमानपदर्थोपस्थितौ पदसम्बन्धस्य विषयत्वे पदस्यापि विषयत्वापत्तिः स्यात् ।

पदानाम् अर्थान्तरे लक्षणां प्रति वक्तृतात्पर्यानुपपत्तिः बीजम् । वृत्तिं विना लक्ष्यार्थे तात्पर्यस्यानिर्वाहात् । शक्यार्थान्वयानुपपत्तिश्च न लक्षणाबीजम् । यतो हि **यष्टीः प्रवेशय** इत्यादौ यष्टिशब्दस्य यष्टिधरेषु लक्षणा स्वीक्रियते । तत्र शक्यार्थयष्टीनां प्रवेशनयौग्यत्वेऽपि लक्षणायाः सत्वात् । परन्तु तत्र भोजनतात्पर्यानुपपत्त्यैव लक्षणास्वीकारः ।

मणिकारमते तावत् मुख्यार्थेऽन्वयायोग्यत्वं लक्षणाबीजमित्यङ्गीक्रियते **गङ्गायां घोषः** इत्यादौ लक्ष्यार्थे

तात्पर्यग्रहात्पूर्वमेव मुख्यार्थान्वयायोग्यत्वज्ञानेन लक्षणायाः उपपादनात् अन्वयायोग्यत्वस्य प्रथमोपस्थितत्वाच्च, **यष्टीः प्रवेशय** इत्यत्र **प्रवेशय** इत्यस्य भोक्तृकर्मकप्रवेशनपरत्वं प्रकरणवशात् ज्ञायते। लाक्षणिकपदघटितवाक्ये शक्तपदे तात्पर्यज्ञानमावश्यकमेव अन्यथा **गङ्गायां घोषः** इत्यत्र घोषपदस्य मीनपरत्वे गङ्गापदस्य लक्षणैव न स्यात्। तथा च प्रवेशनविशेषे प्रवेशयशब्दस्य तात्पर्यज्ञाने सति तत्र यष्टिपदशक्यार्थस्यान्वयायोग्यत्वेनैव लक्षणास्वीकारः। **चित्रगुमानय** इत्यत्रापि आनयपदस्य प्रकरणादिना चित्रगुस्वाम्यानयनपरत्वे निश्चिते सति, तादृशानयने चित्रगोः अन्वयानुपपत्यैव लक्षणास्वीकारः। अत्र च अन्वयायोग्यत्ववत् निराकांक्षात्वस्य सत्वेऽपि न निरकांक्षात्वं लक्षणाबीजम्। निराकांक्षास्थलेऽपि अन्वयायोग्यत्वस्य सत्वात् तदेव लक्षणाबीजमिति मणिकारमताभिप्रायः।

लक्षणा च जहल्लक्षणा अजहल्लक्षणा चेति द्विविधा। यत्र च स्वशक्यार्थस्य परित्यागेन इतरार्थबोधः तत्र जहल्लक्षणा, लक्ष्यतावच्छेदकरूपेण लक्ष्यार्थमात्रविषयकबोधप्रयोजिका लक्षणेति यावत्। **मञ्चाः क्रोशन्ति, यष्टीः प्रवेशय** इत्यादौ मञ्चयष्टिपदयोः पुरुषत्वावच्छिन्ने लक्षणा तत्र शक्यार्थमञ्चयष्ट्योः न शाब्दे भानम्। यत्र च लक्ष्यार्थविषयकबोधे शक्यार्थस्यापि भानं तद्बोधप्रयोजिका अजहत्स्वार्थालक्षणा। लक्ष्यतावच्छेदकरूपेण लक्ष्य-शक्योभयार्थबोधप्रयोजिका लक्षणा इत्यर्थः। यथा – **काकेभ्यो दधि रक्ष्यताम्** इत्यत्र काकपदस्य दध्युपघातकत्वावच्छिन्ने लक्षणा। तत्र काकतदितरेषां दध्युपघातकत्वेन शाब्दबोधे भानम्।

जहदजहल्लक्षणाख्या अपरा च लक्षणा कैश्चिदङ्गीक्रियते। यत्र च शक्यार्थैकदेशपरित्यागेन एकदेशान्वयः स्वीक्रियते तत्रेयं लक्षणा। तद्यथा - **तत्त्वमसीति** वाक्यघटकस्य तच्छब्दस्य सर्वज्ञत्वावच्छिन्नं चैतन्यं शक्यार्थः, अल्पज्ञत्वावच्छिन्नं चैतन्यं त्वं पदस्यार्थः। तत्र सर्वज्ञत्व - अल्पज्ञत्वरूपशक्यतावच्छेदकात्मकैकदेशपरित्यागेन चैतन्ययोः अभेदान्वयबोधः स्वीक्रियते। इदं च जीवब्रह्मणोरैक्यवादिनां मतानुसारेण। न्यायमते तावत् **सोऽयं देवदत्तः** इत्यत्र तद्देश - तत्कालविशिष्टः तत्पदार्थः, एतद्देश - एतत्कालविशिष्टश्च इदं पदार्थः। तत्र विशेषणांशयोः परित्यागेन विशेष्यांशयोः अभेदान्वयबोधः।

लक्षितलक्षणाख्या अपरा वृत्तिः स्वीकार्येति प्राञ्चः मन्वते। यतोहि **द्विरेफो गुञ्जति** इत्यादौ द्विरेफशब्दात् लक्षितलक्षणात्मकवृत्त्यैव सर्वजनसिद्धो भ्रमरबोधः सम्भवति। अत्र द्विरेफपदशक्त्या नायं बोधः। द्विरेफपदस्य द्वौ रेफौ यस्येति विग्रहात् बहुव्रीहिसमासत्वेन पदसमूहत्वात् तत्र शक्तेरनङ्गीकारात्। शक्तेः

 ISSN: 2320-740X

पदमात्रवृत्तित्वात् । शक्त्यभावे शक्यार्थसम्बन्धरूपलक्षणापि न सम्भवति । अतः अत्र रेफशब्दस्यैव रेफद्वयसम्बन्धिनि लक्षणा, तत्र द्विपदं तादृशार्थे तात्पर्यग्राहकम् । रेफद्वयसम्बन्धि च भ्रमरपदं रेफशब्देन लक्ष्यते । लक्षितेन भ्रमरपदेन च स्वशक्यार्थसम्बन्धेन (तादात्म्यरूपेण) भ्रमररूपोऽर्थः उपस्थाप्यते इति द्विरेफशब्दस्य भ्रमरे लक्षितलक्षणाख्यवृत्त्यन्तरं स्वीकार्यम् । इयं च वृत्तिः अवश्यमभ्युपेया अन्यथा प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमो व्याहन्येत । यतोहि भ्रमरस्य शक्त्या लक्षणया वा द्विरेफपदार्थत्वाभावात् द्विरेफपदोत्तरविभक्त्यर्थान्वयबोधानुपपत्तेः इति ।

मिश्रास्तावत् शक्यार्थसम्बन्धः इत्यत्र सम्बन्धश्च साक्षात्परम्परोभयसाधारणसम्बन्धत्वेनैव विवक्षितः अतः न केवलं शक्यस्य साक्षात्सम्बन्धः एव लक्षणा अपि तु परम्परासम्बन्धोऽपि । एवं च शक्यार्थस्य परम्परासम्बन्धरूपलक्षणैव लक्षितलक्षणा न वृत्त्यन्तरम् । द्विरेफशब्दस्य स्वलक्ष्यभ्रमरपदोपस्थाप्यत्वरूपपरम्परासम्बन्धस्य भ्रमरे सत्त्वात् । अतः द्विरेफपदलक्षणयैव उपपत्तौ लक्षितलक्षणा न वृत्त्यन्तरम् इत्यभिप्रयन्ति ।

**********

# व्युत्पत्तिवादे प्रथमखण्डान्तर्गतद्वितीयाकारके उद्धृतवाक्यानां शाब्दबोधवर्णनम्

**डा. आर्. नवीनः**
प्राध्यापकः, नव्यन्यायविभागः

**चैत्रः ग्रामं गच्छति** इत्यत्र ग्रामपदस्य ग्रामोऽर्थः, अम्पदस्य कर्मत्वमर्थः नामार्थप्रत्ययार्थयोः भेदेन अन्वयनियमात् ग्रामस्य आधेयतासम्बन्धेन कर्मत्वे,तस्य च निरूपकतया धात्वर्थे गमने अन्वयः, गमनस्य अनुकूलतासम्बन्धेन आख्यतार्थकृतौ, कृतेश्च आश्रयतासम्बन्धेन प्रथमान्तार्थे चैत्रे अन्वयः । तथा च ग्रामविशिष्टकर्मत्वविशिष्टवगमनविशिष्टकृतिविशिष्टः चैत्रः इति शाब्दः निरुक्तवाक्याज्जायमानो वर्तते । मानसस्तु ग्रामनिष्टकर्मत्वनिरूपकगमनानुकूलकृत्याश्रयः चैत्रः इति बोधो जायते । प्राचीनाः द्वितीयार्थः कर्मत्वं फलमेव, धात्वर्थस्तु व्यापारमात्रम् इति वदन्ति । नव्यास्तु द्वितीयार्थः आधेयत्वम् । तस्य च धात्वर्थभूतफलावच्छिन्नव्यापारैकदेशे फले आश्रयता सम्बधेन अन्वयः इति । बोधस्तु ग्रामविशिष्टाधेयत्वविशिष्टफलावच्छिन्नव्यापारानुकूलकृत्याश्रयः चैत्रः इति वदन्ति ।

**चैत्रेण ग्रामो गम्यते** इत्यत्र कर्माख्यातस्य संयोगादिरूपफलमर्थः । चैत्रेणेत्यत्र तृतीयायाः कृतिः अर्थः । तत्र आधेयतासम्बन्धेन चैत्रस्य अन्वयः । कृतेः जन्यतासम्बन्धेन व्यापारेऽन्वयः, तस्य आख्यातार्थे फलेऽन्वयः । तस्य फलस्य आश्रयतासम्बनधेन ग्रामेऽन्वयः । तथा च चैत्रवृत्तिकृतिजन्यः यः संयोगावच्छिन्नव्यापारः तज्जन्यं यत् फलं संयोगादिः तदाश्रयः ग्रामः इति । न च फलस्य द्विधा भाने गौरवात् कर्त्राख्यातस्थले फलविशिष्टव्यापार इव कर्माख्यातस्थले व्यापारविशिष्टफलं धातुना प्रत्याय्यताम् इति वाच्यम् । धातोः फलविशिष्टव्यापारे एव शक्तिः, तदनुसारेण कर्त्राख्यातस्थले कर्माख्यातस्थले च धातुना फलविशिष्टव्यापार एव बोधयितुं शक्यः न तु व्यापारविशिष्टफलमपि । तदुक्तं - यादृशविशेष्यविशेषणभावापन्नयोः पदशक्यता तादृशविशेषणविशेष्यभावापन्नयोरेव शाब्दबोधे भानसम्भवात् न तु विपरीविशेषणविशेष्यभावापन्नयोः इति । तथा च फलस्य द्विधा भानं सोढव्यमेव ।

**ब्राह्मणाय धनं ददाति** इत्यत्र स्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूला इच्छा धात्वर्थः । धात्वर्थतावच्छेदकफले स्वत्वे द्वितीयार्थस्य आधेयत्वस्य आश्रयतासम्बन्धेन अन्वयः । तथा च

 ISSN: 2320-740X

धननिरूपिताधेयत्वाश्रयः यत् स्वस्वत्वं, तद्ध्वंस विशिष्टपरस्वत्वानुकूला बाह्मणोद्देश्यका या इच्छा तदाश्रयः चैत्र इति अन्वयबोधः । यमुद्दिश्य धनं ददाति स यदि तत्स्वीकरोति तदा तत्स्वीकारेण तदीयं स्वत्वमुत्पद्यते नान्यदा इति परस्वत्वानुकूला इच्छा धात्वर्थो न सम्भवतीति प्रकारान्तरेण ददात्यर्थः वर्ण्यते । स्वस्वत्वध्वंसानुकूलपरस्वत्वप्रकारकेच्छैव ददात्यर्थः । पूर्वोक्त इव अन्वयबोधः ।

**धनं प्रतिगृह्णाति** इत्यत्र स्वस्वत्वजनकेच्छारूपः स्वीकारविशेषः धात्वर्थः । धननिष्ठं स्वस्वत्वं तज्जनकेच्छाश्रयः ब्राह्मणः इति अन्वयबोधः। **तण्डुलं पचति** इत्यादौ रूपादिपरावृत्तिजनकतेजस्संयोगः धातोरर्थः । रूपादिपरावृत्तिरूपफले तण्डुलादेः आधेयतासम्बन्धेन अन्वयः । तथा च तण्डुलवृत्तिः रूपादिपरावृत्तिः तज्जनकः यः तेजस्संयोगः तदनुकूलकृत्याश्रयः चैत्रः इति बोधः ।

**ओदनं पचति** इत्यत्र ओदनादिपदस्य तन्निष्पादकतण्डुलादौ लक्षणा । बोधस्तु पूर्ववदेव । अवयविनि पाकानभ्युपगमवादिनां वैशेषिकाणां भते **तण्डुलं पचति** इत्यादौ तण्डुलशब्दस्य तण्डुलारम्भकपरमाणौ लक्षणां स्वीकृत्य बोध उपपादनीयः । **चैत्र ओदनं भुङ्क्ते** इत्यत्र गलाधोनयनं धात्वर्थः । तश्च गलाधस्संयोगावच्छिन्नक्रियानुकूलव्यापारः । ओदनमित्यत्र द्वितीयार्थः वृत्तित्वम् । ओदनवृत्तित्वस्य धात्वर्थैकदेशक्रियायामन्वयः । तथा च ओदनवृत्तिः या गलाधस्संयोगावच्छिन्नक्रिया तदनुकूलव्यापाराश्रयः चैत्र इति अन्वयबोधः ।

**मैत्रः गां दोग्धि पयः** इत्यत्र द्विकर्मकधातुसमभिव्याहारस्थले द्विकर्मकधातुसमयिव्याहृत-गवादिपदोत्तरद्वितीया क्रियाजन्यफलशालित्वादन्यदेव कर्मत्वं बोधयति । कारकाधिकारीयम् **अकथितं च** इति सूत्रं अपादानत्वादिभिन्नधातुप्रतिपाद्यान्वयिधर्मान्तरस्यापि कर्मसंज्ञामभिधत्ते इति गोः गौणकर्मत्वम् इति । अन्वयबोधश्चैवं - क्षरणानुकूलव्यापारः दुहेरर्थः गोपदोत्तरद्वितीयायाः विभागः अर्थः। तस्य च जनकतासम्बन्धेन धात्वर्थैकदेशे क्षरणे अन्वयः । एवं पय इति शब्दोत्तरद्वितीयाया आधेयत्वमर्थः । तच्च आश्रयतासम्बन्धेन क्षरणेऽन्वेति । तथा च गोनिष्ठविभागाजनकं पयोनिष्ठं यत् क्षरणं, तदनुकूलव्यापारानुकूलकृत्याश्रयः मैत्रः इति ।

**दुह्यते गौः क्षीरम् मैत्रेण** इत्यत्र गौणकर्मत्वं गवादिनिष्ठं क्षरणजन्यविभागाश्रयत्वरूपम् आख्यातार्थः । क्षीरपदोत्तर द्वितीयायाः आधेयत्वमर्थः । तस्य च धात्वर्थैकदेशे क्षरणेऽन्वयः, धात्वर्थव्यापारस्य च आख्यातार्थैकदेशे क्षरणे जन्यतासम्बन्धेन अन्वयः । तथा च मैत्रवृत्तिकृतिजन्यक्षीरवृतिविभाग-

जनकक्षरणजनकव्यापारजन्यक्षरणजन्यविभागाश्रयः गौरिति बोधः इति

**पौरवं गां याचते विप्रः** इत्यत्र स्वोद्देश्यकदानेच्छा याचत्यर्थः । गोपदोत्तरद्वितीयायाः विषयित्वमर्थः तस्य धात्वर्थतावच्छेदकदानात्मकेच्छायामन्वयः । सविषयकज्ञानादिरूपविषयोपहितेच्छाबोधकधातुस्थले इच्छाविषयज्ञानादिविषयत्वमेव प्रधानकर्मत्वं द्वितीयार्यः इति स्वीकारेण अत्र द्वितीयार्थः विषयत्वमिति उपपद्यते । पौरवपदोत्तरद्वितीयायाः अप्रधानकर्मत्वात्मकं आधेयत्वं द्वितीयार्थः । तस्य च आधेयत्वस्य धात्वर्थतावच्छेदके दानात्मकेच्छयामन्वयः । तथा च पौरवनिष्ठं यद् गोविषयकस्वोद्देश्यकदानं तद्विषयकइच्छश्रयः विप्रः इति । पौरवनिष्ठदानात्मकेच्छा तु गौः मत्स्वं मा भूत् याचकस्वं भवतु इतीच्छा इति । **चैत्रेण पौरवो गां याच्यते** इत्यादौ चैत्रवृत्तीच्छाविषयीभूतगोविषयकदानाश्रयः पौरवः । अत्रापि दानं न क्रियाविशेषः किन्तु इच्छैवेति ।

**याचमानः शिवं शुरान्** इत्यादौ व्यापारजन्यत्वप्रकारकेच्छा याचत्यर्थः । शिवपदोत्तरद्वितीयायाः विषयित्वमर्थः । विषयित्वे निरूपितत्वसम्बन्धेन शिवपदार्थस्य कल्याणस्य अन्वयः । तस्य च विषयित्वस्य आश्रयतासम्बन्धेन धात्वर्थेच्छायां अन्वयः । सुरपदोत्तरद्वितीयायाः आधेयत्वमर्थः, तस्य आश्रयतासम्बन्धेन धात्वर्थैकदेशे व्यापारेऽन्वयः । तथा च सुरवृत्तिः यः व्यापारः तज्जन्यत्वप्रकारिका या शिवविशेष्यकेच्छा तदाश्रयः याचकः ।

**गां व्रजमवरुणद्धि** इत्यादौ रुधधातोः देशान्तरसञ्चारविरोधिव्यापारः अर्थः । सञ्चारविरोधित्वं नाम सञ्चारानुत्पादप्रयोजकत्वम् । तत्र सञ्चारानुत्पादे प्रधानकर्मभूतगवान्वितवृत्तित्वस्य आश्रयतासम्बन्धेन अन्वयः । व्रजपदोत्तरद्वितीयायाः प्रतियोगित्वमर्थः । तस्य निरूपकतासम्बन्धेन देशान्तरपदार्थभेदवद्देशैकदेशे भेदेऽन्वयः । व्रजभिन्नः यो देशः, तत्सञ्चारानुत्पादः गोनिष्ठः, इति यावत् । तथा च गोनिष्ठः यः व्रजभिन्नदेशसञ्चारानुत्पादः तत्प्रयोजकव्यापाराश्रयः यादवः ।

**रुध्यते गां व्रजः चैत्रेण** इत्यत्र चैत्रवृतिव्यापारप्रयोज्यगोनिष्ठानुपादप्रतियोगिसञ्चाराश्रयीभूतः यो देशः तद्वृत्तिभेदप्रतियोगिताश्रयः व्रजः इति ।

**गुरुं धर्मं पृच्छति** इत्यत्र जिशासाज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः धात्वर्थः गुरुपदोत्तरद्वितीयायाः वृत्तित्वमर्थः, तस्य धात्वर्थैकदेशे ज्ञानेऽन्वयः धर्मपदोत्तरद्वितीयायाः विषयकत्वमर्थः, तस्य च शब्देऽन्वयः शब्दस्य

धर्मविषयकत्वं कथमिति चेत् शब्दकार्यस्य ज्ञानस्य सविषयकत्वात् याचितमण्डनन्यायेन शब्दस्यापि सविषयकतया गुरुवृत्ति यत् जिसासाविषयकं ज्ञानं तदुद्देश्यकप्रवृत्त्यधीनः यः धर्मविषयकशब्दः तदनुकूलकृत्याश्रयः शिष्यः इति ।

**शिष्यं धर्मं ब्रूते** इत्यत्र ब्रूञश्च ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः अर्थः । तथा च शिष्यवृत्ति यत् ज्ञानं तदुद्देश्यकप्रवृत्त्यधीनः धर्मविषयकशब्दः तदनुकूलकृत्तिमान् गुरुः ।

**अजां ग्रामं नयति** इत्यादौ धात्वर्थः प्रापणम् । प्रापणञ्च उत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापाररूपम् । तत्र उत्तरदेशसंयोगे ग्रामस्य गौणकर्मणः, क्रियाख्यफले अजादिप्रधानकर्मणः अन्वयः । तथा च ग्रामवृत्तिसंयोगजनकाजादिवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमान् चैत्र इति अन्वयबोधः । उक्तरीत्यैव ग्रामं भारं वहतीति प्रयोग अनुसन्धेयः । **अजा ग्रामं नीयते** इत्यत्र उत्तरदेशसंयोगावच्छिन्नक्रियारूपं फलं कर्माख्यातार्थः । तत्र धात्वर्थस्य तादृशव्यापारस्य जन्यतासम्बन्धेन कर्माख्यातार्थे फले अन्वयः । कर्माख्यातार्थस्य आश्रयतासम्बन्धेन अजायामन्वयः । ग्रामस्य आख्यतार्थैकदेशे उत्तरदेशसंयोगे आधेयतासम्बन्धेन अन्वयः । तथा च चैत्रवृत्तिकृतिजन्यः यः उत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापारः तज्जन्या या ग्रामवृत्त्युत्तरदेशावच्छिन्नक्रिया तदाश्रयः अजा इति बोधः ।

**********

# मार्कण्डेयपुराणे रुचिकृतपितृस्तवः

**डा. प्रमोद भट्टः**
प्राध्यापकः, नव्यव्याकरणविभागः

पूर्वस्मिन् काले रुचिप्रजापतिः निरहङ्कारः, निर्मोहश्च, सन् यत्र सूर्यास्तंगतिः भवति तत्रैव शयनं कुर्वन्, त्यक्ताग्निकार्यः, वासरहितः, आश्रमधर्माचरणमकुर्वन्, विमुक्तसङ्ग,ः मुनिवज्जीवनं कुर्वन् आसीत् । एकदा पितृदेवाः प्रत्यक्षीभूय तमुद्दिश्य कस्मात्त्वं दारसंग्रहं न कृतवान् , दारसंग्रहः स्वर्गापवर्गार्थं श्रेष्ठं साधनं वर्तते । विवाहकर्म विहाय अन्यत्सर्वं बन्धहेतुकमेवास्ति । ग्रही पुरुषः स्वाहाकारेण देवताम्, स्वधाकारेण पितृन्, बलिवैश्वदेवादिना भूतानि, अन्नतोयादिदानेन अतिथींश्च अभ्यर्च्य पुण्यलोकम् अवाप्स्यति । अप्राप्तपुत्रसन्तानः, अकृतदेवपितृतर्पणः, अकृतयज्ञयागादिकर्मा यः ग्रहस्थाश्रमे न तिष्ठति सः जीवितकाले जन्मान्तरे च बहुदुःखमनुभवति । संसारबन्धाच्च मुक्तः न भवति । अतः त्वया दारसंग्रहः अवश्यमेव कर्तव्यः इति प्रोचुः ।

तान् पितृन् उद्दिश्य रुचिः दारपरिग्रहः अत्यन्तदुःखप्रदः पापाय च भवति । अनेन अधोगतिः निश्चितैव भवतीति विचिन्त्याहं दारपरिग्रहं न कृतवानस्मि । अपि च इन्द्रियनिग्रह एव मोक्षसाधनमार्गः, अनेकजन्मसञ्चितकर्मक्षयः केवलेन्द्रियनिग्रहेणैव भवतीति कृत्वा दारपरिग्रहः न कृतः इति अवोचत् ।

रुचेः एतादृशवचनं श्रुत्वा ते पितरः पुनः प्रोचुः पूर्वोक्तं भवता पुरुषोचितं कर्मैतत् सत्यम्, किन्तु भवान् यं मार्गमनुसरति तेन इतोऽपि बन्धः एव भवति । यथा आह

**परन्तु दानैरशुभं नुद्यतेऽनभिसंहितैः ।**
**फलैस्तथोपभोगैश्च पूर्वं कर्म शुभाशुभैः ॥**
**एवं न बन्धो भवति कुर्वतः करुणात्मकः ।**
**न च बन्धाय तत्कर्म भवत्यनभिसंहितम् ॥**
**पूर्वकर्म कृतं भोगैः क्षीयतेऽहर्निशं तथा ।**

 ISSN: 2320-740X

**सुखदुःखात्मकैर्वत्स पुण्यापुण्यात्मकैर्नृणाम् ॥**[1] इति ॥

एतत् पितृवचनं श्रुत्त्वा रुचिः पुनराह हे पितामहाः वेदे कर्ममार्गः अविद्या इति कथ्यते तत्कथं कर्ममार्गे भवन्तः मां योजयन्ति इति ।पितरः वदन्ति कर्म अविद्यैव इति न मृषावचः किन्तु विद्यापरिप्राप्तौ हेतुः कर्म तत्र न संशयः । तदुक्तम् –

**विहिताकरणात्पुम्भिरसिद्धिः क्रियते तु यः ।**

**संयमो मुक्तये नासौ प्रत्युताधोगतिप्रदः ॥**[2] इति ॥

अपि च आत्मानं प्रक्षालयामि इति भणसि किन्तु वस्तुगत्या विहिताकरणोद्भूतैः पापैः विदह्यसे । अतः विधिवद्दारसंग्रहं कुरु इति प्रोचुः ।

एतत् पितृवचनं श्रुत्त्वा पित्राशयमङ्गीकृत्य पितृन् एव पृष्टवान् रुचिः उवाच अहं सम्प्रति वृद्धः, कः मे भार्याम् अनुगृह्णाति, अपि च दरिद्रश्च, दरिद्रस्य दारसंग्रहः दुष्करः इति । यदि दारसंग्रहः न क्रियते अस्मद्वचनं यदि भवान् न शृणोति, अस्माकं पतनं तवाप्यधोगतिः भविष्यति इत्युक्त्वा ते अन्तर्दधिरे । तेषां गमनानन्तरं महत्यां चिन्तायां निमग्नः सन् विप्रर्षिः रुचिः पितृणां वचनं श्रुत्त्वा पुनः पुनः उद्विग्नमानसः कन्यान्वेषणार्थं मेदिनीं बभ्राम । मेदिनीपर्यटनेऽपि कन्यामलभमानः पितृणां पूर्वोक्तवचनरूपाग्निना दग्धः रुचिः, खिन्नः, उद्विग्नश्च सम्पन्नः । इतः परं किं करोमि ? क्व गच्छामि ? मम दारापरिग्रहः कथं वा सम्पत्स्यते ? पित्रभ्युदयार्थं मम विवाहः शीघ्रं सम्पत्स्यते न वा इति चिन्ताक्रान्तः बभूव । एवं चिन्तयति सति तस्मिन् रुचौ तपोरूपेण कमलोद्भवस्य ब्रह्मणः आराधना कर्तव्येति चिन्ता मनसि समजनि । तदनु रुचिः चिरकालं यावत् उत्तमोत्तमनियमेन आस्थितः सन् देवमानानुसारेण शतवर्षं यावत् ब्रह्माणमुद्दिश्य तपश्चकार । ततः लोकपितामहः ब्रह्मा प्रत्यक्षीभूय तव तपसा सन्तुष्टः सन् कीदृशं वरप्रदानं तवापेक्षितं तवाभिवाञ्छितं किम् ? इति पृष्टवान् । तदा रुचिः ब्रह्मणे नमस्कृत्य पितृदेवैः यथापूर्वं प्रोक्तं तदेव न्यवेदीत् । अपि च पित्रादेशवचनेन विवाहसंकल्पोऽपि समुदितः, किन्तु इदानीं यावत् अप्राप्तकन्यः इति हेतोः मम मनोरथः असम्पूर्णः जातः इत्यप्यवोचत् । तथा हि ब्रह्मोवाच

**प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ।**

**सृष्ट्वा प्रजाः सुतान्विप्र समुत्पाद्य क्रियास्तथा ॥**

---

[1] मार्कण्डेयपुराणम् – ९२ अ. १४,१५,१६ श्लो.

[2] मार्कण्डेयपुराणम् - ९२ अ. २० श्लो.

**कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ।**

**स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ॥**[1] इति ॥

अपि च कृताधिकारं यदा त्यजति तदा सिद्धिमवाप्स्यति अतः कारणात् पितरः दारपरिग्रहं कर्तुमवोचन् । अतः पितृपूजनं करोतु । पितर एव सन्तुष्टाः भूत्वा तवेप्सितं पत्नीं पुत्रांश्च प्रदास्यन्ति । ते पितामहाः सन्तुष्टाः किं न दद्युः इत्युवाच । तदाह -

**कामं चेममभिध्याय क्रियतां पितृपूजनम् ।**

**त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ॥**

**पत्नीं सुतांश्च संतुष्टाः किं न दद्युः पितामहाः ॥**

**इत्यृषेर्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।**

**नद्या विविक्ते पुलिने चकार पितृतर्पणम् ॥**[2] इति ॥

अव्यक्तजन्मनः ब्रह्मणः पूर्वोक्तवचनं श्रुत्वा रुचिः नद्याः विविक्तं पुलिनं गत्वा पितृभ्यः तर्पणं प्रददौ ।

एकाग्रचेतसा आदर्शपूर्वेण च भक्तिपूर्वकं सश्रद्धं वक्ष्यमाणरीत्या पितॄन् तुष्टाव रुचिः । ये श्राद्धे अधिष्ठातृरूपेण वसन्ति देवैरपि स्वधाकारेण श्राद्धे तृप्यन्ते तादृशीः पितृदेवताः नमामि । भुक्तिमुक्त्यभिलाषायुताः महर्षयः स्वर्गेऽपि मानसश्राद्धरूपेण भक्तिपूर्वकं यान् पितॄन् तर्पयन्ति तादृशीः पितृदेवताः नमामि । श्राद्धेषु स्वर्गे दिव्यैः सर्वोत्तमैः सकलोपहारैः सिद्धाः (सिद्धगणाः) यान् पितृदेवान् तर्पयन्ति तेभ्यः पितृदेवेभ्यः नमः । भुवि मानवाः श्राद्धे श्रद्धापूर्वकं यान् पितॄन् पूजयन्ति, पूजिताः ते पितृदेवाः मनोवाञ्छितलोकं प्रापयन्ति तादृशान् पितॄन् नमस्करोमि । ब्राह्मणाः पृथिव्यां स्वाभीष्टवस्तुप्राप्त्यर्थं यान् पितॄन् अर्चयन्ति, आराधिताः पितरः प्राजापत्यलोकं प्रदास्यन्ति तान् पितॄन्नमस्करोमि । नियताहाराः वनवासिनः महात्मानः तपसा दग्धपापाः वनसम्बन्धिफलमूलादिश्राद्धेन यान् पितॄन् तर्पयन्ति ताः पितृदेवताः नमस्करोमि । नैष्ठिकब्रह्मचर्यं परिपालयन्तः ब्राह्मणाः संयमरूपेण जीवनं व्यापयन्ति समाधिस्थितौ यान् सन्तर्पयन्ति तान् पितॄन् नमस्करोमि । त्रिषु लोकेष्वपि अभीप्सितफलदातॄन् यान् क्षत्रियाः अशेषैः कव्यैः विधिवत् अर्चयन्ति तान् पितॄन् नमस्करोमि । भुवि

[1] मार्कण्डेयपुराणम् – ९३ अ. ८-९ श्लो.

[2] मार्कण्डेयपुराणम् – ९३ अ. १०-११ श्लो.


ISSN: 2320-740X

स्वकर्माभिरताः वैश्याः पुष्पधूपान्नजलादिभिः यान् पूजयन्ति तान् पितॄन् नमस्करोमि । जगतीतले शूद्रा अपि सभक्तिश्रद्धं यान् सुकाली इति ख्यातान् पितॄन् सन्तर्पयन्ति तान् पितॄन् नमस्करोमि । पातालेऽपि त्यक्ताहङ्कारमदाः महान्तः दैत्याः श्राद्धद्वारा स्वधाभोजिनः पितॄन् सन्तर्पयन्ति तान् पितॄन् नमस्करोमि । रसातले अशेषैः भोगैः श्राद्धद्वारा नागाः यान् अर्चयन्ति तान् पितॄन् देवान् नमस्करोमि । मन्त्रभोगसम्पद्भिः युताः सर्पगणाः पाताले विधिपूर्वकं यान् उद्दिश्य श्राद्धमाचरन्ति, सदा यान् तर्पयन्ति च तत्पितॄन् नमस्करोमि । ये देवलोके अन्तरिक्षे भूमौ प्रत्यक्षरूपेण वसन्ति देवादिसमस्तदेहधारिणोऽपि यान् पूजयन्ति तान् पितॄन् नमस्करोमि । ते च पितरः मया समर्पिताम् एनां पूजां स्वीकुर्युः । सर्वदुःखविनिर्मुक्त्यर्थं ये योगीश्वराः निर्मलहृदयाः यान् पितॄन् भजन्ते, ये परमात्मस्वरूपभूताः मूर्तिमन्तः विमाने निवसन्ति तान् नमस्करोमि । काम्यफलाभिलाषिणां पुरुषाणां सकलाभीष्टं ये पूरयितुं समर्थाः सन्ति, अपि च पुरुषाणां मुक्तिप्रदातारः ये सन्ति, ये पितृदेवाः स्वधाभोजिनः द्युलोके मूर्तिमद्रूपेण वसन्ति तान् नमस्करोमि । इच्छावतां मनुष्याणां कामान् ये अनुगृह्णन्ति यथाशक्त्याराधनानुसारम्, देवपदवीम्, इन्द्रपदवीम्, ततः उन्नतपदवीं वा ये अनुगृह्णन्ति, ये च पुत्रम्, पशुम्, धनम्, बलम्, गृहं च अनुगृह्णन्ति ते पितरः ममैतत्पूजाकर्मणा तृप्यन्तु । ये पितृदेवाः चन्द्रस्य किरणेषु, सूर्यमण्डले, श्वेतविमाने च सदा वसन्ति ते मया दीयमानैः, अन्नजलगन्धादिभिश्च तृप्ताः पुष्टिमन्तश्च भूत्वा सञ्चरन्तु । अग्नौ हविर्दानस्वीकारेण ये तृप्ताः भवन्ति, ये ब्राह्मणशरीरेषु संस्थाय पिण्डस्वीकारेण च ये तृप्ताः भवन्ति, तादृक्पितृदेवताः मया समर्प्यमाणान्नतोयैः तृप्यन्तु । खण्डमृगमांसैः दिव्यमनोहरयुतैः कृष्णतिलैः ये सुराः पितॄन् तर्पयन्ति, महर्षयः कालादिशाकैः यान् तर्पयन्ति, ते च पितृदेवाः मम विषये सन्तुष्टास्सन्तः अत्रागच्छन्तु । ये च देवैरपि पूजिताः भवन्ति श्राद्धोपयोगिसमस्तपदार्थान् प्रीणन्ति ताः पितृदेवताः अत्रागत्य मया समर्प्यमाणगन्धपुष्पान्नभोज्यपदार्थानां सन्निधौ उपस्थिताः भवन्तु । ये प्रतिदिनं भुवि पूजां स्वीकुर्वन्ति, भुवि प्रतिमासान्ते अमायां यान् पूजयन्ति, ये अष्टकाश्राद्धेषु पूज्याः भवन्ति, ये वर्षान्तश्राद्धे पूज्याः, अभ्युदयनान्दीश्राद्धेषु पूजनीयाः ये, ते मया प्रदीयमानपूजां स्वीकुर्वन्तु । ये श्वेतकुमुदसमानवर्णाः, चन्द्रसमानशुक्लवर्णयुतकान्तियुताः सन्तः ब्राह्मणेभ्यः पूज्याः भवन्ति, ये सम्प्रत्युदितसूर्यसमानरक्तवर्णकान्तियुताः सन्तः क्षत्रियेभ्यः पूज्याः भवन्ति, ये सुवर्णसमानकान्तियुताः सन्तः विड्भ्यः पूज्याः भवन्ति, ये श्यामलवर्णकान्तिसदृशाः सन्तः शूद्राणां पूज्याः भवन्ति ते सकलपितृदेवाः मया समर्पितपुष्पगन्धधूपान्नजलादिभिः अग्निहोत्रैश्च तृप्यन्तु । ये देवानां सन्निधौ कृतहोमेन श्राद्धान्नं पूर्णतृप्त्यर्थं भुञ्जते, तृप्तास्सन्तः अणीमाद्यष्टैश्वर्यं सृजन्ति ते अत्र तृप्यन्तु, तान् अहं नमस्करोमि ।

ये रक्षांसि, भूतादीन्, घोरासुरान् नाशयन्ति, ये प्रजानाम् अमङ्गलं दूरीकुर्वन्ति, ये देवापेक्षया पुरातनाः, देवराजेन्द्रादपि पूज्याः ते पितृदेवाः अत्र तृप्यन्तु । अग्निष्वात्ता, बर्हिषदः, आज्यपाः, सोमपाः इति चत्वारः पितृगणाः अस्मत्समर्पिततर्पणेन तृप्तिं प्रयान्तु । अग्निष्वात्ताख्याः पितृगणाः, पूर्वदिशि मां रक्षन्तु । बर्हिषदाख्यप्रसिद्धाः पितृगणाः उत्तरदिशि मां रक्षन्तु । आज्यपाख्यया प्रसिद्धाः पितृगणाः पश्चिमदिशि मां रक्षन्तु । सोमपाख्यपितृगणाः उत्तरस्यां दिशि मां रक्षन्तु । पितृगणानामेषामधिपतिः यमराजश्च रक्षोभूतपिशाचासुराणां दोषात् मां रक्षतु ।

विश्वः, विश्वभुक्, आराध्यः, धर्मः, धन्यः, शुभाननः, भूतिदः, भूतिकृत्, भूतिश्चेति नव पितृगणाः । कल्याणः, कल्याणकर्ता, कल्यः, कल्यतराश्रयः, कल्यताहेतुः, अनघशश्चेति षड् पितृगणाः ख्याताः । वरः, वरेण्यः, वरदः, पुष्टिदः, तुष्टिदः, विश्वस्पाता, धाता चेति सप्त पितृगणाः । महान्, महात्मा, महितः, महिमावान्, महाबलश्च एते पापनाशकाः पञ्च पितृगणाः । सुखदः, धनदः, धर्मदः, भूतिदः, एते चत्वारो गणाः । एवमाहत्य एकत्रिंशत् पितृगणाः सन्ति । एते सकलं जगद्व्याप्य तिष्ठन्ति । एते सर्वेऽपि पूर्णतृप्ताः सन्तः मे सर्वदा हितं कुर्वन्तु । सर्वैः पूज्यमानाः, अमूर्तरूपाः, ध्यानशीलाः, तेजस्विनः, दिव्यदृष्टिसम्पन्नाः ये पितरः । इन्द्रादिदेवानां दक्षमरीचप्रजापतीनाम्, सप्तर्षीणाम् अन्येषाञ्च ये नायकाः सर्वान् कामान् ये पूरयन्ति तान् पितॄन् नमस्करोमि । ये मन्वादिमुनीन्द्राणां राजर्षीणां सूर्यचन्द्रादीनाञ्च स्वामिनः, ये समुद्रे जले च वसन्ति तान् सर्वान् पितॄन् नमस्करोमि । नक्षत्रग्रहवाय्वग्निनभस्स्वर्गमपि व्याप्य तिष्ठन्ति तान् कृताञ्जलिः सन् नमस्करोमि । देवर्षीणां ये जन्मदातारः, सर्वलोकनमस्कृताः, सर्वदा अक्षयफलदातारः ये पितृदेवाः तान् नमस्करोमि । एवं पितृस्तवे कृते प्रत्यक्षीभूतपितॄणां सन्निधौ नमस्कृत्य एवमुक्तवान्

हे पितरः ! सम्प्रति ब्रह्मदेवः सर्गकर्तृत्वमादिष्टवान् अस्ति अतोऽहं तदाज्ञाधारी सन् सन्तानप्राप्त्यर्थं सुयोग्यां दिव्यां प्रजावतीमभीप्सामि कृपया अनुगृह्णन्तु इति रुचिना प्रार्थिते सति, रुचिमुद्दिश्य पितरः इत्थमूचुः सम्प्रत्येव अत्रैव स्थाने भवत्प्रार्थितसन्तानदात्रीं प्राप्नोति । तस्यां मन्वाख्यं पुत्रं प्राप्नोति । धीमान् सन् सः मन्वन्तरस्य स्वामी च भविष्यति । त्रिषु लोकेष्वपि रौच्याख्येन प्रसिद्धश्च भविष्यति । तस्यापि महाबलशालिनः पराक्रमिणश्च अनेके पुत्राः जनिष्यन्ति । ते सर्वेऽपि पृथ्वीमिमां सम्यक् परिपालयन्ति । त्वं रुचिरपि प्रजापतिः सन् चतुर्विधप्रजाः स्रक्ष्यति । तवाधिकारसमाप्त्युत्तरम् अस्मदनुग्रहविशेषेण मोक्षं च प्राप्स्यसि इति पितरः आशीर्वचनं

 ISSN: 2320-740X

प्रादुः ।

एवमेतत्स्तोत्रपारायणेन सभक्तिश्रद्धं ये मानवाः पितॄन् अस्मान् स्तुवन्ति तेन सन्तुष्टास्सन्तः ते देवाः मनोवाञ्छितभोगभाग्यं आत्मज्ञानं च प्रयच्छन्ति । ये तावत् नीरोगशरीरं वाञ्छन्ति, पत्नीपुत्रपौत्रादीन् च वाञ्छन्ति ते एतत्स्तोत्रपारायणेन निस्सन्देहमभीप्सितकामान् प्राप्नुवन्ति । श्राद्धभोजनसमये श्रेष्ठब्राह्मणानां सन्निधौ ये इमान् श्लोकान् भक्तिश्रद्धापूर्वकं पठन्ति एतत्स्तोत्रपठनेन अवश्यं तत्र पितरः उपस्थिताः भवन्ति श्राद्धकर्मफलमपि अक्षय्यं भवति ।

श्रोत्रियब्राह्मणरहितं श्राद्धम्, अधर्मवित्तेन आचरितं श्राद्धम्, श्राद्धायोग्यपदार्थदूषितसामग्रीकृतश्राद्धम्, अनुचितसमये देशे वा कृतं श्राद्धम्, विना श्रद्धां कृतं श्राद्धम् एतत्सकलं दोषजातं पापं श्राद्धसमये एतत्स्तोत्रपठनमात्रेण नश्यतीति एतत्स्तोत्रफलश्रुतौ उच्यते । पितृभ्यः सुखप्रदायकमिदं स्तोत्रं श्राद्धकर्मणि यदि पठ्यते तदा १२ वर्षं पितरः तृप्ताः भवन्ति । हेमन्तर्तौ, शिशिरर्तौ, ग्रीष्मर्तौ वर्षाशरदृतौ यदि एतत्स्तोत्रं पठ्यते तर्हि यथाक्रमं पितरः १२, १६, २४, १६, वर्षं तृप्ताः चिरं तिष्ठन्ति । येषां गृहे लिखितस्तोत्रमेतत् तिष्ठति तत्र श्राद्धदिने अवश्यमेव पितरः उपस्थिताः भवन्ति । एवं पितरः उक्त्वा स्वर्गलोकमगमन् । तदनु नदीमध्यात् प्रम्लोचाख्याप्सरा प्रादुर्भूय तस्याः पुत्रीं मालिन्याख्यां दारपरिग्रहार्थं रुचिं प्रार्थयामास ।

**********

# छेद्यकम्

**डा. प्रसादभट्टः**
प्राध्यापकः, फलितज्यौतिषविभागः

छेद्यकं नाम किम् ? **छिद्यन्ते गोलविषयकाः संशयाः** अनेन इति छेद्यकम् । **गोलस्थितिप्रदर्शकः प्रकारः परिलेखः** इति अस्य तात्पर्यम् । तस्मादेव सूर्यसिद्धान्तादिषु ग्रन्थेषु ग्रहणकथनात्परं छेद्यकं विना कुत्र स्पर्शः, कुत्र मध्यग्रहणम्, कुत्र मोक्षः इत्यादि सर्वेषां स्पष्टज्ञानार्थं छेद्यकाधिकारः स्थापितः । सिद्धान्तकाराः चन्द्रशृङ्गोन्नतीत्यादिषु अपि छेद्यकप्रकारं प्रदर्शितवन्तः तथाप्यत्र केवलं ग्रहणविषयमेव लक्षीकृत्य सूर्यसिद्धान्तमाधृत्य छेद्यकः निरूप्यते ।

तत्र ग्रहणं नाम ग्राहकः यदा ग्राह्यं गृह्णाति तदा ग्रहणम् । सूर्यग्रहणे – ग्राहकः चन्द्रः ग्राह्यः सूर्यः । अत्र शीघ्रगतिकः ग्राहकः चन्द्रः पूर्वदिशि गच्छन् ग्राह्यं सूर्यं गृह्णातीत्यतः सूर्यग्रहणे सूर्यस्य पश्चिमदिशि स्पर्शः पूर्वदिशि मोक्षः । चन्द्रग्रहणे तु प्राग्गतिकः चन्द्रः एव भूभां प्रविशतीत्यतः चन्द्रस्य पूर्वदिशि स्पर्शः पश्चिमदिशि मोक्षः । उभयत्रापि ग्रहणे मानैक्यार्धसमः यदा शरः तदा ग्रहणस्पर्शः, यदा मानैक्यार्धादल्पः तदा ग्राहकः ग्राह्यं गृह्णातीत्यतः ग्राससम्भवः । छाद्यबिम्बादल्पे ग्रासे खण्डग्रहणम्, छाद्यबिम्बादधिके ग्रासे खग्रासग्रहणम् । एवं खग्रासग्रहणे स्पर्शसम्मीलनमध्योन्मीलनमोक्षा इति पञ्च स्थितयः । तथैव खण्डग्रासे तु स्पर्शमध्यमोक्षाश्चेति त्रय एव विभागाः । यदा ग्राह्य-ग्राहकयोः स्पर्शः तदा स्पर्शः । यदा पूर्णमाच्छादयति तदा सम्मीलनम् । यदा मोक्षारम्भः तदा उन्मीलनम् । तिथ्यन्तकाले मध्यग्रहणम् । यदा ग्राहकः ग्राह्यं त्यजति तदा मोक्षः । सम्मीलनात् उन्मीलनं यावत् ग्राहकः ग्राह्यं मर्दयतीति सः कालः विमर्दकालः । खण्डग्रहणे पूर्णग्रहणं न भवतीत्यतः सम्मीलन-उन्मीलने न भवतः । इति ग्रहणस्य सामान्यपरिचयः ।

सूर्यचन्द्रयोः ग्रहणयोः परिलेखार्थम् उपकरणत्वेन शरः, वलनञ्च ग्रहणाध्यायोक्तरीत्या साधनीयम् । तथा सूर्यचन्द्रभूभानां च बिम्बमानमपि संसाध्य जलमापनेन समीकृतशिलातलम् अथवा वज्रवत्काठिन्ययुक्तम् अम्बुयन्त्रेण समीकृतभूप्रदेशम्, फलकं वा परिलेखार्थं सज्जीकुर्यात् ।

 ISSN: 2320-740X

एवं सुसाधितायामवनौ एकं केन्द्रबिन्दुं कृत्वा[1](के) तस्मात् केन्द्रात् आदौ एकोनपञ्चाशदङ्गुलव्यासर्धेन वृत्तं कार्यम् । अस्य वृत्तस्य नाम **वलनवृत्तमिति** यतो हि अत्रैव वलनदानम् (पूव/पव) । किमर्थं वलनम् एकोनपञ्चाशदङ्गुलात्मकव्यासार्धवृत्ते दीयते इत्यत्र त्रिज्यायाः अपवर्तनसङ्ख्या इति तु विदितमेव । एवं वलनवृत्तकेन्द्रादेव ग्राह्यग्राहकयोगार्धपरिमिताङ्गुलममेन द्वितीयं वृत्तं लेखनीयम् । अस्य वृत्तस्य नाम **समासवृत्तमिति** । पूर्वोक्तकेन्द्रादेव तृतीयं ग्राह्यार्धमानेन वृत्तं लेखनीयम् । एवं वृत्तत्रयं विलिख्य तत्र यथा दर्पणादिषु अस्माकं सव्यापसव्यं विपरीततया दृश्यते तथैव आकाशस्थपूर्वापरकपालः भूमौ वा फलके वा विपरीततया दृश्यते इत्यतः पूर्वापरकपालः व्यत्यस्तः यथा भवेत् तथा दिङ्निर्देशः कार्यः (पू,प,उ,द) ।

वलनं नाम **ग्रहक्षितिजे समण्डलप्राचीतः क्रान्तिवृत्तीयप्राचीं** यावत् विद्यमानमन्तरम् । अर्थात् **समप्रोतकदम्बप्रोतवृत्तयोर्मध्ये ग्रहक्षितिजे विद्यमानमन्तरं** स्पष्टवलनम् इत्युच्यते । अतः सममण्डलप्राचीतः(अस्माकं पूर्वः) वलनान्तरे स्पर्शादयः । चन्द्रग्रहणे पूर्वोक्तरीत्या ग्राहकः एव ग्राह्यं पूर्वादितः प्रविशतीत्यतः(पूर्वदिशि स्पर्शः) वलनवृत्तस्य पूर्वतः यथादिक् गणितागतस्पार्शिकवलनदानम्[2] । मोक्षकाले शीघ्रगतिकः ग्राहकः ग्राह्यं त्यजतीत्यतः गणितागतमौक्षिकं वलनं पश्चिमचिह्नात् दक्षिणं चेदुत्तरम् उत्तरं चेत् दक्षिणं देयम् । रविग्रहणे शीघ्रगतिकः ग्राहकः ग्राह्यं गृह्णातीत्यतः (पश्चिमदिशि स्पर्शः) स्पार्शिकं वलनं पश्चिमचिह्नात् गणितागतदिग्व्यत्यस्तं यथा भवेत् तथा देयम् । मौक्षिकं वलनं पूर्वचिह्नात् गणितागतरीत्या यथादिक् देयम् । एवं वलनं दत्वा वलनाग्रात् वृत्तकेन्द्रं यावत् सूत्रं नयेत् । तत् सूत्रं समासाख्यवृत्तं यत्र स्पृशति (क्रा) तत्र क्रान्तिवृत्तीयप्राची भवति ।

ग्रहणे ग्राह्यग्राहकयोर्मध्ये एकः क्रान्तिवृत्ते भवति । अन्यः बहिष्ठादागत्य क्रान्तिवृत्तं प्रविशति । अर्थात् बहिष्ठादागत्य गृह्णाति अथवा गृहीतो भवति । सूर्यग्रहणे सूर्यः ग्राह्यः । अयं क्रान्तिवृत्ते तिष्ठति । ग्राहकः चन्द्रः बहिष्ठादागत्य सूर्यं गृह्णाति । अत्र परिलेखे ग्राह्यवृत्तं ( सूर्यग्रहणे सूर्यबिम्बः) सर्वदा मध्ये तिष्ठति। ग्राहकः चन्द्रः बहिष्ठादागत्य ग्राह्यं रविं गृह्णातीत्यतः क्रान्तिवृत्तस्य प्रतीचीतः (वलनसूत्रं समासाख्यवृत्तं यत्र स्पृशति तत्र क्रान्तिवृत्तीयप्रतीची भवति) गणितागतदिशि शरदानम् (श२) । किन्तु चन्द्रग्रहणे ग्राह्यः चन्द्रः (परिलेखे सर्वदा

---

[1] सर्वान्ते विद्यमानछेद्यके द्रष्टव्यम्

[2] वलनं "ज्यकावत्" देयम् – सिद्धान्तशिरोमणिः – चं.ग्रहणाधिकारः श्लो.सं २६

मध्ये तिष्ठति) एव बहिष्ठादागत्य ग्राहकं भूच्छायां प्रविशति । आकाशे अल्पगतियुक्ता भूच्छाया क्रान्तिवृत्ते भवतीत्यतः छेद्यके गणितादागतविपरीतरूपेण (दिग्व्यत्यासेन) शरदानमत्र कर्तव्यम्(श) । ततः परमुभयत्रापि शराग्रे ग्राहककेन्द्रमिति विचिन्त्य ग्राहकवृत्तं ग्राहकाङ्गुलार्धत्रिज्यामानेन कर्तव्यम् । तथा शराग्रतः केन्द्रं यावत् सूत्रं नयेत्(के-श/श२) । तत् सूत्रं यत्र ग्राह्यवृत्तं स्पृशति तत्र स्पर्शः अथवा मोक्षः[1](स्प/मो) ।




चन्द्रग्रहणपरिलेखे मध्यवलनं यदि वलनशरयोः समानदिक्त्वे दक्षिणतः प्राङ्मुखं देयं, तयोः दिग्भेदे पश्चान्मुखं दक्षिणतः देयम्[2] । यतो हि मध्यकाले ग्राह्यग्राहकौ चन्द्रभूभे एकस्मिन् एव कदम्बप्रोतवृत्ते भवतः । तत्र यदि वलनमुत्तरं शरोऽप्युत्तरः तर्हि शरमूलगता भूभा चन्द्रात् दक्षिणगता याम्योत्तरसूत्रात् पूर्वतः भवति । एवं यदि वलनं दक्षिणं शरः उत्तरः तदा याम्योत्तरसूत्रात् परभागगता भूभा शरमूले चन्द्रात् दक्षिणतः भवति[3] । सूर्यग्रहणे वलनविक्षेपयोरेकदिक्त्वे याम्योत्तरसूत्रस्य दक्षिणतः प्रत्यङ्मुखं, दिग्भेदे प्राङ्मुखं दक्षिणतः देयम् । एवमुभयत्रापि ग्रहणे वलनं दत्त्वा वलनाग्रात् सरलरेखा कार्या(के.म), सा रेखा केन्द्रं भित्वा वलनवृत्तस्य अन्यपरिधिबिन्दुं स्पृशेत् । तदा तस्मिन्नपि परिधौ याम्योत्तरसूत्रात् वलनरेखां यावत् विद्यमानमन्तरं वलनमेव(उ.म) भवति ।

मध्यग्रहणे ग्राह्यग्राहकौ एकस्मिन्नेव कदम्बप्रोतवृत्ते भवतः । तथा ग्राह्यग्राहकयोरन्तरं शरतुल्यं च

---

[1] चन्द्रग्रहणे स्प=स्पर्शः, मो=मोक्षः, सूर्यग्रहणे मो=स्पर्शः स्प=मोक्षः ।

[2] अत्र चन्द्रग्रहणे उत्तरः शरः, दक्षिणं वलनम्, के=चन्द्रकेन्द्रम्, श२/श१/श भूभाकेन्द्रम् । सूर्यग्रहणे दक्षिणः शरः, दक्षिणं वलनम्, के=रविकेन्द्रम्, श२/श१/श चन्द्रकेन्द्रम् ।

[3] केतकीकारोक्तच्छेद्यकविधानेनात्र स्पष्टो भवति ।

 ISSN: 2320-740X

भवति । एवमेव मध्यमवलनं समसूत्रकदम्बसूत्रान्तरसमानं भवति (कदम्बसूत्रमेकमेव इत्यतः) । अतः अत्र वलनाग्रात् केन्द्रगतसूत्रं कदम्बसूत्रमिति(के.म) वक्तुं शक्नुमः । तस्मात् तत्रैव मध्यमग्रहणकालीनशरः(के-श१) । अतः ग्राह्यकेन्द्रात् वलनसूत्रे शरं दत्त्वा(श१) ( नित्यशोऽर्कस्य विक्षेपाः परिलेखे यथा दिशम् । विपरीताः शशाङ्कस्य तद्वशादथ मध्यमम् ॥[1]) शराग्रं केन्द्रमिति विज्ञाय तत्र ग्राहकाङ्गुलार्धत्रिज्यामानेन वृत्तं लिखेत् । तद्वृत्तं ग्राह्यवृत्तं यावत् आच्छादयति तावान् ग्रासः (ग्रासः) ।

**ग्राहकमार्गसाधनम्**

ग्रहणपरिलेखे मध्ये ग्राह्यबिम्बस्याङ्गीकारेण ग्राहकबिम्बस्य चलनम् अङ्गीकृतमिति सिद्धम् । यदि ग्राहकबिम्बः चलति तर्हि तस्य मार्गः कः इति जिज्ञासा । पूर्वसाधितपरिलेखे सुलभतया रेखागणितस्य चतुर्थाध्यायस्थ चतुर्थप्रतिज्ञायां यथा अभीष्टत्रिभुजान्तर्गतम् एकं वृत्तं यथा साध्यते तथैव सुलभतया सिध्यति । ग्रहणे स्पर्श-मध्य-मोक्षकाले शराग्रे ग्राहकबिम्बः (अत्र छेद्यके) इति पूर्वमेव सिद्धम् । अतः शराग्रगतस्पर्शमध्य(श-श१)-मध्यमोक्ष(श१-श२)ग्राहकवृत्तकेन्द्रयोः (मध्ये रेखे संसाध्य) अन्तरेण मत्स्यौ साधनीयौ (अ-ड, ब-क) । तयोः मत्स्ययोः योगरूपे रेखे यत्र योगं कुरुते तत् केन्द्रम् (के१) । अस्मात् केन्द्रात् (के१)स्पर्श-मध्य-मोक्षकालीनशराग्रं समानान्तरितम् । अतः तस्मात् केन्द्रात् शराग्रगतः चापः ग्राहकमार्गः भवति । वस्तुतः आकाशे ग्राहकमार्गः चापरूपः भवितुं नार्हति । अल्पान्तरत्वात् सरलाकारयुक्तः (शराग्रगतकल्पितविमण्डलवत्) । किन्तु परिलेखे स्थितिप्रदर्शनार्थमेवं क्रियते ।

**ग्रास-सम्मीलन-उन्मीलनसाधनम्**

स्पर्शमोक्षयोः काले ग्राह्यग्राहकयोः केन्द्रान्तरं मानैक्यार्धतुल्यं भवति । इष्टकाले मानैक्यार्धे तत्कालीनग्रासस्य वियोगेन ग्राह्यग्राहकयोः केन्द्रान्तरं भवितुमर्हति । अतः इष्टकालीनग्रासं संसाध्य मानैक्यार्धे विशोध्य लब्धान्तरसमानशलाकां ग्राह्यकेन्द्रात् ग्राहकमार्गे चालयेत् तदा शलाकाग्रा यत्र मार्गं स्पृशति तत् तत्कालीनग्राहककेन्द्रं भवति । तस्मात् केन्द्रात् ग्राह्यकाङ्गुलार्धमानत्रिज्यया ग्राहकवृत्ते कृते तद्वृत्तं ग्राह्यं यावदाच्छादयति तावान् ग्रासः ।

---

[1] सूर्यसिद्धान्तस्य छेद्यकाधिकारे श्लो.सं ८

यदा ग्राहकः ग्राह्यं पूर्णमाच्छादयति चन्द्रग्रहणे अथवा सूर्यग्रहणे **यदा ग्राहकः ग्राह्ये अन्तर्भवति तदा सम्मीलनम्** । छेद्यके तु **ग्राह्यग्राहकयोः पश्चिमपाल्योः योगः सम्मीलनम्** । **उन्मीलनं नाम मोक्षारम्भः**, छेद्यके **ग्राह्यग्राहकयोः पूर्वपाल्योः योगः**, अतः सम्मीलन-उन्मीलनसमये ग्राह्यग्राहकयोः केन्द्रान्तरं मानान्तरार्धसमं भवति । अतः ग्राह्यवृत्तकेन्द्रात् मानान्तरार्धसमशलाकां स्पर्शदिशि चालयेत् । तदा सा शलाका यत्र ग्राहकमार्गं स्पृशति तस्मात् कृतग्राहकमानार्धत्रिज्यावृत्तं यत्र ग्राह्यं वृत्तं स्पृशति तत्र सम्मीलनम् । तां शलाकां मोक्षदिशि चालयित्वा सा यत्र ग्राहकमार्गं स्पृशति तस्मात् कृतग्राहकमानार्धत्रिज्यावृत्तं यत्र ग्राह्यं स्पृशति तत्र उन्मीलनम् इति सिद्धम् । एवं ग्रहणस्य स्पर्शसम्मीलनमध्योन्मीलनमोक्षाः तथा इष्टकालीनग्रासश्च सूर्यसिद्धान्तोक्तरीत्या सिद्ध्यति ।




**********


ISSN: 2320-740X

# लेखनकौशलाभिवर्धकशिक्षणपद्धतयः

**डा. अरविन्द सोमदत्तः**

प्राध्यापकः, शिक्षाविभागः

**१) सम्भावनात्मकलेखनम्**

छात्राणां लेखनकौशलविकासाय सम्भावनात्मकलेखनपद्धतिः उत्तमा शिक्षणपद्धतिः भवति । शिक्षणपद्धतावस्यां शिक्षकः स्वहस्तघटीं भित्तिघटीं वा पश्यति । तदा यः समयः, तं समयं कृष्णफलके लिखति । ततः छात्रान् एवं सूचयति - अस्मिन् समये भवत्परिचिताः बान्धवाः वा किं कुर्वन्ति इति लिखन्तु । एकैकेनापि न्यूनातिन्यूनं दशानां जनानां विषये लेखनीयम् । सः जनः कः ? इत्यपि लेखनीयम् इति । ततः शिक्षकेण उदाहरणमपि प्रदर्श्यते ।

यथा - **समयः ११:१५**

१) अस्मिन् समये मम पिता कार्यालये कार्यं करोति ।

२) अस्मिन् समये मम माता गृहे पाकं करोति ।

३) अस्मिन् समये मम पितामहः दूरदर्शनं पश्यति ।

एवमुदाहरणं प्रदर्श्य शिक्षकः छात्रान् स्वपुस्तिकासु **तेषां बान्धवाः तस्मिन् समये किं कुर्वन्ति** इति विषये लिखन्तु इति आज्ञापयति । शिक्षकनिर्देशानुसारं सर्वे छात्राः **तेषां बान्धवाः तस्मिन् समये किं कुर्वन्ति** इति विषयमधिकृत्य स्वपुस्तिकासु दशाधिकवाक्यानि लिखन्ति । एवं सम्भावनात्मकलेखनपद्धत्यापि छात्राणां लेखने रुचिः तथा लेखनकौशलञ्च अभिवर्धेते इत्यतः प्रकृतांशः सम्भावनात्मकलेखनपद्धतिः लेखनकौशलविकासाय उत्तमा पद्धतिः भवतीति ।

**२) वार्तालेखनपद्धतिः** - समाचारपत्रिकासु प्रकाशितानां कासाञ्चित् वार्तानां शीर्षकाणि श्यामफलके शिक्षकेण लेखितव्यानि । शिक्षकः तानि शीर्षकाणि श्यामफलके लिखित्वा - अत्र प्रत्येकं शीर्षकस्य अधः विद्यमाना वार्ता का स्यात् इति कल्पनां कृत्वा पञ्चभिः वाक्यैः तां वार्तां लिखन्तु इति आज्ञापयति । स्वयं शिक्षकः एकस्य शीर्षकस्य पञ्च वाक्यानि उदाहरणत्वेन प्रस्तौति । ततः छात्राः स्वपुस्तिकासु किमपि एकं शीर्षकमधिकृत्य पञ्च वाक्यानि लिखन्ति । अनेनापि अभ्यासेन छात्राणां लेखनकौशलस्य विकासः भवति ।

**३) चित्रसम्भाषणलेखनपद्धतिः -** शिक्षकेण समाचारपत्रे प्रकाश्यमानानि चित्राणि संग्रहणीयानि । यत्र सम्भाषमाणौ जनौ दृष्टिगोचरौ भवेताम् । ततः छात्राः गणशः विभक्तव्याः । प्रतिगणम् एकं चित्रं दातव्यम् । ततः गणीयाः सर्वे सावधानतया तत् चित्रं दृष्ट्वा तयोः मध्ये प्रवर्तमानं सम्भाषणं कीदृशं स्यादिति विचिन्त्य चर्चां कृत्वा लिखेयुः इति शिक्षकः आज्ञापयन् सङ्गृहीतानि चित्राणि प्रदर्शयति । स्वयं शिक्षकः कस्यचित् चित्रस्य सम्भाषणं श्यामफलके उदाहरणत्वेन लिखति । ततः छात्राः स्वपुस्तिकासु कस्यापि स्वीकृतस्य चित्रस्य सम्भाषणं लिखेयुः । एवमनेनापि शिक्षणविधिना छात्राणां लेखनकौशलस्य विकासः भवतीति कृत्वा प्रकृतांशः अपि लेखनकौशलविकासाय भवति ।

**४) सूचितविषयलेखनम् -** अत्र दैनन्दिनव्यवहारे छात्राणामनुभवगोचरतां गच्छतां ३०-४० विषयाणामावलिः करणीया, यथा विद्यालयः, गृहम्, लेखनी, पुस्तकम्, चित्रम्, मार्गः, पत्रिका, आकाशवाणी, दूरदर्शनम्, सङ्गणकम् इति कक्ष्यायाम् एकस्मै छात्राय (गणाय वा) तेषु विषयेषु कश्चित् विषयः सूचनीयः । पञ्चनिमेषाभ्यन्तरे एव छात्राः तं विषयमवलम्ब्य किमपि लिखेयुः (न्यूनातिन्यूनं ६-७ वाक्यानि वा भवेयुः) । तत्र दोषाः न गण्यन्ते इत्यपि शिक्षकः आदौ एव सूचयति । स्वयं शिक्षकः कमपि विषयमवलम्ब्य श्यामफलके उदाहरणत्वेन लिखति । ततः छात्राः शिक्षकनिर्देशानुसारं सूचितं विषयमवलम्ब्य लिखेयुः । एवमनेनापि शिक्षणविधिना छात्राणां लेखनकौशलस्य विकासः भवति ।

एवं चतुर्णां श्रवण-भाषण-पठन-लेखनादीनां भाषाकौशलानां विकासाय उपयुक्ततमाः शिक्षणपद्धतयः सविस्तरं निरूपिताः ।

**********


ISSN: 2320-740X

# सुखबोधिन्याः सुखबोधकत्वं गुरुत्वञ्च

**विद्वान् अरुणभट्टः**

प्राध्यापकः, नव्यव्याकरणविभागः

सुविदितमेव यत् विद्वद्भिः श्रीमद्भिः भट्टोजीदीक्षितैर्विरचिता वैयाकरणसिद्धान्तकौमुदी व्याकरणसिद्धान्तानां कौमुदीत्वेन राराष्टि इति । प्रक्रियाक्रममाश्रित्य प्रकरणप्रविभागपूर्वकं सूत्रसूत्रार्थोदाहरणप्रत्युदाहरणादिभिः भूयिष्ठः ग्रन्थोऽयं अध्ययनाध्यापने च अत्यर्थमुपकारकः । व्याकरणसिद्धान्तावगमने अतिदुरूहग्रन्थान्तरेभ्यः इयं सिद्धान्तकौमुदी सुखकरी[1] इति नागेशभट्टः अस्य महत्वं वर्णयति । अयं च ग्रन्थः प्रक्रियाक्रमे मूर्धन्यं स्थानमावहति । ग्रन्थस्यास्य महत्वमधिगम्य ग्रन्थकर्तुः हार्दं प्रकटयितुं च अनेकाः व्याख्याः अजायन्त । तासु प्रौढमनोरमा, तत्त्वबोधिनी, बृहच्छब्देन्दुशेखरः, लघुशब्देन्दुशेखरः, बालमनोरमादयः व्याख्याः प्रकाशिताः अध्ययनाध्यापनपथमारूढाः सन्दृश्यन्ते । पञ्चदशाधिकाः अप्रकाशिताः टीकाः संश्रूयन्ते । तासु अप्रकाशितासु सिद्धान्तकौमुदीव्याख्यासु तत्त्वबोधिनीकाराणां शिष्येण श्रीनीलकण्ठवाजपेयिना विरचिता पूर्णतयोपलभ्यमाना सुखबोधिनीव्याख्या विशिष्टतमा । व्याख्यायाम् अस्यां न केवलं सूत्राणां तात्पर्योद्घाटनं कृतम्, अपि तु प्राचीनार्वाचीनानां मतभेदः, उदाहरणदाने दिक्षितैरनुसृतपन्थाः, स्वगुरूणामाशयः, स्वाभिप्रायश्च प्रकटीकृतः । सुखबोधिन्यां प्रतिपादितेषु विशिष्टेषु विषयेषु बहुत्र स्वगुरोः ज्ञानेन्द्रसरस्वत्याः मतं निरूपितम् । प्रबन्धेऽस्मिन् स्वगुरूणा सह व्याख्याकारस्य मतभेदः, मतैक्यं च गुरुवाक्योद्धरणपुरस्सरं कथं निरूपितमिति दिङ्मात्रं प्रदर्श्यते ।

**आराद्वनादित्यादौ समासविचारः - अव्ययं विभक्तिसमीपसमृद्धि[2].....** इति सूत्रे समीपार्थकाव्ययस्य समासे कृष्णस्य समीपम् उपकृष्णमिति उदाहरणं प्रदर्शयन् कौमुदीकारः समया ग्रामम्, निकषा लङ्काम्,

---

[1] लघुशब्देन्दुशेखरः

[2] अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्त-वचनेषु । - अष्ट २. १. ६

ISSN: 2320-740X 

आराद्वनादित्यादौ तु सामीप्ये नाव्ययीभावः, **अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि**[1]**, अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते**[2] इति द्वितीयापञ्चम्योर्विधानसामर्थ्यात् इति प्राह । परं सुखबोधिनीकारः मूलोक्तानां समया, निकषा, आरादिति त्रयाणां विषये विशिष्टां व्याख्यां समकारयत् । ननु समया ग्रामम्, निकषा लङ्काम्, आराद्वनादित्यत्र समया, निकषा, आरादिति त्रयाणाम् अव्ययानां सामीप्यार्थकत्वेन अव्ययीभावः स्यात्, अव्ययस्य पूर्वनिपातनियमात् ग्रामं समया इत्यादि प्रयोगाः न स्युः इति । समया ग्रामम्, निकषा लङ्काम्, आराद् वनादित्यादौ अव्ययीभावसमासे सति प्रातिपदिकत्वात् अम्भावे समयाग्रामम्, निकषालङ्कम्, आराद्वनमिति स्यादेव । ननु तथा सति **अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि** तथा **अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते** इति द्वितीयापञ्चम्योः विधानं व्यर्थं स्यात् । तथा हि अभितः परितः इत्यनेन वार्तिकेन समयाशब्दयोगे द्वितीयाविभक्तेः तथा अन्यारादिति सूत्रेण आरादित्यस्य योगे पञ्चम्याः विधानमस्ति । यदि समया तथा आरात् इत्यनयोः शब्दयोः प्रयोगेऽपि अव्ययीभावः स्यात् तदा द्वितीयापञ्चम्योः विधानं व्यर्थमेव स्यात् ।

समया ग्रामम्, निकषा लङ्काम् इत्यत्र द्वितीयाविधानसामर्थ्यान्मास्त्वव्ययीभावः, परम् आराद्वनादित्यत्र तु अव्ययीभावसमासः स्यादेव । तथा हि दूरसमीपयोः[3] अर्थयोः विद्यमानस्य आरादित्यस्य अन्यारादिति पञ्चमीविधानेन दूरार्थकाराच्छब्दयोगे सावकाशत्वात् आराद्वनमिति सामीप्यार्थक-आराच्छब्दयोगे समासः भवेदेव । इति चेदत्र उच्यते - **दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्**[4] इति सूत्रेण पञ्चमी षष्ठी च विधीयते । तदपवादतया अन्यारादिति सूत्रेण अन्य-आरादित्यादिना योगे पञ्चमी विधीयते । आराद्वनादित्यत्र तु षष्ठीपञ्चम्योः प्राप्तयोः अपवादतया आराच्छब्दयोगे पञ्चमीविधानात् पञ्चमीविभक्तिः स्यादेव । यदि आराच्छब्दयोगेऽपि पञ्चमी न स्यात् तर्हि पञ्चमीविधानं व्यर्थमेव स्यात् । अतः तत्सामर्थ्यात् अव्ययीभावो न भवति इति समाहितं सुखबोधिन्याम् ।

व्याख्याकारः नीलकण्ठवाजपेयी नात्र अरमत । स्वगुरूणां तत्त्वबोधिनीकाराणां मतमपि प्रादर्शि तेन ।

---

[1] वा - १४४२-१४४३

[2] अष्टा - २. ३. २९

[3] आराद्दूरसमीपयोः इत्यमरः - ३. ४. ४

[4] अष्टा- २. ३. ३४


ISSN: 2320-740X

यथा **गुरवस्त्वाहुः अन्तिकार्थकाराच्छब्दयोगे विशिष्टपञ्चमीविधानाभावात्** *अन्यारादिति* **सूत्रस्य अन्यत्र कृतार्थत्वाच्च सामीप्ये आराद्वनमित्यव्ययीभावो दुर्वार एवेति** इति । **अन्यारादिति** सूत्रेण सामान्यरूपेण पञ्चम्याः विधानात् अन्तिकार्थ-आराच्छब्दयोगे विषिष्टपञ्चम्याः विधानं नास्ति इति हेतोः तस्य सूत्रस्य दूरार्थकाराच्छब्दयोगे चारितार्थ्यात् सामीप्ये आराद्वनमित्यव्ययीभावः स्यादेव इति ।

**पुरुषोत्तमशब्दे समासविचारः –** पुरुषोत्तम इत्यत्र कथं समास इति प्रश्नः **न निर्धारणे**[1] इति सूत्रव्याख्याने सुखबोधिनीकारेण उत्थापितः । निर्धारणे या षष्ठी सा न समस्यते इति **न निर्धारणे** इत्यस्य सूत्रस्यार्थः। नृणां द्विजः श्रेष्ठः इत्यत्र षष्ठ्यन्तस्य नृणामित्यस्य द्विजशब्देन समासो न भवति, यतश्च **निर्धारणम्**[2] इति निर्धारणषष्ठ्याः सत्वात् । एवं पुरुषोत्तम इत्यत्रापि पुरुषाणामुत्तमः इति षष्ठीसमासः न स्यात् । न निर्धारणे इति निषेधः अत्रापि प्रवर्तेत इति चेत्, नात्र निर्धारणे षष्ठी, शेषषष्ठी एव । तथा हि कैयटः - **द्विवचनविभज्योपपदे तरबीयसनौ**[3] इति सूत्रे यस्मान्निर्धार्यम्, यश्चैकदेशो निर्धार्यते, यश्च निर्धारणहेतुः एतत्त्रितयसन्निधाने निर्धारणं भवतीति तत्रैव **न निर्धारणे** इति निषेधः । न तु त्रितयसन्निधानाभावेऽपि समासः इति प्राह । अतः निर्धारणषष्ठ्यभावात् पुरुषोत्तम इत्यत्र **न निर्धारणे** इति निषेधः न प्रवर्तते ।

विषयेऽस्मिन् सुखबोधिनीकारेण मतान्तरमपि प्रदर्शितम् । **पुरुषेषु उत्तमः इति निर्धारणसप्तम्याः** ***संज्ञायाम्*** [4] **इति सप्तमीसमासः** इति । ननु तथा सति न निर्धारणे इति सूत्रवैयर्थ्यं स्यात् । तथा हि निर्धारणे संज्ञायामिति समासे सति न निर्धारणे इति समासनिषेधः व्यर्थ एव स्यात् । इति चेत् सूत्रवैयर्थ्यं न । स्वरे भेदः । सप्तमीसमासे तत्पुरुषे **तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः**[5] इति पूर्वपदप्रकृतिस्वरः इष्यते । षष्ठीसमासे तु समासस्य[6] इति अन्तोदात्तत्वं स्यात् । अतः निर्धारणे षष्ठीसमासो न भवतीत्यतः सप्तमीसमासे पूर्वपदप्रकृतिस्वरो भवति । किञ्च संज्ञायामिति नित्यसमासत्वात् वनेकशेरुकाः, अरण्येतिलकाः इत्यादौ इव

---

[1] अष्टा- २. २. १०

[2] अष्टा- २. ३. ४१

[3] अष्टा - ५. ३. ५७

[4] अष्टा - २. १ ४४., सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम् इति सूत्रार्थः ।

[5] अष्टा- ६. २. २

[6] अष्टा- ६. १. १२३

**हलदन्तात्सप्तम्याः संज्ञायाम्** [1] इति सप्तम्याः अलुक् प्रवर्तते । अतः व्याख्याकारः गुरवस्तु - **संज्ञायामिति समासाभ्युपगमे तस्य नित्यसमासत्वेन विग्रहासङ्गतिप्रसङ्गात् सप्तमीसमासो न युक्त इत्याहुः** इति प्राह । एवमेव संज्ञायामिति सूत्रव्याख्यानेऽपि **अत एव पुरुषोत्तम इत्यत्र सप्तमीतत्पुरुषो न युक्तः, संज्ञायां सप्तम्या अलुक्प्रवृत्तेः इति प्रतिभाति** इति व्याख्या अकारि । एवं पुरुषोत्तम इत्यत्र सप्तमीसमासो न इति समाहितम् ।

एवं बहुषु स्थलेषु गुरुणा तत्त्वबोधिनीकारेण सह सुखबोधिनीकारस्य मतभेदे सत्यपि नीलकण्ठवाजपेयी स्वमतमेव सर्वथा श्रेष्ठमिति मन्यमानो न बभूव । गुरुवाक्येषु आदरं प्रदर्शयन् तस्यापि मतमटङ्कयत् । समानाशयेऽपि बहुत्र गुरुवक्योद्धरणं कृतम् । तेन गुरुषु आदरः गौरवञ्च प्रदर्शितम् । बहूनां मतानां विलोडनेन यः पक्षः साधीयान् इति प्रतिभाति स पक्षः, स्वपक्षश्च सविस्तरं न्यबध्यत । अतः न केवलमस्यां व्याख्यायां सुखबोधकत्वम् अपि तु महत्सत्वं गुरुत्वञ्चापि दरीदृश्यते ।

**यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि ।**
**यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥**

<u>**परिशीलितग्रन्थाः-**</u>

१. अष्टाध्यायीसूत्रपाठः
२. व्याकरणमहाभाष्यम्
३. वैयाकरणसिद्धान्तकौमुदी
४. तत्त्वबोधिनी, सुखबोधिनी च व्याख्ये
५. लघुशब्देन्दुशेखरः
६. अमरकोशः

**********

[1] अष्टा- ६. ३. ९

 ISSN: 2320-740X

# मानवजीवने ज्यौतिषप्रभावः

**डा. प्रदीपशर्मा**

प्राध्यापकः, फलितज्यौतिषविभागः

स्वभावेन एव अन्वेषकः मानवः जगतः प्रत्येकं वस्तुना सह जीवने सम्बन्धं स्थापयितुमिच्छति । अस्याः प्रकृतेः कारणवशादेव मानवः शास्त्रीयज्ञानेन व्यावहारिकज्ञानेन च प्राप्तान् अनुभवान् भविष्यविषयिणीं जिज्ञासां च ज्योतिषाधारेण अभिज्ञातुमिच्छति । ज्योतिषस्य मानवजीवने किं स्थानम् ? ज्योतिर्विज्ञानं नाम किम् ? मानवः किमर्थं तस्मिन् अधिकां रुचिं प्रकटयति ? इत्यादि प्रश्नानां समाधानार्थमेव प्रयासः शास्त्रेऽस्मिन्विधीयते ।

इदमपि अनुभवगोचरः एव यत् प्रकृतौ निहिता शक्तिः कथञ्चित् मानवजीवनमवश्यमेव प्रभावयति । कश्चन जातकः धनिकस्य गृहे जन्म प्राप्नोति, तथा कश्चन याचकस्य पर्णकुटीरे । कश्चन स्वजीवनं दुःखेन अपरश्च सुखेन वा यापयति । अस्य कारणं किम् ? कारणमिदमेव यत् प्रकृतौ निहिता शक्तिः एव सर्वं प्रभावयति। इदानीं प्रश्नः उत्पद्यते यत् एतां शक्तिं कथं ज्ञातुं शक्नुमः? तत्र साधनं किम् ?

अस्यां स्थितौ एकमेव साधनं पुरतः अवलोक्यते, तदस्ति ज्योतिर्विज्ञानम् । अस्मिन् विज्ञाने प्रकृतौ विशिष्य खगोले अन्तर्भूतानां सर्वासां प्रक्रियाणाम् अस्यां पृथिव्यां प्रत्येकमपि प्राणिनः उपरि जायमानप्रभावः विज्ञायते । विशिष्य मानवजीवने आगतानां हर्ष-विषाद-हानि-लाभ-उत्थान-पतन-आरोग्य-अनारोग्य-शुभ-अशुभादीनां ज्ञानं पूर्वमेव ज्ञातुं शक्यते अनेन इति ।

वेदपुरुषस्य षट्स्वङ्गेषु ज्योतिषशास्त्रमपि एकम् अङ्गं विद्यते । ज्योतिः शब्दस्यार्थो भवति प्रकाशः। अयं हि प्रकाशः ईश्वरीयप्रकाशः। यस्मात् सम्पूर्णं जगदिदं प्रकाशितं भवति । अस्य प्रकाशस्य सम्बन्धः नेत्रादपि विद्यते। तस्य ईश्वरस्य नेत्रं सूर्यः इति । तद्यथा निगदति श्रुत्यपि - **चक्षोः सूर्योऽजायत**। **ज्योतिषं वेदचक्षुः** इति । अर्थात् ज्योतिषं वेदपुरुषस्य नेत्रम् उच्यते। अस्मिन् ज्योतिषशास्त्रे प्राणिनां जन्मकालिकग्रहस्थितिं ज्ञात्वा तेषां जीवने जायमानानां शुभाशुभकर्मणां फलनिर्देशश्च कृतोऽस्ति इति । वृद्धयवनजातककारेण आचार्यमीनराजेन उक्तं यत्-

**या पूर्वकर्मप्रभवस्य धात्री धात्रा ललाटे लिखिता प्रशस्तिः ।**
**तां शास्त्रमेतत् प्रकटं विधत्ते दीपो यथा वस्तु घनेऽन्धकारे ॥**

अर्थात् पूर्वजन्मनि कृतं शुभाशुभं यत् कर्म, तस्य फलं शास्त्रमिदं तथैव प्रकटीकरोति यथा अन्धकारे

स्थितपदार्थान् प्रदीपः प्रकाशयति ।

मानवस्य स्वभविष्यं ज्ञातुमिच्छा तथैव प्राचीना अस्ति यथा स्वयं मानवः । उक्तञ्च -

**वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः ।**
**अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम् ॥**

अर्थात् ये सर्वं परित्यक्तवन्तः तथा ये वनाश्रिताः सन्ति, एतादृशाः रागद्वेष-शून्याः निष्परिग्रहाः मुनयः सन्तः महापुरुषा अपि ज्योतिषशास्त्रविद्भ्यः भविष्यं ज्ञातुमुत्सुकाः भवन्ति। तदा साधारणप्राणिनां तु का वार्ता ?

विश्वे प्राणिनां जीवनस्तरः ब्रह्माण्डस्य प्राकृतिकप्रभावेण अवलम्बितोऽस्ति । अत्र नास्ति सन्देहः । यतोहि यद् ब्रह्माण्डे तत् पिण्डे । अस्मात् सिद्धान्तात् स्पष्टतया विदितं भवति यत् येभ्यः तत्त्वेभ्यः ब्रह्माण्डस्य सृजनं जातं तेभ्यः तत्त्वेभ्यः ब्रह्माण्डगतसमग्रपिण्डानामपि सृजनम् अभूदिति ।

प्राणिनां जीवने ग्रहप्रभावविषयिणी न काचित् कल्पनास्ति, परं प्रत्यक्षतः इदं यथार्थमेव । वेदेषु आदावेव सूर्यस्य महिमा गीयते । तद्यथा - सूर्य आत्मा जगतस्तस्थुषश्च इति । न केवलं प्राञ्चः अपि तु आधुनिकाः प्रकृतिविज्ञानिनोऽपि अमुमेव विचारं पूर्णतया अङ्गीकुर्वन्ति यत् सूर्यस्य प्रभावेण वनोषधयः पच्यन्ते ,किञ्च वनस्पतिषु प्राणिषु चापि पोषकतत्त्वानां (Vitamins) प्रमुखप्राप्तिस्थानं जगत्पोषकः सूर्यः एव। न केवलं प्रत्यक्षरूपेण समग्रसंसारपोषकः सूर्यः अपि तु परोक्षतः ज्योतिश्शास्त्रे फलादेशक्रमे उत्तम-गभीर-राजसदृशव्यक्तित्वद्योतकत्वेन सूर्यस्य प्रसिद्धिः वर्तते । सूर्यस्य प्रभावः अपि प्रत्यक्षरूपेण स्पष्ट एवास्ति । सूर्यस्य गत्यनुसारं सूर्यमुखी (Sun Flower) इति नाम्नः पुष्पे परिवर्तनमागच्छति । तत् पुष्पं सूर्याभिमुखं भ्रमति । रूसदेशस्य वैज्ञानिकाः अनुसन्धानेन साधितवन्तः यत् यदा आकाशे सूर्यग्रहणं भवति तदा पक्षिणः अरण्ये चतुर्विंशतिहोरापूर्वं कोलाहलं न कुर्वन्ति । अरण्ये सर्वे जन्तवः अज्ञातभयात् ग्रस्ता भवन्ति इति ।

समुद्रे जलोत्प्लवनस्य (ज्वारभाटा) कारणं चन्द्रः एव मन्यते । चन्द्रस्य प्रभावेण एव जलोत्प्लवनविषयकतथ्यमिदं सर्वे वैज्ञानिकाः स्वीकुर्वन्ति । मानवशरीरे 75% जलीयांश एव विद्यते । अतः चन्द्रस्य प्रभावः मानवानां क्रियासु अपि निश्चयेन भवति । अमायां पूर्णिमायां च फाइलेरिया इति रोगस्य वृद्धिकारणाज्ज्ञातं भवति यत् अत्रापि रोगस्य कारणं चन्द्र एवेति । अमेरिकादेशे कृतस्य सर्वेक्षणस्यानुसारम् अधिकतया मारणादयः अपराधाः अमायां पूर्णिमायाञ्च भवन्ति । डा.बुडाई महोदयानुसारं मानवेषु कामेच्छा, उन्मत्तता, (मिर्गी) इत्यादीनां

 ISSN: 2320-740X

प्रभावः एतयोर्दिनयोः विशेषेण भवति इति ।

कुमुद्नामपुष्पं केवलं चन्द्ररश्मिभिः विकसति । अस्य पुष्पस्य रात्रौ विकसनम्कञ्चिद्विशेषं अर्थं प्रकटयति । एवमेव कमलपुष्पं दिवा विकसति, रात्रौ च संपुटितं भवति । सूर्यचन्द्रग्रहणयोर्विषये गणना बहुभ्यः वर्षेभ्यः प्राक् कृता भवति । अतः सिद्ध्यति यत् ग्रहाणां प्रभावः मानवेषु, पशुपक्षिषु, स्थावरेषु जङ्गमेषु च भवति । प्रत्यक्षमिदं शास्त्रं यस्य साक्षिणौ चन्द्रार्कौ भवतः। उक्तञ्च- प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यस्य साक्षिणौ इति । सूर्यग्रहस्य प्रत्यक्षप्रभावः मानसिक-शारीरिकप्रकृतौ अत्यधिकं जायते इति हंगरीदेशस्य एकेन अध्ययनेन स्फुटमवगम्यते । तद्यथा – हंगरीदेशे १८४८तमे वर्षे राज्यसंघर्षे १५७ बन्धिनः कारावासं प्रेषिताः । पूर्णतया अन्धकारमये कारावासेऽस्मिन्सूर्यस्य किरणाः तत्र न कदापि प्राविशन् । केषाञ्चिद्वर्षाणामनन्तरं एतेषु १५ जनाः पूर्णतया उन्मत्ताः अभूवन् अन्ये सर्वेऽपि विषण्णोन्मादावास्थां प्राप्नुवन् । तेषां कारावासात् निष्कासनानन्तरं सूर्यस्य प्रकाशे च तेषां कार्यकरणेन स्वास्थ्यलाभः अभूदित्यत एव सूर्यस्य रश्मीनां प्रभावः अस्माकं व्यक्तित्वे प्रत्यक्षतः कियान् भवतीति स्पष्टमवगम्यते ।

ज्योतिषशास्त्र-चिकित्साशास्त्रयोर्मध्ये प्राचीनकालात् सम्बन्ध अस्ति । एकस्य चिकित्सकस्य कृते एतदावश्यकं भवति यत् स ज्योतिषज्ञः अपि स्यात् । अनेन रोगनिदानेसौकर्यं भवति । अद्यत्वे अमेरिकायां बहुशः चिकित्सकाः ज्योतिषचिकित्साध्ययनं कुर्वन्तः सन्ति । चिकित्साविज्ञानेन चापि वैज्ञानिकयन्त्रैः यथा क्षकिरणः (X-Ray), रक्तपरीक्षणं (Blood Test), रक्तचापपरीक्षणं (Blood Pleasure) इत्यादिषु परीक्षणेषु निस्सन्देहेन रोगनिवारणे बहुसफलता प्राप्ता । किन्तु कस्यापि रोगस्यारम्भः व्यक्तेः मनोवैज्ञानिकाधारेण, व्यक्तित्वाधारेण, मानवस्वभावेन, तथा अङ्गसंरचनायाः आधारेण भवति । एतदर्थं जन्मकुण्डली (Birth Chart) एव व्यक्तेः स्वरूपस्य उद्घाटनं कर्तुं शक्नोति ।

इत्थं रोगाणां निदाने अपि ज्योतिषशास्त्रस्य महत्वपूर्णं योगदानं वर्तते । प्रायः फलादेशे मिथ्याभूते सति मानवाः ज्योतिषशास्त्रस्योपरि दोषारोपं कुर्वन्ति । किन्तु न इदं समीचीनम् । यतोहि तत्र पृथग्भविष्यफलस्य कारणानि इमान्यपि भवितुं शक्नुवन्ति ।

1. जन्मकालस्याज्ञानता
2. गणिते दोषः त्रुटयः वा
3. ज्योतिर्विदाम् अल्पज्ञानम्
4. जन्मपत्रनिरीक्षणे अनवधानता
5. मनोवैज्ञानिककारणानि
6. बाह्यवातावरणस्य प्रभावः

**7.** शारीरिकास्वास्थ्यम् **8.** धनलोलुपता

एतानि कारणानि प्रायशः भवितुम् अर्हन्ति । अत एव यः ज्योतिर्वित् भवति सः सम्यक् गणितशास्त्रवेत्ता, न्यायवेत्ता, कालवेत्ता, जितेन्द्रियः, ज्योतिषशास्त्रस्य स्कन्धत्रये कृतभूरिश्रमश्च स्यात् । उक्तं च पराशराचार्येण –

**गणितेषु प्रवीणो यः शब्दशास्त्रे कृतश्रमः ।**

**न्यायविद् बुद्धिमान् देशदिक्कालज्ञो जितेन्द्रियः ॥**

**ऊहापोहपटुर्होरास्कन्धश्रवणसम्मतः ।**

**मैत्रेय सत्यतां याति तस्य वाक्यं न संशयः ॥**

अतः वयं वक्तुं शक्नुमः यत् मानवजीवने ज्योतिषस्य प्रभावो विद्यते इति शम् ।

**सन्दर्भग्रन्थाः-**


- बृहत्संहिता, आचार्यवराहमिहिरविरचिता टीका - अच्युतानन्द झा, चौखम्बा सुरभारती प्रकाशन , वाराणसी, 2010
- वृद्धयवनजातकम, मीनराजप्रणीतम्, व्याख्या. – सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स ,नई दिल्ली,**2010**
- वैदिकज्योतिषम् – सं. डा. गिरिजाशङ्करशास्त्री, ज्योतिषकर्मकाण्ड एवं अध्यात्मशोधसंस्थान, प्रयाग, 2003
- भारतीयज्योतिषम् – श्रीनेमिचन्द्रशास्त्री, भारतीयज्ञानपीठम्, नई दिल्ली 2012
- भारतीयज्योतिषशास्त्रस्येतिहासः, आचार्यलोकमणिदहालविरचितः, चौखम्बा सुरभारती प्रकाशन वाराणसी, 2009
- बृहत्पाराशरहोराशास्त्रम्, श्रीपराशरमुनिविरचितम्, सं - पं. देवचन्द्रझा, चौखम्भा संस्कृत संस्थान, वाराणसी, 1997
- कल्याण, हिन्दीमासपत्रिका, गीताप्रैस गोरखपुर


**********

# कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च

**विद्वान् निरञ्जनभट्टः**

प्राध्यापकः, अद्वैतवेदान्तविभागः

वेदान्तशास्त्रस्य आधारभूतं वर्तते प्रस्थानत्रयमिति समेषां सुविदितमेव । तत्र न्यायप्रस्थानत्वेन प्रसिद्धे ब्रह्मसूत्रे तृतीयाध्यायस्य प्रथमपादे द्वितीयाधिकरणस्य प्रथमसूत्रमिदं भवति **कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च** इति । पूर्वस्मिन् तदन्तरप्रतिपत्त्यधिकरणे मरणानन्तरं जीवः लोकान्तरभाविशरीरारम्भकभूतसूक्ष्मैः सहैव गच्छतीति प्रतिपादितम् । अस्मिन् अधिकरणे परलोके चन्द्रमण्डलादौ भुक्तभोगाः जीवाः कर्मसहिताः एव पुनरावर्तन्ते इत्ययं विषयो निरूप्यते वैराग्यदार्ढ्यायैव । तत्रायं प्रथमसूत्रस्य अर्थः किञ्चिद्विचार्यते ।

अस्याधिकरणस्य विषयवाक्यं भवति – **तस्मिन्यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते**[1] इत्यारभ्य **रमणीयचरणा ब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वादियोनिम्** इति इष्टादिकारिणां चन्द्रमण्डले भोगेन क्षीणकर्मणां प्रत्यवरोहप्रतिपादकं छान्दोग्यवाक्यम् । अत्र संशयो भवति –**किं निरनुशया भुक्तकृत्स्नकर्माणोऽवरोहन्त्याहोस्वित् सानुशया** इति । तत्र पूर्वपक्षः प्राप्यते यथा – यावत्सम्पातमुषित्वा इति विशेषणबलात् निरनुशया एव प्रत्यवरोहन्ति सम्पातशब्दस्य कर्माशयवाचकत्वात् । अत एव **तेषां यदा तत्पर्यवैति**[2] इति श्रुतिवचनानुसारं सम्पतन्त्यनेनास्माल्लोकादमुं लोकं फलोपभोगाय इति सम्पातशब्दस्य व्युत्पत्तिः प्रदर्श्यते । **प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे**[3] इत्यत्र यत्किञ्चेत्यनेन फलोपभोगेन अशेषकर्मणो नाशः बोध्यते इत्यस्मात् अस्मिन् लोके यावद् भोक्तव्यं कर्म अविद्यत तावदेव उपभुज्य प्रतिनिवर्तन्ते इति कल्पयितुं न शक्यते । मरणात् पूर्वं प्रारब्धकर्मणा प्रतिबद्धत्वात् अनभिव्यक्तं अनारब्धफलं कर्म मरणेन अभिव्यक्तं भवति । तदपि सम्पूर्णतया यावन्ति अनारब्धफलानि कर्माणि वर्तन्ते तेषां सर्वेषाम् अभिव्यञ्जकं भवति असाधारणनिमित्ते नैमित्तिकमपि असाधारणमेव भवतीति न्यायात् ।

---

[1] छान्दोग्योपनिषत् – ५.१०.५

[2] बृहदारण्यकोपनिषत् – ६.२.१६

[3] बृहदारण्यकोपनिषत् – ४.४.६

प्रदीपप्रकाशसम्बन्धो घटपटयोरुभयोरपि समानश्चेदपि घट एव अभिव्यज्यते न पटः इति अनुपपन्नं यथा तथा मरणमपि इति सर्वस्यापि अनारब्धफलस्य कर्मणः अभिव्यञ्जकं भवति । तस्मात् चन्द्रमण्डलमधिरूढाः भोगक्षयानन्तरं निरनुशयाः एव प्रत्यवरोहन्ति इति ।

तत्रायं सिद्धान्तः – कृतात्यये लोकान्तरे भोगसमाप्त्यनन्तरम् अनुशयवानेव अवरोहति इति । चन्द्रमण्डलभोगप्राप्तिफलककर्मसमवायवशात् तल्लोकवासिनो ये तद्भोगानुकूलम् अम्मयशरीरभाजश्च अभवन् तेषां तत्र भोगेन कर्मक्षये सति यथा सूर्यकिरणसम्पर्कवशात् हिमपिण्डस्य लयो भवति तद्वत् तच्छरीरमपि भोगनाशवशादुत्पन्नशोकाग्नेः कारणादेव प्रलीनं भवति । सूत्रार्थः भाष्ये एवं प्रदर्श्यते - **कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवावरोहन्ति** इति । तत्र हेतुः भवति दृष्टस्मृतिभ्याम् इति । तत्र प्रत्यक्षमेव श्रुतिः – **तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा** इति अनुशयवन्त एव अवरोहन्ति भुक्तभोगाः जीवाः इति दर्शयति । अत्र अनुशयसूचको भवति चरणशब्दः । लोकेऽपि इदं दृष्टमेव यत् जन्मना एव सर्वेषां प्राणिनाम् उच्चावचरूपेण प्रविभक्तो भोगः, स च अकस्मात् सम्भवितुं नार्हतीत्यतः शास्त्रप्रतिपादितात् अभ्युदयप्रत्यवायरूपकारणवशादेव सुकृतदुष्कृतरूपात् अनुशयसद्भावः अत्र संसूचितो भवति । **वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते** इति स्मृतिवाक्यमपि **कर्मफलमनुभूय ततः शेषेण** इत्यनेन अनुशयवतामेव अवरोहं प्रदर्शयति । तस्मात् कृतात्यये सानुशया एव अवरोहन्ति इति स्पष्टम् अवगतम् ।

तत्रेदानीम् अनुशयो नाम कः ? इति प्रश्नः । तत्र एकदेशिनां मतमिदम् – स्वर्गार्थस्यैव कर्मणः फलभोगानन्तरम् अवशिष्टो भाग एव अनुशयः इति । तत्र भाण्डानुसारिस्नेहवदिति दृष्टान्तोऽपि प्रदर्श्यते । यथा – रिच्यमाने स्नेहपात्रे पात्रानुसारित्वेन स्नेहशेषः अवतिष्ठते तद्वदेव अनुशयोऽपि भुक्तफलस्य कर्मणः अवशिष्टो भागः इति । कर्म तु भोगनाश्यं भवति । सम्पूर्णकर्मफलभोगायैव चन्द्रमण्डलमधिरोहति इति चेत्, सर्वात्मना कर्मणः फलभोगः भवतीति एकदेशिनः न मन्वते । भोगानन्तरं किञ्चित्कर्म अवशिष्टं चेदपि चन्द्रमण्डले अवस्थानं न शक्यते । तत्र दृष्टान्तः – यथा कश्चित् सेवकः सकलसोवोपकरणैः राजकुलं प्राप्तः, बहुकालप्रवासवशात्

क्षीणबहूपकरणः छत्रपादुकादिमात्रावशेषः तत्र अवस्थातुं न शक्नोति । एवमेव अनुशयमात्रवशात् चन्द्रमण्डले अवस्थातुं न शक्यते इति ।

तत्र सिद्धान्तः – स्वर्गार्थस्य कर्मणः फलभोगानन्तरम् अवशेषः भवितुं नार्हति कार्यविरोधित्वादित्युक्तत्वात् एकदेशिमतम् अयुक्तम् । स्वर्गार्थं कृतं कर्म स्वर्गस्थस्य एव सम्पूर्णं फलं न जनयति, स्वर्गात् निवृत्तस्यापि कञ्चित् फललेशं जनयतीति तु कल्पयितुमपि न शक्यते शब्दप्रमाणिकानाम् । स्नेहभाण्डे स्नेहलेशानुवृत्तिः, सेवकस्य उपकरणलेशानुवृत्तिः वा सर्वैः प्रत्यक्षतया द्रष्टुं शक्यते । किन्तु स्वर्गफलस्य लेशानुवृत्तिस्तु न दृश्यते केनचित् । स्वर्गफलत्वशास्त्रविरोधात् एवं कल्पयितुमपि न शक्यते । यदि एवं स्यात् तर्हि सर्वस्यापि रमणीय एव अनुशयः भवेत् । **तद्य रमणीयचरणा, अथ य इह कपूयचरणा** इति अनुशयविभागबोधकश्रुतेः उपरोधः स्यात् । तस्मात् लोकान्तरे भोक्तव्यकर्मणः उपभोगानन्तरम् अवशिष्टं यत् ऐहिकफलं कर्मान्तरं वर्तते तदेव अनुशयशब्दवाच्यं भवति । तद्वन्तः अवरोहन्तीति ।

यत्पुनः **यत्किञ्च** इति श्रुतिबलेन सर्वकर्मफलभोगं चन्द्रमण्डले इच्छन्ति तेषां मतं अनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तं भवति । तथा च यत्किञ्चेति यावत् कर्मफलं चन्द्रमण्डले उपभोक्तव्यं तदशेषं भुक्त्वा इत्यर्थः पर्यवस्यति । पुनश्च मरणं सर्वस्यापि अनारब्धफलस्य कर्मणः अभिव्यञ्जकमित्यतः कानिचन कर्माणि परलोके कानिचन इहलोके फलमारभन्ते इत्ययुक्तमिति यदुक्तं तदपि अनुशयस्य सद्भावसाधनेनैव निरस्तमिति न दोषः ।

अतोऽनुशयवन्तः चन्द्रमण्डलात् अवरोहन्ति । ते च इष्टादिकारिणः यथेतम् इत्युक्ते यथागतम्, अनेवं नाम तद्विपर्ययेण अवरोहन्तीत्यर्थः । अस्माल्लोकात् गमनसमये पितृयाणमार्गे धूमाकाशादिसम्पृक्ते चन्द्रमण्डलमधिरोहन्ति । अवरोहक्रमे तु रात्र्यादीनां निर्देशाभावात् अभ्रादीनाम् उपसङ्ख्यानलाभाच्च गतस्य विपरीतक्रमेण अवरोहः सिद्ध्यति । अनेन **कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च** इति सूत्रार्थः सुनिरूपितः ।

*********

# फलनिर्धारणे मानानि

**डा. रमानन्द भट्टः एन्.**

ज्यौतिषप्राध्यापकः, वास्तु-डिप्लोमा विभागः

**ज्योतिश्शास्त्रफलं पुराणगणकैः आदेश इत्युच्यते**[1] इति भास्करोक्त्या महता परिश्रमेण साधितानां ग्रहस्थित्यादीनां प्रयोजनं तु फलादेशे एव । फलार्थमेव प्रवृत्ते होरास्कन्धे मिहिरादयो महान्तः चतुर्लक्षवेदाक्षिपाथोऽम्बुधिं प्रमथ्य बृहज्जाताकादीन् उद्ग्रन्थान् निबबन्धुः । तत्र ग्रहाणां राशिफलम्, भावफलम्, युतिफलम्, गोचरफलम्, दृष्टिफलम्, दशाफलञ्चेत्यादीनि फलानि भिन्नभिन्नतया निरूपितानि दृश्यन्ते । तथापि बहुधा विकल्पेन तेषां निरूपितानां फलानां कस्य सम्भवः इति निर्धारणं शास्त्रज्ञानामपि न सुलभम् । क्वचित् प्रोक्तफलेषु वैरुद्ध्यमपि दृश्यते ।

अतः फलनिरूपणं सन्दिग्धं तिष्ठति । किन्तु एवं बहुधा, विकल्पेन च निरूपितानां फलानां निर्णये केचन सहायकांशाः अपि उक्ताः सन्ति । तेषां साहाय्येन फलिते निर्णयः सुकरो जायते । बृहज्जातकम्, प्रश्नमार्गः, फलदीपिका चेत्याद्यैः ग्रन्थैः तान् अंशान् सङ्गृह्यअत्र लिखामि ।

**१. सौम्यानां व्ययमृत्युशत्रुसहजा नेष्टा अभीष्टाः परे ।**

**पापानामभिमातिसोदरभवा इष्टा अनिष्टाः परे ॥** [2]

ग्रहाणां फलचिन्तनसमये तेषामिष्टानिष्टभावस्थितिः ज्ञेया । तत्र पापानां ६-३-११ भावाः इष्टाः, शिष्टाः अनिष्टाः । शुभानां तु १२-६-८-३ भावाः अनिष्टाः, इतरे इष्टाः । एतदेव बृहज्जातके **शशाङ्कलग्नोपगतैः शुभग्रहैः ....**[3] इत्यादिना सुखिनो गर्भस्य लक्षणकथनवेलायां प्रतिपादितम् ।

२. **एकग्रहस्य सदृशे फलयोर्विरोधे नाशं वदेत् ॥** [4]

---

[1] सिद्धान्तशिरोमणिः – गोले – गोलप्रशंसा – ६ ।

[2] प्रश्नमार्गः १४.४४ ।

[3] बृहज्जातकम् – ४.१० ।

[4] बृहज्जातकम् – ८.२३ ।

 ISSN: 2320-740X

यदि कस्यापि ग्रहस्य केनचित् कारणेन वृद्धिकारकत्वम्, अन्येन कारणेन हानिजत्वं च सम्भवति तर्हि अत्र किं वाच्यमिति संशीतिः । सा च उदाहरणद्वारा समाधीयते । मेषलग्नजातस्य वृषभस्थः कुजः लग्नाधिपत्वेन धनवृद्धिकरः, अष्टमाधिपतित्वेन धननाशकरः । अत्र सदृशो विरोधः । नाम सदृशे विषये विरोधः । एतस्मिन् अवसरे न किमपि फलं सम्भवतीति ध्येयम् । अत्र धनानाशोऽपि नास्ति, धनवृद्धिरपि न सम्भवति । अर्थात् कुजः नाशं वृद्धिं वा न करोति ।

३. **यदधिकं परिपच्यते ॥** [1]

पूर्वोक्तसमये एव आधिक्येन यद्दृश्यते तद्वाच्यम् । नाम कुजः प्रागुक्तकारणाभ्यां तटस्थो भवति । किन्तु राश्यंशकयोगेक्षणादिभिः शुभाशुभयोः मध्ये यं सम्बन्धम् आधिक्येन प्राप्तवान्, स सम्बन्धः शुभः चेत् शुभफलम्, अर्थात् धनप्राप्तिः, अशुभसम्बन्धः चेत् अशुभं नाम धननाशरूपं फलं सम्भवतीति ज्ञेयम् । एवम् एकग्रहस्य सदृशफलयोः विरोधे निर्वाहः ।

**४. नान्यो ग्रहः सदृशमन्यफलं हिनस्ति ॥** [2]

एकस्मिन् जातके चतुर्थे भावे रविः गुरुश्च भवतः । चतुर्थभावे रविफलं **विसुखः पीडितमानसः**[3] इति । गुरोः फलं **सुखी**[4] इति । एवं जातके फलयोः वैरुद्ध्यं दृश्यते । विषयः सदृशः समानः । सति ग्रहद्वयकृतफलवैरुध्ये किं सम्भवतीति निर्णयार्थमाह "अन्यः ग्रहः सदृशम् अन्यस्य फलं न हिनस्ति न नाशयति" इति । अत्र फलद्वयस्यापि सम्भवो वाच्यः । तत्कथमिति जिज्ञासायाम् उच्यते –

**५. स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः ॥** [5] इति ।

ग्रहाः स्वीयं फलं स्वस्वदशान्तर्दशादिषु प्रददति । अत्र रविकृतं फलं विसुखादिकं रवेः दशान्तर्दशादिषु वाच्यम् । गुरोः सुखीति फलं गुरोः दशादिषु सम्भवतीति विज्ञेयम् । अत्र फलद्वयस्यापि सम्भवः एव । नाशो न

---

[1] बृहज्जातकम् – ८.२३ ।

[2] बृहज्जातकम् – ८.२३ ।

[3] बृहज्जातकम् – २०.२ ।

[4] बृहज्जातकम् – २०.७ ।

[5] बृहज्जातकम् – ८.२३ ।

सम्भवति ।

**६. भावस्थानालोकयोगोद्भवं यत् तत्तत्सर्वं तस्य योज्यं दशायाम् ॥** [1]

ग्रहाणां भावफलम्, स्थानफलम्, दृष्टिफलम्, युतिफलञ्चेत्यादीनां योगः दशायामेव कार्यः । अर्थात् ग्रहस्य सकलं फलं विविच्य दशासु योजयित्वा तन्निरूपयेत् । अत्र फलानां तारतम्यनिर्धारणाय दशान्तर्दशाध्याये मिहिरोक्ताः सम्पूर्णादिसंज्ञकाः दशा अश्रयणीयाः । ताभ्यः फलतारतम्यं ज्ञात्वा फलकीर्तनं कुर्यात् ।

**७. परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः ॥** [2]

बलहीनानां ग्रहाणां फलप्रवचने इदं मनसि निधातव्यं यत् तेषां फलं स्वप्ने वा चिन्तासु सम्भवेदिति । फलानां साक्षादनुभवः न भवति चेदपि स्वप्नादिषु तद्भवितुमर्हति ।

**८. अशुभगदिता योगा याप्या भवन्ति शुभेक्षिताः ॥** [3]

जातके ये ये अशुभयोगाः गदिताः अथवा जातकदृष्ट्या वा निसर्गतः ये ये अशुभग्रहाः तान् आश्रित्य ये दुष्टयोगाः गदिताः ते शुभग्रहेक्षिताः चेत् दोषरहिताः भवन्ति । **दृष्टेऽमरराजमन्त्रिणा दीर्घायुः**[4]**, भृगुसुतशशिपुत्रदेवपूज्यैः यदि बलिभिर्न युतोऽवलोकितो वा**[5]**, शुभदृष्टियुते वापि सुतावाप्तिं विनिर्दिशेत्**[6] इत्यादिवचनैः दुष्टयोगानाम् अपवादः शुभग्रहदृष्ट्यादिसम्बन्धः इति ज्ञायते । एतदवलोक्य फलं कथयेत् ।

**९. बलयोगात्फलमंशकर्क्षयोः ॥** [7]

फलनिरूपणे नवांशानां प्राधान्यं वर्तते । अंशकशब्देन नवांशाः एव उच्यन्ते । अतः राश्यंशयोः मध्ये कस्य प्राबल्यमिति ज्ञात्वा तस्मात् फलं वक्तव्यम् । अंशाधिपतेः प्राबल्ये अंशराशितः, राश्यधिपतेः प्राबल्ये राशितः फलं

---

[1] बृहज्जातकम् – ८.२० ।

[2] बृहज्जातकम् – ८.२२ ।

[3] बृहज्जातकम् – ४.२० ।

[4] बृहज्जातकम् – ५.१४ ।

[5] बृहज्जातकम् – ६.१२ ।

[6] प्रश्नमार्गः १८.२४ ।

[7] बृहज्जातकम् – ५.१३ ।

कथनीयम् ।

**१०. वीर्यान्वितोंऽशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति ॥** [1]

बलान्वितः अंशाधिपतिः राशीक्षणस्य फलं निरुणद्धि, अंशफलं च ददाति । अर्थात् राश्यधिपः बलवांश्चेदपि तं निरुद्ध्य स्वीयं फलमेव ददाति । पूर्वोक्तस्य **नान्यो ग्रहः सदृशमन्यफलं हिनस्ति** इत्यस्य अपवादोऽयम् ।

**११. येन ग्रहेण यत्प्रोक्तम् अशुभं वा शुभं फलम् ।**
**बली चेत्स शुभं पूर्णम् अशुभं दुर्बलो यदि ॥** [2]

यस्य कस्यापि ग्रहस्य फलं शुभं चेत् स ग्रहः स्थानादिषड्बलपूर्णः यदि तर्हि पूर्णतया शुभं दिशति । स दुर्बलः चेत् शुभं तथा नानुभूयते, भागशः शुभानुभवो वाच्यः । तथैव अशुभं फलं चेत् ग्रहस्य दौर्बल्ये पूर्णतया अशुभानुभूतिः भवति । स बलिष्ठः चेत् अल्पशः अशुभानुभवो भवति ।

**१२. स्वोच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः ।**
**शुभं सम्पूर्णपादोनदलपादाल्पनिष्फलम् ॥** [3]

ग्रहे उच्चङ्गते पूर्णं शुभम्, स्वत्रिकोणे पादोनं शुभम्, स्वक्षेत्रे अर्धं शुभम्, सुहृत्क्षेत्रे पादप्रमाणं शुभम्, शत्रुक्षेत्रे अल्पं शुभम्, नीचे अस्ते च शुभं शून्यम् इति ज्ञेयम् । अतः एतदाधारेण ग्रहाणाम् अशुभशुभफलदत्वं विचार्य तत्र फलसम्भवं निर्धारयेत् ।

**१३. आत्मादयो गगनगैः बलिभिः बलवत्तराः ।**
**दुर्बलैः दुर्बला ज्ञेया विपरीतं शनेः स्मृतम् ॥** [4]

ग्रहाणां रव्यादीनाम् आत्मादिकारकपदार्थाः तेषा प्राबल्ये प्रबलाः वैबल्ये विबलाः ज्ञेयाः । किन्तु शनेः इदं विपरीततया चिन्त्यम् । अर्थात् शनेः प्राबल्ये कारकवस्तुनः वैबल्यम्, दौर्बल्ये प्राबल्यं च चिन्त्यम् । यद्यपि इदं

---

[1] बृहज्जातकम् – १९.९ ।

[2] प्रश्नमार्गः १४.३७ ।

[3] बृहज्जातकम् – १८.११ ।

[4] सारावली ४.२ ।

शनेः दुःखकारकत्वमाश्रित्य उक्तम् । शनेः प्राबल्ये दुःखाभावः, दौर्बल्ये दुःखाधिक्यम् इति । अन्यत्र शनेः पदार्थेषु एतद्यथासम्भवं विचिन्त्य वाच्यम् ।

**१४. यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः ।**
**पापैरेवं तस्य भावस्य हानिः ....... ॥** [1]

यः भावः अधिपतिना दृष्टो वा युतो भवति अथवा शुभैः बुधगुरुशुक्रैः युतो वा दृष्टो वर्तते तस्य भावस्य वृद्धिः वाच्या । एतदेव मिहिरेण **होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा** [2] इत्युक्तम् । पापोऽपि लग्नपः चेत् शुभः एव चिन्त्यः ।

**१५. समुपचयविपत्ती सौम्यपापेषु सत्यः**
**कथयति विपरीतं रिःफषष्ठाष्टमेषु ॥** [3]

सौम्यग्रहाः भावेषु स्थिताः चेत् भावस्य उपचयं कुर्वन्ति । पापग्रहाः भावेषु स्थिताः भावनाशं कुर्वन्ति । किन्तु अयं नियमः ६-८-१२ भावेषु वैपरीत्यं प्राप्नोति । अर्थात् एतेषु त्रिषु भावेषु विद्यमानाः शुभाः भावहानिं जनयन्ति । पापाः तत्रस्थाः भाववृद्धये भवन्ति । उदाहरणार्थम् – नवमे गुरोः **तपस्वी** [4] इति फलम्, कुजस्य नवमे **अघवान्** [5] इति फलम् । षष्ठे गुरोः **अशत्रुः** [6] इति फलम्, कुजस्य **शत्रुजितः** [7] इति फलम् । अर्थात् शत्रुभावे शुभाः चेत् भावनाशः नाम शत्रुनाशः, रोगभावत्वात् रोगनाशः, अष्टमे आयुःस्थाने आयुर्वृद्धिः, व्यये व्ययस्थाने व्ययाभावः अथवा वितरणप्रायो व्ययः चेत्यादि । तथैव भाववृद्धिः इत्युक्ते शत्रुभावे शत्रुवृद्धिः, रोगवृद्धिः, अष्टमे अल्पायुः, व्यये व्ययः दुष्टव्ययो वा चेत्यादि । एतत्तु सत्यमतम् । (क्वचिद् विषयभेदेन नियमे व्यत्ययः जायेत, तत्तु विचिन्त्य वाच्यम्)

---

[1] षट्पञ्चाशिका – १.३ ।

[2] बृहज्जातकम् – १.१९ ।

[3] बृहज्जातकम् – १८.१० ।

[4] बृहज्जातकम् – १८.०७ ।

[5] बृहज्जातकम् – १८.०६ ।

[6] बृहज्जातकम् – १८.०७ ।

[7] बृहज्जातकम् – १८.०२ ।

 ISSN: 2320-740X

**१६. षष्ठं द्वादशमष्टमं च मुनयो भावाननिष्टान् विदुः**

**तन्नाथान्वितवीक्षिता यदधिपाः ....... ॥** [1]

६-८-१२ भावाः अनिष्टाः दुष्टाश्च । अत्रापि **तत्रातिकष्टोऽष्टमः**[2] इत्युक्तत्वात् अत्यन्तम् अनिष्टभावो भवति अष्टमः । एतेषां त्रयाणाम् अधिपतिभिः युक्ताः वा दृष्टाः ग्रहाः येषां भावानामधिपाः ते भावाः नश्यन्ति ।

**१७. ये वा च भावाः स्वयम् ॥**[3]

पुनः च येषु भावेषु एते षष्ठाष्टमद्वादशाधिपतयः स्थिताः, वा येषु भावेषु एतेषां दृष्टिः पतति ते भावाः नश्यन्ति ।

**१८. तत्रस्थाश्च यदीश्वरास्त्रय इमे नश्यन्ति भावा नृणाम् ॥**[4]

तथैव येषां भावानाम् अधिपाः षष्ठाष्टमद्वादशभावेषु स्थिताः तेऽपि भावाः नश्यन्तीति चिन्त्यम् । अथवा ते जाताश्चेदपि विकलाः वा विफलाः विनष्टाः वा भवन्ति ।

ग्रहफलचिन्तनेऽपि एते नियमाः अनुसन्धेयाः । ग्रहफलचिन्तने तु पूर्वम् इष्टानिष्टभावाः एव निरूपिताः । **रुक्प्रदत्वात्तु रोगादिप्रश्ने नेष्टा रिपौ खराः** [5] इत्यतः षष्ठभावस्थाः पापाः रोगप्रदाः । अतः अनिष्टाः । किन्तु ते एव ताम्रादिस्वोक्तवस्तुलाभं कुर्वन्तीति शुभाः । एवं विषयभेदेन इष्टानिष्टत्वं पापानां चिन्त्यम् । शुभास्तु अनिष्टभावेषु त्रिषु भावहानिं जनयन्ति । तथैव स्वेष्टफलमपि दातुं न शक्नुवन्ति । **सर्वे नेष्टा व्ययाष्टमगाः** [6] इत्यतः ग्रहफलचिन्तने एतेषु त्रिषु विद्यमानाः ग्रहाः स्वीयफलस्य दाने असमर्थाः भवन्ति । भावफलस्य विषये तु विपरीततया नाम, शुभाः भावहानिं पापाः भाववृद्धिं कुर्वन्तीति चिन्त्यम् । एवं भावेषु इष्टानिष्टं विचिन्त्य ग्रहफलम्, भावफलम् इति भेदेन फलं विचिन्त्य वाच्यम् ।

---

[1] प्रश्नमार्गः १४.२९ ।

[2] प्रश्नमार्गः १४.२९ ।

[3] प्रश्नमार्गः १४.२९ ।

[4] प्रश्नमार्गः १४.२९ ।

[5] प्रश्नमार्गः १४.४५ ।

[6] प्रश्नमार्गः १४.४६ ।

**१९. षष्ठाष्टमरिःफेशाः भावपरिपवः शुभाश्च भावहनः ।** [1]

षष्ठाष्टमद्वादशाधिपाः तथा भावाधिपतेः शत्रवः भावस्थाः यदि ते शुभाः चेदपि भावहानिं कुर्वन्ति ।

**२०. स्फुटमिह भवति द्वित्रसंवादभावात् ॥** [2]

एवं पूर्वोक्तानां नियमानां द्वित्राणां संवादेन भावपदार्थनाशं स्फुटतया वक्तुं शक्नुमः । बहूनि लक्षणानि एकमेव विषयं प्रतिपादयन्ति यदि तर्हि अवश्यं तत्सम्भावना अस्ति ।

**२१. भाग्याद्यभीष्टभावेशोऽप्यशुभो भावपुष्टिकृत् ॥** [3]

भाग्याद्यभीष्टभावेशः नाम नवम-पञ्चम-एकादशादिभावानाम् अधिपतिः अशुभोऽपि भावपुष्टिं जनयति । **भावेष्वेषु हि मुख्यता तु वपुषो धर्मात्मजौ तत्समौ** [4] इति एतेषां त्रयाणां प्राधान्यं वर्तते । एतदेव आह आह मिहिरोऽपि -

**२२. लग्नात् पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते**

**चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथासम्भवः ॥** [5] इति ।

लग्नाद्वा चन्द्रात् पञ्चमे वा सप्तमे शुभेन वा अधिपतिना वा शुभपतिना नाम नवमाधिपतिना युते वा अवलोकिते तदनुभवो वाच्यः ।

**२३. यस्य यस्य विलग्नेन सम्बन्धो लग्नपेन वा ।**

**दृग्योगकेन्द्रगत्याद्यैः स स भावोऽनुभूयते ॥** [6]

यस्य यस्य भावस्य लग्नेन लग्नाधिपतिना वा दृष्ट्या वा योगेन, केन्द्रत्रिकोणादिबन्धेन वा सम्बन्धः जायते स

---

[1] प्रश्नमार्गः १४.२८ ।

[2] प्रश्नमार्गः १४.३० ।

[3] प्रश्नमार्गः १४.३४ ।

[4] प्रश्नमार्गः १४.४४ ।

[5] बृहज्जातकम् – २१.०१ ।

[6] प्रश्नमार्गः १४.४३ ।

 ISSN: 2320-740X

भाव अवश्यम् अनुभूयते जातेन । अत एव उच्यते **लग्नादनुभवश्च**[1] इति । भावानामनुभवः लग्नेन लग्नाधिपतिना वा तयोः भावानां सम्बन्धेन चिन्तनीयः इत्यर्थः ।

**२४. स्वामी कारकखेचरश्च बलिनौ यस्येष्टभावस्थितौ**
**सम्पूर्णोऽनुभवक्षमश्च नियतं भावः स नृणां भवेत् ।**
**रिःफारातिमृतिस्थितौ च विबलौ यत्कारकाधीश्वरौ**
**भावोऽयं नहि सम्भवेदपि नृणां कस्यानुभूतौ कथा ॥** [2]

भावाधिपतिः भावकारकश्च बलिष्ठौ इष्टभावस्थौ चेत् तद्भावस्य फलं पूर्णतया सम्भवति तथा नियमेन स भावः अनुभूयते । किन्तु पूर्वोक्तौ भावाधिपकारकौ दुर्बलौ यदि तर्हि स भावः न सम्भवत्येव, तर्हि अनुभूतेः का कथा ?।

**२५. स्वोच्चादीष्टगृहेषु कारकपती रन्ध्राद्यनिष्टस्थितौ**
**यद्भावस्य स सम्भवेदविमलो नास्यानुभूतिर्नृणाम् ।**
**नीचाद्याश्रयतोऽबलौ शुभतरे लाभादिभावे स्थितौ**
**यद्भावाधिपकारकौ स विकलोऽप्यस्यानुभूतिर्नृणाम् ॥**[3]

तौ एव भावाधिपकारकौ स्थानेषु स्वोच्चादीष्टेषु स्थितौ किन्तु भावतः अष्टमाद्यनिष्टस्थौ तर्हि स भावः पूर्णं सम्भवति, किन्तु तस्य अनुभूतिः न भवति । तथा च स्थानतः तावुभौ नीचाद्यनिष्टस्थितौ किन्तु भावतः शुभतरेषु पञ्चमनवमैकादशादिषु स्थितौ तर्हि भावः विकलतया सम्भवति, किन्तु वैकल्येन सम्भूतस्यापि भावस्य अनुभूतिः जातस्य पूर्णतया अवश्यं भवति ।

**२६. बलवति राशौ तदधिपतौ च स्वबलयुतः स्याद्यदि तुहिनांशुः ।**
**कथितफलानामविकलदाता शशिवदतोऽन्येऽप्यनुपरिचिन्त्याः ॥**[4]

---

[1] प्रश्नमार्गः १४.४२ ।

[2] प्रश्नमार्गः १४.३९ ।

[3] प्रश्नमार्गः १४.४० ।

[4] बृहज्जातकम् – १६.१३ ।

राशिफलनिर्णयार्थं राशेः राश्यधिपतेः राशौ स्थितस्य ग्रहस्य च बलं ज्ञातव्यम् । त्रिषु अपि बलिष्ठेषु सत्सु प्रोक्तं फलम् अविकलं प्राप्यते ।

**२७. फलमधिकमिदं यदत्र भावात् भवनभनाथगुणैर्विचिन्तनीयम् ॥**[1]

ग्रहाणां राशिफलनिर्णये अनन्तरोक्तविचार एव अत्राप्युक्त इति व्याख्यानेषु दृश्यते । तथापि लग्नचन्द्रग्रहाणां यद्राशिफलं कीर्तितं तत् अधिकं भावाद् भवतीत्यर्थः अत्यन्तं सङ्गच्छते । विशिष्य लग्नचन्द्रयोः फलकीर्तने इदं युक्तियुक्तं भवति । यतः राशयः भावाः च इति विभागद्वयं प्राप्यते । तत्र फलानामनेकत्वम् । राशयः एव भावाः भवन्ति । तदा एवं फलं चिन्त्यम् । उदाहरणार्थम् – वृषभराशौ **दीप्ताग्निः**[2] इत्येकं फलम् । वृषभराशिः तृतीयभावो भवति तदा अस्य फलस्य आधिक्येन चिन्तनम् । नाम अस्य महत्त्वं तत्र भवति । यतः तृतीयभावः नैवेद्यस्थानम् । अस्मान्नैवेद्यमुच्यते । विशिष्य देवप्रश्ने देवतायाः **दीप्ताग्निः** इत्यनेन नैवेद्ये दीयमाने अल्पत्वं वक्तुं शक्यते । एवं भावात् नाम भावचिन्तनपदार्थ एव राशिफले यत्र कीर्तितः तदा तत्र तस्यैव महत्त्वं परिकल्प्यम् । एवमेव धनूराशेः फलम् **स्थूलरदश्रवोधरनसः**[3] इति । यदि द्वितीयभावः भवति धनूराशिः तदा तद्भावस्य मुखस्थानत्वात् एतत्फलं तज्जातकस्य अवश्यं वाच्यम् । तन्नाम मुखे विद्यमानानां रदादीनां स्थौल्यं वाच्यम् । एवमेव अन्यत्रापि । एवं कथनकालेऽपि भवनगुणं भनाथगुणं च स्वीकृत्य फलं वाच्यम् । अर्थात् तयोः बलम्, कारकत्वेन वा स्वभावत्वेन वा यदुक्तं तत्सर्वं संयोज्य फलं वाच्यमिति । रुद्रविवरणे एवमेव दृश्यते । **भावादिति भावमाश्रित्य तत्तद्भावोपयोगीनि वस्तूनि विषयीकृत्येत्यर्थः**[4] इत्याह रुद्रः ।

**२८. यद्भावेष्वशुभोऽपि वोदयपतिस्तद्भाववृद्धिं दिशेत्**
**दुःस्थानाधिपतिः स चेद्यदि तनोः प्राबल्यमन्यस्य न**[5] **।**

लग्नाधिपतिः अशुभोऽपि यस्मिन् भावे वर्तते स तद्भाववृद्धिमेव करोति । कुजादीनां पञ्चानां

[1] बृहज्जातकम् – १६.३३ ।

[2] बृहज्जातकम् – १६.०२ ।

[3] बृहज्जातकम् – १६.०९ ।

[4] रुद्रविवरणम् १८.२० व्याख्यायाम् ।

[5] फलदीपिका १५.१० ।

द्विस्थानाधिपतित्वात् लग्नाधिपत्येन सह दुस्थानाधिपत्यं यदि सम्भवति तदा लग्नाधिपतित्वस्य प्राबल्यम्, नान्यस्य । मेषलग्नजातस्य कुजः लग्नाधिपतिः, अष्टमाधिपतिश्च । स च सिंहे पञ्चमे यदि विद्यते तर्हि पुत्रप्राप्तिमेव करोति, न तु नाशम् । अत्र लग्नाधिपत्यस्यैव प्राबल्यम्, न तु अष्टमाधिपत्यस्य ।

**२९. द्विस्थानाधिपतित्वमस्ति यदि चेन्मुख्यं त्रिकोणर्क्षगम् तस्यार्धं स्वगृहे ..... ।**[1]

पूर्वोक्तवत् कुजादीनां द्विस्थानाधिपतित्वात् (लग्नाधिपतित्वव्यतिरिक्ते स्थले) कस्य भावस्य प्राधान्यम् इति चेत् तत्र तेषां मूलत्रिकोणराशिरेव प्रधानम् इति । कुम्भलग्नजातस्य बुधः पञ्चमाधिपतिः अष्टमाधिपतिश्च । अत्र भावद्वयाधिपत्ये सति कन्यायाः बुधस्य मूलत्रिकोणराशित्वात् अष्टमाधिपत्यस्यैव प्राधान्यम् ।

**३०. पूर्वमुभयोः यत्तद्दशादौ भवेत् ।** [2]

राशिद्वयस्य आधिपत्यं यस्य वर्तते स लग्नात् प्रथमं विद्यमानस्य भावस्य फलं दशायाः पूर्वार्धे, अन्यस्य फलं दशायाः उत्तरार्धे च ददाति । उदाहरणार्थम् - वृषभलग्नजातस्य गुरुः स्वदशापूर्वार्धे अष्टमाधिपत्यस्य अशुभं फलम्, दशोत्तरार्धे एकादशाधिपत्यस्य शुभं जनयति ।

**३१. दुःस्थानपस्तदितरस्वगृहस्थितश्चेत्**
**स्वक्षेत्रभावफलमेव करोति नान्यत् ।**
**मन्दो मृगे सुतगृहे खलु पुत्रसिद्धिः**
**षष्ठाधिपस्य कृतदोषफलं न चात्र ॥**[3]

कश्चिद्ग्रहः द्विस्थानाधिपः दुःस्थानपः सन् स्वकीये अन्यस्मिन् क्षेत्रे वर्तते चेत् सः स्वस्थितक्षेत्रजातमेव फलं ददाति, न तु दुःस्थानपत्वजातम् । यथा कन्यालग्नजातस्य शनिः मकरे पञ्चमे तिष्ठन् पुत्रसिद्धिमेव करोति, न तु षष्ठाधिपत्वजातमशुभम् ।

**३२. वदन्ति भावैक्यदलं हि सन्धिं तत्र स्थितः स्यादफलो ग्रहेन्द्रः ॥**[1]

---

[1] फलदीपिका १५.११ ।

[2] फलदीपिका १५.११ ।

[3] फलदीपिका १५.२९ ।

भावसन्धौ विद्यमानः ग्रहः भावफलविषये अफलो भवति ।

**३३. पूर्णं फलं भावसमांशकेषु ॥**[2]

भावसमांशको ग्रहः पूर्णतया स्वस्थितभावजातं फलं ददाति ।

**३४. जातिदेशकालावस्थानुरूपं फलं वाच्यम् ।** [3]

फलनिरूपणे इदमपि मनसि निधाय फलं वाच्यम् । प्रोक्तं सर्वं फलं सर्वस्य सम्भावीति नास्ति । उक्तफलं जात्यनुगुणम्, दशानुगुणम्, कालानुगुणम्, अवस्थानुगुणं च वाच्यम् । जातकस्य जात्यनुगुणं विद्याकर्मादिकं वाच्यम् । देशभेदेन देवतासु भेदः, आचारभेदः, व्यवहारभेदः इत्येवं भेदाः ये सम्भवन्ति तानपि यथायोग्यं योजयेत् । तथा कालानुगुणं विद्यायां कर्मणि वा यः भेदः दृश्यते तथा अथवा आगतस्य वयोऽनुरूपम् अपत्यविवाहादिविषये भेदः यः तदनुरूपं फलं वाच्यम् । अथवा अवस्था नाम आगतस्य पृच्छकस्य मुखभावादिः अथवा तत्काले तस्य दशा । तदनुरोधेनापि फलं प्रकथयेत् इति ।

एवं शास्त्रमुखात् गुरुमुखात् लोकमुखाच्च फलनिरूपणोपायान् ज्ञात्वा तान् आश्रित्य इतोऽप्यधिकतया प्रश्नमार्गबृहज्जातकादिषु निरूपितनियमान् मनसि कृत्वा ऊहापोहपटुः दैवज्ञः फलमादिशेदिति शम् ॥

**<u>आधारग्रन्थाः</u>**


| | |
|---|---|
| बृहज्जातकम् | प्रश्नमार्गः |
| दशाध्यायी | सिद्धान्तशिरोमणिः |
| षट्पञ्चाशिका | फलदीपिका |
| श्रीपतिपद्धतिः | |


**********

[1] श्रीपतिपद्धति १.०८ ।

[2] श्रीपतिपद्धति १.१० ।

[3] दशाध्यायी १०.०३ व्याख्यायाम् ।

 ISSN: 2320-740X

# प्लवत्ववशाद्भूमेः शुभाशुभज्ञानम्

**डा. सुधांशु कुमार नन्दः**
वास्तुप्राध्यापकः, वास्तु-डिप्लोमा विभागः

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः**[1] इति भास्करोक्तमतानुसारेण वेदस्य प्रवृत्तिस्तु यज्ञकर्मसम्पादनार्थमेवास्ति । यज्ञकर्मनिमित्तं यज्ञकुण्डस्यावश्यकता अस्ति एव । तस्य कुण्डस्य निर्माणं तु ज्यौतिषशास्त्रानुगुणं वास्तुशास्त्रञ्चाश्रित्य दिग्ज्ञानं कृत्वा क्रियते । एवञ्च न केवलं यज्ञकुण्डनिर्माणार्थं दिग्ज्ञानस्यावश्यकता वर्तते, पुनश्च तस्याभावे सति वास्तुशास्त्रस्य प्रयोग एव दुष्करः भवति । अस्यायमाशयः यत् वास्तुकर्मसु आदावेव दिक्साधनं कार्यम्। वास्तुरत्नावल्याम् उक्तमस्ति यत् -

**प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।**
**दिङ्मूढे कुलनाशः स्यात्तस्मात् संशोधयेद्दिशः ॥**[2]

अत्र अस्माकं विचारः प्लवत्ववशाद्भूमेः शुभाशुभज्ञानम्। एतदपि तदा कर्तुं शक्यते यदा दिग्ज्ञानं भवति। दिग्ज्ञानं कथं करणीयमिति शङ्कायां सूर्यसिद्धान्तस्य अभिमतम् एवमस्ति यत् –

**शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे ।**[3]

इत्याद्युक्तप्रकारेण दिग्ज्ञानात्परं भूमेः प्लवत्वं कस्यां दिशि अस्तीति दृष्ट्वा फलाफलं वास्तुशास्त्रे निर्णीयते । इदानीं भूमेः अष्टदिक्प्लवत्ववशात् फलं यथाशास्त्रं विचार्यते ।

**अष्टदिक्प्लवत्वफलम्**

**श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।**
**प्रवासं धनलाभं च विद्यालाभं क्रमेण च ॥**
**विदधात्यचिरेणैव पूर्वादिप्लवता मही ॥** [1]

---

[1] सिद्धान्तशिरोमणिः - मध्यमाधिकारः, कालमानाध्यायः, 9 श्लो.

[2] वास्तुरत्नावली 3 अ. 1 श्लो.

[3] सूर्यसिद्धान्तः 3 अ. 1 श्लो.

अर्थात् पूर्वादिप्लवयुक्ता मही क्रमेण श्रियं दाहं मृत्युं धनहानिं सुतक्षयं प्रवासं धनलाभं विद्यालाभञ्च विदधाति। पुनः विस्तरेण -

**शम्भुकोणप्लवा भूमिः कर्तुः श्रीसुखदायिनी।**
**पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा॥**
**मृत्युशोकप्रदा नित्यं सर्वथा दक्षिणप्लवा।**
**गृहक्षयकरी सा च भूमिर्या नैर्ऋतप्लवा॥**
**धनहानिकरी चैव कीर्तिता वरुणप्लवा।**
**वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी॥**
**मध्यप्लवा मही नेष्टा न शुभा प्लवतः पुरा।**[2]

ईशानकोणप्लवा भूमिः वासकर्तुः श्रीसुखदायिनी भवति। पूर्वदिशि प्लवा भूमिः धान्यादिवृद्धिकरी भवति। उत्तरप्लवा तु धनं ददाति। दक्षिणप्लवा भूमिः मृत्युशोकप्रदा भवति। नैर्ऋतप्लवा भूमिः गृहक्षयकरी भवति। पश्चिमप्लवा भूमिः धनक्षयकरी भवति। वायुकोणप्लवा भूमिः नित्यमुद्वेगकारिणी भवति। मध्यभागनिम्ना भूमिः न शुभदायिका भवति। मध्यनतायाः मध्योन्नतायाः भूमेः फलं मनुष्यालयचन्द्रिकायाम् एवमुक्तम् अस्ति यत्

**प्रवासदा मध्यनता धरित्री मध्योन्नता वित्तसुखादिहन्त्री।**
**वह्न्यादिवाय्वन्तनता धरित्री प्रायेण दारिद्र्यफलप्रदा स्यात्॥**[3]

मध्यनता भूमिः गृहस्वामिनः प्रवासस्य कारणं भवति। मध्योन्नता भूमिस्तु मानवस्य वित्तसुखादीनाम् अपहारकर्त्री भवति। पुनश्च अग्निकोणादारभ्य वायव्यकोणपर्यन्तं भूमेः प्लवत्वं वर्तते चेत् सा भूमिः तत्रत्यमानवस्य कृते दरिद्रतायाः कारणं भवति।

**उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणेनैव।**
**विप्रः सर्वत्र वसेदुक्तस्थानं त्रयाणां हि॥** [4]

---

[1] वास्तुरत्नावली - प्र.अध्यायः

[2] वास्तुरत्नावली - प्र.अध्यायः

[3] मनुष्यालयचन्द्रिका 1-20

[4] वास्तुरत्नावली. प्र.अ

ब्राह्मणस्य उदक्प्लवः, क्षत्रियस्य पूर्वप्लवः, वैश्यस्य दक्षिणप्लवः, शूद्रस्य तु पश्चिमप्लवः शुभः भवति । ब्राह्मणः सर्वत्र अर्थात् सर्वदिक्प्लवभूमौ वासं कर्तुं शक्नोति। अन्येषां त्रयाणां तु उक्तस्थानेष्वेव वासः करणीयः। विविधाः वीथ्यः अपि भूप्लवत्वाधारेणैव निरूपिताः । अष्ट वीथ्यः भवन्ति। ते यथा गोवीथी, जलवीथी, यमवीथी, गजवीथी, भूतवीथी, नागवीथी, वैश्वानरवीथी एवं धनवीथी ।

१. **गोवीथी - वारुण्योच्चसमायुक्ता नीचमाहेन्द्रसंयुता । गोवीथीति सा ज्ञेया.**[1]..अर्थात् यस्याः भूमेः पश्चिमभागः उच्चः, पूर्वभागः नीचः, सा भूमिः गोवीथी भवति ।

२. **जलवीथी - ऐन्द्रोच्चा नीचवारुणा। जलवीथिरिति प्रोक्ता वास्तुज्ञानविशारदैः ।**[2] अर्थात् यस्याः भूमेः पूर्वभागः उच्चः, पश्चिमभागः नीचः, सा भूमिः जलवीथी भवति ।

३. **यमवीथी - सोमोच्चयमनीचा च यमवीथीति कथ्यते ।**[3] अर्थात् यस्याः भूमेः उत्तरभागः उच्चः, दक्षिणभागः नीचः, सा भूमिः यमवीथी भवति ।

४. **गजवीथी - यमोच्चसोमनीचा च गजवीथीति कथ्यते ।** [4] अर्थात् यस्याः भूमेः दक्षिणभागः उच्चः, उत्तरभागः नीचः, सा भूमिः गजवीथी भवति ।

५. **भूतवीथी - ईशानोच्चं निर्ऋतौ नीचं भूतलं भूतवीथिकम्।**[5] अर्थात् यस्याः भूमेः ईशानभागः उच्चः, नैर्ऋतभागः नीचः, सा भूमिः भूतवीथी भवति ।

६. **नागवीथी - आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते।**[6] अर्थात् यस्याः भूमेः आग्नेयभागः उच्चः, वायुभागः नीचः, सा भूमिः नागवीथी भवति ।

---

[1] वास्तुकल्पलता 1 - 42

[2] वास्तुकल्पलता 1 - 43

[3] वास्तुकल्पलता 1 - 44

[4] वास्तुकल्पलता 1 - 44

[5] वास्तुकल्पलता 1 - 45

[6] वास्तुकल्पलता 1 - 45

७. **वैश्वानरवीथी - वायूच्चमग्निनीचं यद् वीथीं वैश्वानरीं विदुः ।**[1] अर्थात् यस्याः भूमेः वायुभागः उच्चः, अग्निभागः नीचः, सा भूमिः वैश्वानरवीथी भवति ।

८. **धनवीथी - निर्ऋत्युच्चमीशनीचं धनवीथीत्युदाहृता ।**[2] अर्थात् यस्याः भूमेः नैर्ऋतभागः उच्चः, ईशानभागः नीचः, सा भूमिः धनवीथी भवति ।

वीथीफलं तु नामानुसारं ज्ञातव्यम्। एवमेव अमुं विषयमधिकृत्य शास्त्रे बहवः विचाराः विचारिताः सन्ति । भूमेः चयनावसरे एषः विषयः एकं महत्वपूर्णं स्थानं स्वीकरोति । भूमिग्रहणावसरे वास्तुशास्त्रानुगुणं प्लवत्वादीनां विचारं कृत्वा भूमेः ग्रहणं कार्यम् ।

*********

[1] वास्तुकल्पलता 1 - 46

[2] वास्तुकल्पलता 1 - 46

# पुन्नामनरकः

**डा. एम्. श्रीनिवासमूर्तिः**

प्राध्यापकः, साहित्यविभागः

संस्कृतसाहित्ये वेद्-पुराण-दर्शन-शास्त्र-काव्येषु बहवो विषयाः लोककल्याणार्थं प्रोक्ताः वर्तन्ते। तत्र काव्यमार्गः अत्यन्तं सुलभः सर्वजनरञ्जकश्च भवति। यद्यपि संस्कृते बहूनि काव्यानि सन्ति कालिदासस्य काव्येन तावत् न किमपि समानं भवितुमर्हति इत्यत्र न काचित् विप्रतिपत्तिः। कालिदासस्य अतिगभीरं भिन्नविषयिकं ज्ञानं पठितृन् आश्चर्यचकितान् करोति। जीवपरिणामक्रमे कथं तत्तज्जीविनः वंशावल्यश्च पुरोगतिं प्राप्नुवन्तीति, केचन गुणाः भौतिकाः मानसिकाश्च कथं अनुवर्तन्त इति आधुनिकविज्ञानशास्त्रे जीवपरिणामशास्त्रे शरीरविज्ञानशास्त्रे च सम्यक् प्रोक्तं वर्तते। ते एव विषयाः सांप्रदायिकशास्त्रदिशा सुष्ठु निरूपिता वर्तते कालिदासेन रघुवंशमहाकाव्ये रघूणां गुणगणवर्णनसन्दर्भे, यथा-

**त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्,**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ इति।**

अत्र प्रजायै गृहमेधिनाम् इत्यत्र पुन्नामनरकात् रक्षणार्थमेव विवाहं प्राप्नुवन्ति इति कथयन् पुन्नामनरकविषये अलोचयितुम् अस्मान् प्रेरयति। को नाम पुन्नामनरक इति यथाशक्ति निरूप्यते।

जीविनः पुरोगमनार्थं द्वौ मर्गौ स्तः, आगामि जन्म (Next Birth) आगामिनी वंशावलिः (Generation) चेति। तत्र प्रथममार्गस्य देवयानमिति, द्वितीयमार्गस्य पितृयानमिति च प्रसिद्धिः। देवयाने जीविनः संस्काराः उपाधिरूपेण तिष्ठन्ति। पितृयाने भार्यायाः गर्भे पिण्डोत्पत्तिः उपाधिरूपेण तिष्ठति। जीविनः गत्यै देवतानामिकाः प्राज्ञाः मार्गं प्रदर्शयन्ति। एतयोः द्वयोरपि मार्गयोः पुरोगतिः भवति चेत् नरकबाधाः न भवन्ति।

अनेकलक्षेभ्यः वर्षेभ्यः परिणामगतजीवनेन प्राप्ते नरजन्मनि देहे सप्तधातुरूपेण निरग्निनामिकाः देवताः कार्यं कुर्वन्ति। तत्र शुक्रधातुना मानवजन्मनि परिणामस्य पुरोगतिं कल्पयितुं भार्गवाः अथवा उशनसः इति पितृदेवताः सहकुर्वन्ति। तेषाम् आश्रये जीविनः पितृपितामहादयः तावत्पर्यन्तं सम्पादितानां संस्काराणां रूपेण जीविनि प्रलम्बन्ते। तेषां भाविगतिः भार्यागर्भे पिण्डप्रदानमात्रेणैव सिद्ध्यति। नो चेत् तत्पूर्ववंशावलिसंस्काराः

सर्वे मृत्तिकायां वायौ जले च संलग्नाः भवन्ति। परमपदसोपानपट्टिकाक्रीडायां (Snakes and Ladders) सर्पस्य पुच्छादिव पुनः तत एव गतिः प्रारम्भणीया भवति। अयमेव विषयः अधोगतिः अथवा पुन्नामनरक इति उच्यते।

अस्माकं पूर्वजास्तावत् अस्मासु संस्कारान् त्यक्त्वा देवयाने स्वकीयपरिणामक्रमे ऊर्ध्वं गच्छन्ति । तैः संस्थापिताः संस्काराः अस्मासु प्रलम्बमानाः भाविवंशावल्याः कृते निरीक्षन्ते। तेषां अविनियोग एव पुन्नामनरकः इत्युक्तम्।

महाभारते पितामहप्रपितामहादयः वृक्षे प्रलम्बमानाः जरत्कारुं दृष्ट्वा विवाहं प्राप्नोत्विति प्रार्थयन्तीति, जरत्कारुः अङ्गीकरोतीति कथा एतत् सत्यं निरूपयितुमेव प्रोक्ता वर्तते।

**********


ISSN: 2320-740X

# शाब्दिकचिन्तामणौ अतिदेशविचारः

**राजेन्द्र भट्टः**

शोधच्छात्रः,नव्यव्याकरणविभागः

महाभाष्यव्याख्याकारैः श्रीमद्भिः गोपालकृष्णशास्त्रिभिः विरचितस्य शाब्दिकचिन्तामणेः अष्टमनवमाह्निकयोः सम्पादनात्मके शोधकार्ये प्रवृत्तोऽहं सम्प्रति "अतिदेशविचारः"इत्यस्मिन् विषये तेषामभिमतं मदीयाध्ययनानुसारं प्रस्तोतुमीहे । तत्रभवन्तः जानन्त्येव षड्विधसूत्रेषु अतिदेशसूत्राण्यपि अन्तर्भवन्तीति । को नाम अतिदेशः इति चेत् सर्वलक्षणसङ्ग्रहकारः ब्रूते –

**एकत्र श्रुतस्यान्यत्र सम्बन्धः ।**

**अन्यधर्मस्य अन्यत्रारोपणं वा ।** स्वविषयमुल्लङ्घ्य अन्यविषये उपदेशः ॥ इति

अष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादस्य षट्पञ्चाशत्तमं सूत्रं – स्थानिवदादेशोऽनल्विधाविति । महाभाष्ये अष्टमाह्निके प्रथमं सूत्रमिदम् अतिदेशसूत्रमिति प्रसिद्धम् । इत आरभ्य आप्रथमपादं यावन्ति अतिदेशसूत्राणि सन्ति तान्येव स्पृश्यन्ते गोपालकृष्णशास्त्रिमतेन प्रसङ्गवशात् इति ।

**अतिदेशपदार्थः -**

अतिदेशो नाम आरोप इत्यर्थः । अत्युपसृष्टात् उच्चारणार्थात् दिश धातोः करणार्थे घञि अतिदेशशब्दोऽयं निरपादि । स्थानिनि असतः कार्यानुकूलस्य धर्मस्य आरोप एव अतिदेशः ।

अष्टाध्यायाः प्रथमाध्याये प्रथमपादे अतिदेशप्रकारेषु सूत्रेषु आद्यतां वहतीदं "आद्यन्तवदेकस्मिन्" इति । इदं शब्दात् भ्यामि प्रत्यये कृते "त्यदादीनामः" इति मकारस्य अत्वे "हलि लोपः" इत्यनेन इदो लोपे 'अ+भ्याम्' इति स्थिते अत्र भ्यां निरूपितस्य अङ्गस्य अकाररूपत्वात् अकारान्तत्वाभावात् "सुपि च" इति दीर्घो न प्रवर्तेत । तदेदं सूत्रम् उपन्यास्यत् ।

सुत्रेऽत्र एकशब्दस्तु न सङ्ख्यावाची परन्तु असहायार्थकः । 'एके मुखान्यकेवलाः' इति कोशात् । अतः काशिकायाम् असहायस्य आद्यन्तोपदिष्टानि कार्याणि न सिध्यन्ति इत्ययमतिदेश आरभ्यते इत्युक्तम् । अत्राद्यन्तशब्दौ मध्यस्थसापेक्षौ, सति परस्मिन् यस्मात् पूर्वं नास्ति सः आदिः, सति च पूर्वस्मिन् यस्मात् परं नास्ति सोऽन्तः इति

आद्यन्तसूत्रभाष्यात् । अत्र अङ्गे अकारे पूर्वपरयोर्विरहेण दीर्घाप्राप्तौ अनेन च योगेन आद्यन्ततुल्यत्वातिदेशे दीर्घादीनां प्रवृत्तिः ।

**स्थानिवदादेशोऽनल्विधौ (१-१-५६) -**

आदेशः स्थानितुल्यं कार्यं प्राप्नोति परं यश्च विधिः अलाश्रयः तत्र अनेन अतिदेशो नास्ति ।

वस्तुतः गुरोः स्थाने शिष्यः याज्यकुलानि गत्वा अग्रासनादीनि लभते इति लोकव्यवहारेणैव अयमतिदेशः फलति । तथापि स्थान्यादेशयोर्भेदस्य लोकाचारप्रसिद्धत्वात् तथा "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति विधेश्च लोकन्यायेन अतिदेशो दुष्करः इति कृत्वा सूत्रमिदमारब्धम् ।

अत्र अतिदेशविषये हि द्वयी मतिः । स्थानिनि निमित्तविरहात् कार्याप्राप्तौ आतिदेशिकेन अनेन विधिना निमित्तवैकल्याभाववत् कार्यमेव न क्रियते । किन्तु यद्धर्माभावप्रयुक्तकार्याभावः तद्धर्मोऽनेन अतिदिश्यते । अयं कार्यातिदेशपक्षः ।

यत्र च लक्ष्ये कार्यप्राप्तौ किञ्चिन्निमित्तवैकल्येऽपि वैकल्यनिमित्ताभाववत् कार्यम् अनेन आतिदेशिकेन क्रियते इत्यस्य शास्त्रातिदेशपक्षः । उदा – 'राम + ङे' इत्यवस्थायां "ङेर्यः" इति यादेशे 'राम + य' इत्यवस्थायां यादेशस्य स्वयं यञादित्वेऽपि सुप्त्वाभावात् सुप्त्वरूपनिमित्तवैकल्यात् "सुपि च" इति दीर्घाप्रवृत्तौ कार्यातिदेशे सुप्त्वे यादेशे अतिदिष्टे "सुपि च" इत्यनेन दीर्घः । अत एव कौमुद्यां 'रामाय इत्यादौ स्थानिवत्त्वेन सुप्त्वात् सुपि च इति दीर्घः' इत्युक्तं सङ्गच्छते ।

शास्त्रातिदेशपक्षे तु अत्र दीर्घविधौ निमित्तस्य सुप्त्वस्य अभावेऽपि दीर्घकार्यम् अनेन आतिदेशिकयोगेनैव क्रियते इति ।

अत्र कार्यस्यैव प्राधान्यात् कार्यातिदेश एव न तु शास्त्रातिदेशः । शास्त्रातिदेशस्यापि कार्यैकफलकत्वात् स च कार्यातिदेशात् अभिन्न एव । अतः भाष्येऽपि 'तत्राङ्गशास्त्रातिदेशात्सिद्धम् अङ्गं यत्कार्यं तदतिदिश्यते' इत्युक्तम् । अस्यैव पक्षस्य भाष्यसम्मतत्वात् 'स्थान्यल्विधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो वक्तव्यः' इति वार्त्तिके 'स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयञ्च लघूपधत्वादि तत्र लघूपधगुणादिः प्राप्नोति' इत्यादिभाष्येण अयमेव समर्थ्यते ।

आनुमानिकस्थान्यादेशस्यापि अत्र ग्रहणम् – तस्य च वस्तुतः अत्र सूत्रे स्थानिशब्दः प्रयुक्तः । आदेशसापेक्षत्वात् तेनैव आदेशार्थसिद्धौ पुनः सौत्रेण आदेशग्रहणेन यत्र च श्रौतस्थान्यादेशमन्तरा आनुमानिकस्थान्यादेशभावःकल्प्यते तत्रापि अयमतिदेशः प्रवर्तते । यथा भूधातोर्लोटि भव+ति इत्यवस्थायां "एरुः"

इत्यनेन तकारोत्तरस्य इकारस्य उकार आदिश्यते। तत्र शब्दानाम् अनित्यत्ववारणाय 'सर्वे सर्वपदादेशाः' इति न्यायेन तेः तुः इति अनुमानेन स्थान्यादेशभावः कल्प्यते। तत्रापि अतिदेशप्रवृत्त्या भवतु इत्यादेः पदत्वसिद्धिः।

**अचः परस्मिन् पूर्वविधौ (१-१-५७) –**

परनिमित्तः अचः आदेशः स्थानिवद्भवति स्थानिभूतो यो अच् तस्मात् पूर्वस्य विधौ कर्तव्ये इति सूत्रार्थः। 'सुधी+उपास्य' इत्यत्र यणि 'सुध् य् + उपास्य' इत्यत्र "अनचि च" इति द्वित्वे कर्तव्ये स्थानिवद्भावेन यकारे इकारातिदेशे तत्र अनल्विधौ इति निषेधेन अतिदेशे निषिद्धे अनेन पुनः स्थानिवत्त्वातिदेशः।

**उभयातिदेशः –**

अत्र उभयशब्देन भावाभावौ गृह्येते। स्थानिवत्सूत्रेण यत्र अतिदेशः तत्र स्थानिप्रयुक्तं कार्यं क्रियते न तु आदेशप्रयुक्तं वार्यते। अतः रामाय इत्यत्र आदेशधर्मं यञादित्वं स्थानिधर्मं सुप्त्वम् उभयमपि आश्रित्य दीर्घः।

अनेन तु भावाभावौ उभावपि अतिदिश्येते। स्थानिधर्मस्य भावः, आदेशधर्मस्य अभावश्च उभयोरप्यतिदेशः। तदुक्तं भाष्ये 'काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति' इति।

स्थानिवत्सूत्रेण शास्त्रीयकार्यस्य सिध्यर्थम् अतिदेशः क्रियते। अतिदेशो नाम अन्यत्र अन्यधर्मारोपः। तद्यथा रामशब्दात् चतुर्थ्येकवचने ङे प्रत्यये ङेर्यादेशे कृते तस्य सुप्त्वाभावात् सुपि च इति दीर्घस्याप्रवृत्तौ अतिदेशः प्रार्थ्यते। ततः च सुप्त्वातिदेशे दीर्घः सिध्यति। रामाय इति रूपं च भवति। अत्र षड्विधातिदेशाः सम्भवन्ति। रूपातिदेशः, निमित्तातिदेशः, तादात्म्यातिदेशः, शास्त्रातिदेशः, व्यपदेशातिदेशः, कार्यातिदेशश्च इति।

**रूपातिदेशः –**

यत्र आनुपूर्वी एव अतिदिश्यते तत्र रूपातिदेश इति व्यवहारः। यथा चक्रतुः। कृञ् धातोः लिटि प्रथमपुरुषद्विवचने तस् प्रत्यये तस्य अतुस् आदेशे लिटि धातोरनभ्यासस्य इति द्वित्वम्, इको यणचि इति यणादेशश्च प्राप्तौ। तत्र परत्वात् यणादेशे क्र् अतुस् इति जाते धातोः एकाच्त्वाभावात् द्वित्वं न स्यात् द्वित्वविधौ एकाचो द्वे इति स्मरणात्। अतः द्विर्वचनेऽचि इति सूत्रे स्थानिरूपमेवातिदिश्यते। स्थानिवत्सूत्रं तु न रूपातिदेशं करोति। आदेशोत्तरं स्थानिरूपमेव यद्यतिदिश्येत तर्हि आदेशविधेः वैयर्थ्यं स्यात्। अस्तेर्भूः इति सूत्रेण भूभावे सति धातुत्वाय अतिदेशे कृते पुनः अस् भावापत्तौ अस्तेर्भूः इति सूत्रं व्यर्थं स्यात्।

**निमित्तातिदेशः –**

क्वचित् आदेशादिषु कृतेषु कार्यप्रवृत्तौ निमित्तस्य अनुपलम्भात् लक्ष्ये कार्यं न प्राप्नोति । यन्निमित्तवैकल्यप्रयुक्त-उपदेशाप्रवृत्तिः तन्निमित्तम् अतिदिश्यते । कार्यं तु तत्सूत्रेणैव विधीयते । तद्यथा पूर्ववत्सनः । अनेन हि सूत्रेण आत्मनेपदनिमित्तम् अतिदिश्यते । सनः प्रकृतिभूतधातोः यल्लिङ्गम् आत्मनेपदनिमित्तं तत् सन्नन्तेऽपि अतिदिश्यते । यथा शीङ् स्वप्ने – शिशयिषते । स्थानिवत्सूत्रे निमित्तातिदेशः आश्रयितुं न शक्यते । न हि ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम् इत्यादौ अग्रभोजनादिनिमित्तस्य ब्राह्मण्यादेः वचनशतेनापि क्षत्रिये अतिदेष्टुं शक्यते । तद्वत् चक्षिङः आर्धधातुके ख्यायादेशे सति सः चक्षिङ्वत् न भवति ।

**तादात्म्यातिदेशः –**

द्वयोः सहावस्थितयोः अन्योन्यभावः यत्र अतिदिश्यते तत्र तादात्म्यातिदेश इति व्यवहारः । यथा पराङ्गवद्भावः । सुबामन्त्रिते पराङ्गवत्सरे । सुबन्तम् आमन्त्रिते परे पराङ्गवत् स्वरे कर्तव्ये । द्रवत्पाणी शुभस्पती। अत्र पतिशब्दस्य आमन्त्रितसंज्ञा अस्ति । शुभस् इति षष्ठ्यन्तम् आमन्त्रितस्य अङ्गभावं भजते । ततश्च आमन्त्रितस्य च इति आद्युदात्तस्वरः शुभशब्दोकारस्य भवति । न तावदिह तादात्म्यातिदेशः स्थान्यादेशयोः सहावस्थानासम्भवात् ।

**शास्त्रातिदेशः –**

यत्र लक्ष्ये केनचिन्निमित्तेन कार्यस्य प्रतिबन्धे सति शास्त्रप्रवृत्तिः अप्रवृत्तिर्वा सम्भाव्यते तत्र शास्त्रातिदेश इति व्यवहारः । यथा पूर्वत्रासिद्धम् । मनर् रथः इति दशायां रो रि इत्यनेन रेफलोपे प्राप्ते रो रि इति शास्त्रस्यैव असिद्धत्वमुक्त्वा हशि च इति उत्वं व्यवस्थाप्यते । अन्यथा कार्ये जाते वचनशतेनापि पुनरुन्मज्जनाभावात् लक्ष्यासिद्धिप्रसङ्गः । स्थानिवत्सूत्रे तावत् शास्त्रातिदेशः नैव आश्रयितुं युक्तः अतिदेशस्य कार्यार्थत्वात् शास्त्रस्याप्राधान्यात् ।

**व्यपदेशातिदेशः –**

व्यपदेशो नाम मुख्यव्यवहारः । तस्यातिदेशे व्यपदेशातिदेश इति व्यवहारः । तद्यथा अस्यापत्यम् इः । अ इति वासुदेववाचकः । तस्मात् अपत्यार्थे अत इञ् इति सूत्रेण इञ् प्रत्ययो विधेयः । परम् अकारान्तात् प्रातिपदिकादेव इञ् प्रत्ययो विधीयते । अ इति न अकारान्तम् । अकारातिरिक्तस्य कस्यचित् तत्राभावात् । एवं स्थिते दक्ष इत्यादाविव अकारान्तत्वव्यपदेशः अ इत्यत्राप्यतिदिश्यते । तेन इञ् प्रत्ययः सिध्यति । न हि स्थानिवत्सूत्रे व्यपदेशातिदेशः आश्रयितुं शक्यः कार्यस्य प्राधान्यात् शास्त्रवत् व्यपदेशस्यापि अप्राधान्यात् । किञ्च व्यपदेशातिदेशे कृते स्थान्यपेक्षया आदेशस्य व्यपदेशाभेदेन संज्ञानिरासे सिद्धे संज्ञानिवृत्त्यर्थं वतिग्रहणमिति भाष्यं व्याकुप्येत ।

 ISSN: 2320-740X

**कार्यातिदेशः –**

यत्र निमित्तवैकल्येन कार्यस्य अप्रवृत्तौ अतिदेशेन साक्षात् कार्यमेव अतिदिश्यते तत्र कार्यातिदेश इति व्यवहारः । सर्वेषामपि अतिदेशानां प्रागुक्तानां कार्यार्थत्वेन कार्यस्य च प्राधान्यात् सर्वत्र कार्यातिदेश एव आश्रयितुं युक्तः । अत एव भाष्ये स्थानिकार्यम् आदेशे अतिदिश्यते इत्युक्तम् । एवं च रामाय इत्यादौ स्थानिनि सुपि सति यत्कार्यं दीर्घरूपं तत् आदेशे यादेशे सत्यपि भवति स्थानिवत्सूत्रेण । इत्थं सर्वानतिदेशान् सङ्कलय्य इह सूत्रे परीक्ष्य कार्यातिदेश एव व्यवस्थापितः शास्त्रिभिः ॥

**********

# मीमांसाशास्त्रे योगसम्बद्धयमेषु अहिंसायाः विचारः

**प्रशान्तगांव्करः**

शोधच्छात्रः, मीमांसाविभागः

वेदार्थनिर्णयार्थं प्रवृत्तायां जैमिनिप्रणीतायां **मीमांसायां योगसम्बद्धयमेषु अहिंसायाः विचारः** कथं निरूपितः इति अत्र किञ्चिन्निरूप्यते । **अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः**[1] इति पतञ्जलिः योगसूत्रे निगदति । तत्र अहिंसा नाम **वाङ्मनःकायैः सर्वभूतानामनभिद्रोहः । अशास्त्रीयः प्राणिपीडनाभावः अहिंसा**[2] इति तत्र तत्र अभिधीयते । वेदे **अग्नीषोमीयं पशुमालभेत**[3], **वायव्यं श्वेतमालभेत भूतिकामः**[4], **तरति ब्रह्महत्यां योऽश्वमेधेन यजते**[5] इत्यादयः पशुद्रव्यकयागाः श्रूयन्ते । अत्र पशुवधः वेदेन विहित इति नाधर्मजनकः । वैदिकी हिंसा न अधर्मजनिका ।

अत्रैव वेदार्थनिर्णयप्रसङ्गे अहिंसाविचारः प्रवृत्तः । **वसन्ताय कपिञ्जलान् आलभेत**[6] इति एकादशे तन्त्राध्याये

---

[1] योगसूत्रम् २/३०

[2] मधुसूदनसरस्वतियतीनां श्रीमद्भगवद्गीताव्याख्यानम् ४/२८

[3] ऐतरेयब्राह्मणम् ६/३

[4] यजुर्वेदः २/१/१

[5] तैत्तिरीयसंहिता ५/३/१२/२

[6] मैत्रायणीयसंहिता ३/१४/१

प्रथमपादस्य अष्टमाधिकरणे बहुवचनस्य त्रित्वपरत्वे कपिञ्जलाधिकरणे[1] वाक्यार्थविचारः । अत्र वसन्ताय इत्यनेन वसन्ताख्या देवता बोध्यते । तत्र प्रमाणं चतुर्थीविभक्तिः । तदुक्तम् –

**तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते ।**

**देवतासङ्गतिस्तत्र दुर्बलं च परं परम् ॥**2 इति ।

एवमत्र वसन्तप्रातिपदिकोत्तरं या चतुर्थी श्रूयते, तया देवता बोध्यते । कपिञ्जलान् इत्यत्र कपिञ्जलो नाम जलचरः पक्षिविशेषः उच्यते । सः अत्र द्रव्यम् । आलभेत इत्यत्र आङ् पूर्वकलभधातोः स्पर्शोऽर्थः । तथापि द्रव्यदेवतासम्बन्धानुपपत्त्या मीमांसकैः यागः कल्प्यते । अस्मिन् यागे कपिञ्जलान् इत्यत्र द्रव्यवाचके पदे बहुवचनं श्रूयते । बहुवचनं तावत् त्रित्वमारभ्य परार्धपर्यन्तं सङ्ख्यावाचकम् । अतः सर्वेषां सङ्ख्याविशेषाणां युगपत् समावेशाभावात् या कापि सङ्ख्या आश्रयितुं शक्यते । यदि त्रित्वमेव बहुवचनार्थः तर्हि **चत्वारो ब्राह्मणाः, पञ्च हवींषि** इत्यादौ सामानाधिकरण्यं न स्यात् इत्याक्षिप्य समाहितं यथा – त्रित्वप्रभृतिपरार्धपर्यन्तं सङ्ख्यागतं बहुत्वमेव बहुवचनस्यार्थः । तथापि कपिञ्जलानित्यत्र प्राथम्येन त्रित्वमेव प्रगीयते । न चतुष्टादि । **एका देया, षड् देयाः, द्वादश देयाः**[3] इत्यादौ तु सङ्ख्याविशेषणानां पृथङ्निर्देशात् फलतारतम्यम् अस्ति । अत्र तु सः तरतमभावः नास्ति । अत्र त्रयाणामेव स्वीकारे अस्ति मीमांसकानां महान् आग्रहः । **न हिंस्यात् सर्वा भूतानि**[4] इति निषेधशात्रम् । यदि त्रित्वं स्वीकृत्य शास्त्रार्थः सङ्गच्छते तर्हि ततोऽधिकस्वीकारे हिंसात्मकः स्यात् ।

अतो हिंसापरित्यागार्थमेव त्रिभिः कपिञ्जलैः शास्त्रार्थो निर्वोढुं शक्यत इति अहिंसायाः परिपालनं शरणीकृतं मीमांसकैः । एवं रीत्या वैदिकदर्शनेन मीमांसाशास्त्रेण अपरस्मिन् वैदिकदर्शने योगशास्त्रे प्रतिपादितामहिंसां नितरामुररीकृत्य वेदवाक्यार्थनिर्णयः विहितः ।

**आकरग्रन्थाः–**

जैमिनीयन्यायमाला योगसूत्रम् भाट्टदीपिका

तन्त्रवार्तिकम् मीमांसाशाबरभाष्यम्

**********

[1] जैमिनीयन्यायमाला ११/१/८

[2] तन्त्रवार्तिके गुणाधिकरणम् २/२/९

[3] अग्न्याधाने इदं श्रूयते ।

[4] कपिलस्मृतिः ८/२


ISSN: 2320-740X

# शर्करामिव गोक्षीरे वाचोयुक्तिं निवेशय

**उमामहेश्वरः एन्.**
शोधच्छात्रः, नव्यव्याकरणविभागः

अभिजातमिदम् आर्षवाङ्मयं वेदैः शास्त्रैः पुराणैः इतिहासैः काव्यैः नाटकैःव्यवहारैश्च परिपुष्टं विद्योततेतमाम् । किञ्चेदं वाङ्मयं सुमहान्तं कालगर्भं सुमहता च प्रमाणेन देशांश्च समभिव्याप्य नानासाहित्यनिचयैः नितरां भुव एव भूषणायते । अनया देवगिरा ये तावत्क्रान्तदर्शिन ऋषयःकवयश्च स्वीयं सारस्वतं कर्म निर्वर्तयामासुः ते समेऽपि स्वीयया शैल्या किञ्चन वचस्सौन्दर्यं वाग्वक्रतां वा काञ्चन समभिव्यञ्जयितुं ययतिर इति सर्वविदितो विषयः । साम्प्रतमपि नवसाहित्यस्रष्टारः पूर्वसूरीणां पन्थानमनुयियासवोऽभिनवाभिः वचोविच्छित्तिन्यायाभाणकवक्रोक्तिसूक्तिसुभाषित-गमकनिपातनव्याससमासवृत्तिरूपाभिर्वचःश्रीभिः भारतीं समभिवर्धयन्तः समृद्धां तां समृद्धतरां साधयन्तस्तेन पुष्यन्ति तुष्यन्ति च ।

तत्र कतिपयैरेव अभिज्ञातः अङ्गुलिमेयैरेव विद्वद्भिरध्ययनविषयत्वेन गृहीतो वाचां प्रकारो भवति**वाचोयुक्ति**रिति वाग्रत्नम् । **वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु** इत्यनेन षष्ठ्या अलुकि वाचोयुक्तिः, दिशोदण्डः, पश्यतोहरः इति पदत्रितयं निष्पद्यते । तत्र वाचोयुक्तिरिह प्रकृतो विषयः । साकल्येन वाचोयुक्तिस्तु शब्दसंविधानम् एव शब्दगुम्फो वा भवति।तच्च वाचोयुक्तिपदेनैव बुद्ध्यते यत् वचसां योग इति । स योगः अभिधाभिन्नं सहृदयहृदयवेद्यं व्यवहारपुष्टं लोकपरिगृहीतं स्वरसतरं कञ्चिदर्थविशेषं अभिव्यनक्तीति विद्वद्भिर्विदितम् । तदेव आङ्ग्लवाचा Idiomatic expression इति पदेन देशभाषया **मुहावरे** इत्यनेन कन्नडगिरा **ನುಡಿಗಟ್ಟು** इत्यनेन तेलुगुभाषया **నుడికారము** इत्यनेन मराठीभाषयावाग्प्रयोग इत्यनेन पदेन तत्तद्भाषावेदितृभिरभिज्ञायते।उदाहरणानि यथा- **पात्रेसमितः** यस्तु भोजन उपतिष्ठते न कार्य्ये , **गेहेशूरः** यस्तु पत्न्यां पराक्रमते न तु बहिरित्यभिप्राये एवमेव बहूनि सन्ति वचोरत्नानि । साम्प्रममिह लेखे रूपकेभ्यःसञ्चिताः कतिपय्यः वाचोयुक्तयः सहृदयानां तोषोत्कर्षाय निरूप्यन्ते ।

१) **अकालेकूष्माण्डपतनम्** इत्ययं राजशेखरस्य कर्पूरमञ्जरीसट्टके वर्तते । कूष्माण्डपातस्तु यदा कदापि न क्रियते । अकाले अपूर्वस्य भाविनि काङ्क्षितस्य फलस्य प्राप्तौ अस्या वाचोयुक्तेः प्रयोगः ।

२) **श्वेतकाकीयैः** मृच्छकटिकप्रकरणे तावत् चारुदत्तः राज्ञः विरुद्ध्य प्रवर्तमानं शाठ्यं निन्दति तदा

**ईदृशैः श्वेतककीयैः राज्ञः शासनदूषकैः।**

**अपापानां सहस्राणि हन्यन्ते च हतानि च ॥** इति प्रयुक्तम् ।

यस्तावद्विद्यमानं गोपयित्वा अन्यथाकारं वर्णयति प्रवर्तते वा तत्र प्रयुक्तिरियं शक्या ।

३) **मशकनाशं नष्टः** सुभद्राधनञ्जयाख्ये रूपकविशेषे प्रयोगोऽयं विकोक्यते अत्यन्तं लघुना यत्नेन विनायासं यत्किञ्चित्साधितं चेत् तदा प्रयोगः शक्यः । तथैव प्रयोगान्तरं कदलीभङ्गं बभञ्ज इति शृङ्गारगङ्गाधरे काव्ये दृश्यते । अत्र उपमानाच्च इत्यनेन णमुल् । प्रयोगश्च औपमिकः ।

४) **भस्मनि हुतम्** वत्सराजप्रणीते त्रिपुरदाहडिमे व्यर्थतात्पर्यकः प्रयोगोऽयम् अभ्यनुज्ञायते । भागवतेऽपि प्रयोगो दृश्यते ।

**यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।**

**हित्वार्थं मौढ्याद्भजते भस्मन्येव जुहोति सः ॥**( ३-२९-२२)

५) **चषकचुम्बनमात्रपरः** कर्पूरचरितभाणरूपके यस्तावदन्तः सत्त्वं न गृह्णाति केवलं बहिरेव रमते स उच्यते **चषकचुम्बनमात्रपरः ।** अयमेवाभिप्रायः पल्लवग्राही तलस्पर्शी इत्येताभ्यामपि वाचोयुक्तिभ्यां निष्पद्यते ।

६) **को मे द्वितीयां जिह्वां दास्यति** रुक्मिणीहरणेहामृगे विद्यमाना वाचोयुक्तिरियम् । अत्र कस्यापि द्वितीयजिह्वा न भवति । जिह्वादानञ्च नितरामनुपपन्नम् इत्यतः अभिधात्र अकिञ्चित्करी । अत्रायमभिप्रायः मया एवं राज्ञे निवेदिते सति तत् समर्थयितुम् अनुभाषितारः के इति । "सात् देने वाला" इति देशभाषायाम् आङ्ग्ले च supportive speaker इति विज्ञातुं शक्यते ।

७) **मातरं विक्रीय** अयञ्च पदगुम्फो लटकमेलके दृश्यते । मातुः विक्रयणे न तात्पर्य्यम् अपि तु स्वेन प्राप्तव्यस्य द्रव्यस्य परिग्रहे प्रकर्षोपादनं कवेरिष्टम् ।

८) **पीठमर्दिकाभावं वहन्ती**ति मालविकाग्निमित्रे कालिदासः । अत्र आलस्येन दर्पं गताः मयूरा वर्ण्यन्ते । यस्तावत्कार्य्यं न करोति राज्ञः पुरतः दर्शनमात्रं भवति स उच्यते पीठमर्द इति ।

९) **वाचाकलहं कुरुतः** इति हास्यचूडामणौ । कदाचित् वाचोयुक्तौ तत्स्वरूपमपि वर्ण्यते । यथा – चेटः - अम्ब ! द्वौ कावपि मुण्डितमुण्डौ वाचाकलहं कुरुतः । यदेको भणति तस्य कृते तदपरोपि प्रतिभणति इति । आहत्यात्र निष्प्रयोजनमभिप्रेतम् ।

 ISSN: 2320-740X

१०) **पिष्टपेषणम्-निर्लाभमभिप्रेतमिह  गम्यते ।**

**देवात्मजैर्मनुष्याणां कथं वा  बन्धुता भवेत् ।**

**पिष्टपेषणमेतावत् पर्य्याप्तं छिद्यतां कथा ॥** इति दूतवाक्ये भासः ।

एतदभिप्राय एव चर्वितचर्वणम् इत्यपि वाचोयुक्त्यन्तरं प्रसिद्धमेव । एवं नो वाङ्मये परस्सहस्राः वाचोयुक्तयो विलसन्ति । ताः भाषां स्वरसां कुर्वते । तदेव महामहोपाध्यायाः रङ्गनाथशर्माणः स्वीये भाषाजीवातुः वाचोयुक्तिः इति लेखे प्राचीकशन् तद्यथा-

**यदि नाम  पुरेवेदं रोचयेद् संस्कृतं जनः ।**

**शर्करामिव गोक्षीरे वाचोयुक्तिं निवेशय ॥**

**********

# समावेशात्मकशिक्षायाः निदर्शनरूपेण भगवद्गीता

**प्रियाङ्का चन्द्र**

शोधच्छात्रा,शिक्षाविभागः

प्राप्तक्षमतानुसारम् आत्मविकासः सर्वेषां बालकानां जन्मसिद्धः अधिकारः । शिक्षायाः उद्देश्यं भवति बालकस्य सर्वाङ्गीणविकासः । समावेशात्मकशिक्षायाः अर्थः सर्वेभ्यः बालकेभ्यः समानशिक्षा प्रदानम् । अत्र सर्वेषु बालकेषु केचन विशिष्टबालकाः अपि भवन्ति । समावेशात्मकशिक्षा शिक्षायाः एका प्रणाली अस्ति यत्र सामान्यविद्यालयेषु सामान्यबालकैस्सह असमर्थाः बालकाः अपि एकस्यामेव कक्ष्यायां पठन्ति । अस्यां शिक्षायां दिव्याङ्गादिभ्यः (*शारीरिक-मानसिकरूपेण विकारग्रस्थाः, अधिगमे असमर्थाः, बालापराधिनः, अनुसूचितजाति-जनजाति-निम्नवर्गाणां बालकाः*) सर्वेभ्यः समानरूपशिक्षा प्रदीयते । भारतीयसंविधाने अनुसूचितजाति-जनजातीनां कृते शिक्षायाः [१५(४),४५,४६धारायां] विशेषप्रावधानं दृश्यते । समावेशितशिक्षायाः उद्भवः अमेरिका-कनाडा-देशयोः अभूत् इति प्रचलितमस्ति । आङ्ग्लभाषायाम् एषा शिक्षा Inclusive Education इति नाम्ना ज्ञायते ।

**उद्देश्यानि –**

१. आत्मनिर्भरतायाः भावनायाः जागरणम् ।
२. शिक्षणे प्रजातान्त्रिकमूल्यस्य स्थापना ।

३. सर्वेषां कृते समानाधिकारस्य भावनायाः जागरणम् ।

४. समाजे दिव्याङ्गतसम्बन्धिभ्रान्तीनां दूरीकरणम् ।

५. दिव्याङ्गादिबालकेभ्यः *(शारीरिक-मानसिक-विकारग्रस्थाः, बालापराधिनः, अधिगमे असमर्थाः, अनुसूचितजातेः अनुसूचितजनजातेः बालकाः, निम्नवर्गीयश्च्छात्राश्च)* शिक्षणं प्रदाय समाजे तेषां समायोजनम्।

६. सर्वेषु जागरूकतायाः विकासः ।

**आवश्यकता –**

- सामाजिक-एकीकरणाय अस्याः शिक्षायाः आवश्यकता अस्ति ।
- असामान्यबालकानां मानसिकविकासहेतोः अस्याः आवश्यकता अस्ति ।
- शैक्षिक-एकीकरणाय अस्याः शिक्षायाः आवश्यकता अस्ति ।
- सहयोगिभावनायाः विकासाय अस्याः आवश्यकता अस्ति ।
- राष्ट्रियविकासाय अस्याः शिक्षायाः आवश्यकतास्ति ।

**शिक्षकः –**

अस्यां शिक्षायां शिक्षकः अधोलिखितकार्याणि करोति–

१) छात्रेषु सहयोगितायाः भावनायाः विकासाय क्रीडायाः आयोजनम् ।

२) समस्यायाः समाधाने विद्यार्थिनां सहयोगिता-स्वीकरणम् ।

३) छात्रेषु पुस्तकानाम् आदान-प्रदानम् ।

४) कक्ष्यायां विचाराणाम् आदान-प्रदानम् ।

५) विविधकार्यक्रमेषु छात्राणां दलं निर्माय छात्रेषु कार्यविभाजनम् ।

६) उत्तमवातावरणस्य निर्माणम् ।

७) अभिभावकानां विशेषाध्यापकानाञ्च सहयोगितास्वीकरणम् ।

समावेशितशिक्षायाः एकमुद्देश्यमस्ति मानसिकविकारयुतानां छात्राणाम् अपि समाजस्य मौलिकस्रोतसि आनयनम् । महाभारते कुरुक्षेत्रस्य युद्धं धर्मयुद्धमासीत् (धर्मक्षेत्रे कुरुक्षेत्रे....) । समाजकल्याणाय तदा युद्धम् अपेक्षितम् आसीत् । तस्मिन् युद्धे पाण्डवपक्षस्य उत्तमयोद्धा अर्जुनः प्रतिपक्षस्थस्वजनान् दृष्ट्वा रणाङ्गणे एव गाण्डीवं त्यक्तवान् ।

**गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते ।**

 ISSN: 2320-740X

**न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥**[1]

वस्तुतः एषा स्थितिः मानसिकविक्षिप्तातायाः एकं निदर्शनम्, यत्र उत्तमयोद्धा रणाङ्गणे प्रतिपक्षस्थात्मीयान् दृष्ट्वा युद्धे अनिच्छुको भवति । तदा तं मानसिकविकारग्रस्थम् अर्जुनं समाजकल्याणाय प्रवृत्ते युद्धे प्रेरयितुं गुरुः श्रीकृष्णः भिन्नं भिन्नं मार्गम् (कर्ममार्गः ध्यानमार्गः भक्तिमार्गः ज्ञानमार्गश्च) आश्रितवान् ।

मानवजीवनस्य उद्देश्यं भवति आत्मकल्याणम् । मनुष्यः स्व-स्व-कर्तव्यकर्मणा आत्मकल्याणं विधास्यति । अत्र क्षत्रियः भूत्वा आवश्यकतायां सत्याम् उत्तमयोद्धा अर्जुनः युद्धं कर्तुम् अनिच्छुकः । तदा गुरुः श्रीकृष्णः विविधमार्गैः(कर्ममार्गः ध्यानमार्गः भक्तिमार्गः ज्ञानमार्गश्च) मानसिकविकारयुतम् अर्जुनम् आत्मकल्याणाय समाजकल्याणाय च प्रवृत्ते धर्मयुद्धे प्रेरयितुं युद्धार्थं प्रचोदयत् । युद्धेनैव क्षत्रियस्य आत्मकल्याणं भवति । अज्ञानेनाविष्टः अर्जुनः क्षात्रधर्मं त्यक्तवान् ।

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥**[2]

रणाङ्गणे युद्धं त्यक्त्वा पलायनं क्षात्रधर्म-विरुद्धाचरणम् । अर्जुनस्य अज्ञानं विमोचयितुं श्रीकृष्णः विभिन्नप्रयत्नं कृतवान् । सर्वादौ देह-देहिनोः भेदज्ञानं स्पष्टयति अर्जुनस्य शोकं दूरीकर्तुम्[3] । युद्धे आत्मीयाः म्रियन्ते, तद् आत्मीयहननजनितपापम् अर्जुने आपतति - इति अर्जुनस्य पापभीतिः[4]। तस्मात् अर्जुनस्य पापभयं दूरीकर्तुम् स्व-वर्णधर्मपालनविषयं प्रतिपादयति[5] । श्रीकृष्णः अर्जुनम् अवबोधयति यत् समभावापन्नत्त्वेन स्वकर्तव्यपालनं न कदापि संसारबन्धने आबध्नाति । अतः अर्जुनोऽपि समतायां भूत्वा स्व-वर्णधर्मपालनं कुर्यादिति श्रीकृष्णस्य आशयः ।

अतः परं मानसिकस्वस्थपुरुषस्य *(स्थितप्रज्ञस्य)* लक्षणम् उक्त्वा अर्जुनस्य स्थितप्रज्ञविषयकजिज्ञासायाः समाधानं प्रददाति ।***छात्रः यदा पूर्वाग्रहवशात्* [6]*अथवा अज्ञानवशात् गुरोः अभिप्रायं नावगच्छति तदा सः तमेव विषयम् अवगन्तुं प्रश्नं पृच्छति । कक्ष्यायां विविधाः मतियुताः छात्राः भवन्ति । सर्वे छात्राः प्रथमवारेणैव***

---

[1] भ. गी. – १अ. ३०श्लो.

[2] भ. गी. – १८ अ. ४३ श्लो.

[3] भ. गी. –२ अ. ११-३० श्लो.

[4] भ. गी. – १ अ. ३६ श्लो.

[5] भ. गी. – २ अ. ३१-३८ श्लो.

[6] भ. गी. – न योत्स्य इति...- २ अ. ९ श्लो.

***प्रतिपाद्यविषयं नावगच्छन्ति*** । अत्र अर्जुनः अपि अज्ञानवशात् श्रीकृष्णस्य अभिप्रायं नावगतवान् । अज्ञानवशात् श्रीकृष्णस्य कथनं तस्मै मिश्रितं भाति ।

**व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।**

**तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥**[1]

***छात्रः यदा प्रतिपाद्यविषयं नावगच्छति तदा शिक्षकः प्रकारान्तरेण तमेव विषयं छात्रस्तरानुगुणं बोधयति*** । अत्र श्रीकृष्णोऽपि मानसिकविकारयुतम् अर्जुनं तथैव अवबोधयितुं प्रयासं करोति ।

**लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।**

**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥**[2]

*'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे...*[3] अर्थात् अर्जुनः स्वकल्याणम् इच्छति । कल्याणप्राप्त्यर्थं यज्ञरूपविविधसाधनानां वर्णनं कृत्वा ज्ञानप्राप्तिः कथं सम्भवति इति विवृणोति श्रीकृष्णः ।

**श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।**

**सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥**

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥**

**यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।**

**येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥**[4]

मनसः चञ्चलतावशात् मनः स्थिरं न भवति, तस्मात् ध्यानयोगम् अर्थात् योगानुष्ठानं क्लेशकरं भवति। अतः मनसः निग्रहः कथं सम्भवति इति अर्जुनः पृच्छति ।

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।**

**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**[5]

---

[1] भ. गी. – ३ अ. २ श्लो.

[2] भ. गी. – ३ अ. ३ श्लो.

[3] भ. गी. – २ अ. ७श्लो.

[4] भ. गी. – ४ अ. ३३,३४,३५ श्लो.

[5] भ. गी. – ६ अ. ३४ श्लो.

 ISSN: 2320-740X

अत्र श्रीकृष्णः मनसः निग्रहस्योपायम् उक्त्वा अर्जुनं संतृप्तं करोति ।

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**[1]

अर्जुनस्य मनसि योगभ्रष्टस्य विषये जायमानजिज्ञासायाः अपि समाधानं [2] प्रदाय ध्यानयोगस्य महिमानं कीर्तयति एवञ्च अर्जुनं योगी भूत्वा स्व-कर्मणि नियोजयितुं प्रेरयति गुरुः कृष्णः ।

इत्थं कदाचित् कर्ममार्गेण कदाचित् ज्ञानमार्गेण कदाचित् ध्यानमार्गेण कदाचिद्वा भक्तिमार्गेण छात्रामर्जुनं स्ववर्णधर्मपालयितुं गुरुः श्रीकृष्णः प्रेरितवान् । एवञ्च अन्तिमे युद्धविमुखः अर्जुनः युद्धार्थं सिद्धः भवति ।

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।**

**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥** [3]

समावेशितशिक्षायां शिक्षकस्य बहुषु लक्ष्येषु एकं लक्ष्यं भवति मानसिकविकारयुतं छात्रमपि सामाजिकसमायोजनार्थं समाजस्य मूलप्रकरणे आनयनम् इति । अत्र श्रीकृष्णः अपि मानसिकरूपेण विकारयुतं युद्धविमुखम् अर्जुनं समाजकल्याणाय प्रवृत्ते युद्धे युद्धार्थं सिद्धं कृत्वा समावेशितशिक्षायाः निदर्शनरूपेण भगवद्गीतां प्रतिष्ठापयति ।

**सन्दर्भग्रन्थसूची** (हिन्दी-पुस्तकानि)–


**१.** उच्चतर शिक्षा मनोविज्ञान, एस्. पी. गुप्ता शारदा पुस्तक भवन, इलाहावाद, २०१५.

२. भगवद्गीता (साधक-सञ्जीवनी टीका), स्वामी रामसुखदास, गीताप्रेस, गोरखपुर, ५१ तमपुनर्मुद्रणम्

**You Tube**

**1.** https://youtu.be/x-70xuW-UxA

**2.** https://youtu.be/y4ezaprV-ZE

3. https://youtu.be/0zZnXpEbGBA

**Google:** https://education.cu-portland.edu – Blog: Inclusive Education: Definition, Examples, and Classroom Strategies.


---

[1] भ. गी. – ६अ. ३५ श्लो.

[2] भ. गी. - ६अ. ४०-४५ श्लो.

[3] भ. गी. - १८अ. ७३ श्लो.

# सामुद्रिकशास्त्रे रेखाफलविचारः

**कुलदीपः**
शोधच्छात्रः, फलितज्यौतिषविभागः

हस्तस्य करतले प्राप्तानां रेखा-चिह्नादीनां तथा च अङ्गुष्ठ-अङ्गुली-मणिबन्धप्रभृतीनां विविधानाम् अङ्गानाम् आकृतीनाम् आधारेण कस्यचिदपि जातकस्य जीवन-सम्बन्धिनां शुभाशुभ-विषयाणां ज्ञानम् एव हस्तपरीक्षायाः अथवा Palmistry इत्यस्य उद्देश्यमस्ति । पाश्चात्त्यैः मनीषिभिः भारतीयसामुद्रिकशास्त्रं विविधवर्गेषु विभज्य तस्य मुख-परीक्षा, मस्तक-परीक्षा, लिपि-परीक्षा च इत्यादीनि पृथक्-पृथक् नामानि च दत्त्वा तेषां विषये स्वतन्त्ररूपेण चिन्तनं मननञ्च कृतम् । रेखालक्षणविषये उक्तमस्ति यत् मानवः सुख-दुःखे, लाभ-हानी, जय-पराजयौ, जीवन-मरणे, यशोऽपयशसीत्यादिकं रेखाबलेनैव प्राप्नोति । सर्वेषां हस्ते आयूरेखा, मातृरेखा, पितृरेखा, ऊर्ध्वरेखा (भाग्यरेखा) च इत्यादि प्राधानरेखाः वर्तन्ते । एतासां रेखाणां फलविचारः अधः प्रस्तूयते ।

**आयूरेखा (हृदयरेखा) –**



या रेखा कनिष्ठाङ्गुलीम् आरभ्य तर्जन्यङ्गुल्याः मूलाभिमुखं गमनं करोति तस्याः नाम आयूरेखा हृदयरेखा वा अस्ति । आयूरेखा छिन्ना वा भिन्ना नास्ति चेत् सः जनः १२० वर्षपर्यन्तं जीवितो भवति । इयं रेखा अनामिकामूलपर्यन्तं विस्तृता भवति तदानीं जातकस्य आयुः ५०-६० वर्षाणि भवन्ति । यदि इयं रेखा शृङ्खलावत् वर्तते तर्हि मानवः लम्पटः उत्साहहीनश्च भवति । स्त्रीणां मध्योन्नतं रक्तवर्णयुक्तं छिद्ररहितं कोमलम् अल्परेखायुक्तञ्च करतलं शुभदायकं भवति । स्त्रीणां बहुरेखायुक्तं करतलं वैधव्यदायकं भवति । रेखाविहीनः हस्तस्तु सदैव निर्धनतादायकः भवति । स्त्रीणां करतले शिराजालं स्यात् चेत् भिक्षाटनं कारयति । यथा उक्तम् –

**वैधव्यं बहुरेखाभिर्निर्धनत्वमरेखया ।**
**शिराभिर्भिक्षुवृत्तित्वं स्त्रीणां करतले भवेत् ॥**[1]

परं यासाम् आयूरेखा कनिष्ठिकामात्रं लङ्घति तासां पञ्चविंशतिवर्षाणाम् आयुः केवलम् उच्यते । यत्र कर्तनं

[1] बृहत्पाराशरहोराशास्त्रम्. ८१/४२


ISSN: 2320-740X

भवति तानि वर्षाणि कष्टयुक्तानि भवन्ति ।



**मातृरेखा** –आयूरेखायाः पार्श्वे या रेखा तर्जन्याः अधोभागात् निम्नप्रदेशं गता अस्ति, तस्याः नाम मातृरेखा वर्तते । यस्य हस्ते मातृरेखाद्वयं भवति सः जातकः सौभाग्यशाली, धनिकः, कुशलपरामर्शदाता च भवति तथा च ईदृशः रेखायुक्तः जातकः पैतृकसम्पत्तिमपि प्राप्नोति । इयं रेखा बुधस्थानाभिमुखं गच्छति चेत् जातकः वाणिज्ये व्यवसाये च लाभं प्राप्नोति। इयं रेखा यदि कनिष्ठानामिकयोर्मध्ये भवति तर्हि जातकः शिल्पकार्येण उन्नतिं प्राप्नोति । यदि सा रविस्थानपर्यन्तं भवति तर्हि जातकः शिल्पकार्यैः यशः प्राप्य सर्वेषां प्रियः भवति । मातृरेखा विषये उक्तम् –

**वक्ता स्वात्माभिमानी स्थिरमतिरहितः कार्यशक्तः पृथग्धीः**
**मातृरेखे यदा द्वे करकमलगते स्यात्तु मर्त्यो दयालुः।**
**जीवार्क-स्थानमुच्चैर्मृदुलतर-करावुक्त-दोषान्तकौ तौ**
**क्रूरो वा सद्विचारं वितरति सततं लक्षणज्ञाः वदन्ति॥**[1]

यदि भाग्यरेखां छित्त्वा इयं रेखा शनिस्थानाभिमुखी भवति तर्हि जातकस्य मृत्युः मस्तकघातेन भवति । सैव जीवनरेखायाः पार्श्वे चेत् मानवः श्वासरोगग्रस्तः भवति । अस्यां रेखायां बिन्दवः भवन्ति चेत् मानवः आविष्कारकर्ता अर्थात् वैज्ञानिकः भवति । परन्तु यदि यवचिह्नानि भवन्ति तर्हि मानवः वातरोगेण ग्रस्तो भवति ।



**पितृरेखा** – इयं रेखा जीवनरेखानाम्नाभिधीयते । या रेखा बृहस्पतिक्षेत्रस्य अधःस्थानात् आरभ्य हस्तस्य मध्यस्थानं प्रति गच्छति, अङ्गुष्ठस्य मूले स्थितस्य शुक्रस्य क्षेत्रं च पृथक् करोति सा जीवनरेखा, पितृरेखा इति वा व्यवह्रियते । प्राचां भारतीयानां मते तु इयं रेखा प्रगूढरेखा, पितृरेखा, गोत्ररेखा, मित्ररेखा, कुलरेखा, जीवनरेखा च इत्यादिभिः विविधैः नामभिः व्यवहृता च । अनया रेखया, मृत्युः, व्याध्यादिसमयस्य च ज्ञानं भवति । अन्यरेखाभिः जीवनसम्बद्धं यत् फलं निर्दिष्टं तस्य फलस्य पुष्टिः अपि अनया एव क्रियते । इयं रेखा विशालरक्तवाहिन्याः उपरि भवति आङ्ग्ले यत् Great Palmer Arch इति कथ्यते । अस्याः रक्तवाहिन्याः हृदयेन,

[1] सामुद्रिकरहम् पृ. सं. १३५, श्लो. सं. ३

उदरेण च सह सम्बन्धः भवति। अतः इयं जीवनशक्तिरेखा (Line of Vitality) इत्यपि व्यवह्रियते। यदि इयं रेखा विस्तृता विवर्णा च स्यात् तर्हि मानवः रुग्णः, नीचस्वभावयुक्तः, दुर्बलः, ईर्ष्यालुश्च भवति । यदि जातकस्य मातृरेखा पितृरेखा च परस्परं संयुक्ते वर्तेते तर्हि सः जातकः स्वाभिमानी, अभिनेता, व्याख्याता च भवति तथा च अविचार्य शीघ्रातिशीघ्रं कर्मणि प्रवृत्तो भवति । यदि मानवस्य हस्ते पितृरेखाद्वयं भवति तर्हि सः दीर्घायुः, विलासी, सुखी, कस्याः अपि स्त्रियाः धनस्य उत्तराधिकारी च भवति। यदि पितृरेखायाः अन्या कापि रेखा वक्रमयी भूत्वा चन्द्रप्रदेशं गच्छति तर्हि जातकः दीर्घजीवी, बुधस्थानं गच्छति चेत् व्यवसाये प्राप्तोन्नतिः च भवति। यदि पितृरेखायाः रेखाद्वयं निर्गत्य एका चन्द्रस्थानम् अपरा शुक्रस्थानं च गच्छति तर्हि सः मानवः स्वदेशं त्यक्त्वा विदेशं गच्छति । उक्तं यथा –

**पैत्री सुमध्याच्चलिता यदानीं शुक्रोच्चगा चेद्दिशदा विभाति ।**

**सोऽयं जनो गच्छति सर्वदेशं सौभाग्यशाली सरलस्वभावः ॥**[1]

**ऊर्ध्वरेखा –** हस्तमूलात्, मणिबन्धात्, पितृरेखामूलात् आरभ्य वा या रेखा मध्यमाङ्गुलीं प्रति गच्छति सा ऊर्ध्वरेखा भवति । यथा उक्तम् –

**मध्यां गता या मणिबन्धनोत्था रेखा यदा पाणितले विभाति।**

**तामूर्ध्वरेखां सुधियो भणन्ति साम्राज्यदात्रीं धनधान्यदां च ॥**[2]



प्राच्यैः सामुद्रिकशास्त्रिभिः इयं रेखा भाग्यरेखा, राज्यप्रदायिनीरेखा, विभवरेखा, धनरेखा, मध्यरेखा, नदरेखा इत्यादिभिः विविधनामभिः च वर्णिता अस्ति । इयं रेखा हस्तस्य अन्यरेखासु मुख्यतमा तथा च हस्तरेखाध्ययने विशिष्टं स्थानं भजते । अस्याः रेखायाः अध्ययनेन मानवस्य जीवने घटितानां प्रमुखघटनानां ज्ञानं प्राप्तुं शक्यते । यस्याः ऊर्ध्वरेखा पितृरेखातः उद्भूता वर्तते सा स्वकीयचेष्टया सुखं सौभाग्यञ्च प्राप्नोति। यस्य जातकस्य ऊर्ध्वरेखा हस्ततलमध्यभागादुत्थाय बुधस्थानं गच्छति सः जातकः काव्यवाणिज्यवाचकविज्ञानशास्त्रेषु च उन्नतिं लभते । इयं रेखा रविस्थानाभिमुखी भवति चेत् जातकः साहित्ये शिल्पशास्त्रे च यशः उन्नतिं च प्राप्नोति । यस्य हस्ते ऊर्ध्वरेखा न भवति सः आलस्ययुक्तः, उद्यमरहितः, दौर्भाग्यशाली च भवति । इयं रेखा यदि स्त्रीणां करतले पादतले च भवति तर्हि ताः चिरकालपर्यन्तं साध्व्यः, सौभाग्यवत्यः, पुत्रपौत्रवत्यश्च भवन्ति । यदि इयं रेखा तर्जनीपर्यन्तं गच्छति तथा रेखा स्पष्टचिक्कणलालिमायुक्ता च

---

[1] सामुद्ररत्नम् पृ. सं. १६४ श्लो. सं. १९४

[2] सामुद्ररत्नम् पृ. सं. १५३ श्लो. सं. ११८


ISSN: 2320-740X

भवति चेत् पुरुषजातकः राजदूतो भवति शतायुः च भवति । यथा उक्तम् –

**रेखाः प्रदेशिनिहताः शतायुषं कल्पनीयमूनाभिः।**

**छिन्नाभिर्द्रुमपतनं बहुरेखारेखिणो निःस्वाः॥**[1]

यदि इयं रेखा मध्यमाङ्गुलीपर्यन्तंगच्छति तर्हि जनः सुखी, वैभवशाली, पुत्रपौत्रयुक्तश्च भवति । यस्य जातकस्य ऊर्ध्वरेखा जीवनरेखातः आरब्धा, सः जातकः स्वकीयकृतप्रयत्नैः कठिनपरिश्रमेण अनुभवयोग्यतया च जीवने सफलतां प्राप्नोति । ईदृशस्य जातकस्य प्रारम्भिकं जीवनं काठिन्यपूर्णं भवति । यदि इयं रेखा जीवनरेखातः निर्गत्य सुस्पष्टा बलवती च भूत्वा अग्रे वर्द्धमाना वर्तते तर्हि सः जातकः कठिनपरिस्थितावपि विजयं प्राप्य, भाग्ये विश्वासम् अकृत्वा स्वकीयकठिनपरिश्रमेण अनुभवयोग्यतया च साफल्यं प्राप्नोति । यस्य जातकस्य ऊर्ध्वरेखा मणिबन्धस्थानात् आरभ्य हस्तस्य मध्यभागात् शनिक्षेत्रपर्यन्तं गच्छति सः जातकः जीवने प्रतिभावान्, सौभाग्यशाली च भूत्वा सफलतां प्राप्नोति । यस्य जातकस्य मणिबन्धादारब्धा ऊर्ध्वरेखा सरला भूत्वा, चन्द्रस्थानात् आगतया कयाचित् रेखया सह मिलति चेत् सः जातकः विपरीतलिङ्गव्यक्तेः साहाय्येन भाग्यवृद्धिं प्राप्नोति । यस्य जातकस्य ऊर्ध्वरेखा मस्तिष्करेखातः आरब्धा सः जातकः विलम्बेन परं स्वकीयमस्तिष्कसाहाय्येन सफलतां प्राप्नोति । यस्य जातकस्य ऊर्ध्वरेखा हस्तस्य मध्यभागतः आरब्धा भवति सः जातकः लक्ष्यप्राप्त्यर्थं काठिन्यपूर्णं संघर्षं जीवने करोति, परं यदि तस्याः रेखायाः शाखैका सूर्यस्थानं प्रति गच्छति तर्हि सः जातकः स्वकीयानुभवेन, पुरुषार्थेन, परिश्रमेण, योग्यतया च धनं, सफलतां च प्राप्य सुप्रतिष्ठितः भवति ।

**********

# उपनिष्क्रमणविधिः

**कृष्णकुमार द्विवेदी**

शोधच्छात्रः, फलितज्यौतिषविभागः

भारतीयसंस्कृतौ संस्कारेषु षोडश संस्काराः प्रमुखाः सन्ति । ते च निम्नलिखितास्सन्ति –

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।**

**नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥**

[1] बृहत्संहिता ६८/५०

**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।**

**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥**

**त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडश स्मृताः ।**[1]

इत्यत्रोक्तेषु षोडशसु संस्कारेषु निष्क्रमणसंस्कारस्य मुख्यं स्थानं वर्तते । शिशुं गृहात् प्रथमवारं बहिरानीय रविदर्शननिमित्तसंस्कारविशेषः निष्क्रमणसंस्कारः इति । उच्यते चापि – **उपनिष्क्रमणो नाम गृहात् प्रथमनिर्गमः**[2] इति । यथा प्रत्येकं संस्कारविशेषस्य प्रयोजनं भवति तथैव निष्क्रमणसंस्कारस्यापि प्रयोजनं वर्तते । निष्क्रमणविधेः प्रयोजनविषये बार्हस्पत्ये प्रोच्यते यदि शिशोः निष्क्रमणसंस्कारः न क्रियते तर्हि तस्य शिशोः श्रीवृद्धिः आयुर्वृद्धिश्च न भवति इति । यदि क्रियते चेत् श्रीवृद्धिः आयुर्वृद्धिश्च भवति । तद्यथा –

**अकृतायां क्रियायां वा श्रीरायुर्नाशनं शिशोः ।**

**कृते सम्पद्विवृद्धिः स्यादायुर्वर्द्धनमेव च** [3] इति ।

शिशूनां निष्क्रमणकालविषये मनुना उच्यते यत् चतुर्थे मासे शिशोः निष्क्रमणं कर्त्तव्यमिति । तद्यथा – **चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्** [4] इति । मनोरेव मतं श्रीगोविन्दभट्टत्तिरिणा मुहूर्त्तरत्नाख्ये ग्रन्थे निरूपितं वर्तते । तद्यथा – **चतुर्थे मासि कर्तव्यमुपनिष्क्रामणं शिशोः** [5] इति । प्रसङ्गेऽस्मिन् श्रीरामदैवज्ञेन भण्यते यत् शिशोः निष्क्रमणं चतुर्थे मासे यात्रोक्तकाले जन्मतः द्वादशदिने वा कर्त्तव्यम् । तद्यथा – **अथ निष्क्रमणं चतुर्थमासे गमोक्तसमयेऽर्कमितेऽह्नि वा स्यात्** [6] इति । मुहूर्त्तचिन्तामणिकारस्यैव मतं गणपतिना मुहूर्त्तगणपतौ प्रतिपादितं वर्तते । तद्यथा –

**तुर्ये निष्क्रमणं मासि यात्रोक्तदिवसे स्मृतम् ।**

**जन्मतो द्वादशाह्ने वा कुर्यान्मङ्गलपूर्वकम् ॥**[7] इति ।

---

[1] भारतीयसंस्कृतिः – पृ.सं. ६०

[2] बृहस्पतिसंहिता – १२.०१

[3] बृहस्पतिसंहिता – १२.०२

[4] मुहूर्त्तचिन्तामणिः – पृ.सं. १८४, मनुस्मृतिः – ०२.३४

[5] मुहूर्त्तरत्नम् – ०२.२६०

[6] मुहूर्त्तचिन्तामणिः – ०५.१५

[7] मुहूर्त्तगणपतिः – १४.५६

 ISSN: 2320-740X

यदि चतुर्थे मासि कारणवशात् शिशोः निष्क्रमणं न क्रियते तर्हि, अन्नप्राशनकाले शिशोः निष्क्रमणविधिं कुर्यादिति श्रीगोविन्दभट्टत्तिरिणा प्रोच्यते । तद्यथा –

**न क्रियेतोपनिष्क्रामो यदि मासि चतुर्थके ।**

**सहान्नप्राशनेनास्य काल उक्तोऽन्तरा न च ॥**[1] इति ।

एवं प्रकारेण मनु-गोविन्दभट्टत्तिरि-श्रीरामदैवज्ञ-गणपतिभिः नैकैः बुधैः निष्क्रमणार्थं चतुर्थः मासः कथितः । किन्तु, भोजराजेन शिशोः निष्क्रमणाय तृतीयः मासः प्रोक्तः । तद्यथा – **तृतीये मासि कर्त्तव्यं शिशोर्निष्कासनं गृहात्** [2] इति ।

एवं प्रकारण ज्ञायते यत् शिशोः निष्क्रमणमुहूर्त्तेषु कैश्चित् चतुर्थः मासः तृतीयो मासो वा स्वीकृतं वर्तते । अतः सम्प्रति कालेऽस्माभिः कदा शिशोः निष्क्रमणविधिः कार्यः इति प्रश्ने उदिते सति बुधैः कथ्यते यत् सर्वदा देशाचारस्यैव पालनं कर्त्तव्यम् । देशाचारविरुद्धं कार्यं कदापि नाचरणीयम् । उच्यते च –

**लोकाचारस्तावदादौ विचिन्त्यो देशे देशे या स्थितिः सैवकार्या ।**

**लोके दिष्टं पण्डिताः वर्जयन्ति दैवज्ञोऽतो लोकमार्गेण यायात् ॥**[3] इति ।

एवमेव स्मृतिष्वपि –

**कुलस्य देशस्य च चित्तवृत्तिर्न खण्डनीया विदुषा कदाचित् ।**

**दोषं गुणं वापि गुणञ्च दोषं यो भावयेज्ज्यौतिषिकः स चाज्ञः ॥** [4] इति ।

एवं प्रकारेण शास्त्रेषु शिशोः उपनिष्क्रमणविधिः प्रोक्तं वर्तते । अतः अस्माभिः शिशोः आयुःश्रीबलवृद्ध्यर्थमवश्यमेव निष्क्रमणसंस्कारः आचरणीयः ।

**आधारग्रन्थाः**

१. **भारतीयसंस्कृतिः** – आचार्यलोकमणिदाहालः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी- २२१००१

२. **राजमार्तण्डः** – डा. श्रीकृष्ण 'जुगनू', चौखम्बा संस्कृत सीरीज आफिस, वाराणसी – २२१००१

---

[1] मुहूर्त्तरत्नम् – ०२.२६१

[2] राजमार्त्तण्डः – श्लो.सं. २२४

[3] राजमार्त्तण्डः – श्लो.सं. ४०५

[4] राजमार्त्तण्डः – श्लो.सं. ४०६

३. **मुहूर्तगणपतिः** – डा. मुरलीधर चतुर्वेदी, मोतीलाल बनारसीदास, नई दिल्ली – ११०००७

४. **मुहूर्तचिन्तामणिः**– पं. श्रीकमलाकान्त ठाकुर, भारतीयविद्याप्रकाशनम्, वाराणसी – २२१००१

५. **मुहूर्त्तरत्नम्** – डा. ए. श्रीपादभट्टः, वराहमिहिरप्रकाशनम्, तिरुपतिः – ५१७५०७

६. **बृहस्पतिसंहिता** – डा. गिरिजाशंकर शास्त्री, चौखम्बासंस्कृतभवनम्, वाराणसी – २२१००१

७. **मनुस्मृतिः** – शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्बाविद्याभवनम्, वाराणसी – २२१००१

**********

# अग्निपुराणे रसमीमांसा

**ब्रजेश कश्यपः**

शोधच्छात्रः,साहित्यविभागः

अस्माकीना भारतीया संस्कृतिः वेदमूला । तत्र कालपर्ययात् मनुष्याणां मेधाशक्तेः ह्रासमुपलक्ष्य तेषां सरलतया वेदार्थावगमञ्चाऽभिलक्ष्य पुराणपुरुषेण भगवतो श्रीविष्णोरवतारभूतेन महर्षिणा श्रीकृष्णद्वैपायनेन व्यासेन पुराणानि व्यरच्यन्त । तत्र **वेद एव आख्यानात्मनावतिष्ठते** [1] । सङ्ख्यादृष्ट्या यद्यप्येषाम्भूयस्त्वं तथाऽपि येषां महत्त्वमाधिक्येन भवति तथाविधानां लब्धमहापुराणसंज्ञानां सङ्ख्याऽष्टादशैव । यद्यपि तेष्वष्टादशसु केषां महापुराणसंज्ञाभाक्त्वमिति विद्वत्सु विवादाऽस्पदमथ चानिश्चितम् । तथाऽपि सामान्यतः परम्परा एकेन कूटश्लोकेन स्थूलतया महापुराणपरिगणनविषयकं निर्देशमुपस्थापयति । तथाहि –

**मद्वयम्भद्वयञ्चैव ब्रत्रयं वचतुष्टयम् ।**

**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥** इति ।

एतेष्वन्यतममग्निपुराणम् । अस्य कालविषये यद्यपि विद्वत्सु द्विधा मतं विद्यते । एके पुराणमेतदर्वाचीनं मन्वते । अपरे पुनः पारम्परिकाः पुराणस्यास्य प्राचीनतामङ्गीकुर्वन्ति । भवतु नाम कालविषये विदुषां वैमत्यं किन्त्वस्य विश्वकोशत्वे विविधविद्याऽगारत्वे च न कस्यचिद्विमतिः । पुराणेऽस्मिन् त्र्यशीत्युत्तरत्रिशताध्यायेषु “अवतारवर्णनम्, रामकथा, कृष्णजन्माऽऽख्यानम्, महाभारताऽख्यानम्, सृष्ट्युत्पत्ति-मन्वादिवंशवर्णनम्, विविधाः कर्मकाण्डविधयः,

---

[1] वेदाख्यानोपनिबन्धनप्रायं पुराणमष्टादशधा । काव्यमीमांसा द्वितीयाध्याये ।

 ISSN: 2320-740X

विभिन्नानां पर्वतानां द्वीपानां तीर्थानाञ्च माहात्म्यवर्णनम्, श्राद्धवर्णनम्, ज्योतिःशास्त्रम्, युद्धविद्या, वर्णधर्मचर्चा, आचारचर्चा, वर्णाऽश्रमधर्मचर्चा, प्रायश्चित्तचर्चा, विविधाः पूजाविधयः, राजधर्माः, नीतिचर्चा, धनुर्वेदचर्चा, विविधराजवंशवर्णनम्, आयुर्वेदवर्णनम्, काव्यशास्त्रमीमांसा, व्याकरणकोशयोः योगशास्त्रस्य च वर्णनम्" इत्येते, एवंविधा अन्ये च बहवः विषयाः व्याख्याताः ।

पुराणेऽस्मिन् समुपनिबद्धासु बह्वीषु विद्यासु साहित्यविद्याया अपि प्रचुरं वर्णनं लभ्यते । तत्र सप्तत्रिंशदुत्तरत्रिशतसङ्ख्याकाद् अध्यायादारभ्य (337) सप्तचत्वारिंशदुत्तरत्रिशतसङ्ख्याकाध्यायपर्यन्तं (347) एकादशसु(11) अध्यायेषु काव्यशास्त्रसम्बन्धिनः विषयाः वर्णितास्सन्ति । तथाहि – पुराणस्यास्य काव्यशास्त्रीयेषु एकादशस्वध्यायेषु प्रथमे काव्यादिलक्षणम्, द्वितीये नाटकनिरूपणम्, तृतीये शृङ्गारादिरसनिरूपणम्, चतुर्थे रीतिनिरूपणम्, पञ्चमे नृत्यादिरङ्गनिरूपणम्, षष्ठे अभिनयादिनिरूपणम्, सप्तमे शब्दालङ्काराः, अष्टमेऽर्थालङ्काराः, नवमे शब्दार्थालङ्काराः, दशमे काव्यगुणविवेकः, एकादशे च काव्यदोषविवेक इत्येते विषयाः निरूपिताः । निरूपितेष्वेतेषु विषयेषु रसमीमांसाऽपि महद्वैलक्षण्यम्भजति ।

वाङ्मयं ध्वनि-वर्ण-पद-वाक्यमित्येतावन्मात्रं विद्यते । एतेष्वेव शास्त्राणि इतिहासः काव्यानि च परिसमाप्तिं यन्ति । एतेषु शास्त्राणि शब्दप्रधानानि भवन्ति । इतिहासे निष्ठताख्यो धर्मः प्राधान्यम्भजते । निष्ठता चार्थप्राधान्यम् इतिवृत्तपरता वा । काव्यञ्च शास्त्रेतिहासाभ्यां विभिद्यते वैशिष्ट्यात् । तच्च वैशिष्ट्यं धर्मनिष्ठम् । धर्मश्चाऽभिधाप्राधानः । काभिधात्रेति चेत् , अभिधीयतेऽर्थः प्रत्येयोऽनयेति । इयञ्चाऽभिधा कवित्वाऽनुप्राणिता एव । कवित्वाननुप्राणिता इतिहास एव इतिवृत्तनिर्वाहकतया अन्तर्भावात् । कवित्वञ्च कविसंस्कारानुविद्धहृदयशालित्वम् । कविसंस्कारश्चाग्निदेवेन यथाशास्त्रमुपदिश्यमानशास्त्राध्ययनजन्यविवेकः । तथा चोक्तमाकरेत्राग्निपुराणे -

**ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम् ॥**[1]

**शास्त्रेतिहासकाव्यानां त्रयं यत्र समाप्यते ।**

**शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ॥**[2]

**अभिधायाः प्रधानत्वात्काव्यं ताभ्यां विभिद्यते ।**[3] इत्यादीनि ।

पुनरस्य शास्त्रेतिहासाभ्यां विभिन्नस्य काव्यस्य शोभा कथङ्कारं जायते ? इत्यत्र ब्रूते । यथा दानक्रियामन्तरा

---

[1] अग्निपुराणम् - 337.1. ½

[2] अग्निपुराणम् - 337.2

[3] अग्निपुराणम् - 337.3. ½

लक्ष्म्याः शोभा न भवति तथैव रसं विना वाण्याः शोभा न भवति ।

**लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा ॥**[1] इति ।

अथ च महाकाव्यलक्षणे निरूप्यमाणे वाग्वैदग्ध्यस्य काव्ये प्राधान्येऽङ्गीकृतेऽपि रसस्यैव जीवितत्वं स्वीकृतम् । तथाहि –

**वाग्वैदग्ध्यप्रधानेऽपि रस एवाऽत्र जीवितम् ।**

**पृथक्प्रयत्ननिर्वर्त्यवाग्वक्त्रिम्णि रसाद्वपुः ॥**[2] इति ।

तर्हि कोऽयं रसाऽभिधः इति विषयेऽस्मिन् प्राचीनकालादद्यावधि बहुविवेचनं जातम् । तत्र आनन्दवर्द्धनादारभ्य व्यङ्ग्यत्वमाप्तस्य स्थायिभावस्य रसत्वप्रतिपादनपरम्परा अनवच्छिन्नप्रवाहम्प्रावर्तत व्यञ्जनावादिनामाचार्याणाम् । अनन्तरम्पण्डितराजेन जगन्नाथेन रससूत्रस्य व्यक्तिवादमतव्याख्यानाऽवसरे चिद एव रसत्वम्प्रतिपादितम् ।

**वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः ॥**[3] इति ।

इयं रसस्य ब्रह्मणा सहाऽभेदप्रतिपादनपरम्परा ब्रह्ममूलकत्वप्रतिपादनपरम्परा वा बीजरूपेण अग्निपुराणे एव लक्ष्यते ।

यदक्षरं सनातनमजं विभु परम्ब्रह्म वर्तते, वेदान्तेषु वेदान्तिनः यदेकं चैतन्यं ज्योतिः ईश्वरञ्च वदन्ति, यस्य चानन्दः सहज एव तद्ब्रह्म यदा व्यज्यते अर्थात्प्रकटतामापद्यते तदा तदेव प्रकटतामाप्तम्ब्रह्म चैतन्यचमत्काररसाख्यः भवति । तस्य प्रथमः विकारः अहङ्कारः कथ्यते । अहङ्कारादभिमानः जायते । एष चाभिमानः न साङ्ख्यदृशा अभिमताहङ्कारापरपर्यायः अपितु अत्राभिमानाहङ्कारयोः जन्यजनकभावोऽस्ति । अभिमानाद्रतिः उत्पद्यते । ये खल्वन्ये भावाः व्यभिचारिणः सात्त्विकाः अनुभावाः विभावाश्च तैः परिपोषमुपेयुषी अर्थात् पुष्टिं लब्ध्वा सतीयं रतिः शृङ्गारनाम्ना आख्यायते ।

**अक्षरं ब्रह्म परमं सनातनमजं विभुम् ।**

**वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ॥**[4]

**आनन्दः सहजस्तस्य व्यज्यते स कदाचन ।**

**व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया ॥**[1]

---

[1] अग्निपुराणम् - 339.9

[2] अग्निपुराणम् -337.33

[3] रसगङ्गाधरः - प्रथमाननम् (रससूत्रव्याख्या)

[4] अग्निपुराणम् – 339.1


ISSN: 2320-740X

**आद्यस्तस्य विकारो यः सोऽहङ्कार इति स्मृतः ।**

**ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम् ॥**[2]

**अभिमानाद्रतिः सा च परिपोषमुपेयुषी ।**

**व्यभिचार्यादिसामान्याच्छृङ्गार इति गीयते ॥**[3] इति ।

अत्र रसचतुष्टयप्राधान्यवादिसिद्धान्तोऽपि स्थापितः । परमात्मनः सत्वरजस्तमोगुणानां प्रसारादादौ चतसृभ्यः परमात्मवृत्तिभ्यश्चत्वारः रसाः जायन्ते । अनन्तरमेतेभ्यः स्वभावेभ्यश्चतुर्भ्यः रसेभ्य अन्ये चत्वारः रसा एकैकमुत्पद्यन्ते । तत्र (1) परमात्मनः रागप्राधान्याद् शृङ्गाररसः जायते । (2) तैक्ष्ण्यप्राधान्याद् रौद्ररसः जायते। (3) अवष्टम्भाद् वीररसः उत्पद्यते । (4) सङ्कोचाद् भयानकरसः समुत्पद्यते । तथाहि –

**सत्त्वाऽदिगुणसन्तानाज्जायन्ते परमात्मनः ।**

**रागाद्भवति शृङ्गारो रौद्रस्तैक्ष्ण्यात्प्रजायते ॥**[4]

**वीरोऽवष्टम्भजः सङ्कोचभूर्बीभत्स इष्यते ।**[5] इति ।

एवमेभ्यः स्वभावाज्जातेभ्यश्चतुर्भ्यः एव रसेभ्यः क्रमादन्ये रसा उत्पद्यन्ते । तथाहि – (1) शृङ्गाराद् हास्यरसस्योद्भवः । (2) वीररसाद् अद्भुतरसस्योद्भवः । (3) रौद्ररसात्करुणरसस्योद्भवः । (4) बीभत्साच्च भयानकरसस्योत्पत्तिः ।

**शृङ्गाराज्जायते हासो रौद्रात्तु करुणो रसः ॥**[6]

**वीराच्चाद्भुतनिष्पत्तिः स्याद्बीभत्साद्भयानकः ।**[7] इति ।

यद्यपि शान्तरसस्योद्भवः कस्माद्रसविशेषादिति अथवा साक्षादभिमानादेव वेति न स्पष्टतया विविक्तं तथाऽपि रसपरिसङ्ख्याने नव रसाः परिगणिताः । तथाहि –

---

[1] अग्निपुराणम् – 339.2

[2] अग्निपुराणम् – 339.3

[3] अग्निपुराणम् – 339.4

[4] अग्निपुराणम् – 339.6

[5] अग्निपुराणम् – 339.7.½ पूर्वार्द्धम्

[6] अग्निपुराणम् - 339.7.½ उत्तरार्द्धम्

[7] अग्निपुराणम् – 339.8.½ पूर्वार्द्धम्

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ॥**[1]

**बीभत्साद्भुतशान्ताख्याः स्वभावाच्चतुरो रसाः ।**[2] इति ।

भावानां रसस्य च मिथः सहकारिताख्यः सम्बन्धो भवति । साऽपि सहकारिता अविनाभावरूपेण तिष्ठति । तथाहि –

**न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।**

**भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति ॥**[3] इति ।

एवं रसविषयिणी अग्निपुराणीया मीमांसा रसस्य उत्तरवर्तिन्याः रसमीमांसायाः बीजभूतेति निश्चेतुं शक्यते ।

**सन्दर्भग्रन्थाः –**


1. अग्निपुराणम् – वेदव्यासः – गुरुमण्डलग्रन्थमाला 17 पुष्पम् , मुद्रकः – गोपाल प्रिन्टिंग वर्क्स, 87.ए, राजा दिनेन्द्र स्ट्रीट, कलकत्ता-6 ।
2. अग्निपुराण का काव्यशास्त्रीय भाग ( हिन्दी अनुवाद सहित ) – सम्पादकः अनुवादकश्च – रामलाल वर्मा शास्त्री, प्रकाशकः नेशनल पब्लिशिंग हाउस, 96, दरियागंज, दिल्ली - 7 ।
3. काव्यमीमांसा – राजशेखरः, सम्पादकः – सी.डी.दलालः आर.ए.शास्त्री च, प्रकाशकः – ओरियण्टल इन्स्टीट्यूट, बडौदा ।
4. रसगङ्गाधरः (नागेशभट्टकृतटीकासमेतः) – पण्डितराजजगन्नाथः, सम्पादकसंशोधकौ – पण्डितदुर्गाप्रसादः, काशीनाथशर्मा च । प्रकाशकः – निर्णयसागरप्रेस, मुम्बई ।


**********

[1] अग्निपुराणम् – 339.8.½ उत्तरार्द्धम्

[2] अग्निपुराणम् – 339.9 पूर्वार्द्धम्

[3] अग्निपुराणम् – 339.12

# वास्तुशास्त्रोक्तमानसाधनविचारः

**गणेशकृष्णभट्टः**

शोधच्छात्रः,फलितज्योतिषविभागः

गृह-देवालयादीनां निर्माणावसरे वास्तुशास्त्रज्ञाय मानानां ज्ञानम् अत्यावश्यकम् । विनैतेषामवलोकनेन यत्किमपि निर्मितं निर्मापितं वा तदा तस्यावश्यमसाफल्यं नाशो वा सम्भवेदिति शास्त्रवचः । अतः प्रमुखेषु वास्तुशास्त्रग्रन्थेषु प्रतिपादितानि मानानि इह सङ्गृह्यन्ते । तत्र च वास्तुविद्यायां यथा

**तत्रादौ सम्प्रवक्ष्यामि सर्वेषां मानसाधनम् ।**

**मानेनैवाखिलं लोके वास्तु संसाध्यते यतः ॥**[1]

इति । वास्तुविद्यायां मानानि परमाणुक्रमादुक्ताः । परमाणुभिरष्टाभिः रथरेणुः, तैरष्टाभिः वालाग्रम्, ततोऽष्टाभिः लिक्षा, ततः यूका, यूकाभिरष्टाभिः यवः, अष्टौ यवमध्या अङ्गुलमिति क्रमः वास्तुविद्याकारेण प्रोक्तः । पुनः अङ्गुलशब्दस्योक्तमानस्य मात्रमित्यपि संज्ञा विद्यते । द्वादशभिरङ्गुलैः वितस्तिर्जायते । वितस्तिद्वयेन एकः हस्तः, तस्यैव करः, किष्कुरित्यपि नामान्तरम् । एतच्च चत्वारिंशदङ्गुलात्मकम् । पञ्चविंशति मात्रात्मकाङ्गुलयुक्तस्य करमानस्य प्राजापत्यमिति संज्ञा । एवमेव षड्विंशत्यङ्गुलस्य धनुर्मुष्टिः, सप्तविंशस्य धनुर्ग्रहः, अष्टाविंशाङ्गुलस्य प्राच्यः, नवविंशतेः वैदेहः, त्रिंशदङ्गुलस्य वैपुल्यः, एकविंशतेः प्रकीर्णकः इत्येवम् अङ्गुलमानभेदात् एकस्य करमानस्य विविधाः संज्ञाः निरूपिताः ।

परन्तु तिलादिमानान्यधिकृत्य मनुष्यालयचन्द्रिकाकारः तिरुमङ्गलनीलकण्ठन्वर्यः एवं ब्रवीति -

**शिम्बिस्थाष्टतिलैर्यवोदरमितिप्राहुस्तदष्टोन्मितैः**
**मात्राख्याङ्गुलमङ्गुलैरिनमितैः प्रोक्ता वितस्तिस्तथा ।**
**तद्द्वन्द्वं करकिष्क्वरत्निभुजदोर्मुष्ट्यादिसंज्ञं तत-**
**स्त्वेकैकाङ्गुलवृद्धितोऽङ्गुलविशेषादप्यमो भिद्यते ॥**[2]

इत्यादिना शिम्बिस्थैरष्टतिलैरेकं यवोदरम्, अष्टयवोदरैरेकं मात्राख्यमङ्गुलम् द्वादशमात्राङ्गुलैरेकः वितस्तिः; वितस्तिद्वयेन

[1] वा. वि. – १अ. ०३श्लो.

[2] म. च. – ३अ. ०१श्लो.

एकः करः भवति । तस्यैव किष्कुः,अरत्निः, भुजः, दोस्, मुष्टिरित्यादि संज्ञाः विद्यन्ते । एतच्च चतुर्विंशत्यङ्गुलात्मकं वर्तते । पञ्चविंशत्यङ्गुलस्य प्राजापत्यम् षड्विंशत्यङ्गुलस्य धनुर्मुष्टिः, सप्तविंशतेः धनुर्ग्रहम्, अष्टाविंशस्य प्राच्यम्, नवविंशत्यङ्गुलस्य वैदेहः, त्रिंशतः वैपुल्यः, एकविंशतः प्रकीर्णकः इत्येवं मानानां संज्ञाः प्रोक्ताः । इत्थमत्र अष्टतिलोदरैः एकः यवः इत्यनेन यवमानादारभ्य मानानि गणितानि ।

समराङ्गणसूत्रधाराख्ये ग्रन्थे श्रीभोजराजेनापि मानानां विषये निरूपितं वर्तते । तेनादौ परमाण्वारभ्य दण्डपर्यन्तं लक्षणमुक्त्वा परम् अङ्गुलभेदात् हस्तप्रमाणेऽपि वैविध्यं जायते इति प्रतिपादितम् । पुनश्च तेन एकाद्यङ्गुलेभ्यः संज्ञाः कथिताः यथा – एकाङ्गुलस्य मात्रा, अङ्गुलद्वयस्य कला, त्रयाणां पर्व, चतुर्णां मुष्टिः, पञ्चानां तलम्, षडङ्गुलानां करः इति । सप्ताङ्गुलानां दिष्टिः, अष्टाङ्गुलानां तूणिः, नवानाम् अङ्गुलानां प्रादेशः, दशाङ्गुलानां शयताला, एकादशाङ्गुलस्य गोकर्णः, द्वादशस्य वितस्तिः, चतुर्दशाङ्गुलस्य पादेति च नामानि अभिहितानि । एकविंशत्यङ्गुलमानस्य रत्निरितिसंज्ञा । चतुर्विंशत्यङ्गुलानामरत्निः इति संज्ञा यच्च करप्रमाणमितं भवति । चतुरशीत्यङ्गुलानां व्यामः पुरुषः, षण्णवत्यङ्गुलानां चापः, षष्ट्युत्तरशताङ्गुलानां पुनः इति च संज्ञाः । चापत्रयप्रमाणमितस्य नल्वेति, सहस्रचापप्रमाणस्य क्रोश इति संज्ञा । क्रोशद्वयस्य गव्यूतिरिति, गव्यूतिचतुष्टयस्य एकं योजनं च भवति ।[1]

पूर्वं यः **'करः'** इत्युक्तः तत्र करस्तु यजमानस्य शिल्पिनः वा स्वीकरणीयः इति चेत् शिल्परत्नाख्ये ग्रन्थे श्रीकुमारः कथयति यत् –

**तद्भर्तुर्दक्षिणकरमध्यमामपर्वणः ।**
**दैर्घ्यं मात्राङ्गुलं श्रेष्ठं नीचं तद्व्याससम्मितम् ॥**[2]

अर्थात् तद्भर्तुरित्यस्य गृहालयादीनां निर्मातुः यजमानस्य इत्यर्थः । मयमतनामके ग्रन्थे मयोऽपि कथयति–

**मध्यमाङ्गुलमध्यस्थपर्वमात्रायतं तु यत् ।**
**कर्तुर्मात्राङ्गुलं प्रोक्तं यागादीनां प्रशस्यते ॥**[3]

**दण्डलक्षणम् –** सम्प्रति वास्तुविद्यायां दण्डलक्षणमुच्यते –

**उत्तरेण जगत्या वा जन्मना वा प्रकीर्तितः ।**

---

[1] स. सू. – ९ अ. ४६-४७ श्लो.

[2] वा. वि. - १ अ. ०५-०६ श्लो. व्याख्याने

[3] म. म. – ५ अ. ११-१२ श्लो.

 ISSN: 2320-740X

**दण्डस्तु सुरधिष्ण्येषु मानुष्येषु चतुष्करः ॥** [1]

अत्र देवालयस्य बाह्यात् बाह्यम् उत्तरद्वयमध्यवर्तिनं स्थानम् अर्थात् गर्भगृहसमानं विस्तारप्रमाणं उत्तमदण्डत्वेन कथ्यते । जगत्या बाह्यात् बाह्यं विद्यमानस्य स्थानस्य विस्तारप्रमाणं मध्यदण्डत्वेनोच्यते । पादुकाद्वयस्य बाह्यात् बाह्यं विद्यमानं मध्यवर्तिविस्तारप्रमाणम् अधमदण्डत्वेन वाच्यः । देवालयेषु प्रासादात् अर्थात् गर्भगृहात् बहिः पञ्च प्राकारान् अनेनैव दण्डप्रमाणेन विनिश्चयेत् ।[2] अनेनैव क्रमेण मनुष्यालयचन्द्रिकायां दण्डलक्षणं पञ्च प्राकाराश्च निरूपिताः ।[3]

**मानानां विनियोगः –** मानानां विनियोगस्थानानि यथा निरूपितानि - याने शयने च किष्कुमानम्, विमानदेवालयानां प्राजापत्यम्, गृहादीनां च मापने धनुर्मुष्टिः, ग्रामपुरादीनां मापने धनुर्ग्रहः इति सर्वसाधारणः पक्षः । वर्णभेदेनापि कुत्रचित् मानानां विनियोगः दृश्यते । तत्र धनुर्ग्रहः-प्रकीर्णकश्च विप्रस्य, वैपुल्यः-धनुर्मृष्टिश्च क्षत्रियस्य, प्राजापत्यः-वैदेहश्च वैश्यस्य, किष्कुः-प्राच्यश्च शूद्रस्य भवति । एवं प्रकारेण वस्त्रादीनां वितस्तिना, देवप्रतिमानां तालेन, यज्ञशालादीनां दण्डेन, स्रुक्-स्रुव-कुण्ड-मण्डलादीनां मात्राङ्गुलेन च मापनं कर्तव्यम् । हस्तेन येषां मापनं कर्तुं न शक्यते (अर्थात् लघुकायानां वस्तूनां) तेषां मापनमङ्गुलैः कार्यम् । तैरप्यशक्यत्वे(अत्यन्तलघुकायानां वस्तूनां) यव-तिलादिना माप्यम् । मनुष्यालयचन्द्रिकायामपि एष एव विचारः निरूपितः ।

इत्थं बहुषु वास्तुशास्त्रीयग्रन्थेषु मानवजीवनोपयोगिनां विविधानां मानानां विषये निरूपितम् । एते विषयाः शतमानान्तरे प्रतिपादिताश्चेदपि तत्तत्काले वास्तुविद्भिः अवश्यं ज्ञातव्या एव ।

**<u>आधारग्रन्थसूची –</u>**


1. वा. वि. - वास्तुविद्या - डा.श्रीकृष्ण जुगनू, चौखम्बा संस्कृत सीरीज आफिस,2009
2. म. च. - मनुष्यालयचन्द्रिका - सिद्धमूले शङ्करनारायणभट्टः, मुनियङ्गल कृष्णभट्ट संस्मरण वेदिके, 2001
3. म. म. - मयमतम् - डा. श्रीमती शैलजा पाण्डेय, चौखम्बा सुरभारती प्रकाशन, 2007
4. स. सू. - समराङ्गणसूत्रधारः - डा.श्रीकृष्ण जुगनू/ प्रो.भँवर शर्मा, चौखम्बा संस्कृतसीरीज आफिस, वाराणसी, 201


**************

[1] वा.वि – १ अ. ११ श्लो.

[2] पञ्च प्राकाराः इमे स्युः - १) अन्तर्मण्डलम् २) अन्तहारः ३) मध्यहारः ४) बाह्यहारः ५) मर्यादा इति ।

[3] म.च – ३ अ. २०-२१ श्लो.

# पदशक्यविचारपराणां यववराहाद्यधिकरणानां विषयभेदविमर्शः

**गोविन्द गोपालकृष्ण हेगडे**

शोधच्छात्रः,मीमांसविभागः

द्वादशाध्यायात्मकपूर्वमीमांसायां प्रथमाध्याये तृतीयपादे चतुर्थपञ्चमाधिकरणयोः पदशक्यविचारः निरूपितः । आर्यम्लेच्छाधिकरणे, त्रिवृच्चर्वश्ववालाधिकरणे, पिकनेमाधिकरणे च पदशक्यविचार एव निरूपितः। एकस्यैव विषयस्य बहुषु अधिकरणेषु निरूपणे युक्तिः कः? विषयभेदादधिकरणभेदविषयः निरूप्यते ।

**आर्यम्लेच्छाधिकरणसंक्षेपः** – पूर्वमीमांसायाः प्रथमाध्यायस्य तृतीयपादस्य चतुर्थाधिकरणम् । प्रयोगरूपाचारस्य यत्रार्यम्लेच्छयोः परस्परार्थविप्रतिपत्तिः । यथा पीलुशब्दस्य आर्याणां वृक्षविशेषे प्रयोगः, अन्येषां हस्तिनि प्रयोगः दृश्यते । आर्यम्लेच्छयोः तुल्यबलत्वम् अभ्युक्तत्वाविशेषात् । तथा च पीलुशब्दस्य उभयत्रापि शक्तिः इति चेन्न । शक्यतावच्छेदकभेदेन अनेकशक्तिकल्पनाप्रसङ्गात् एकत्रैव शक्तिः उचिता । न च विनिगमनाविरहः । आर्यप्रसिद्धेरेव नियामकत्वात् । आर्याः शब्दैकसमधिगम्यधर्माधर्मयोरविप्लुतिलिप्सया शब्दार्थतत्त्वं विविच्य परिपालयन्ति । अतः आर्यप्रसिद्ध्या पीलुशब्दस्य वृक्षविशेषे एव शक्तिः । गजप्रतीतिस्तु लक्षणया शक्तिभ्रमाद्वा । यत्र नियामकाभावः तत्र उभयत्रापि शक्तिः । यथा अक्षादिशब्देषु आर्याणामेव उभयत्र प्रयोगात् उभयत्र शक्तिः । तत्रापि वाक्यशेषस्य क्वचित् नियामकत्वम् । यवशब्दस्य दीर्घशूकविशिष्टे प्रियङ्गुषु च प्रयोगे **यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति** [1] इति वाक्यशेषात् यवशब्दस्य दीर्घशूकविशिष्टे शक्तिः ।

**त्रिवृच्चर्वश्ववालाधिकरणसंक्षेपः** – त्रिवृच्चर्वश्ववालादिशब्देषु लोकवाक्यशेषयोः अर्थविप्रतिपत्तिः । तत्र पदपदार्थसंबन्धे लोकाद्वेदस्याधिक्ये प्रमाणाभावात् तुल्यबलत्वम् । विधिस्तुत्योः विषयैक्याभावे एकवाक्यत्वानुपपत्तेः विधिः वाक्यशेषस्यैव शक्तिग्राहकत्वमनुमन्यते । तथा च त्रिवृच्छब्दस्य वाक्यशेषात् स्तोत्रगतऋङ्नवकमित्यर्थः, न तु लोकात् त्रित्वमर्थः । एवं चरुशब्दस्य ओदनः न तु स्थाली, अश्ववालशब्दस्य काशाः न अश्वकेशाः इति ।

**पिकनेमाधिकरणसंक्षेपः**– पिकनेमसततामरसादिशब्दानां नार्याणामर्थप्रसिद्धिः म्लेच्छेषु तु पिकः कोकिलः इत्येवं प्रसिद्धिर्वर्तते । तत्र पिकादिशब्दानां अर्थविशेषप्रतीतिः निगमनिरुक्तादिना कल्पनीयम् उत म्लेच्छप्रसिद्ध्या इति चेत्

[1] शाबरभाष्यम् – १-१-६ (यववराहाधिकरणम्)

 ISSN: 2320-740X

यद्यपि म्लेच्छेषु शब्दार्थयोर्विप्लुतिदर्शानात् तत्प्रसिद्धेरविस्रम्भणीयता, तथापि म्लेच्छप्रसिद्धेः क्लृप्तत्वात् निगनिरुक्तादीनां कल्प्यत्वात् कल्प्यापेक्षया क्लृप्तस्य प्राबल्यात् म्लेच्छप्रसिद्ध्या एव शक्तिग्राहकत्वम् । म्लेच्छप्रसिद्धेः म्लेच्छप्रसिद्धित्वेन दौर्बल्येऽपि क्लृप्तत्वेन प्राबल्यम् । अतः पिकः कोकिलः, नेम अर्धम् , सतं बृहत् परिमण्डलं शतच्छिद्रं दारुपात्रम् , तामरसं कमलम् इति म्लेच्छप्रसिद्ध्या पिकादिशब्दैः अर्थप्रतीतिः भवति ।

एवं रूपेण त्रिषु अधिकरणेषु पदशक्यविचारः एव निरूपितः । तत्र यद्यपि एक एव विषयः सामान्यतः त्रिषु अधिकरणेषु निरूपितः । किन्तु आर्यम्लेच्छाधिकरणे यत्र पीलुशब्दादौ आर्यम्लेच्छयोः प्रसिद्धिः तत्र आर्यप्रसिद्धेः नियामकत्वम् । तथा च पीलुशब्दस्य वृक्षविशेषः अर्थः । एवं त्रिवृच्चर्वश्ववालाधिकरणे लोकवाक्यशेषयोः अर्थविप्रतिपत्तिः तत्र वाक्यशेषस्य नियामकत्वम् । अतः पूर्वाधिकरणापेक्षया विषयभेदः स्पष्टः । एवं पिकनेमाधिकरणे यत्र आर्यप्रसिद्धिरेव नास्ति । केवल म्लेच्छप्रसिद्धिमात्रं तत्र न निगमनिरुक्तादिना अर्थबोधः। किन्तु प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य प्राबल्यात् म्लेच्छप्रसिद्ध्या एव अर्थप्रतीतिः । अतः प्रत्यधिकरणे विषयभेदः स्पष्टः इत्यतः पदशक्यविचारपराणां यववराहाद्यधिकरणोक्तविषयाणां भिन्नेषु अधिकरणेषु निरूपणं कृतम् ।


**आकराः**

| | |
|---|---|
| भाट्टदीपिका | जैमिनीयन्यायमाला |
| शाबरभाष्यम् | शम्भुभट्टीयम् |


**********

# योगः धर्माध्यात्मविज्ञानसङ्गमः


**वाणी मञ्जुनाथ हेगडे**

शोधच्छात्रा, नव्यन्यायविभागः


मानवस्य आविष्कारिणी बुद्धिः प्रतिक्षणं नूतनं किञ्चन चिन्तयितुं भवति यतमाना। जीवनस्य सर्वविधस्यापि पक्षस्य चिन्तनं मानवेन क्रियते। सुखदुःखादीनाम् अनुभूतौ सर्वदा मानवः स्वसौकर्यकल्पनाय विविधान् प्रयासान् करोति। केषुचित् प्रयासेषु साफल्यं लभ्यते केषुचिन्न च लभ्यते। लब्धे साफल्ये हर्षानुभूतिः, असाफल्ये तु क्वचित् दुःखं क्वचित्समत्वं क्वचिच्च असहनतैव दृश्यते। सुखोत्पादकस्य भोगरूपिणः सौकर्यस्य लाभोऽपि क्षणिक एवेति कृत्वा

शाश्वतः पन्थाः कश्चन भारतीयैः आर्षपरम्परया आश्रीयते। स च पन्थाः मोक्षाख्यः। आम्! मोक्ष एव अस्माकं भारतीयानां चरमं लक्ष्यं जीवनस्य। तदर्थं विविधाः सरण्यः आलम्ब्यन्ते तत्प्रेप्सुभिः। तादृशमोक्षसम्प्राप्त्यै धर्मस्य, अध्यात्मं (अध्यात्मम् इत्यस्य) विशिष्टस्य ज्ञानस्य च आवश्यकता कस्मैचित् साधकाय भवति। धर्माचरणं विना अशक्यः अध्यात्मप्रवेशः। अध्यात्मञ्च विना अशक्या विशिष्टज्ञानसम्प्राप्तिः। अथ च यदि कश्चन तादृगुपायः लभ्येत येन मोक्षसाधनायै उक्तस्य त्रिकस्य (धर्माध्यात्मविज्ञानस्य) युगपत् सम्प्राप्तिः स्यात् तर्हि निश्चप्रचमेव कश्चन साधकः तत्पालनद्वारा मोक्षसरणिम् आरोहेत्। यद्यपि अस्मद्वाङ्मये स्युः तदर्थम् अनेकोपायाः तथापि प्रबन्धे अत्र धर्मादीनां सम्बन्धस्थापनपूर्वकम् उपायत्वेन आर्षोक्तः योगमार्गः उपस्थाप्यते। योगेनैव च धर्मादित्रिकस्य सम्भवः सम्प्राप्तिर्वा इति च प्रतिपाद्यते।

**योगः** - तत्रादौ समासेन योगविषये उच्यते – योगो हि आत्मनः परमात्मना योजनम्। अथवा जीवनस्य दायित्वम् अवगम्य तत्तत्समये अपेक्षितकर्मसु श्रद्धया आत्मनो व्यापारः योगः। अथवा आर्षजनोपदिष्टपरम्परायाः निर्वहणं योगः। अथवा वेदादिशास्त्राणाम् अवधारणं व्यवहारे चानयनं योग एव। वस्तुतः धर्मस्य, अध्यात्मं, विज्ञानस्य च पर्याय एष योगः इति महतां हि साधकानाम् अनुभूतिः। पतञ्जल्यादिभिः मनीषिभिः अयं योगः सकलजनहिताय निर्दिष्टः। अस्मिन्नेव च धर्माध्यात्मविज्ञानादीनां क्रमशः सोपानानि व्यरचिषत। तदिदानीं विचार्यते योगेन धर्मादित्रिकस्य लाभः योगस्य धर्मादिवत्त्वं वा।

**योगेन धर्मलाभः** – धृतिः, क्षमा, दमः, अस्तेयं, शौचः, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधः इत्याद्येवं दशधा धर्मः[1] प्रतिपाद्यते स्मृतिषु। धर्मलक्षणान्तराणि अपि प्रायशः अस्मिन् दशधोक्तधर्मलक्षणे अन्तर्भवन्ति। एतादृशस्य च धर्मस्य लाभाय योगः एकः उत्तमः मार्गः। तद्यथा – महर्षिणा पतञ्जलिना मानवजीवनस्य सकलक्षेमाय वेदादुद्धृत्य योगानुशासनमकारि। तत्रादौ धर्मस्य प्रथमे सोपाने आरोहणाय चित्तवृत्तिनिरोधप्रकारः[2] उपादेशि। इहैव चानुशासने अष्टावङ्गानि[3] योगस्य प्रत्यपादिषत। इमानि यमनियमादीन्यष्टावङ्गानि वस्तुतः धर्मस्य एव पर्यायभूतानि। यां विना धर्ममार्गे प्रसरणारम्भ एव न भवति सा **अहिंसा**[4] यमाख्ये आद्ये एव सोपाने उपात्ता। अत एव **अहिंसा परमो धर्म** इति

---

[1] मनु.स्मृ .६.९

[2] योगश्चित्तवृत्तिनिरोधः )यो.द.स.पा.१(

[3] यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि )यो.द.सा.पा.२९(।

[4] अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः )यो.द.सा.पा.३०(

 ISSN: 2320-740X

कथ्यते। ततश्च योगदर्शने **सत्यम्, अस्तेयम्, ब्रह्मचर्य्यम्, अपरिग्रहः, शौचः, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम्** इत्यादय उपायाः क्रमेणोक्ताः, ये च धर्मात् न कथमपि व्यतिरिच्यन्ते। अतः धर्माचरणाय योगालम्बनम् अवश्यम् अस्माभिः कार्यम्।

**योगेन अध्यात्मलाभः –** अध्यात्मं नाम आत्मनि। तन्नाम आत्मा कः? कुत आयातः? कस्य अंशः? देहत्यागात् परं क्व अस्य विलीनता? इत्यादीनां प्रश्नानाम् उत्तरान्वेषणम् अध्यात्मनि अन्तर्भवति। अध्यात्मलाभाय च योगः सुमार्ग इति तपस्विनां महताम् आशयः। तद्यथा यमनियमासनप्राणायामादिबहिरङ्गयोगस्य अनुष्ठानात् परं यदा साधकः धारणाद्यन्तरङ्गयोगक्षेत्रे प्रवेशाय उद्युक्तः भवति तदैव स तस्य आत्मनि विद्यमानानां रहस्यानां परिचयं प्राप्नोति। तत्रादौ तेन सर्वाणि इन्द्रियाणि स्वविषयेभ्यः विमुखीकृत्य स्थिरेण चित्तेन सह संयोज्य प्रत्याहार[1]स्थितिः प्राप्यते। ततः कस्मिँश्चिद् देशविशेषे चित्तं बद्ध्वा **धारणा**[2] प्राप्यते। ततः समाधेः[3] स्थितौ आत्मसाक्षात्कारस्य प्राप्तिः क्रियते। यश्च साधकः आत्मसाक्षात्कारे सफलः तस्मै अध्यात्मनि विद्यमानः यः कोऽपि विषयः अप्राप्यः न भवति। अतः यदि योगक्रमानुसारं कश्चित् सोपानशः साधनायां प्रवृत्तः भवति तर्हि निश्चयेन अध्यात्मसम्प्राप्तिः जायते।

**योगेन विज्ञानलाभः –** विशिष्टं ज्ञानं विज्ञानम्। आधुनिके युगे यन्त्रतन्त्रसमन्वितप्राविधिकपरिवेशाय विज्ञानम् इति संज्ञा प्रदीयते। परन्तु कस्यापि विषयस्य विशेषेण ज्ञानमपि विज्ञानं भवितुमर्हति। योगे अपि बहुविधं विशिष्टं ज्ञानं सन्निहितं वर्तते। तद्यथा ईश्वरेण प्रदत्तं शरीरं नूनमेव कस्माचित् यन्त्रात् न्यूनं नास्ति। अस्य च साऽऽरोग्यं व्यवस्थापनं विज्ञानाधीनमेव वर्तते। योगदर्शने तावत् प्राणायामाख्यं[4] विज्ञानं शरीरयन्त्रस्य संरक्षणाय महर्षिणा निरदेशि। शरीरयन्त्रं चेदं यदि स्वस्थं तर्हि सर्वविधविज्ञानस्य अवगमनं प्रतिपादनं वा न जात्वपि दुष्करम्। न केवलं शरीरविज्ञानमेव अपि तु **भुवनज्ञानं**[5]**, ताराव्यूहज्ञानं**[6]**, कायव्यूहज्ञानम्**[7] **आकाशगमनञ्च** [8] इत्यादीनि विज्ञानानि योगविद्यायां सन्निहितानि

---

[1] स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः )यो.द.सा.पा.५४(

[2] देशबन्धश्चित्तस्त धारणा )यो.द.वि.पा.०१(

[3] तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः )यो.द.सा.पा.५४(

[4] तस्मिन्सति श्वासप्रश्वासयोर्गतिच्छेदः प्राणायामः )यो.द.सा.पा.४९(

[5] भुवनज्ञानं सूर्ये संयमात् )यो.द.वि.पा.२६(

[6] चन्द्रे ताराव्यूहज्ञानम् )यो.द.वि.पा.२७(

[7] नाभिचक्रे कायव्यूहज्ञानम् )यो.द.वि.पा.२९(

[8] कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् )यो.द.वि.पा.२६(

वर्तन्ते।

एवञ्च वयं वक्तुं शक्नुमः यत् योग एव धर्मः अस्ति, योग एव अध्यात्मम् अस्ति योग एव च विज्ञानमस्ति ।

<u>**सन्दर्भग्रन्थसूचिः –**</u>


1. यो.द. - योगदर्शनम्, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
2. स.पा. - समाधिपादः, अमरस्वामिप्रकाशनम्, गाजियाबाद, उत्तरप्रदेशः
3. स.पा. - साधनापादः
4. भो.वृ. - भोजवृत्तिः
5. म.स्मृ. - मनुस्मृतिः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
6. भ.गी. - भगवद्गीता, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी


**********

# कादम्बर्यां परिसङ्ख्यालङ्कारः


**सूर्यः हेब्बार् ए,**

शोधच्छात्रः, साहित्यविभागः


विशाले अलङ्कारप्रपञ्चे अनेके अलङ्काराः आलङ्कारिकैः प्रपञ्चिताः। परन्तु अलङ्कारग्रन्थाद् ऋते अन्यत्र काव्येषु अलङ्काराणां परिशीलनार्थं महान् उद्यमः करणीयः। यद्यपि उपमाविरोधाभासादीनां -अतिशयोक्ति-उत्प्रेक्षा-रूपक-प्रसिद्धानाम् अलङ्काराणाम् उदाहरणानि काव्यग्रन्थेषु भूरिशः दृश्यन्तेसमाधिः ,मीलितं ,अर्थापत्तिः ,तथापि परिसङ्ख्या , अवज्ञा इत्यादीनाम् अलङ्काराणाम् उदाहरणानि विरलतया एव दृश्यन्ते । यदि ईदृशालङ्कारान् काव्येषु पश्यामः तर्हि इमे अलङ्काराः अन्येन केनचिदलङ्कारेण सह सङ्करेण संसृष्ट्या वा युक्ताः भवन्ति । परन्तु शुद्धस्य कस्यचिद् अप्रसिद्धस्य अलङ्कारस्य उदाहरणं द्रष्टव्यं चेत् प्रायेण बाणभट्टः एव शरणीकरणीयः । काव्यरचनायाः निकषरूपे गद्यकाव्यरचने बाणभट्टस्तु सिद्धहस्तः । बाणभट्टस्य रचनाः आकारेणापि महत्यः । अतः बाणोच्छिष्टं जगत्सर्वम्। बाणभट्टकृतिषु प्रायेण बहूनाम् अप्रसिद्धानाम् अलङ्काराणां स्फुटानि उदाहरणानि उपलभ्यन्ते। तेषु परिसङ्ख्यालङ्कारोऽपि अन्यतमः ।

परिसङ्ख्यायाः लक्षणं उदाहरणं च कुवलयानन्दे अप्पय्यदीक्षितैः इत्थं प्रदर्शितम् ।

**परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयन्त्रणम् ।**

**स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ॥** इति।[1]

कस्यचिद् वस्तुनः स्थितिम् एकत्र निषिद्ध्य तस्यैव वस्तुनः स्थितिः अन्यत्र वर्ण्यते चेद् सः परिसङ्ख्यालङ्कारः भवति । यथा प्रदीपेषु स्नेहक्षयः भवति । कामिनीनां मनस्सु स्नेहक्षयः न भवति इति । अत्र स्नेहशब्दस्य तैलरूपं प्रेमरूपं च अर्थं गृहीत्वा अलङ्कारोऽयम् उपनिबद्धः ।

कादम्बर्याः कथामुखे एव बाणभट्टः अमुम् अलङ्कारं प्रयुङ्क्ते । विशेषो नाम बाणभट्टः धाराप्रवाहरूपेण बहुषु वाक्येषु निरन्तरं समानम् अलङ्कारम् प्रयुङ्क्ते। तेन काव्यस्य सौन्दर्यम् अतिशयितं भवति। यथा बहुभिः समानरूपैः कङ्कणैः नारी शोभते तद्वत् बाणस्य काव्यमपि समानेन अलङ्कारेण शोभते । कथामुखे हारीताश्रमवर्णने बाणभट्टः परिसङ्ख्यालङ्कारमपि प्रयुङ्क्ते। सामान्येन आश्रमादीनां वर्णने कालिदासादयोऽपि महाकवयः स्वभावोक्तिमेव आश्रयन्ते । तद्यथा शाकुन्तले—

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः**
**प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।**
**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा**
**स्तोयाधारपथाश्च वल्कलशिखानिस्स्यन्दरेखाङ्किताः॥**
**कुल्याम्बोभिः पवनचपलैः शाखिनो धौतमूलाः**
**भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।**
**एते चार्वागुपवनभुविच्छन्नदर्भाङ्कुरायां**
**नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥**[2]

अत्र कालिदासेन कण्वाश्रमवर्णने श्लोकद्वयं प्रयुक्तम् । परन्तु उभयत्रापि समासोक्तिरेव निबद्धा । बाणभट्टस्तु जाबाल्याश्रमवर्णने अप्रसिद्धं परिसङ्ख्यालङ्कारं प्रयुङ्क्ते । तद्यथा-

**यत्र च मलिनता हविर्धूमेषु न चरितेषु ,तीक्ष्णता कुशाग्रेषु न स्वभावेषु ,मुखरागः शुकेषु न कोपेषु , ,कण्ठग्रहः कमण्डलुषु न सुरतेषु ,चक्षूरागः कोकिलेषु न परकलत्रेषु ,चञ्चलता कदलीदलेषु न मनःसु मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु ,पक्षपातः कृकवाकुषु न विद्याविवादेषु ,स्तनस्पर्शो होमधेनुषु न वनितासु , ,गणना रुद्राक्षवलयेषु न शरीरेषु ,वसुसङ्कीर्तनं दिव्यकथासु न तृष्णासु ,भ्रान्तिरनलप्रदक्षिणेषु न शास्त्रेषु**

[1] कुवलयानन्दे 112 तमः अलङ्कारः

[2] अभिज्ञानशाकुन्तलम् 15 ,14

**रामानुरागो रामायणेन न यौव ,मुनिबालनाशः क्रतुदीक्षया न मृत्युनानेनविकारो जरया न धनाभिमानेमुखभङ्ग , ।**
[1]इति । अत्र बाणभट्टः मलिनतादीनां निषेधं चरितादिषु कृत्वा तेषां सत्तां हविर्धूमादिषु स्थापयति ।

सर्वेषु अपि वाक्येषु नञा निषेधः कण्ठतः उक्तः । अतः अत्र शाब्दः परिसङ्ख्यालङ्कारः । तादृगन्यव्यपोहश्चेच्छाब्दः[2] इति लक्षणात् । गद्यभागेऽस्मिन् क्वचिद् श्लेषं विनापि परिसङ्ख्या उपतिष्ठते । यथा मलिनता हविर्धूमेषु न चरितेषु इत्यादिस्थले । क्वचिच्च श्लेषानुप्राणितः यथा चक्षूरागः परकलत्रेषु इत्यादिस्थले ।

एवमत्र मलिनतादयः अंशाः चरितादिषु विभिन्नेमु अधिकरणेषु निषिद्धाः। अत्रैवाग्रे बाणभट्टः परिसङ्ख्यायाः चमत्कृत्यन्तरं दर्शयति । तद्यथा ,वयःपरिणामे द्विजपतनम् ,पुराणे वायुप्रलपितम् ,यत्र च महाभारते शकुनिवधः- ,भुजङ्गमानां भोगः ,शिखण्डिनां नृत्यपक्षपातः ,एणकानां गीतश्रवणव्यसनम् ,अग्नीनां भूतिमत्त्वम् ,उपवनचन्दनेषु जाड्यम् कपीनां श्रीफलाभिलाषःमूलानाम् अधोगतिः इति , ।

अत्र महाभारतादिषु शकुनिवधादयः विहिताः । परन्तु शब्दतः क्वापि न निषिद्धाः । तथापि अर्थबलाद् आश्रमे शकुनिवधादयः न प्रवर्तन्ते इत्यर्थः उपतिष्ठते । तथा च शकुनिवधःजाड्यम् च आश्रमे न ,द्विजपतनम् ,वायुप्रलपितम् , भवति इति अर्थः स्फुटं प्रतिभाति । अत्रापि शकुनिशब्दस्य पक्षिरूपः ,द्विजशब्दस्य दन्तरूपः ,गान्धारराजरूपः , ब्राह्मणरूपश्च अर्थः श्लेषमहिम्ना ज्ञातव्यः । भूतिसत्त्वादयः अनन्तरोक्ताः अंशाः अग्न्यादिषु भवन्ति न तु आश्रमवासिषु इत्यप्यर्थः सुबोध्य एव । अत्रापि आश्रमवासिषु न भवन्ति इत्यर्थः कण्ठतः नञा नोक्तः इति कृत्वा आर्थः परिसङ्ख्यालङ्कारः।

एवं शूद्रकस्य राज्यवर्णनेऽपि परिसङ्ख्यालङ्कारस्य प्रयोगं द्रष्टुं शक्नुमः तद्यथा -**यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसङ्कराःशास्त्रेष ,काव्येषु दृढबन्धाः ,रतेषु केशग्रहाः , चिन्तास्वप्नेषु , ,चापेषु गुणच्छेदाः ,करिषु मदविकाराः ,गीतेषु रागविलसनानि ,ध्वजेषु प्रकम्पाः ,छत्रेषु कनकदण्डाः ,विप्रलम्भाः सार्य्यक्षेषु शून्यगृहाः न ,रतिकलहेषु दूतसम्प्रेषणानि ,शशिकृपाणकवचेषु कलङ्काः ,गवाक्षेषु जालमार्गाः**

---

[1] कादम्बरी कथामुखम्

[2] साहित्यदर्पणः 81-10

 ISSN: 2320-740X

**प्रजानामासन् ।** [1]इति अत्रापि न प्रजानामासन् इति एकत्र वर्णसङ्करादीनाम् अंशानां संस्थितिं उक्त्वा चित्रकर्मादिषु निबन्धः कृतः ।

बाणः यद्यपि स्वकीये काव्ये बहुत्र शब्दालङ्कारान् योजयति ।

**शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।**
**सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥**
**ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनं ।**
**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥**[2]

इति ध्वनिकारोक्तदिशा शब्दालङ्काराणां प्रयोगः शृङ्गारप्रधाने काव्ये रसापकर्षं जनयति । कादम्बरी तु शृङ्गारप्रधानं काव्यम् । तथापि बाणभट्टेन उपनिबद्धः श्लेषः अपृथग्यत्ननिर्वर्त्यः इत्यस्माद् रसं न अपकर्षतिअपि तु पोषयति , । क्वचित् श्लेषेण पुष्टाः उपमाविरोधाभासः इत्यादयः अलङ्काराः बाणस्य काव्यशोभां वर्धयन्ति ,रूपकं , । परिसङ्ख्यालङ्कारेऽपि श्लेषस्य प्रयोगेण विशिष्टा चमत्कृतिः बाणेन दर्शिता । प्रायेण आलङ्कारिकाः अलङ्काराणाम् उदाहरणत्वेन पद्यकाव्यमेव उपस्थापयन्ति । परन्तु साहित्यदर्पणकारः आचार्यविश्वनाथः परिसङ्ख्यालङ्कारनिरूपणे उदाहरणत्वेन **श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा -'यस्मिंश्च राजनि 'जितजगति पालयति महीं चित्रकर्मसु वर्णसङ्करश्चापेषु गुणच्छेदः-' इत्यादि**[3]। इति बाणभट्टस्य पङ्क्तिम् उद्धरति इत्यनेनापि श्लेषानुप्राणितालङ्कारेषु बाणस्य गरिमा ज्ञातुं शक्यः ।

इत्थम् अप्रसिद्धस्य परिसङ्ख्यालङ्कारस्य वैभवं बाणस्य कादम्बर्याः कथामुखे एव भृशं पश्यामः । ईदृशानाम् अनेकेषाम् आलङ्कारिकाणां प्रयोगे बाणस्य महद्वैशिष्ट्यं तस्य त्रिषु अपि ग्रन्थेषु दरीदृश्यते ।

**********

[1] कादम्बरी कथामुखम्

[2] ध्वन्यालोकः 14,15-2

[3] साहित्यदर्पणः 81-10

# सच्चिदानन्देन्द्रसरस्वतीस्वामिनां परिचयः वेदान्तार्थविशेषणं च

**रविशंकर भट् के. एस्.**
शोधच्छात्रः, अद्वैतवेदान्तविभागः

आस्तिकदर्शनानां सर्वेषां परमार्थः मोक्ष एव । तत्र पूर्वमीमांसा कर्ममार्गमुत्तरमीमांसा ज्ञानमार्गञ्च प्रतिपादयति । तत्रापि उत्तरमीमांसायां मोक्षः विस्तरेण प्रतिपादितः । **प्रज्ञानं ब्रह्म**[1], **अहं ब्रह्मास्मि**[2], **तत्त्वमसि**[3], **अयमात्मा ब्रह्म**[4] इत्यादिभिः महावाक्यैः जीवब्रह्मणोरैक्यं प्रस्तुत्य **ज्ञानादेव तु कैवल्यम्** इत्यादिना मोक्षमार्गः उपदिष्टः । दुर्गमाणां ब्रह्मसूत्रोपनिषदादीनामवबोधाय शङ्कराचार्यप्रभृतिभिः आचार्यैः भाष्यग्रन्थाः विरचिताः । ततः भाष्यग्रन्थानधिकृत्यापि नैकैः तत्त्वदर्शिभिः विचारः कृतः । तत्र आचार्याणां शङ्करभगवत्पादानां भाष्यमधिकृत्य प्राचीनकालादेव विद्वांसः ग्रन्थानरचयन् । तेषु भामतीकाराः वाचस्पतिमिश्राः, पञ्चपादिकाकाराः पद्मपादाचार्याः, विवरणकाराः प्रकाशात्मयतयः इत्यादयः प्रसिद्धाः विद्यन्ते । भाष्यटीकास्वपि परस्परं वैलक्षण्यं दृश्यते । उत्तरोत्तरकाले समागताः आचार्याः भाष्यं परामृश्य स्वसिद्धान्तान् प्रतिपादयामासुः । सर्वेषामपि आचार्याणां भागवत्पादकृतं भाष्यमेव मूलम् । तदुक्तं सिद्धान्तलेशसङ्ग्रहे -

**अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्त्रधा**
**सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।**
**जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता**
**जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥** इति ।

## ➤ सच्चिदानन्देन्द्रसरस्वतीस्वामिनां जीवनम् -

आधुनिककाले भाष्यकारमतं परिशीलितवत्सु आचार्येषु अन्यतमाः विद्यन्ते श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः। 1880 तमे क्रिस्ताब्दे जनवरिमासस्य 5 दिनाङ्के अमीषां जन्म समभवत् । एतेषां पूर्वनाम श्री यल्लम्बळसी

---

[1] ऋग्वेदस्य ऐतरेयोपनिषद् (3-5-3)

[2] यजुर्वेदस्य बृहदारण्यकोपनिषद् (4-3-2-21)

[3] सामवेदस्य छान्दोग्योपनिषद् (6-8-7)

[4] अथर्ववेदस्य माण्डूक्योपनिषद् (2)

 ISSN: 2320-740X

सुब्रह्मण्यशर्मा । शिक्षकरूपेण एतैः आजीविका आरब्धा । ततः तत्कालीनशृङ्गेरीजगद्गुरूणां श्री श्री चन्द्रशेखरभारतीमहास्मामिनां विद्यागुरूणां हानगल् विरूपाक्षशास्त्रिणां के. ए. कृष्णस्वामी-अय्यरवर्याणां च सविधे वेदान्ताध्ययनमकुर्वन् । 1920 तमे वर्षे कर्णाटकराज्यस्य हासनमण्डलस्य होळेनरसीपुरप्रदेशे अध्यात्मप्रकाशकार्यालयस्य स्थापनमकार्षुः । एते 1948 तमे वर्षे संन्यासं स्वीकृत्य आजीवनं वेदान्तार्थविचारमकुर्वन् । 1975 तमे क्रिस्ताब्दे आगस्तमासस्य 5 दिनाङ्के स्वामिनां स्थूलशरीरं लीनमभवत् । एतेषां वेदान्तविषयकाः ग्रन्थाः संस्कृत-आङ्ग्ल-कन्नडभाषासु समुपलभ्यन्ते ।

श्रीशङ्करभगवत्पादकृतानां प्रस्थानत्रय-भाष्यग्रन्थानां कन्नडभाषायामनुवादः एतैः कृतः । इमे **सुगमा, सूत्रभाष्यार्थविवेचनी, ब्रह्मविद्यारहस्यविवृतिः, गीताशास्त्रार्थविवेकः, पञ्चपादिकाप्रस्थानम्, मूलाविद्यानिरासः, भामतीसमालोचनम्, भक्तिचन्द्रिका** इत्यादीन् त्रिंशतं (30) ग्रन्थान् संस्कृतभाषायां रचयामासुः । तथैव कन्नडभाषायां **आत्मबोधः, वेदान्तबालबोधः, सर्वेष्टसिद्धिः, अध्यात्मशास्त्रपरिभाषा, ब्रह्मविद्या, अध्यात्मविद्या, श्रीमद्भगवद्गीतार्थसर्वस्वम्, ब्रह्मसूत्रभाष्यसारः, अवस्थात्रयचन्द्रिका, परमार्थचिन्तामणिः** इत्यादयः प्रमुखाः चत्वारिंशदुत्तरैकशताधिकाः (140) ग्रन्थाः स्वामिभिः विरचिताः । आङ्ग्लभाषायां **Misconceptions about Sankara, The Vision of Atman, Intuition of Reality, Essays on Vedanta, The Science of Being** इत्यादीन् चत्वारिंशतं (40) ग्रन्थान् इमे व्यरचयन् ।

श्रीमतां सच्चिदानन्देन्द्रसरस्वतीस्वामिनां ग्रन्थेषु विशिष्टाः वेदान्तविषयाः प्रतिपाद्यन्ते । तेषां ग्रन्थानामध्ययने कृते वेदान्तविषये जिज्ञासुभ्यः अनायासेन ज्ञानं प्राप्यते । ईशावास्याद्युपनिषदां व्याख्यानं स्वामिभिः स्वयं कृतम् । एतेषां व्याख्यानेषु सरला भाषा समाश्रिता । तथा दुर्गमाणां भाष्याणामनुवादः कन्नडभाषायां आङ्ग्लभाषायां च कृतः । अनेन नूतनाः अध्येतारः सामान्यजनाश्च उपकृताः सन्ति । ग्रन्थेषु स्वामिभिः भाष्यव्याख्यातृणां भामतीकार-पञ्चपादिकाकाराणां मतं क्वचित् खण्डितम् । केचन अद्वैतवेदान्तस्य साम्प्रदायिकसिद्धान्ताः अपि निराकृताः । यथा मूलाविद्यानिरासः, सत्तात्रैविध्यखण्डनं, सुषुप्तावस्थायामविद्यायाः वृत्तेः खण्डनं, मायायाः जगत्कारणत्वखण्डनमित्यादयः । यथा मूलाविद्यानिरासविषये उक्तं स्वामिभिः स्वकीये सुगमाख्ये ग्रन्थे द्विचत्वारिंशे पृष्ठे "**अध्यासः अविद्याशब्दप्रवृत्तिनिमित्तम् । तत्रैकीयमतोपन्यासः – कस्मात्पुनरेतमध्यासमविद्येति मन्यन्ते पण्डिताः ? अविद्या-कार्यत्वादिति केचित् । का पुनरसावविद्या नाम ? इयमेव या चिन्मात्राश्रयविषया जडात्मिका अविद्याशक्तिः । सा हि जडवस्तुरूपेणोपवर्णिताध्यासरूपेण च परिणमते । अत एव हि सा कारणाविद्या, मूलाविद्या – इत्यादिभिर्नामभिरुपचर्यते । अथ भाष्यकारेण किमिति तां त्यक्त्वा**

**कार्याविद्याभिधानीयकोऽध्यास एव वर्णित इति चेत् । मूलाविद्यायाः सुषुप्तादावनर्थकारित्वादर्शनात् कार्याविद्यारूपेण परिणतैव साऽनर्थकारिणीति ज्ञापनार्थमिति ब्रूमः । वक्ष्यति हि "अस्यानर्थहेतोः प्रहाणाय" इत्यादि । अतोऽध्यासोऽविद्याकार्यत्वात् अविद्येति ॥"** इति ।

एवं विवरणादिव्याख्यानकाराणां मतमनङ्गीकृत्य तैः भणितम् यथा – "**उक्तमतनिराकरणम् – तदसत् । कारणविद्याया अप्रकृतत्वात् । तस्याः परिणामस्य च प्रत्याख्यातत्वात् । यत्तूच्यते – अध्यासरूपाविद्याया अनर्थकारित्वमिति, तदङ्गीक्रियते, भाष्यकारेण तथा वक्ष्यमाणत्वात् । यत्पुनः कारणाविद्या सुषुप्तौ सत्यपि नानर्थकरिणीत्यतो भाष्यकारेण नात्र वर्णितेति, तन्न क्षम्यते । एतादृश्याः कारणाविद्यायाः कुत्रापि भाष्ये स्वीकाराभावात् । ननु "प्राज्ञः कारणबद्धस्तु" (मां. का. १-११) इति कारिकायां श्रीगौडपादैः कारणाविद्या निर्दिष्टा । तद्भाष्ये च "तत्त्वाग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्यां तौ यथोक्तौ विश्वतैजसौ बद्धौ संग्रहीताविष्येते । प्राज्ञस्तु बीजभावेनैव बद्धः" इति । तत्कथमुच्यते कारणाविद्यायाः कुत्रापि भाष्ये स्वीकाराभाव इति ? नैष दोषः । "अग्रहणम्" इति भाष्योक्तस्य त्वदभ्यूहिताध्यासोपादानार्थकत्वे मानाभावात् ।**" इति ।

स्वीये पञ्चपादिकाप्रस्थानग्रन्थे स्वामिभिः सुषुप्तावस्थायामविद्यायाः वृत्तेः खण्डनविषयमधिकृत्य एकचत्वारिंशे पृष्ठे इत्थं विचारः कृतः "**टीकायाम् अविद्या ब्रह्मस्वरूपाच्छादिका प्रत्यक्चिति निसर्गत एवास्तीति सा च सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्रस्थितिः – इति चोच्यते । विवरणे तु अग्रहणमिथ्याज्ञानतत्संस्कारव्यतिरिक्तैव सा – इति, ब्रह्मस्वरूपानवभासव्यवहारान्यथानुपपत्त्या कल्पनीया इति चोच्यत इति ।**

**भाष्ये पुनर्ब्रह्मस्वरूपप्रकाशाच्छादिकाया अविद्याया नामापि न श्रूयते । सुषुप्तौ जीवस्य ब्रह्मणि संपत्तिरेव श्रुत्यभिमता, संपत्तिनिमित्त एव तु तत्राऽऽत्मनो विशेषज्ञानाभावः – इति चासकृदुच्यते । एतदर्थकवाक्यानि समाहृत्योदाहरिष्यामो भाष्यतद्व्याख्यानप्रस्थानयोः परस्परवैलक्षण्यस्फोरणाय –**

**मनःप्रचारोपाधिविशेषसंबन्धात् इन्द्रियार्थान् गृह्णन् तद्विशेषापन्नो जीवो जागर्ति । तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति । स उपाधिद्वयोपरमे सुषुप्तावस्थायाम् उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इव – इति 'स्वं ह्यपीतो भवति' इत्युच्यते । अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणम्, न प्रधानम् ॥१-१-९,"** इति ।

एवं रीत्या नैकेषु ग्रन्थेषु केषाञ्चित् साम्प्रदायिकसिद्धान्तानां खण्डनं स्वामिभिः कृतं दरीदृश्यते । इत्थं

केषुचिद्विषयेषु विप्रतिपत्तिं दर्शयन्तः स्वामिनः अन्येषु विषयेषु तु व्याख्यानकाराननुसरन्ति । अतः अध्येतॄणां मनसि भगवत्पादानामभिमतं किम् ? किं व्याख्यानकारैः भाष्यस्यान्यथार्थवर्णनं कृतम् ? अथवा एते स्वामिनः एव भाष्यव्याख्यानानाम् अर्थग्रहणे भ्रान्ताः इत्येवं बहुषु विषयेषु संशयान्विताः भवन्ति । एवमेव स्वामिनां कृतिषु केचन सन्दिग्धाः, अन्ये केचन सङ्क्षिप्ताः, अन्ये च सम्प्रदायसम्मताः विषयाः इत्येवं महती अध्ययनसामग्री दृश्यते । तेषामध्ययनेन गुणग्रहणेन च ज्ञानवृद्धिर्भवतीत्यत्र नास्ति सन्देहलेशः ।

**सन्दर्भग्रन्थसूची**


१. सुगमा, श्रीसच्चिदानन्देन्द्रसरस्वती, अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्, १९९९२

२. पञ्चपादिकाप्रस्थानम्, श्रीसच्चिदानन्देन्द्रसरस्वती, अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्, १९६६

३. सिद्धान्तलेशसङ्ग्रहः, श्रीमदप्पय्यदीक्षितः, संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, २००२

४. कल्पतरुः, श्रीमदमलानन्दसरस्वती, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, २००२

५. उपनिषद्भाष्यम्-१, आदितः (८) उपनिषदाम्, श्रीमच्छङ्करभगवत्पादाचार्याः, श्री दक्षिणामूर्तिमठ प्रकाशन, वाराणसी, २००४

६. उपनिषद्भाष्यम्-२, छान्दोग्योपनिषत्, श्रीमच्छङ्करभगवत्पादाचार्याः, श्री दक्षिणामूर्तिमठ प्रकाशन, वाराणसी, २००५

७. उपनिषद्भाष्यम्-३, बृहदारण्यकोपनिषत्, श्रीमच्छङ्करभगवत्पादाचार्याः, श्री दक्षिणामूर्तिमठ प्रकाशन, वाराणसी, १९८६

८. ईशादिदशोपनिषदः, श्रीमच्छङ्करभगवत्पादाचार्याः, मोतिलाल बनारसीदास, दिल्ली, २००७

९. अद्वैत वेदान्त (इतिहास तथा सिद्धान्त), डा. राममूर्ति शर्मा, ईस्टर्न बुक लिंकर्स, दिल्ली, १९९८

१०. अद्वैतदर्शने ब्रह्मसिद्धिः, प्रभातरञ्जनमहापात्रः, श्रीप्रकाशनम्, भुवनेश्वर, २००३

११. अद्वैतदीपिका, श्रीनृसिंहाश्रमः, संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, १९८२

१२. अद्वैतसिद्धिः, श्रीमधुसूदनसरस्वती, रत्न पब्लिकेशन्स, वाराणसी, १९८५

१३. अद्वैतसुधा, गौविन्दाश्रमः, जीवारामशर्माप्रकाशनम्, कलकत्ता, १९७५


**********

# अमरकोषस्य सुधाव्याख्यायाः वैशिष्ट्यम्

**गणेशप्रसादः के .एस्**

शोधच्छात्रः, व्याकरणविभागः

विश्वस्मिन् विश्वे बहवः शब्दाः सन्ति । शब्दसाधुत्वरक्षणार्थं यथा व्याकरणमस्ति तथैव अर्थबोधनाय निघण्टुः अस्ति । शब्दार्थकोषाः निघण्टु इति कथ्यन्ते । संस्कृते सर्वविधानां कोषाणां मूलम् अस्ति वैदिकनिघण्टुः। व्यावहारिकशब्दानां संग्रहः कोषे भवति । बहुविधकोषेषु कश्चन प्रमुखः सुप्रसिद्धः शब्दार्थकोषः अस्ति **अमरकोषः** ।

संस्कृतवाङ्मये उपलभ्यमानेष्वनेकेषु कोषेषु सर्वोत्कृष्टः लौकिकसंस्कृतस्याद्यकोषः वर्तते अमरसिंहस्य **अमरकोषः** । **नामलिङ्गानुशासनम्** इत्येतदस्य अपरं नाम वर्तते । कोषेऽस्मिन्शब्दाः श्लोकरूपेण रचिताः । **अष्टाध्यायी जगन्माताऽमरकोषो जगत्पिता** इत्येषा उक्तिः अमरकोषस्य श्रेष्ठतां दर्शयति । अमरकोषस्य कर्ता **अमरसिंहः** । व्याकरणशास्त्रे तस्य विशिष्टा अभिरुचिः आसीत् । पाणिनेः अष्टाध्याय्याः सूत्र-वार्तिक-भाष्यादीनि सम्यक् परिशील्य तान् शब्दान् अमरकोषे योजितवान् ।

- अस्य बहूनि व्याख्यानानि उपलभ्यन्ते ।[1] तेषु प्रमुखानि –
    - क्षीरस्वामिना विरचितम् **अमरकोषोद्घाटनम्** ।
    - भानुजिदीक्षितेन विरचिता **व्याख्यासुधा** ।
    - वन्ध्यघटीयसर्वानन्देन विरचितं **टीकासर्वस्वम्** ।
    - रायमुकुटेन विरचितं **पदचरितम्** ।

बहुभिः विद्वद्वर्यैः अस्य ग्रन्थस्य अनेकाः व्याख्याः रचिताः सन्ति । तत्रोपलभ्यमानेषु महामहोपाध्याय – श्रीभट्टोजिदीक्षितात्मजविद्वद्वर – **श्रीभानुजिदीक्षितकृत –व्याख्यासुधा** [2] एव शङ्कासमाधान – खण्डनमण्डन – सदसद्विवेचन – पाठान्तरादिकथनपूर्वकं ,पाणिन्यादिकृतसूत्रवार्तिकोणादिसूत्रादिद्वारेण धातुप्रत्ययादिनिर्देशनपुरस्सरं परिपूर्णतया समस्तव्याख्यानां मुकुटमणीयते । यथा –

---

[1] व्याकरणशास्त्रेतिहासः

[2] अमरकोशः

 ISSN: 2320-740X

1. **लक्ष्मीः -लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया || २७ ||**

लक्ष्मीरित्यादि । लक्षयति पश्यति नीतिज्ञम् । लक्ष दर्शनाङ्कनयोः (चु० प० से० ) 'लक्षेर्मुट् च' (उणा० ३ १६०) इति ईप्रत्ययः, तस्य च मुट् । 'लक्ष्मीः सम्पत्तिशोभयोः । ऋद्ध्यौषधौ च पद्मायां वृद्धिनामौषधेऽपि च' (१) ॥ [1]
व्युत्पत्तिः -लक्षयति पश्यति नीतिज्ञम् । लक्ष –दर्शनाङ्कनयोः इति धातुः । चुरादिगणः ,परस्मैपदि ,सेट् ।

2. **सुधा - पीयूषममृतं सुधा || ४८ ||**

सुखेन धीयते । धेट् पाने (भ्वा० प० अ०) आतश्चोपसर्गे' (३.३.१०६ ) इति कर्मण्यङ् । यत्तु-अङ्विधौ (३.३.१०४,५,६) कारकाधिकारः (३.३.१९,९३) निवृत्तः इति मुकुटः । तदाकरविरुद्धम् । द्वितीयभावग्रहणस्य (३.३.९५) कारकाधिकारनिवृत्त्यर्थत्वात् इति हेतुरपि स्वरूपासिद्धः । "अभिविधौ भावे-" (३.३४) इत्यस्याग्रेऽनुवर्तनात् । यदपि - सुष्ठु दधाति पुष्णाति शरीरमिति पचाद्यजन्तात् (३.१.१३४) टाप् (४.१.४) इति तदपि न । नित्यत्वादन्तरङ्गत्वाच्चैकादेशेऽदन्तत्वाभावेन टाबयोगात् । एकादेशस्य पूर्वान्तत्वेन ग्रहणात्सस्यालोपप्रसङ्गाच्च। आतश्चोपसर्गे- (३.१.१३६) कप्रत्ययो वक्तुमुचितः । ('सुधा गङ्गेष्टिकास्नुह्योर्मूर्वालेपामृतेषु च') (३) ॥ संप्रत्याबालवृद्धविद्वद्वृन्दाभ्यस्त-पाणिन्यादिकृतसूत्रवार्तिकोणादिसूत्रादिद्वारेण धातुप्रत्ययादिनिर्देशनपुरस्सरं च प्रत्येकं नाम्नां साधिततया हैम-विश्व-मेदिनी-रभस-अजयप्रभृतिकोषाणां श्रुति-स्मृति-पुराण-इतिहास-आयुर्वेदशास्त्रादीनां प्रमापकवचनैश्च परिपूर्णतया समस्तव्याख्यासु व्याख्यासुधा एव वरीवर्ति । [2]

**<u>भानुजिदीक्षितः</u>**[3]

महावैयाकरणस्य सिद्धान्तकौमदीकारस्य श्रीभट्टोजिदीक्षितस्य पुत्रः श्रीभानुजिदीक्षितः । अयमपि स्वजनकवदेव महावैयाकरणः इत्येतदस्य सुधाव्याख्यावलोकनेनैव सुस्पष्टं ज्ञायते । अस्य कालः –संवत्सरः 1741विक्रमशताब्देः पूर्वम् । सन्यासाश्रमे तस्य नाम रामाश्रम इति जातम् । अतः व्याख्यासुधाया अपरं नाम **रामाश्रमी** इत्यभवत् ।

---

[1] अमरकोषः सुधा-व्याख्योपेतः ।

[2] अमरकोषः ।

[3] व्यकरणशास्त्रेतिहासः ।




**********

## षड्वर्गविचारः

**राजेश कुमारः**

आचार्यद्वितीयवर्षम्

सिद्धान्तसंहिताहोरानामके त्रिस्कन्धात्मके ज्यौतिषशास्त्रे होरास्कन्धः पूर्वजन्मनि कृतानां शुभाशुभकर्मणां फलव्यञ्जकः वर्तते । अत्र षड्वर्गाणां चिन्तनमपि कुर्वन्ति । षड्वर्गाः के ते ? इत्युक्ते

**गृहं होरा च द्रेष्काणो नवांशो द्वादशांशकः ।**

**त्रिंशांशश्चेति षड्वर्गास्ते सौम्यग्रहजाः शुभाः ॥**[1]

अर्थात् १. क्षेत्रम् (गृहम्), २. होरा, ३. द्रेष्काणः, ४. नवांशः, ५. द्वादशांशः, ६. त्रिंशांशः इत्येते षड्वर्गाः स्युः । सामान्यतः शुभग्रहाणां वर्गगताः ग्रहाः शुभफलानि प्रयच्छन्ति ।[2] जातकचिन्तनकाले मुहूर्तशोधनकाले च इमान् वर्गान् चिन्तयन्ति । एतेषां षण्णां वर्गाणां चिन्तनम् अत्र विधीयते ।

---

[1] बृहत्पाराशरहोरा

[2] **क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापाः बुधस्तैर्युतः** इत्युक्तिः बृहज्जातकस्य । क्षीणचन्द्रः, रविः, कुजः, शनिः इत्येते पापग्रहाः । एतैर्युतः बुधोऽपि पापी भविष्यति ।

 ISSN: 2320-740X

**१. क्षेत्रम् –** क्षेत्रम् इत्युक्ते राशिः । मेषः, वृषभः, मिथुनः, कर्कः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः मीनः इति द्वादश राशयः वर्तन्ते । एकः राशिः त्रिंशदंशात्मकः (३०°) भवति । एकैकस्मिन् राशौ नवग्रहाणाम् आधिपत्यं भवति । सिंहस्य रविः, कर्कस्य चन्द्रः, मेषवृश्चिकयोः भौमः, कन्यामिथुनयोः बुधः, धनुर्मीनयोः गुरुः, वृषतुलयोः शुक्रः, मकरकुम्भयोः शनिश्च अधिपाः भवन्ति । उदाहरणार्थं लग्नस्फुटः - ०७$^{s}$-२०°-४९'-१२" इत्यस्ति । मेषादितः सप्तमः राशिः अतीतः । अष्टमे राशौ वृश्चिके लग्नम् अस्ति । अतः तस्याधिपः कुजः ।

**२. होरा –** राशेः अर्धं होरा । अतः एकस्मिन् राशौ पञ्चदशांशात्मकं होराद्वयं भवति । यतः ३० ÷ २ = १५° । तदुक्तं यथा -

**त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते ।**
**मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे ॥**[1] इति ॥

विषमराशौ प्रथमहोरा सूर्यस्य द्वितीयहोरा चन्द्रस्य च भवति । समराशौ तु विपरीतक्रमेण अर्थात् प्रथमहोरा चन्द्रस्य द्वितीयहोरा सूर्यस्य भवति ।[2] उदाहरणार्थं पूर्वोक्तः लग्नस्फुटः – ०७$^{s}$-२०°-४९'-१२" इत्यस्ति । अत्र लग्नं वृश्चिकराशौ अस्ति । तच्च समराशिः । समराशौ द्वितीयहोरा सूर्यस्य भवति । अतः लग्नं सूर्यहोरायामस्ति इति व्यवहारः ।

**३. द्रेष्काणः –** राशेः त्रिभागः द्रेष्काणः । अतः प्रत्येकं द्रेष्काणः दशांशात्मकः भवति । यतः ३० ÷ ३ = १०° (दश अंशाः) स्यात् । आहत्य द्वादशसु राशिषु षट्त्रिंशत् (१२ x ३ = ३६) द्रेष्काणाः भवन्ति । प्रथमद्रेष्काणस्य अधिपतिः तत्तद्राशेः एव अधिपतिः । द्वितीयस्य तत्पञ्चमराशेः अधिपः, तृतीयस्य च तन्नवमराशेः अधिपः भवति । तदुक्तं यथा -

**राशित्रिभागा द्रेष्काणास्ते च षट्त्रिंशदीरिताः ।**
**परिवृत्तित्रयं तेषां मेषादेः क्रमशो भवेत् ॥**
**स्वपञ्चमनवमानाञ्च राशीनां क्रमशश्च ते ।**[3]

उदाहरणार्थं - लग्नस्फुटः - ०७$^{s}$-२०°-४९'-१२" इत्यत्र वृश्चिकराशौ तृतीयद्रेष्काणः । अतः तस्मात् नवमराशेः कर्कस्य अधिपः चन्द्रः । अतः लग्नं चन्द्रस्य द्रेष्काणे अस्ति ।

---

[1] भारतीयकुण्डलीविज्ञानम् ।

[2] मेषादिक्रमेण विषमसमेति गणनायां षड्राशयः विषमाः अन्ये षट् समाश्च स्युः । तदा मेष-मिथुन-सिंह-तुला-धनु-कुम्भाः विषमराशयः । वृषभ-कर्क-कन्या-वृश्चिक-मकर-मीनाः समराशयः ।

[3] बृहत्पाराशरहोराशास्त्रम्

**४. नवांशः –** राशेः नवमः भागः नवांशः इत्युच्यते । अतः एकः नवांशः इत्युक्ते ०३°-२०' । यतः ३० ÷ ९ = ०३°-२०'। मेषादिषु राशिषु मेषः, मकरः, तुला, कर्कः इति क्रमेण नवांशस्य अधिपस्य गणनां कुर्यात् । अर्थात् मेषे मेषादारभ्य धनुषः यावत्, वृषे मकरादारभ्य कन्यां यावत्, मिथुने तुलादारभ्य मिथुनं यावत्, कर्के कर्कादारभ्य मीनं यावत्, एवमेव पुनः सिंहादिषु मेषादिक्रमतः नव नवांशाः भवन्ति । तत्तद्राशीनाम् ईशाः एव नवांशेशाः स्युः । अथवा चरराशिषु तस्मादेव नवानां राशीनां, स्थिरराशिषु तस्मान्नवमराशितः नवानां राशीनाम्, उभयराशिषु तस्मात्पञ्चमराशितः नवानां राशीनां नवांशाः भवन्ति ।[1] तदुक्तमपि पाराशरहोरायां यथा -

**मेषादिष्वजनक्रतौलिककुलीराद्या नवांशाः क्रमात् ।**

**नवांशेशाश्चरे तस्मात् स्थिरे तन्नवमादितः ।**

**उभये तत्पञ्चमादेरिति चिन्त्यं विचक्षणैः ॥**[2]

उदाहरणार्थं - लग्नस्फुटः - ०७ˢ-२०°-४९'-१२" इत्यत्र वृश्चिकराशौ सप्तमे नवांशः । वृश्चिकराशौ कर्कतः नवांशगणनारम्भः । तदा कर्कतः सप्तमः नवांशः मकरस्य भवति । मकरस्याधिपः शनिः । अतः लग्नं मकरस्य अथवा शनेः नवांशे अस्तीति व्यवहारः ।

**५. द्वादशांशः –** राशेः द्वादशभागः द्वादशांशः । अतः एकस्य द्वादशांशस्य मानं ०२°-३०' भवति । यतः ३० ÷ १२ = ०२°-३०' । एकस्मिन् राशौ द्वादश द्वादशांशाः भवन्ति । तदधिपाः प्रत्येकस्मिन् राशौ तस्मात्तस्मात् राशितः गणयेत् । अर्थात् मेषे मेषादारभ्य मीनं यावत्, वृषे वृषभादारभ्य मेषं यावत् एवं द्वादशांशानामाधिपत्यं चिन्तयेत् । उक्तञ्च यथा -

**द्वादशांशस्य गणनां तत्तत्क्षेत्रात् विनिर्दिशेत् ।**[3]

उदाहरणार्थं - लग्नस्फुटः - ०७ˢ-२०°-४९'-१२" इत्यत्र वृश्चिकराशौ नवमे द्वादशांशे अस्ति । वृश्चिकराशौ वृश्चिकतः आरभ्य नवमः कर्कस्य द्वादशांशः । तदधिपः चन्द्रः । अतः लग्नं चन्द्रस्य द्वादशांशे अस्ति इत्यर्थः ।

**६. त्रिंशांशः –** त्रिंशांशः विषमसमराशिभेदेन पञ्चसु खण्डेषु विभक्तः । विषमराशौ ५, ५, ८, ७, ५ इत्येवं क्रमशः पञ्च खण्डाः भवन्ति । एतेषां स्वामिनः क्रमशः कुज-शनि-गुरु-बुध-शुक्राः भवन्ति । अर्थात् विषमराशौ आदौ पञ्च कुजस्य त्रिंशांशः । ततः पञ्च शनेः, ततश्च अष्टौ गुरोः, ततः सप्त बुधस्य, ततः पञ्च शुक्रस्य इत्येवं त्रिंशांशाधिपत्यं वहन्ति ।

---

[1] मेषादिक्रमेण चर-स्थिर-उभयेति गणनायां चत्वारः चत्वारः राशयः तत्तत्संज्ञकाः स्युः । तदा मेष-कर्क-तुला-मकरराशयः चराः, वृष-सिंह-वृश्चिक-कुम्भराशयः स्थिराः, मिथुन-कन्या-धनु-मीनराशयः उभयाः च भवन्ति ।

[2] बृहत्पाराशरहोराशास्त्रम्

[3] बृहत्पाराशरहोराशास्त्रम्

 ISSN: 2320-740X

समराशौ त्रिंशांशः विपरीतक्रमेण भवति । अर्थात् ५, ७, ८, ५, ५ इत्येवं क्रमेण शुक्र-बुध-गुरु-शनि-कुजाः पञ्चानां खण्डानाम् अधिपाः भवन्ति । उक्तमत्र पराशरेण-

**त्रिंशांशेशाश्च विषमे कुजार्किज्यज्ञभार्गवाः ।**

**पञ्चपञ्चाष्टसप्ताक्षभागा व्यत्ययतः समे ॥**[1]

उदाहरणार्थं - लग्नस्फुटः - ०७$^{s}$-२०°-४९'-१२" इत्यत्र वृश्चिकराशिः समराशिः । अत्र २०° तः २५° पर्यन्तं चतुर्थः त्रिंशांशः । अयं त्रिंशांशः शनेः । अतः लग्नं शनेः त्रिंशांशे अस्ति ।

इदानीं व्यवहारः कथमिति चेत् लग्नं वा ग्रहाः यस्मिन् वर्गे स्थिताः ते **तद्वर्गगाः** इति व्यवह्रियन्ते । पूर्वोक्तम् उदाहरणमेव अत्र समाधीयते । इदं वृश्चिकलग्नं **कुजस्य क्षेत्रे, रवेः होरायां, चन्द्रस्य द्रेष्काणे, शनेः नवांशे, चन्द्रस्य द्वादशांशे, शनेः त्रिंशांशे च अस्ति** इति व्यवहारः ।

**********

# भारतीयस्य मनोगतम्

**राजेशः आर्. एस्.**

आचार्यद्वितीयवर्षम्

अस्माकम् राष्ट्रं भारतम् । वयं भारतीयाः | अस्माकं भाषा च संस्कृतम् । विश्वगुरुस्थानमलङ्कृत्य विराजमानं आसीत् अस्माकं राष्ट्रम् ! अधुना गुरुस्थानात् च्युतं भूत्वा छात्रावस्थायाम् वा.. उत कुत्रचित्..! किमत्र कारणम् ? वयमेव कारणीभूताः किमस्य ?

अस्माकं शक्तिरस्ति इति वदन्तः आस्म । **अतिथि देवो भव** इति प्रसिद्धोक्तिः । अतः आगतान् वयं भूरिशः पुरस्कुर्मः । तदेव अस्माकं कण्टकं जातं किम् ? बहिस्तात् वैदेशिकाः अतिथिरूपेण आगत्य **भिक्षुकपादप्रसारणन्यायवत्** ईषद् ईषद् सर्वेषु स्थानेषु अभिव्याप्य अस्मान् चोरितवन्तः । इयमासीत् अस्माकं स्थितिः । अधुनापि एतादृशी एव स्थितिः दृश्यते । किमस्ति अस्य कारणम् । भारते भारतीयसंस्कृतेः प्राधान्यं नास्ति किम् ?

हे भारतीयाः ! उत्तिष्ठत ! जाग्रत ! प्राप्य वरान् निबोधत ! अस्माकं संस्कृतेः आधारः कः ? वयम् तु जानीमः

---

[1] बृहत्पाराशरहोराशास्त्रम्

यत् शारदावागेव इति । किं तस्याः संरक्षणम् न कुर्मो वा ? बहुदूरं न गच्छेम । अस्माकं परिसरः लघुभारतमिव अस्ति । वयं पञ्चशतं सङ्ख्याकाः स्मः । किं वाग्रूपायाः शारदायाः संस्कृतमातुः सेवा न शक्यते वा ? हे भारतपुत्राः ! चिन्तयामः ! अवलोकयामहे च ! स्वं परितः कुतो न शिक्षणं दद्मः ? किं शारदायाः वाक्प्रसारणे कष्टं वर्तते वा ? हे भारतीसमुपासकाः ! भवद्भिः न शक्यते वा इदं कार्यम् ?

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः** एवं किल वदति सुभाषितम् ? कथमागच्छति निद्रा ? कथं वा स्वस्थ इति वक्तुम् शक्नोषि त्वम् ? यदि एवम् अलसतायाम् प्रेम भवति तर्हि श्वः पलायामहे निश्चयेन !

शारदावाण्याः जीवः स्वहस्ते भवति न तु भगवत्याम् । यदि उत्सहामहे, हे भारतीयाः ! तर्हि सर्वेषु राशिषु अपि सूर्यः उच्चङ्गतः भवति ! कस्यापि ग्रहस्य मौढ्यं नापद्यते ! सत्यमिदम् ! परमार्थमिदम् ! यद्यपि करोमि तथापि अपर्याप्तमिदम् । हे परिसरस्यास्य पञ्चशतं सङ्ख्याकाः वीरपुरुषाः वीराङ्गनाश्च ! भवत्सु एव सा शक्तिरस्ति स्वस्य ऊर्जप्रकटनाय । राष्ट्राय किम् कृतवान् ? उत कृतवती ? इति प्रश्ने सति किम् उत्तरम् ददाति ?

हे भारतवर्षस्य वीरपुत्राः ! हे भारतीयाः ! अलमलम् अतिजडमत्या । शवरूपं शरीरं शिवमिति मत्वा जाड्यम् भस्मसात् कुर्मः । अग्रे सरामः । गैर्वाणीं तद्गतधर्मनिनदं प्रसारयामः प्रचारयामश्च । यतोहि **धर्मो रक्षति रक्षितः** ।

**********

# स्वं रूपं शब्दस्याशब्दसंज्ञा

**ऐश्वर्या**

आचार्यप्रथमवर्षम्

चतुष्पदात्मकमिदं सूत्रम् । 'शब्दस्य स्वं रूपं सञ्ज्ञि, शब्दशास्त्रे या संज्ञा तां विना' इति सिद्धान्तकौमुद्यां सूत्रस्यास्यार्थो वर्णितः । अर्थात्, शब्दस्य स्वरूपं(आनुपूर्वी) सञ्ज्ञि भवति सः शब्द एव संज्ञा भवति । यथा 'अग्रेर्ढक्' इत्यत्र अग्निशब्दस्य स्वरूपमेव सञ्ज्ञि, अग्निरिति शब्दः संज्ञा । किन्तु शब्दशास्त्रे याः संज्ञा उक्ताः तासु स्वरूपस्य न ग्रहणम्, अपि तु तत्र ये सञ्ज्ञित्वेन निर्दिष्टाः तेषामेव ग्रहणम् । यथा – 'दाधा घ्वदाप्' इति । शब्दशास्त्रे 'घु' इति संज्ञा । तस्य दाधाः संज्ञिनः, न तु 'घु' इति स्वरूपम् ।

यद्यपि सामान्यतः उच्चारितेन शब्देन स्वरूपस्य पर्यायाणां तद्विशेषाणां च ग्रहणं भवति । एवमिहापि शास्त्रे तेषां सर्वेषां ग्रहणे प्राप्ते इदं सूत्रं नियमार्थम्, अत एव परिभाषासूत्रम् इति पक्षो अस्ति । तथापि अन्येषु परिभाषासूत्रेषु

 ISSN: 2320-740X

यथा किञ्चिल्लिङ्गं विध्यन्तरशेषभूतत्वं वा भवति तथा किमपि अत्र सूत्रे न दृश्यत इति कृत्वा संज्ञासूत्रमेवेदमिति स्वीक्रियते । सूत्रेऽस्मिन् सञ्ज्ञासञ्ज्ञिनोः समानविभक्तिकत्वाभावात् बोध्यमिति पदमध्याहृत्य स्वं रूपमित्यस्य शेषत्वेन वक्तव्यम् (शब्दस्य सञ्ज्ञि स्वं रूपं बोध्यम्) इति लघुशब्देन्दुशेखरे नागेशभट्टः ।

अत्र सूत्रे रूपग्रहणम् 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषायाः ज्ञापकम् । तथाहि – एकः शब्द उच्चारितश्चेत् प्रथमं रूपस्यैव उपस्थितिर्भवति । यतः शब्दस्वरूपप्रतीतौ उपदेशस्य अपेक्षा न भवति, अर्थस्य उपस्थितौ तु शक्तिग्रहणस्य अपेक्षा भवति । श्रोत्रेन्द्रियेण प्रथमं रूपमेव गृह्यते इति कृत्वा अन्तरङ्गत्वं रूपस्य । पुनश्च अनुकरणशब्देषु अर्थो न प्रतीयते, रूपं तु प्रतीयत एव इति अहेयत्वम् । अर्थः पर्यायशब्देनापि भासते, रूपं तु उच्चारितेन शब्देनैव प्रतीयते इति रूपस्य असाधारणत्वम् । इत्येतैः हेतुभिः शब्दे उच्चरिते प्रथमतया रूपस्यैव उपस्थितौ सिद्धायां सूत्रे स्वमित्यनेनैव तल्लाभे रूपग्रहणं व्यर्थम् । यदि च शब्दस्य अर्थः सञ्ज्ञी स्यात्तर्हि 'शब्दः अर्थं प्रत्याययति' इति लोकत एव सिद्धे सूत्रमेव अनर्थकं स्यात् । एवञ्च सूत्रे रूपग्रहणस्य व्यावर्त्यं किमपि नास्तीति कृत्वा अर्थविशिष्टं रूपं सञ्ज्ञि इति विज्ञायते । अर्थात् स्वशब्देन अर्थो रूपशब्देन स्वरूपञ्च गृह्यते । एवं रूपग्रहणम् अर्थवद्ग्रहणारिभाषाया ज्ञापकं भवति । तेन 'शे' इति प्रगृह्यसंज्ञा काशे, कुशे इत्यादौ विद्यमानस्य अनर्थकस्य शे इत्यस्य न भवति । यत्र अर्थवता रूपेण शब्द आश्रीयते तत्रैव इयमुपतिष्ठते । तेन वर्णग्रहणेषु टेरेत्वे च अस्या अनुपस्थानमेव । अर्थः शास्त्रीयोऽपि गृह्यते ।

अशब्दसंज्ञा इत्यत्र सप्तमीतत्पुरुषः । शब्दे अर्थात् शब्दशास्त्रे संज्ञा शब्दसंज्ञा । षष्ठीतत्पुरुषाश्रयणे 'कर्तुरीप्सिततमं कर्म' इत्यादावर्थस्य संज्ञा उक्ता इति कृत्वा विधिप्रदेशेषु(कर्मण्यणित्यादौ) स्वरूपस्यैव ग्रहणं स्यात् ।

शब्देनोच्चारितेन अर्थो गम्यते । यथा भाष्ये उदाहृतम् – 'गामानय, दध्यशान इत्युच्चारिते अर्थ अनीयते, अर्थश्च भुज्यते' इति । व्याकरणशास्त्रे बहुत्र शब्दे कार्यस्य सम्भवः । यथा – 'अग्रेर्ढक्' इति अग्निशब्देन यः अर्थः अङ्गाररूपः प्रतीयते , ततः परः ढक् कर्तुं न शक्यते । एवं 'राजश्वशुराद्यत्' इत्यादावपि । पुनश्च प्रातिपदिकादेते विधयो भवन्ति । अर्थस्य पौर्वापर्यासम्भवात् प्रत्ययः परश्च इति असम्भव एव । तस्मात् तत्पर्यायवाचिनो यावन्तः शब्दाः तेभ्यः सर्वेभ्यः ते ते प्रत्ययाः स्युः, नेष्यते च । तदर्थं सूत्रमिदमारब्धम् । तस्यापत्यम्, सास्य देवता इत्यादौ शास्त्रेऽपि अपत्यादिशब्दैः प्रतीतः अर्थ एव आश्रीयते, तत्र अर्थे कार्यस्य सम्भवात् ।

भाष्यकारस्तु इदं सूत्रं प्रत्याचख्यौ । तथाहि – कश्चिदुच्चारितः शब्दः श्रोत्रेन्द्रियेण उपलब्ध एव अर्थं प्रत्याययति । यदा अर्थ उपस्थितो भवति, तदा अर्थे 'अग्रेर्ढक्' इत्यादीनां शास्त्रीयकार्याणामसम्भवात् प्रत्यासत्त्या उपात्तात् शब्दादेव कार्यं भवति । अतः सूत्रेण विनापि इष्टं सिध्यति । अपि च सः शब्द उपस्थितमर्थं विशेषणतया

बोधयन् कार्यं लभत इति कृत्वा 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषापि स्वतः सिद्धा ।

दाधा घ्वदाप् इत्यादिषु शब्दसंज्ञासु स्वरूपग्रहणवारणाय अशब्दसंज्ञा इति प्रतिषेधो वक्तव्यः । अतः लोकन्यायेन सिद्धस्यापि विध्यंशस्यानुवादः अनेन सूत्रेण क्रियते इति तु प्रयोजनं न । तासु शब्दसंज्ञारम्भसामर्थ्यादेव स्वरूपस्य ग्रहणं न भवति, अन्यथा तदारम्भो व्यर्थः स्यात् । 'ष्णान्ता षट्' इति ज्ञापकादुभयगतिः (वचनप्रामाण्यात् सञ्ज्ञिनां संप्रत्ययः, स्वरूपग्रहणात् संज्ञायाः संप्रत्ययः) अत्र नाश्रीयते ।

एवमिदं लोकन्यायसिद्धमिति कृत्वा भाष्यकारेण यद्यपि प्रत्याख्यातम् । तथापि अस्मदादीनां बुद्धिवैशद्यार्थमनुग्रहार्थञ्च सूत्रमिदम् । अदृष्टोत्पत्तिश्च अस्य प्रयोजनमिति 'अशक्यं वर्णेनाप्यनर्थकेन भवितुम्' इति वदतो भाष्यकारस्याशयः ।

**********

# भारतस्य विश्वगुरुत्वं संस्कृतमाध्यमेन अस्माभिः कथं साध्यम् ?

**महेश हेगडे,**

आचार्यप्रथमवर्षम्

सर्वैः विदितमेव यत् परमोत्कृष्टसंस्कृतिमान् अयम् भारतदेशः । विविधसंस्कृतिसम्प्रदायानुयायिजनसत्वे अपि बहुभिः कारणैः एकत्वं भजति इयं भारतभूः । अयं भारतरूपीवृक्षः चतुर्वेदरूपमूलेन सुदृढः, पुराणादिरूपकाण्डेन पुष्टः, विविधशास्त्ररूपशाखैः पुष्पितः, वसिष्ठ- वाल्मीकि-व्यास-पराशर-विश्वामित्र-दधीचि-दुर्वासादिसहस्राधिकयोगिमुनिवराणां तपोजलेन सिञ्चितः, कालिदास-भवभूति-भारवि-बाणादिमहाकवीनां ग्रन्थेन फलितः विश्वे विश्वगुरुत्वेन विराजते ।

परन्तु बहुखेदस्य विषयोऽयं यत् मेघाच्छादितसूर्यवत् भारतरूपीबृहद्वृक्षः अस्माकम् अज्ञानेन अस्माकमेव संस्कृतेः अपमौल्यीकरणेन, वैदेशिकशिक्षणपद्धत्यनुसारेण च आच्छादितः वर्तते । रोगपीडितस्सन् रोगी कश्चित् स्वगृहपृष्ठतः विद्यमानं सस्यम् ओषधिरिति ज्ञातः अपि तदुपेक्षां कुर्वन् बहिस्थापणे लभ्यमानं तदेव ओषधिसस्यम् बहुमौल्येन क्रीत्वा तस्य गुणगानं यथा करोति तद्वत् इदानीं अस्माकम् अवस्था अपि । बहुकालादस्माकं पूर्वजैः सम्पाल्यमानसंस्कृतेः अनुकरणमकृत्वा वैदेशिकैः यदा तस्यानुकरणं क्रियते तदा **उद्बुद्धसंस्काराः** वयं तस्यानुकरणं

 ISSN: 2320-740X

कुर्मः, तदस्माकम् इति अहंभावेन वदामः च। उदाहरणार्थं योगम् एव स्वीकुर्वन्तु ... यदा अन्येषु देशेषु योगः प्रसिद्धः अभूत् तदा एव **उद्बुद्धसंस्काराः** वयम् अहंभावेन योगः अस्माकं देशस्य विषयः इति उक्तवन्तः । खेदायते यत् अस्माकं ग्रहे विद्यमानविशेषान् बाह्याः एव सम्यक् जानन्ति, तैरुक्ते एव अस्माभिः अपि ज्ञायते इति ।

एतादृशस्थितेः मूलकारणम् अस्माकं संस्कृतेः एवं संस्कृतभाषायाः विस्मरणमेव । संस्कृतभाषया एव भारतस्य विश्वगुरुत्वं साध्यम् । तदपि अस्मभिः एव कर्तव्यम् । तस्याः भाषायाः देशे सर्वत्र प्रसारणकार्यं तु बहुभिः संस्थाभिः क्रियमाणं वर्तत एव । केवलं संस्कृतभाषायाः प्रसारणेन विश्वगुरुत्वं न सिद्ध्यति । तेन साकं संस्कृतभाषायां विद्यमानानां विषयाणाम् आधुनीकरणेन अपि सिद्ध्यति ।

संस्कृतभाषायां विद्यमानविषयाणां आधुनीकरणम् अधोलिखितांशेन प्रायः कर्तुं शक्यमिति मे मतिः यथा -

- संस्कृतभाषा न केवलं वेदभाषा मन्त्रभाषा एव अपि तु विज्ञानभाषा गणितभाषा अपि । ये च आधुनिकविषयं पठन्ति तेभ्यः संस्कृते विद्यमानगणितविषयं वा विज्ञानविषयं वा यदि पाठ्यते तर्हि ते अस्माकं पूर्वजैः प्राप्तज्ञानभण्डारस्य स्वरूपं ज्ञातुं शक्नुवन्ति। यतः यावत्पर्यन्तम् अस्माकं पूर्वजानां उपरि आदरः न भवति तावत् पर्यन्तम् देशभक्तिः न जागर्ति । देशभक्त्यभावे भारतस्य विश्वगुरुत्वं खपुष्पायत एव ।

- संस्कृतभाषारूपज्ञानाम्बुधौ यावत् मथ्यते तावत् नित्यनूतनाः विषयाः उत्पद्यन्त एव । इदानीं अस्माभिः प्राप्तं ज्ञानं केवलं बिन्दुमात्रम् । अतः अध्ययनातिशयेन बहून् विषयान् ज्ञातुं शक्नुमः । भारद्वाजमुनिना रचिते वैमानिकशास्त्रे उक्तानां विमानानां विषये तु सर्वे जानन्ति । परन्तु तस्य प्रायोगिकरूपेणानुष्ठानं न क्रियते अस्माभिः । तत्र प्रायोगिकरूपेण अनुष्ठानं कर्तुं युवानः सिद्धाः सन्ति । परन्तु प्रयोजकस्तत्र दुर्लभः । यदि अस्माभिः एका संस्था संस्थाप्यते यत्र यूनः तत्र संस्कृतभाषायां विद्यमानानां प्रकाशिताप्रकाशित-विज्ञान-गणित-अन्तरिक्षविषयाणां प्रायोगिकरूपेण प्रामाण्यं सम्पादयन्ति तदा विश्वे अस्माकं कीर्तेः वर्धनं अवश्यं भवति।

- जगति द्वितीयस्थानं भजते जनसङ्ख्या दृष्ट्या । सर्वेषां आहारः कर्षकेण एव दातव्यः । कृषीवलाः आधुनिककाले अल्पाः सञ्जाताः । अतः यदि संस्कृते विद्यमानं अस्माकं पूर्वजैः रचितं **कृषिपाराशरम्** यदि कर्षकेभ्यः संस्कृतजनैः यदि संज्ञाप्यते तर्हि ते अत्यल्पजलेन एवमेव अत्यल्पपरिश्रमेण रासायनिकांशान् विहाय फल-मूल-शाखान् अत्यधिकप्रमाणे उत्पादयितुं शक्नुवन्ति ।

- संस्कृतसाहित्ये बहवो हि उपदेशाः प्रसिद्धाः । तत्र **विदुरनीतिः, भीष्मोपदेशः, मनुस्मृतिः, चाणक्यनीतिः** इत्यादिषु प्रशासनिकानां राज्ञां कृते उपदेशाः कृताः वर्तन्ते । तान् यदि वयम् आधुनिकप्रशासनिकशास्त्रे ये

अध्ययनं कुर्वन्ति तेषां कृते यदि पाठयामः तदा उत्तमप्रशासनिकाः भवितुम् अर्हन्ति । ये तावत् न अस्माकं देशमेव न सम्पूर्णविश्वमपि प्रशासितुम् शक्नुवन्ति ।

- संस्कृतभाषायाः व्याकरणं जगति विद्यमानसर्वभाषाव्याकरणापेक्षया अत्युत्तमं वर्तते । संस्कृतभाषायाः व्याकरणं भगवता पाणिनिना रचितम् । यथा आधुनिकाः तन्त्रज्ञाः (Engineers) True or False रूपेण तन्त्रांशं निरूपयन्ति तद्वत् पाणिनिः उत्सर्गापवादेन निरूपयति बहुसहस्रवर्षेभ्यः प्रागेव निरूपयामास । अतः अष्टाध्याय्याः मौलिकाध्ययनं क्रियते इतोऽप्युत्तमरूपेण तन्त्रांशं कर्तुं प्रभवन्ति ।

- **साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः ।**
  **तृणं न खादन्नपि जीवमानः तद्भागदेयं परमं पशूनाम्॥**

इति उक्त्यनुसारं भारतीयाः आबहोःकालात् साहित्य-सङ्गीत-कलासु अग्रेसराः सन्ति । भरतमुनिः नाट्यशास्त्रे नाटकानां नियमानि शास्ति। तानि नियमानि इदानींतन चलनचित्रेषु अनुष्ठेयानि । यतः समाजस्य परिवर्तने वज्रायुधसदृशं वर्तते । अनधीतविद्याः जनाः सुसंस्कृताः एतेन भवन्ति ।

अतः अत्र कानिचन नियमानि अवश्यं पालनीयानि येन समग्रभारतीयाः सुसंस्कृतिसहिताः यथा स्युः । अतः तादृशसंस्कृतग्रन्थानां विषये यथा अधिकाः जनाः जानीयुः तथा एकः उपायः अस्माभिर्यूनैः चिन्तनीयः ।

अत्र एकः उपायः एवं भवितुम् अर्हति एका संस्था स्थापनीया यया एते पूर्वोक्ताः अंशाः साधयितुं शक्याः स्युः । तत्र सर्वेषां संस्कृतशास्त्रविदुषः संस्कृताभिमानिनः भागग्रहणं भवेत् । तेन संस्कृतभाषायाः तेन सह भारतस्य अपि कीर्तिः यशश्च वरीवर्धत एव ।

**********


ISSN: 2320-740X

# शारदाम्बाष्टकम्

**नागराज मय्यः**

आचार्यप्रथमवर्षम्

श्रीचक्रबिन्दुमध्यस्थे शृङ्गेरीपुरवासिनि ।

हे वाणि ! देहि मे विद्यां शारदाम्ब नमोऽस्तु ते ॥१॥

चपलानीन्द्रियाणीह निहन्तुं न क्षमे क्षमे ।

विवेकं देहि मे वाणि शारदाम्ब नमोऽस्तु ते ॥२॥

नीचोऽहं कामचारेषु बद्धोऽहं पापकर्मणा ।

हे वाणि ! देहि मे प्रज्ञां शारदाम्ब नमोऽस्तु ते ॥३॥

मतिर्नास्ति गतिर्नास्ति नास्ति मे चित्तनिग्रहः।

हे वाणि ! देहि मे बुद्धिं शारदाम्ब नमोऽस्तु ते ॥४॥

अज्ञानेनान्धकारेण पतितं पापकर्मणि ।

समुद्धर दयासिन्धो ! शारदाम्ब नमोऽस्तु ते ॥५॥

जाड्यकूपे निमग्नोऽस्मि पुण्यकार्याद्बहिर्मुखः।

हे वाणि ! कुरु मे रक्षां शारदाम्ब नमोऽस्तु ते ॥६॥

मूढोऽहं तृणतुल्योऽहम् अज्ञश्च तव पूजने ।

हे वाणि ! देहि मे भक्तिं शारदाम्ब नमोऽस्तु ते ॥७॥

भवबन्धनपाशेन बद्धोऽहमिह जन्मनि ।

हे वाणि ! देहि मे मोक्षं शारदाम्ब नमोऽस्तुते ॥८॥

**********

# रीतिप्रस्थानम्

**शरण्यः पि.**
आचार्यप्रथमवर्षम्

साहित्यशास्त्रेतिहासे बहवः आलङ्कारिकाः समभूवन् । ते सर्वेऽपि स्वेषु लक्षणग्रन्थेषु स्वमतं प्रत्यपादयन् । विशेषतया साहित्यशास्त्रे षट्प्रस्थानानि प्रसिद्धानि । भामहस्य अलङ्कारप्रस्थानम्, भरतस्य रसप्रस्थानम्, आनन्दवर्धनस्य ध्वनिप्रस्थानम्, कुन्तकस्य वक्रोक्तिप्रस्थानम्, क्षेमेन्द्रस्य औचित्यप्रस्थानम्, एवमेव वामनस्य रीतिप्रस्थानम् । अत्यन्तपुरातनेषु आलङ्कारिकेषु अयं वामनः अपि अन्यतमः । तेन स्वस्य **काव्यालङ्कारसूत्राणि** इत्यस्मिन् ग्रन्थे समग्ररीतिप्रपञ्चः दर्शितः । अस्मिन् ग्रन्थे षडधिकरणानि सन्ति। तत्र सः प्रथमाधिकरणे **रीतिरात्मा काव्यस्य** इति सूत्रेण काव्ये रीतेः प्रामुख्यस्य प्रतिपादनमकरोत्। काव्यस्यात्मा रीतिरेव इति तस्याभिप्रायः।

रीणन्ति गच्छन्त्यस्यामिति, रीयते क्षरन्त्यस्यां वाङ्मधुधारा इति वा रीतिः। अधिकरणार्थे क्तिन् प्रत्ययः। एवं शब्दार्थयुगलस्य काव्यशरीरस्य आत्मा रीतिरिति वामनमतम्। वामनाचार्यः **विशिष्टा पदरचना रीतिः** इति रीतेः लक्षणमवदत् । माधुर्यादि गुणविशिष्टा पदरचना रीतिः इति तस्यार्थः। माधुर्यादीनां गुणानामभिव्यक्तिः रीतिद्वारैव, अतः रीतिरेव सारभूततया आत्मास्थानं भजति । रीतेः अनवस्थितत्वे काव्यस्यापि अनवस्थितिः जायते । एवञ्च रीतिद्वारेणैव काव्ये तुच्छमपि वस्तु सारभूतं सत् आनन्दं जनयति इति वामनाचार्येण विषदीकृतम् । पुनः तेन रीतिविभागः त्रिधा कृतः, तत्सूत्रञ्च **सा त्रेधा वैदर्भी गौडीया पाञ्चाली च** इति । सा रीतिः त्रिविधा तत्र प्रथमा वैदर्भी, तस्याश्च लक्षणं- **समग्रगुणा वैदर्भी** । समग्रैः माधुर्यौजप्रसादादिभिः गुणैरुपेता वैदर्भी । तदुक्तं –

**अस्पृष्टागोत्रमात्राभिः समग्रगुणगुम्फिता ।**
**विपञ्ची स्वरसौभाग्य वैदर्भी रीतिरिष्यते ॥**

अस्यार्थः काव्ये विद्यमानाः असाधुकष्टत्वादिदोषरहिता, समग्रगुणैः संघटिता, विपञ्ची अर्थात् वीणायाः स्वर इव अस्याः वैदर्भ्याः स्वरः अपि मनोरञ्जकः। उदाहरणं यथा-

**गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं**
**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।**
**विस्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिं पल्वले**

 ISSN: 2320-740X

**विश्रान्तिं लभतामिदञ्च शिथिलज्याबन्धमस्मध्दनुः ॥**

अस्मिन् पद्ये च समग्राणां गुणानां सत्वात् दोषाभावाच्च वैदर्भीरीतिरङ्गीकृता ।

पुनः **द्वितीया रीतिः - ओजः कान्तिमती गौडीया** अर्थात् ओजः कान्तिश्च विद्यते यस्यां सा **गौडीया** नाम रीतिः । तदुक्तम् -

**समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।**

**गौडीयामिति गायन्ति रीतिं रीति विचक्षणाः ॥**

समासवृत्तिमापन्नात्युद्भटपदयुक्तां, ओजो गुणेन, कान्तिगुणेन च समन्वितां रीतिं रीतिविचक्षणाः **गौडीया** इति कथयन्ति । उदाहरणम् –

**दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-**

**ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।**

**द्राक्पर्यस्तकपालसम्पुटमितब्रह्माण्डभाण्डोदरो**

**भ्राम्यात्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥**

समासबाहुल्यात् ओजः कान्तिगुणयोः सत्वात् अत्र गौडीयारीतिः ।

**तृतीया पाञ्चाली** यथा - **माधुर्यसौकुमार्योपपन्ना पाञ्चाली** तन्नाम माधुर्येण सौकुमार्येण च गुणेनोपपन्ना **पाञ्चाली** नाम रीतिः । तथा च उक्तिः –

**आश्लिष्टश्लथभावां तां पूरणच्छाययाश्रिताम् ।**

**मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥**

श्लिष्टपदरहितां, समासादिभिः रहिताम्, माधुर्यं सौकुमार्यञ्चेति गुणद्वयेन सहितां च रीतिं कवयः **पाञ्चाली** इति गदन्ति । उदाहरणम्-

**ग्रामेऽस्मिन् पथिकाय नैव वसतिः पान्थाधुना दीयते**

**रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा ।**

**तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत् कृतं**

**येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ॥**

अत्र दीर्घसमासाभावात् झटित्यर्थावगमात् च सुकुमारता इति गुणः, ततः पुनः पाञ्चाली रीतिः । आहत्य कविस्वभावानामानन्त्येऽपि वस्तुतस्त्रैविध्येन कोमलस्वभावात् वैदर्भी, परुषस्वभावात् गौडीया, उभयमिश्रितस्वभावात् पाञ्चालीति तस्याः विभागः । पुनः समासाधारेण असमासेन लघुसमासेन क्रमेण त्रैविध्यम् । इत्थम् वामनाचार्येण

काव्यजगति रीतिसिद्धान्तः प्रतिपादितः । अमुं सिद्धान्तं केचन आलङ्कारिकाः अङ्गीचक्रुः, अन्ये केचन रीतेः आत्मत्वम् अखण्डयन् । केचन तां रसास्वादने साधनत्वम् अविवेचयन्। रीतिविचारस्तु बहुभिः आलङ्कारिकैः स्वग्रन्थे निरूपितः एव।

**********

# साम्प्रतं संस्कृतम्

**राहुलमिश्रः**

शिक्षाशास्त्रिद्वितीयवर्षम्

नमस्याः अस्माकं पूर्वजमुनयः येषां स्वाध्यायेन तपसा च वयम् एतत् वदामः यत् **भारतस्य प्रतिष्ठे द्वे संस्कृतं सस्कृतिस्तथा** । ते मुनयः संस्कृतं संस्कृतिञ्च रक्षन्तः अस्मान् संस्कर्तुं प्रायतन्त । किन्तु **दूरतः पर्वतो रम्यः** इति कथनानुसारं यदि वयं भारतं पश्यामः तर्हि भारतस्य प्रतिष्ठे द्वे भवेतान्नाम । परन्तु आन्तरिकं दृष्टिनिक्षेपं कुर्मश्चेत् काचित् अन्या एव परिस्थितिः अवलोक्यते । तस्याः परिस्थित्याः काश्चन समस्याः उल्लिख्यन्तेऽत्र । ताः सुधीभिः भवद्भिः परिशीलनीयाः ।

<u>**पाठनसन्दर्भसमस्याः -**</u>

- **पाठशालानां स्थगनम् -** आङ्ग्लशासनस्य आरम्भकाले एव मेकालेप्रतिवेदनात् परं भारते इण्डियन् एजुकेशन् एक्ट अनुसारेण विधानं कृतं यत् सर्वाः अपि पाठशालाः असंवैधानिकाः इति यत्र मातृभाषायाः संस्कृतस्य च पाठनं प्राचलत् । एतस्मात् कालात् संस्कृतपाठनस्य महती हानिः अभवत् ।

- **अनुवादपद्धतिः -** अनन्तरकाले आङ्ग्लशिक्षायाः प्रचाराय विद्यालयाः प्रतिष्ठापिताः यत्र भारतीयेभ्यः आङ्ग्लं पाठयितुम् अनुवादपद्धतिः आश्रियत । कालक्रमेण एषा पद्धतिः संस्कृतपाठनेऽपि उपयुज्यमाना अभवत्। इदानीमपि बहुषु विद्यालयेषु एतया पद्धत्या पाठनं प्रचलति । पुनश्च संस्कृतवाङ्मयस्य विषयाः अनुवादग्रन्थमाध्यमेन चोरिताः । अनेन संस्कृतवाङ्मयस्य अध्यात्मायुर्वेदयोगविज्ञानगणितादिविषयाणां प्रचारस्तु अभूत् परन्तु संस्कृतभाषा परित्यक्ता । एतेन सरलीकृतसंस्कृतं (अनुवादादिः) गृहीतं जनैः, न तु सरलं संस्कृतम् ।

- **लक्ष्यपरिवर्तनम् -** आङ्ग्लैः भारतीयशिक्षापरम्परा तु नष्टा । परन्तु तस्मिन् काले शिक्षाग्रहणस्य परिभाषा

 ISSN: 2320-740X

अपि **"सा विद्या या विमुक्तये** इत्यतः **सा विद्या या नियुक्तये** इति परिवर्तिता । अस्य परिवर्तनस्य प्रभावः न केवलं संस्कृतसन्दर्भे अपितु अन्यत्रापि बाहुल्येन दृश्यते यत् शिक्षाग्रहणस्य मुख्योद्देश्यम् उद्योगप्राप्तिः प्रमाणपत्रप्राप्तिः एव इति । एतेन वैयक्तिकलाभः साध्यते, न तु देशस्य लाभः, न च शास्त्रसम्प्रत्ययस्य ।

- **आवश्यकता -** सम्प्रति विद्यालयेषु संस्कृतन्नाम परीक्षायाम् अङ्कवर्धनाय केवलम् एकःविषयः इति मन्वते छात्राः । ततः परं संस्कृतानुरागिच्छात्राः विश्वविद्यालयेषु अधीत्य तत्तद्विषयेषु अध्यापनं कुर्वन्ति । एवं क्रमेण शास्त्रसंरक्षणं तु भवति, परन्तु एतेषां शास्त्राणां लौकिकावश्यकतानां पूर्तये उपयोगाय च अवसरः नास्ति । अतः साक्षादुपयोगाय नास्तीति मत्वा जनाः शास्त्रेभ्यः संस्कृताच्च विमुखाः भवन्ति । तदर्थं वेदेषु शास्त्रेषु च सन्निहितानां विज्ञानगणितप्रयुक्तिविद्यायुर्वेदादीनां विशोधं कृत्वा लोकोपयोगाय अवसरः कल्पनीयः अस्ति ।

- **पाठ्यक्रमः -** एषा समस्या बहुत्र दृश्यते यत् बहुषु राज्येषु संस्कृतम् अनिवार्यं नास्ति विद्यालयीयशिक्षायाम् । स्थितिः एषा अस्ति यत् केषुचित् राज्येषु पञ्चमीतः कुत्रचित् षष्ठकक्ष्यारभ्य क्वचित् अष्टमीतः संस्कृतं शिक्ष्यते तच्च पुनः विकल्पत्वेन । नागालेण्ड्, पाण्डिच्चेरी इत्यादिस्थानेषु तु संस्कृतविषयः एव न भवति । पुनश्च कदाचित् एवमेव भवति यत् पाठ्यक्रमनिर्मातारः विश्वविद्यालयीयपण्डिताः भवन्ति । येषु माध्यमिकस्तरपाठनस्य अभिज्ञता एव न भवति । तदर्थं पाठ्यक्रमः छात्रेभ्यः कठिनायते । एतस्मात् भीताः छात्राः संस्कृतं त्यक्त्वा अन्यं विषयं स्वीकुर्वन्ति ।

- **श्रमाणां कृतश्रमाणाञ्च उपेक्षा -** अस्माकं वेदोपनिषच्छास्त्राणि ज्ञानैः परिपूरितानि सन्ति । एतेषु विद्यमानविषयान् परिशील्य आधुनिकवैज्ञानिकाः एतत् सर्वं सत्यमिति अङ्गीकुर्वन्ति । अस्माकं पूर्वजाः मुनयः ऋषयः बहून् आविष्कारान् कृतवन्तः सन्ति । परन्तु दौर्भाग्येण आधुनिकपाठ्यपुस्तकेषु वैदिकज्ञानगणितादीनाम् आर्यभट्टचाणक्यादीनाञ्च विषये न पाठ्यते अपितु आइन्ष्टाइन्, न्युटन् इत्यादीनां विषयः बहुत्र उल्लिख्यते । एतेन बाल्यकालादेव एषा भावना उत्पद्यते यत् वैदेशिकज्ञानमेव ज्ञानमस्तीति । भारतीयज्ञानविषये अनभिज्ञाः भवन्ति ।

<u>**सामाजिकसन्दर्भसमस्याः**</u>

- **हीनभावना -** आङ्ग्लशासनकालात् इदानीं यावत् लोके संस्कृताय काचित् हीनभावना जागरिता अस्ति । आङ्ग्लप्रचारस्य आरम्भिकदशायां तथाकथितसमाजसंस्कारकाः राममोहनादयः प्रतिग्रामम् अटन्तः वदन्ति स्म यत् **आङ्ग्लपठनाय बालान् प्रेषयन्तु** इति । तदानीम् अभिभावकानाम् उत्तरं भवति स्म **आङ्ग्लं पठित्वा**

**अस्माकं पुत्राः किं वा करिष्यन्ति** इति । परन्तु समयान्तरे पितृणाम् उत्तरमपि परिवर्तितम् । इदानीं वदन्ति **बालः संस्कृतं पठित्वा किं वा करिष्यति ? को लाभः ?** इति । अस्य मूलकारणम् एवम् अस्ति यत् शासनक्षेत्रे कार्यालयीयक्षेत्रे अन्तर्जालादिक्षेत्रेषु च आङ्ग्ल-मातृभाषा-हिन्दी इत्यादीनां भाषाणामेव उपयोगः अस्ति । न कुत्रापि संस्कृतस्य । पुनश्च उद्योगक्षेत्रेऽपि पठितसंस्कृतेभ्यः प्रायशः अध्यापनकार्यमेव लभ्यते । तत्रापि वेतनस्य स्थितिः दयनीया अस्ति ।

- **अपप्रचारः** - आबहुभ्यः कालेभ्यः कैश्चित् महामनीषिभिः एवम् अपप्रचारः अपि क्रियते यत् भाषा एषा मृता, कठिना, प्राचीना, अनुपयोगिनी, उच्चवर्गीयाणाम् इत्यादयः। एषा भाषा केवलं पूजापाठादिनिमित्तम् इत्यादिकथाः बहुधा श्रूयन्ते ।

- **परिवेषस्य न्यूनता** - अन्याभिः भाषाभिः संवादपत्रिकाः धारावाहिन्यः चलच्चित्राणि निर्मीयन्ते । शैक्षिकसंस्थासु अन्याः भाषाः माध्यमत्वेन स्वीक्रियन्ते । एतेषां सर्वेषामपि प्रभावः साधारणजनानां दैनन्दिनजीवने आपतति । परन्तु संस्कृतस्य उपयोगः एतेषु प्रायशः न भवति । न च कुत्रापि एषा व्यावहारिकभाषा अस्ति ।

**<u>शासकीयसन्दर्भसमस्याः</u>**

श्रूयते यत् कदाचित् भारते सुवर्णयुगः आसीत् । तदानीं बहुषु क्षेत्रेषु भारतम् अग्रणि आसीत् । परन्तु कालान्तरे अरब - इङ्ग्लेण्ड् आदिभ्यः देशेभ्यः देवदूताः आगताः । स्वातन्त्र्योत्तरकालेऽपि गान्धि, नेहेरु इत्यादयः भारतस्य तथाकथितसुपुत्राः बहुप्रयत्नं कृतवन्तः । येन कारणेन साम्प्रतं संस्कृताध्ययनव्यवस्था मुमूर्षुदशां प्राप्नोत् । स्वातन्त्र्योत्तरकाले भारते या स्थितिः आङ्ग्लस्य आसीत् सा संस्कृतस्यापि आसीत् । आङ्ग्लं गणतन्त्रव्याजेन पृष्ठपोषकतां प्राप्य प्रतिगृहं प्राविशत् । परन्तु संस्कृतम् अद्यावधि सङ्ग्रहालये कपाटिकासु च स्थानमलङ्करोति । संस्कृतस्य सार्वत्रीकरणं न सम्भवति यतोहि गणतन्त्रं धर्मनिरपेक्षता च संस्कृतस्य स्वागतीकुरुतः । भारते कार्यालयीयभाषा देशे सर्वत्र विद्यमानं संस्कृतं नास्ति अपितु किञ्चन वैदेशिकम् आङ्ग्लमस्ति ।

देशे बहवः शिक्षायोगाः रचिताः परन्तु न कोऽपि संस्कृतस्य पक्षं स्व्यकरोत् । अपितु समयान्तरे प्रथमकक्ष्यारभ्य आङ्ग्लशिक्षा अनिवार्या अभवत् । ततः परं प्रथमकक्ष्यारभ्य आङ्ग्लमाध्यमोऽपि प्रवृत्तः । दशमकक्ष्यां यावत् त्रिभाषासूत्रम् अवश्यं भवेदिति नियमः कृतः तत्रापि संस्कृतस्य नामलेश एव नास्ति ।

उपर्युक्तानुक्ताश्च बह्व्यः समस्याः सन्ति यासां कारणैः संस्कृतशिक्षा प्रभाविता लुप्तप्राया चास्ति। अन्ततो गत्वा यदि पश्यामः तर्हि अस्माकं संस्कृतज्ञानां संस्कृतानुरागिणां निष्क्रियतापि प्रमुखं मूलकारणञ्च विद्यते । देशे संस्कृताय

समर्पिताः बहवः विद्यालयाः विश्वविद्यालयाः च सन्ति । परन्तु सर्वत्रापि पाठनगुणवत्तायां छात्रसङ्ख्यायाञ्च अभावपूर्णस्थितिः दरीदृश्यते । स्वरोत्तोलनाय असाध्यं साधनाय भारतं पुनरेकवारं विश्वगुरुस्थाने प्रतिष्ठापनाय च प्रकृष्टसमयः उपस्थितः । केवलम् अस्माभिः जागरणीयमस्ति । नो चेत् भारतमातुः उत्तरदायादाः संस्कृतिसंस्कृतहीनाः उत्पद्येरन् ।

**********

# स्मृतिग्रन्थेषु मूल्यशिक्षा

**मधुस्मिता राउत**

शिक्षाशास्त्रिप्रथमवर्षम्

**अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ।**

**चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः ॥**[1]

उदात्तानां जीवनमूल्यानाम् अनुसरणेन मानवाः श्रेयांसि प्राप्नुवन्ति । एवमेव स्वात्मानं सात्विकजीवनं यापयत्वा धन्यताभावं प्राप्तुं शक्नुवन्ति । वस्तुतः कस्यापि राष्ट्रस्य मूल्याङ्कनं तत्रत्य जनसमाजस्य आचरणगतमूल्यैः क्रियते । प्रत्येकं राष्ट्रस्य एका भवति परम्परागतसंस्कृतिः, यस्याः सर्जनं तेषां मूल्यानामाधारेण अभिजायते । यासां पालनं तत्रत्यैः महापुरुषैः क्रियते । वस्तुतः तैः मूल्यैः तेषां चरित्रं गौरवपूर्णव्यक्तित्वं स्वर्णाक्षरैः अङ्कितं जायते ।

भारतीयधार्मिकसाहित्ये स्मृतीनां मुख्यं स्थानम् अस्ति । श्रुतेः पश्चात् धार्मिकक्रियासु मान्या अस्ति एषा एव । धर्मस्य मूलस्रोतः यस्मात् प्रवाहितं जातं तेषु स्मृतिः प्रधाना वर्तते । महर्षियाज्ञवल्क्येन धर्मस्य पञ्चमूल्यानि स्वीकृतानि । यथा - श्रुतिः, स्मृतिः, सदाचारः, स्वाभीष्टवस्तु, सङ्कल्पेनोत्पन्ना इच्छा च । अनेन कथनेन स्पष्टीक्रियते यत् धर्म-मीमांसायोः कृते वेदादनन्तरं स्मृति एव प्रमाणं वर्तते । सामाजिकसन्दर्भे अपि एतासां बहुमहत्वम् प्रतिभाति । भारतीयसमाजः आश्रितोऽस्ति वर्णाश्रमसिद्धान्ते । अतः एतेषां सम्पूर्णज्ञानार्थं धर्मशास्त्रस्य ज्ञानम् आवश्यकं वर्तते । षोडशसंस्काराणां विधानं स्मृतिषु निहितमस्ति । भारतीयानां व्यवहारावबोधार्थमपि एतासाम् अनुशीलनम् अनिवार्यम् अस्ति ।

[1] अध्यात्मोपनिषद्

याज्ञवल्क्यस्मृतौ त्रयः मुख्यविषयाः सन्ति । आचारः, व्यवहारः, प्रायश्चित्तश्च । आचाराध्याये महर्षियाज्ञवल्क्येन मानवहृदयस्य शुद्धीकरणार्थं समाजानुकूलानां पवित्रनियमानां मण्डनं कृतम् । परधर्मः आचारः मुख्यः भवति याज्ञवल्क्यस्मृतौ । आचारेण सत्समाजस्य स्थापना उन्नतिश्च जायते । आचारशास्त्रं समाजिकनियमान् परिपाल्य व्यक्तेः समाजस्य चारित्रिकबलं च वर्धयति ।

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**

**सम्यक्सङ्कल्पः कामो धर्ममूलमिदं स्मृतम् ॥**[1]

श्रुतिः अर्थात् वेदः, स्मृतिः, धर्मशास्त्रं, सदाचारः, पवित्रविचारः, उदारभावः, परोपकारादर्शश्च एते एव सर्वे धर्माः।

महर्षियाज्ञवल्क्येन आचाराध्याये चतुर्दशविद्याः, धर्मस्य उपादाननसंस्कारः (जन्मतः विवाहपर्यन्तं), उपनयनम्, तस्य समयः, ब्रह्मचारिणः कर्त्तव्याकर्तव्यः, विवाहः, तस्य योग्यता, सपिण्डसम्बन्धस्य नियमः, अन्तर्जातीयनियमः, अष्टविवाहः, गृहस्थस्य कर्त्तव्यम्, आचारस्य दशसिद्धान्तः, गृहस्थस्य जीवनपद्धतिः, स्नातकस्य कर्तव्यम्, अनध्यायः, दानस्य नियमः, श्राद्धविधिनियमः, गृहशान्तिः, राजधर्मः, दण्डादीनाञ्च विधानं क्रियते । एतेषां मूल्यनामाचारेण पवित्रस्य उत्तमसमाजस्य निर्माणं भवितुं शक्यते ।

**व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।**

**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥**[2]

एतादृशानि बहुनि मूल्यानि स्मृतिग्रन्थेषु वर्णितानि सन्ति । अतः एतेषां संस्काराणां पालनेन अवश्यमेव सदाचारशीलयुक्तं जीवनं भवति ।

**********

[1] याज्ञवल्क्यस्मृतिः – 1 अ. 7 श्लो.

[2] याज्ञवल्क्यस्मृतिः – 2 अ. 1 श्लो.

 ISSN: 2320-740X

# शिक्षायाः अभिकरणानि, तेषां प्रकृतिः, सम्प्रत्ययः, आवश्यकता च ।

**(Agencies of Education, Nature, Concept, Need and Objectives.)**

**मधुस्मिता मिश्र**

शिक्षाशास्त्रिप्रथमवर्षम्

'अभि' इति उपसर्गपूर्वकात् 'कृ' धातोः ल्युट्-प्रत्यये विभक्त्यादिकार्ये 'अभिकरणम्' इति पदं निष्पन्नम् । यस्य साहाय्येन सम्पूर्णकार्यस्य सिद्धिः भवति तदेव अभिकरणम् । अभिकरणस्य आङ्ग्लं पदं भवति 'Agency' अर्थात् 'An Organization Providing a Particular Service' इति । येन माध्यमेन शैक्षिकगतिविधयः प्रचलन्ति तन्माध्यममेव शिक्षायाः साधनम् अभिकरणं वा भवति ।

शिक्षाक्षेत्रे प्रधानतया त्रिविधानि अभिकरणानि सन्ति । तद्यथा -

1. औपचारिकम् अभिकरणम् (Formal Agency)
2. अनौपचारिकम् अभिकरणम् (Informal Agency)
3. निरौपचारिकम् अभिकरणम् (Non-formal Agency)

### 1. औपचारिकम् अभिकरणम् (Formal Agency)

शिक्षायाः औपचारिक- अभिकरणानि (Formal Agencies of Education) इमानि भवन्ति-

a) विद्यालयः (School)
b) धार्मिकसंस्थाः (Religious Institutions)
c) पुस्तकालयः (Library)
d) सङ्ग्रहालयः ( Museum)
e) व्यायामशाला (Gymnasium)

**औपचारिक – अभिकरणस्य सम्प्रत्ययः (The Concept of Formal Agency)** - येन माध्यमेन नियमितरुपेण पूर्वयोजनया वा शिक्षाप्रक्रियायाः आयोजनं क्रियते तन्माध्यमम् औपचारिकम् अभिकरणं भवति ।

**औपचारिक – अभिकरणस्य आवश्यकता (Needs of Formal Agency)**

a) सुव्यवस्थित व्यक्तित्वविकासार्थम् ।

b) नियमित–शैक्षिकवातावरण–निर्माणार्थम् ।

c) नैतिक–सामाजिक–सांस्कृतिक–शारीरिक-मानसिकविकासार्थम् ।

d) सुव्यवस्थितजीवनयापनार्थम् ।

e) ऐक्यभावनायाः विकासार्थं सम्पादनार्थञ्च ।

**औपचारिक – अभिकरणस्य उद्देश्यानि । (The Objectives of Formal Agency)**

a) छात्रस्य बहुमुखचिन्तनम् ।

b) पाठितविषयस्यावबोधः कार्यान्वयनञ्च ।

c) समयस्य परिपालनम् ।

d) सामाजिककुशलतासम्पादनम् ।

e) विश्वबन्धुत्वभावनासम्पादनम् ।

**औपचारिक – अभिकरणस्य प्रकृतिः (The Nature of Formal Agency)**

a) निश्चितसमये निश्चितस्थाने च योजनाबद्धा शिक्षा भवति ।

b) पूर्वनिर्धारितपाठ्यक्रममाश्रित्य शिक्षा–प्रकियायाः आयोजनं भवति ।

c) पाठ्यक्रममादृत्य विधीनां निर्धारणमपि पूर्वं भवति ।

d) निश्चितैः शिक्षकैः निश्चितेभ्यः छात्रेभ्यः शिक्षाप्रदानस्य आयोजनं भवति ।

**2. अनौपचारिकम् अभिकरणम् (Informal Agency)**

a) परिवारः । (Family)

b) समाजः । (Society)

c) क्रीडाङ्गणम् । (Play ground)

d) आकाशवाणी । (Radio)

e) दूरदर्शनम् । (Television)

**अनौपचारिक – अभिकरणस्य सम्प्रत्ययः (The Concept of Informal Agency)** - येन माध्यमेन अनियमितरुपेण पूर्वयोजनां विना वा शिक्षाप्रक्रियायाः आयोजनं क्रियते तन्माध्यमम् अनौपचारिकम् अभिकरणं भवति ।

**अनौपचारिक – अभिकरणस्य – आवश्यकता (Needs of Informal Agency)**

a) अप्रत्यक्षरूपेण बालकस्य व्यवहारे परिवर्तनस्य आनयनम् ।

b) सामाजिकव्यवहारेण सह नैतिकसांस्कृतिकगुणानां विकासनम् ।

c) चिन्तनशक्तेः कल्पनाशक्तेश्च परिप्रकाशनम् ।

d) कौटुम्बिकभावनायाः ऐक्यभावनायाः च जागरणम् ।

e) स्वतन्त्रतायाः अनुशासनस्य च स्वतः स्फुटनम् ।

**अनौपचारिक – अभिकरणस्य उद्देश्यानि (The Objectives of Informal agency)**

a) उद्देश्यं पूर्वनिश्चितं न भवति । समयानुगुणं परिस्थित्यनुगुणञ्च परिवर्त्यते ।

b) सामाजिकज्ञानस्य कार्यान्वयनम् ।

c) चरित्रनिर्माणेन सह सुनागरिकत्वसम्पादनम् ।

d) स्वाभाविक-रुच्यनुसारं शिक्षाप्रदानम् ।

e) परोपकारः, सहिष्णुता, कृतज्ञता, आज्ञापालनादिगुणानां विकासः ।

**अनौपचारिक – अभिकरणस्य प्रकृतिः (The Nature of Informal Agency)**

a) अनिश्चितसमये अनिर्धारितस्थाने च योजनां विना शिक्षायाः आयोजनम् ।

b) अनिर्धारितविषयाणां शिक्षकप्रक्रियायाः आयोजनं भवति ।

c) परिस्थित्यनुगुणं शिक्षायाः आयोजनं भवति ।

d) सामाजिकगतिविधीनामाधारेण अध्ययनं प्रचलति ।

e) अनिश्चितैः शिक्षकैः अनिश्चितेभ्यः छात्रेभ्यः शिक्षाप्रदानाय आयोजनं भवति ।

**३. निरौपचारिकम् अभिकरणम् (Non-Formal Agency)**

शिक्षायाः निरौपचारिक – अभिकरणानि (Non- Formal Agencies of Education)

a) पत्राचारपाठ्यक्रमः ।

b) जनसञ्चारसाधनानि ।

c) चलनचित्रगृहम् ।

d) मुक्तविश्वविद्यालयः ।

e) सङ्गणकयन्त्रम् ।

**निरौपचारिक-अभिकरणस्य सम्प्रत्ययः (The concept of Non-formal agency) -** येन माध्यमेन औपचारिक–अनौपचारिकयोः अभिकरणयोः यथावश्यकं सम्मिश्रणेन शिक्षायाः आयोजनं क्रियते तन्माध्यमं निरौपचारिकम् अभिकरणं भवति ।

**निरौपचारिक – अभिकरणस्य उद्देश्यानि (The objectives of Non-formal agency)**

a) जनजागृतिः ।

b) साक्षरतावर्धनम् ।

c) व्यवहारे परिवर्तनम् ।

d) जनेषु सामाजिकविकासस्यावधारणायाः स्थापनम् ।

e) राष्ट्रियविकासः

**निरौपचारिक – अभिकरणस्य प्रकृतिः (The nature of Non-Formal Agency)**

a) एषा औपचारिक-अनौपचारिक-अभिकरणयोः सम्मिश्ररूपा भवति ।

b) पाठ्यविषयाः पूर्वनिश्चिताः भवन्ति, परम् उद्देश्यानि तात्कालिकानि भवन्ति ।

c) अधिगमविषयमभिलक्ष्य विधीनां स्वतः प्रयोगः क्रियते ।

d) आवश्यकशिक्षा-केन्द्रिता भवति ।

e) छात्रस्य, अध्यापकस्य, शिक्षाप्राप्तिस्थानस्य च निर्धारणं परिस्थित्याधारेण भवति ।

**उपसंहृतिः –** शिक्षाक्षेत्रे अभिकरणानि विशिष्टानि अङ्गानि वर्तन्ते । अभिकरणानि एव शिक्षायाः प्रकृतिं, सम्प्रत्ययम् आवश्यकातञ्च द्योतयन्ति । अन्यस्मिन्नर्थे वदामश्चेत् अभिकरणमित्युक्ते शिक्षां प्राप्तुं विद्यमानानि साधनान्येव । अभिकरणानां माध्यमेनैव शिक्षाकार्यं सुष्ठु सम्पद्यते । अतः नियमितरूपेण योजनाबद्धशिक्षानिमित्तं अभिकरणानाम् आवश्यकता अनिवार्यमेव ।

**********

 ISSN: 2320-740X

# धर्मः

**रंजुला पधान्**

शिक्षाशास्त्रिप्रथमवर्षम्

भारतीयसंस्कृतेः मूलाधारो भवति धर्मः । स च प्राचीनकालादारभ्य अद्यावधि समग्रसृष्टेः मूलाधारो भवति । भारतवर्षे धर्मस्य अत्यधिकं प्राधान्यं प्रदत्तमस्ति । **धृञ् धारणपोषणयो**रित्यस्माद्धातोः **मन्** प्रत्यये कृते धर्म इति शब्दः निष्पद्यते । धर्मस्य व्युत्पत्तिं एवं वर्णयन्ति –

- ध्रियते लोकः अनेन इति धर्मः ।
- धरति धारयति वा लोकेऽस्मिन् ।
- ध्रियते लोकयात्रानिर्वाहार्थं यः सः धर्मः इति ।

येन माध्यमेन लोकानां धारणं सम्भवति । यः संसारः धारयति स एव धर्म इति मनुस्मृतिग्रन्थे धर्मस्य विषये वर्णितमस्ति –

**वेदस्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥**[1] इति ।

ऋग्वेदः, यर्जुवेदः, सामवेदः, अथर्ववेदश्चेति चतुर्वेदाः, शिक्षा, कल्पः, व्याकरणं, निरुक्तम्, छन्दः, ज्यौतिषमिति षड्वेदाङ्गानि, तथैव उपवेदाः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च धर्मस्य सूक्ष्मतत्वचिन्तने सहायकाः भवन्ति ।

महाभारतस्य अनुसारेण जगद्धारकतत्वानि एव धर्माः । यथा –

**धारणद् धर्म इत्याहुः धर्मो धारयति प्रजाः ।**
**यस्स्यात् धारणसंयुक्तः स धर्म इति निश्चयः ॥**

धर्म एव जीवनस्य सारः । मनुजेषु विद्यमानानां पाशविकप्रवृत्तीनां दूरीकरणायमार्ग एव धर्मः । धर्ममार्गे अनुसरणशीलाः पशुत्वात् मानुषत्वम्, मानुषत्वाच्च दैवत्वं प्राप्नुवन्ति । अतः धर्मशून्याः जनाः पशुतुल्या एव । अर्थसङ्ग्रहेऽपि धर्मस्य विषये वर्णितमस्ति यथा –

**चोदनालक्षणोऽथौ धर्मः।**[2] इति ।

---

[1] मनुस्मृतिः – 2 अ. 12 श्लो.

[2] जैमिनिसूत्रम् – 1-1-2

यदेव तत्वं मानवातां स्फूर्तिजनकम् अत्तश्चेत्नप्रबोधकम् सत्कर्मोण प्रवर्त्तकं च तदेव धर्मः शब्दवाच्यम् । वैशेषिकदर्शने महर्षिकणादेन प्रतिपाद्यते यत् लौकिकालौकिक-साधनतत्वानि एव धर्म इति । तद्यथा–

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥**

अधर्मो विनाशकारणम् । अतः जीवने धर्माचरणं सर्वदा श्रेयस्करम् । धर्ममार्गानुगामिनां वहूनि कष्टानि सम्मुखीकरणीयानि भवन्ति । किन्तु तानि सर्वाणि सहमानः यो धर्मान्न विचलति सः अवश्यं सफलताम् काले एव अवप्नोति । धर्माचरणं जीवनरक्षकं सुखशन्तिसाधकं सत्कर्मप्रेरकं दुःखनिरोधकञ्च भवति । धर्मस्य सर्वदा सर्वत्र विजयो भवतीति भगवदुक्तिः प्रसिद्धा ।

**॥ यतो धर्मस्ततो जयः ॥**

**************

# व्यक्तित्वम् (Personality)

**रवीश जोशी**

शिक्षाशास्त्रिप्रथमवर्षम्

शिक्षायाः उद्देश्येष्वन्यतमं वर्तते सम्पूर्णव्यक्तित्वस्य विकासः । सामान्यतः लोके शारीरिकसंरचना, स्वास्थ्यं, सौन्दर्यं, वेषभूषा इत्यादीन् सामान्यगुणान् व्यक्तित्वमिति लौकिकाः कथयन्ति । कदाचित् अन्नपानादीन् भाषणशैलीं चलनशैलीञ्च दृष्ट्वा व्यक्तेः विषये सामान्यीकरणं कुर्मः । यथा – अयं भोजनप्रियः, अयं वाग्मी, अयं मितभाषी, अयं भ्रमणशीलः इत्यादि । यथोक्तं पञ्चतन्त्रे –

**आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।**

**नेत्रवक्त्रविकारैश्च ज्ञायतेऽन्तर्गतं मनः ॥**

व्यक्तित्वम् इत्यस्य आङ्गलभाषायां Personality इति समानार्थकशब्दः, व्यक्तेः बाह्यगुणान् आचारव्यवहारांश्च द्योतयति । वस्तुतः लाटिनभाषायाः Persona इति शब्दात् Personality शब्दः निष्पन्नः । Persona इत्यस्य लाटिनभाषायां मुखावरणम् (Mask) इत्यर्थः । अतः विविधाभिः प्रक्षेपक–अप्रक्षेपकपरीक्षाभिः व्यक्तेः गूढव्यवहारं ज्ञातुं प्रयत्नः क्रियते ।

**व्यक्तित्वस्य परिभाषा**

मनोविज्ञाने व्यक्तित्वस्य बहवः परिभाषाः समुपलभ्यन्ते । एताः परिभाषाः कस्याश्चित् व्यक्तेः शारीरिक-मानसिक–सांवेगिक–सामाजिक–आध्यात्मिकगुणान् द्योतयन्ति । ताः यथा –

1. **गिल्फोर्डमहोदयः** – व्यक्तित्वं गुणानां समष्टिस्वरूपं वर्तते (Personality is an Integrated Pattern of traits – Guilford.)
2. **वुडवर्थमहोदयः** – सामाजिकसमायोजनेन प्राप्तव्यवहारविशेषताः एव व्यक्तित्वम् इति कथ्यते । (Personality is the sum of total behavioral trends manifested in his social adjustment – Wood worth.)
3. **अल्पोर्टमहोदयः** – व्यक्तित्वं कस्यचित् मनुष्यस्य मनःशारीरिकव्यवस्थानां गत्यात्मकसङ्घटनं वर्तते यत् परिवेषेण सह तस्य अपूर्वसमायोजनं निर्धारयति ।
4. आर्. बि. केटिलमहोदयः - प्रदत्तपरिवेषे कस्याश्चित् व्यक्तेः व्यवहारस्य भाविकथनमेव व्यक्तित्वमिति वक्तुं शक्यते।

- **व्यक्तित्वं प्रभावयन्ति कारकाणि**

व्यक्तित्वम् पूर्वोक्तगुणेषु कानि कारकाणि प्रभावयन्ति इति जिज्ञासायाम् अध्ययनसौकर्यार्थं शारीरिककारकाणि परिवेषिककारकाणि इति द्विधा विभागं कर्तुं शक्नुमः ।

**1. शारीरिककारकाणि** – प्रत्येकं व्यक्तिः जन्मतः कानिचन शारीरिक–मानसिकलक्षणानि पूर्ववंशजेभ्यः प्राप्नोति । व्यक्तेः वर्णः, शरीराकृतिः, भारः, शारीरिकसामर्थ्यम्, स्वास्थ्यम् इत्यादयः बहवोऽप्यंशाः वंशानुक्रमेण प्रभाविताः भवन्ति । तत्र अधोनिर्दिष्टांशाः प्रधानतया भवन्ति ।

- **शरीराकृतिः** - व्यक्तेः सौन्दर्यम्, शारीरिकदृढता, दुर्बलता च व्यक्तित्वं प्रभावयन्ति ।
- **ग्रन्थयः** – शरीरस्य अन्तः विद्यमानग्रन्थयः व्यक्तित्वं प्रभावयन्ति ।
- **नाडीमण्डलम्** – केन्द्रनाडीमण्डलं, स्वयञ्चालितनाडीमण्डलं, संयोजकनाडीमण्डलञ्च व्यक्तेः सर्वाणि कार्याणि नियन्त्रयति ।
- **स्वास्थ्यम्** – उत्तमशारीरिक-मानसिकस्वास्थ्यमपि व्यक्तित्वं प्रभावयति ।

वस्तुतः सर्वाण्येतानि वंशानुक्रमेण प्रभाविताः भवन्ति । अत एतेषां **वंशानुक्रमकारकाणि** इत्यपि वक्तुं शकनुमः ।

**2. पारिवेषिककारकाणि** - वंशानुक्रमादनन्तरं परिवेषः व्यक्तित्वमत्यन्तं प्रभावयति । मनुष्यस्य अभिवृद्धिविकासयोः परिवेषस्य प्रभावं परिशीलयामः ।




**3. गृहं परिवारश्च** – बालकः जन्मतः वर्षत्रयं यावत् गृहे एव तिष्ठति । अतः तस्मिन् समये गृहवातावरणं बालकमत्यन्तं प्रभावयति ।

**4. विद्यालयः** – विद्यालये अध्यापकस्य प्रधानाध्यापकस्य सहच्छात्राणाञ्च गुणाः, पाठ्यक्रमः, शिक्षणपद्धतयः, पाठ्येतरकार्यक्रमाः, अनुशासनम् इत्यादयः बालान् प्रभावयन्ति ।

**5. समाजः** – गृहविद्यालययोः अनन्तरं सामाजिकपरिवेषः बालकान् अत्यधिकं प्रभावयति । समाजस्य आचारव्यवहाराः, जीवनपद्धतिः, मूल्यानि च व्यक्तित्वं प्रभावयन्ति ।

### व्यक्तित्वसिद्धान्ताः

व्यक्तित्वमेकः संकीर्णः विषयः वर्तते । व्यक्तित्वस्य स्वरूपविषये मापने च बहवः मनोवैज्ञानिकाः प्रयत्नशीलाः आसन् । विशिष्य शिक्षामनोविज्ञने व्यक्तित्वमापनं प्रधानांशः वर्तते । सिद्धान्तानां बाहुल्यात् तेषां वर्गीकरणमनिवार्यं भवति । अनेन तेषां सामान्यस्वरूपम् इतोऽपि स्पष्टं भवति ।

**शरीराकृतिसिद्धान्ताः** – व्यक्तेः शरीराकृतिमाश्रित्य व्यक्तित्वस्य व्याख्यानं कर्तुं बहवः प्रयत्नमकुर्वन् ।

**(क) हिप्पोक्रोट्समहोदयस्य सिद्धान्तः** – ग्रीसदेशीयः हिप्पोक्रोटस नामकः वैद्यः शरीराकृतिमाश्रित्य व्यक्तित्वस्य पैत्तिकः श्यामपित्तीयः, पीतपित्तीयः, सुप्रत्याशी इत्यादिरीत्या व्याख्यानमकरोत् ।

**(ख) युंगमहोदयस्य वर्गीकरणम्** – युंगमहोदयः मनुष्यस्य सामाजिकगुणानामाधारेण अन्तर्मुखः इति द्विधा विभागमकरोत् । सामान्यतः अधिकांशव्यक्तिषु, एतल्लक्षणद्वयमपि सङ्गच्छते । अतः एतान् उभयमुखः इति वक्तुं शक्यते ।

**********

 ISSN: 2320-740X

# दशाफलविचारः

**वेङ्कटरमण हेब्बारः**
शिक्षाशास्त्रिप्रथमवर्षम्

शास्त्रमेतत् पूर्वजन्मार्जितसदसत्कर्मणः फलम् व्यञ्जयति । तच्च कर्म दृढकर्म अदृढकर्म दृढादृढकर्म चेति त्रिविधम् । तत्र तावददृढकर्मणः फलं दशाप्रभेदेन चिन्तनीयम् इत्युक्तं शास्त्रे । तदेवोक्तम् –

**दशा प्रभेदेन विचिन्तयेद् दृढं दृढेतरञ्चाष्टकवर्गगोचरैः ।**

**दृढादृढं योगवशेन चिन्तयेत् इति त्रिधा जातकसूक्ष्मसङ्ग्रहः ॥**[1]

अत्र का नाम दशा इति जिज्ञासायां दंस्यन्ते अनुभूयन्ते फलानि अस्याम् इति दशा । मिहिरोऽपि **स्वां स्वां दशामुपागताः स्वफलप्रदाः स्युः**[2] इति वदन् ग्रहाणां भावस्थानालोकयोगोद्भूतस्य सर्वस्यापि फलस्य प्रदानकालस्यैव दशा इति अभिप्रेयाय । अतः ग्रहाणां स्वसूचितफलदानकालस्यैव दशेति संज्ञा इति शास्त्रनिर्णयः । तत्रादौ का दशा शुभदा भवति इति कथयामास वराहमिहिरः -

**पाकस्वामिनि लग्नगे सुहृदि वा वर्गेऽस्य सौम्येऽपि वा**

**प्रारब्धा शुभदा दशा त्रिदशषड्लाभेषु वा पाकपे ।**

**मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थित –**

**श्चन्द्रः सत्फलबोधनानि कुरुते पापानि चातोऽन्यथा ॥**[3]

अर्थात् दशास्वामिनि दशारम्भकालिकलग्नगते सति अथवा मित्रस्थानगे सति अथवा त्रि-दश-षड्-लाभेषु स्थिते सति प्रारब्धा दशा शुभदा भवति । यदि दशाधिपस्य मित्रगृहे, उच्चराशौ, उपचयभावेषु त्रिकोणे सप्तमे वा चन्द्रः स्थितश्चेत् तदा सापि दशा शुभदा भवति ।

दशाधिपः दशारम्भकाले स्वराशौ स्वोच्चे अथवा मित्रभवने स्थितः सन् शुभग्रहेण मित्रग्रहेण वीक्षितो युतो वा भवेत् तदाऽपि नराणां तद्भावसम्बन्धि शुभफलं वाच्यम् । यदि तु दशापतिः केन्द्रे त्रिकोणे वा स्थितः तदा दशायाम् अतिशुभफलानि अनुभूयन्ते । सत्वादिप्रकृतिमतां ग्रहाणां दशासमये तत्तद्गुणो जायते । अर्थात् सत्वगुणात्मकग्रहदशायां

---

[1] बृहज्जातकस्य रुद्रविवरण्याम् – १ अ. ३ श्लो.

[2] बृहज्जातकम् -८ अ. २३ श्लो.

[3] बृहज्जातकम् -८ अ. १० श्लो.

सत्वगुणः, रजोगुणात्मकग्रहदशायां रजोगुणः, तमसि च तमो गुणो भवति जातकः इत्यर्थः । दशमेशस्य दशा राजप्रसादप्रदा भवति । अर्थात् राजपुत्रश्चेत् तद् दशायां राज्यं लभते । साधारणश्चेत् राज्ञः प्रसन्नतां प्राप्नोति । पञ्चमेशस्य दशासमये तत्तद् देवतायाः आराधनं वाच्यम् । उक्तानां ग्रहाणां दशासमये तत्तदुक्तं कर्म कृतञ्चेत् साफल्यमुपगच्छति ।

अथ च पापाः त्रिषष्टायगाः स्युस्तदा ये ग्रहाः तुङ्गाद्युपचयेषु विद्यमानाः स्युः तेषां दशायां शुभं फलं भवति । अर्थादेव इतरस्थानगाः निर्बलाश्च ये ग्रहाः स्युः तेषां दशायाम् अशुभं फलम् इति चिन्त्यम् । एतत् फलदीपिकायामप्युक्तं यथा –

**यद् भावगो गोचरतो विलग्नाद्दशेश्वरः स्वोच्चसुहृद्गृहस्थः ।**

**तद्भावपुष्टिं कुरुते तदानीं बलान्वितश्चेज्जननेऽपि तस्य ॥**[1]

यदि पाकेशः शीर्षोदयराशौ स्थितः तदा दशादौ फलदो भवति । पृष्ठोदये स्थितश्चेत् दशान्ते, उभयोदये स्थितश्चेत् सर्वदा फलदो भवति इति ज्ञेयम् । जन्मलग्नात् षष्ठभावाधिपस्य दशा दुःखदात्री भवति । अष्टमाधिपतेः दशायां मृत्युर्जायते । एवम् अस्तङ्गतग्रहस्य दशायाम् अन्तर्दशायां वा बन्धुमरणं वाच्यम् ।

जन्मनक्षत्रात् पञ्चमनक्षत्राधिका दशा उत्पन्नदशा संज्ञया उच्यते । जन्मनक्षत्रात् अष्टमाधिका दशा आधानसंज्ञका भवति । जन्मनक्षत्रात् चतुर्थाधिका दशा महासंज्ञिका कथ्यते । आसां अर्थात् उत्पन्नाधानमहासंज्ञकानां दशानाम् अवसानसमये मनुष्यानाणां मरणकर्त्री भवति इति । अथ च अल्प-दीर्घ-समायुष्मतां स्वल्पायुः-दीर्घायुः-मध्यमायुः चैतेषां क्रमेण त्रिविध–पञ्चमेशदायान्तिमे मरणं वाच्यम् । एतत् पराशरेणाप्युक्तं यथा-

**अल्पायुर्योगजातस्य विपद्दाये मृतिं वदेत् ।**

**जातस्य मध्यमे योगे प्रत्यरौ तु मृतिर्भवेत् ॥**

**दीर्घायुर्योगजातानां वधभे तु मृतिर्भवेत् ।**[2] इति ।

तथा च यस्य भावस्य विचारः प्रस्तुतः तस्य यद् बाधास्थानं तत्पतेः अथवा तद्युक्तग्रहस्य दशा तद्भावस्य अशुभदा भवति । तस्मात् बाधास्थानात् केन्द्रे स्थितस्य ग्रहस्य दशान्तर्दशाकाले दुःखं विदेशाटनं भवति । परस्परम् अष्टम-षष्ठगग्रहयोः दशान्तर्दशायां भीतिः देशत्यागः अनर्थञ्च सञ्जायते । अथ च तयोः अन्योन्यम् अष्टमषष्ठगग्रहयोः

---

[1] फलदीपिका – २० अ. ३४ श्लो.

[2] जातकपारिजातस्य सुधाशालिनीव्याख्याने – १८ अ. ३५ श्लो.

 ISSN: 2320-740X

मित्रयोः शुभग्रहयोश्च सर्वम् उक्तं फलं विमिश्रं भवति । जन्मकाले यो ग्रहः नीचङ्गतः नीचस्थितग्रहयुक्तश्चाऽपि स्वदशाकाले शुभं फलं दातुम् असमर्थो भवति । अथच राहुयुतग्रहः तत्क्षेत्रगतश्च तद्युतराशिपश्च अशुभफलमेव ददाति । दशायाम् अशुभफले सति तद्दशाधिपसम्बद्धदेवताराधनेन अनिष्टन्यूनतां शुभाधिक्यञ्च फलं जातकेन अनुभूयते इति शास्त्रसिद्धान्तः।

तथा च जातके सूचितानां भावफलानां योगफलानां दृष्टिफलानाम् अनुभवः तत्तत्कारकग्रहदशाकाले अनुभवगोचरीभवन्ति इति शास्त्रसिद्धान्तः । तदेवोक्तं मिहिरेण **भावस्थानालोकयोगोद्भवं यत् तत्तत् सर्वं तस्य योज्यं दशायाम्**[1] इति ।

**********

# संस्कृतं संस्कारः संस्कृतिश्च

**रोजी बन्चोर्**

शिक्षाशास्त्रिप्रथमवर्षम्

भारतस्य संस्कृतिस्तथा सभ्यतायाः स्रोतः अस्ति संस्कृतभाषा । यतोहि उक्तं खलु यथा– **संस्कृतिः संस्कृतमाश्रिता** इति । भारते प्रायः सर्वोपि शास्त्रग्रन्थः संस्कृतभाषायुक्ताः सन्ति । भारतीयानां सम्प्रदायाः, कल्पनाशक्तिः तथा नैतिकज्ञानं संस्कृतभाषामूलकमेव अस्ति । अतः उच्यते यथा - **सा विद्या या विमुक्तये** इति । परन्तु साम्प्रतम् इयं वेदोक्तिः अन्यथा व्याख्यायते यथा - **सा विद्या या नियुक्तये** इति ।

न केवलं इहजन्मनः पूर्णतायै अपि तु जन्मान्तरे अपि सद्गतिप्राप्तये सुसंस्कारः अपेक्षितः । अस्माभिः अस्माकं संस्कृतिः संस्कारश्च न विस्मरणीया । किन्तु यान्त्रिकयुगेऽस्मिन् बहवो जनाः पाश्चात्यसंस्कृतेः दासाः भूत्वा सरसं जीवनं सारहीनं कुर्वन्तः सन्ति इति मे मतिः । त्यागयुतानां वीरपुरुषाणां भूमिः इयम् । किन्तु भोगरतानां भूः जाता वा इति सन्देहो भवति । यतः वैदशिकसंस्कृतिस्तु भोगप्रधाना अस्ति । परन्तु भारतीयसंस्कृतिः त्यागप्रधाना वर्तते ।

अधुना अस्माकं भाषायां पित्रोः कृते माता पिता इति सुन्दरे पदे विद्येते । किन्तु आङ्ग्लभाषाव्यामोहात्, मातुः कृते Mummy इति, पितुः कृते Dad/Daddy इति वदन्तः सन्ति । अस्य शब्दद्वयस्य अर्थः कः ? अरबीभाषायां Mummy इत्यस्य **कवरः**, Dad इत्यस्य **मृतः** इति च अर्थः ।

[1] बृहज्जातकम् – ८ अ. २० श्लो.

अस्माकं भाषायां पित्रोः कृते माता पिता इति सुन्दरे पदे विद्येते । माता इति शब्दस्य व्युत्पत्तिः – **मान्यते पूज्यते इति माता** । एवमेव पिता इत्यस्य व्युत्पत्तिः **पाति रक्षति अपत्यम् इति पिता** । पश्यन्तु ! अस्माकं संस्कृतौ शब्दार्थयोः सम्बन्धः घनिष्ठतमः भवतीत्यस्य एकम् उदाहरणम् इदम् । इमौ अर्थयुक्तौ श्रवणरमणीयौ योग्यौ च शब्दौ वर्तेते । प्रायः संस्कृतभाषायां निरर्थकाश्शब्दा नास्तीत्येव इत्यपि वक्तुं शक्यते । **एकश्शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामदुघ् भवती**ति प्रसिद्धं वाक्यम् ।

पूर्वोक्तवत् अर्थविहीनशब्दानां प्रयोगापेक्षया शिशवः **हे पिता, हे मातः, हे अम्बे** इति सुन्दरशब्दान् एव सम्बोधयन्ति चेत् कुतो न युक्तम् । अस्माकं संस्कृतिः **यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः, भार्या हि परमो नाथः, गृहिणी गृहमुच्यते** इत्यादिना बोधयति । प्रायः अन्येषु संस्कृतिषु एतादृशचिन्तनं नास्ति । अतः विदेशमोहवशात् अन्यस्याः अनुकरणं न कर्तव्यम्, अस्माकं संस्कृतेः अनुसरणं कर्तव्यम् । अयं स्वधर्मः ।

अस्माकं परम्परायाः संस्कृतेर्वा सम्यग्ज्ञानार्थं संस्कृतभाषा अध्येतव्या । वैदेशिका एव अस्मिन् विषये आदरभावं प्रदर्शयन्ति अधुना । अमेरिकन् हिन्दू विश्वविद्यालयस्य कथनानुसारं संस्कृतभाषाभाषिणः मधुमेहः, कोलेस्ट्राल् इत्यादिभिः रोगैः मुक्ताः भविष्यन्ति । यतः व्यक्तौ कश्चन सकारात्मकावेशः (Positive Charges) उत्पद्यते येन शरीरं सर्वदा सक्रियं तिष्ठति ।

अस्यां भुवि अत्यन्तं स्फुटतया भाषमाणा भाषा संस्कृतमेव इति **नासा** (National Aeronautics and Space Administration) इति नामिका संस्था कथयति । **नासा** इत्यस्यां संस्था नासा संस्थायाः विज्ञानिनः 6th तथा 7th Generation Super Computers संस्कृतभाषायाः आधारेण कार्यं करिष्यन्ति । एते 2034 तमे वर्षे उद्घाट्यन्ते इति श्रूयते । एतावदेव न नासा संस्था उत्तमा संस्कृतिः व्यक्तौ उत्तमं संस्कारं जनयति । अत्युत्तमसंस्कारकारणात् व्यक्तिः शीलवान् सच्चारित्र्यवांश्च भवति । तादृश एव नवयुगकर्ता क्लेशहर्ता च भविष्यति । अतः अस्माकं संस्कृतिः परम्परा च रक्षणीया ।

अथवा संस्कारदानेन अपि संस्कृतिः रक्षिता भविष्यति । युवकानां कृते अत्युत्तमसंस्कारदानेन संस्कृतेः रक्षणमेव अस्माकं प्रधानकर्तव्यं भवेत् । गृहस्य भित्तयः सुदृढशिलाधारे एव दृढतया तिष्ठन्ति । अस्माकं संस्कृतिनामिका भित्तिः संस्कृतभाषानामके दृढाधारे वर्तते । स्वस्थपरिवारनिर्मितये स्वस्थसमाजनिर्माणे च संस्कृतस्य महती भूमिका वर्तते । संस्कृतभाषाविहीनां भारतीयसंस्कृतिं कल्पयितुमपि न शक्यते । अतः **पठेम संस्कृतम् । पाठयेम संस्कृतम् । बोधयाम संस्कृतिम् ।**

# मानवजीवनस्योद्देश्यम्

**चण्डीप्रसादः**

शास्त्रितृतीयवर्षम्

एतन्मनुष्यजीवनं महता पुण्येन सत्कर्मणा च लभ्यते । लब्ध्वा एतद् दुर्लभं मानवजीवनं, तस्य जीवनस्य किमुद्देश्यमिति प्रश्नः । प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते, किं पुनः विचारशीलः मानवः। मनुष्यजीवनं सफलं सप्रयोजनं च विधातुम् अस्माकं पूर्वजैः ऋषिभिः मुनिभिश्च पुरूषार्थचतुष्टयमेव प्राधान्येन मनष्यजीवनस्योद्देश्यभूतं प्रतिपादितम् । पुरूषार्थचतुष्टयं च पुनः धर्मार्थकाममोक्षाः । तत्र सर्वप्रथमं मनुष्यजीवनस्योद्देश्यं धर्मोपार्जनम् । यावन्तश्च सद्गुणाः तेषामुपसङ्ख्यानं धर्मशब्देन कृतम् । धृतिः, क्षमा, ब्रह्मचर्यं, अस्तेयः, शौचः, सत्यम्, अक्रोधः, सदाचारः, परोपकारः, समाजसेवा, देशसेवादयः सद्गुणाः पुरुषं दीपयन्ति । उक्तमपि-

**अष्टौ गुणाः पुरुषं दीपयन्ति**
**प्रज्ञा च कौल्यं च दमः श्रुतञ्च ।**
**पराक्रमश्चाबहुभाषितञ्च**
**दानं यथाशक्ति कृतज्ञता च ॥**

अहन्यहनि वृद्धिं कामयमानैः जनैः इमे षड्दोषाः त्याज्याः यथा -

**षड्दोषाः पुरूषेणेह हातव्या भूतिमिच्छता ।**
**निद्रा तन्द्रा भयं क्रोधम् आलस्यं दीर्घसूत्रता ॥**

सद्गुणैः विहीनानां जीवनं तु तृणसमानम् । तृणं पशु-पक्षिणामुदरपूरणार्थमेवास्ति न तु सर्वजनहिताय। अत एव गुणैः विहीनं जनं साक्षात् पशुपुच्छविहीनः पशुः इति सुभाषितकारः कथयति-

**आहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणाम् ।**

विश्वेऽस्मिन् तस्यैव जीवनं सफलं यः परेषामुपकाराय, देशोन्नत्यै, समाजसेवायै, सत्य-रक्षणाय, दीनोद्धाराय स्वस्य अर्थं शक्तिञ्च प्रयुङ्क्ते । इदं पारमार्थसाधनं, बहुपुण्यप्रापकं, धर्मैकहेतुभूतं मानवजीवनं लब्ध्वापि न विदधाति धर्मकार्याणि तदा निरर्थकं तस्य जीवनम् । नूनमेतादृशं गुणविहीनं धर्मशून्यं जीवनम् अजागलस्तनस्येव, लोहकारभस्त्रेव श्वसनपि मृतमेवेति । अतः **धर्मबुद्ध्या** जीवनयापनस्य कृते **प्रथमं प्राशस्त्यम्** दत्तमस्ति ।

**अर्थोपार्जनं** मनुष्यजीवनस्य **द्वितीयं** प्रयोजनम् । यतोहि न तद्विद्यते किंचिद्यदर्थेन न सिद्ध्यति । नूनम् अस्मिन्

मानवलोके व्यवहाराय सारभूतं धनमेव नास्ति अत्र सन्देहः । **धनमूलं हि सर्वं जगत्** । यथा पर्वतेभ्यः सर्वाः नद्यः प्रवर्तन्ते तथैव अर्थेन सर्वाणि सिद्ध्यन्ति ।

**कामप्राप्तिः** मनुजजीवनस्य **तृतीयं** प्रयोजनम् । लौकिकान् भोगान्, यशः, कीर्तिः च अधिगत्य अवसाने **मोक्षं** प्राप्नुयात् जनः । यत्र नास्ति जरामरणजं भयं दुःखलेशं क्लेशं वा । मोक्षं लब्ध्वा मानवः परमानन्दसन्दोहम् अनुभवति नात्र संशयः । सन्दर्भेऽस्मिन् रघुवंशस्य श्लोकः स्मृतिपथम् आगच्छेत् यथा -

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥**

भारतीयाः एवम् अत्युत्तमं जीवनं यापयन्तः आसन् इति वेदपुराणकाव्येतिहासादीनां अध्ययनात् ज्ञायते । एतदेव सारभूतं पुरूषार्थचतुष्टयं मनुष्यजीवनस्य मुख्योद्देश्यम् ।

**********

# दिङ्निर्धारणम्

**विवेक त्रिपाठी**
शास्त्रिद्वितीयवर्षम्

सूर्यसिद्धान्तस्य तृतीयः अधिकारः त्रिप्रश्नाधिकारः । दिक् देशः कालः इत्येतेषां त्रयाणां विचारः यस्मिन् अधिकारे प्रवर्तते सः त्रिप्रश्नः । एषु त्रिषु विषयेषु दिग्विषयकः प्रश्नः एव आदौ कृतः ।

मानवानां कृते लोकव्यवहारार्थं दिशः ज्ञानम् अत्यावश्यकम् । सा च दिक् स्थूलसूक्ष्मभेदेन द्विधा । स्थूला दिक् इत्यस्य प्रयोजनं यात्रादिषु भवति । स्थूलदिशः ज्ञानविषये सिद्धान्तितं यथा - **यत्रोदितोऽर्कः किल तत्र पूर्वा**[1] इति । अर्थात् यस्यां दिशि सूर्यः उदेति सा पूर्वा दिक् । सा दिक् स्थूला एव ।

तथा च अपरा सूक्ष्मा दिक् इति । धर्मनिष्ठानां भारतीयानां वैदिककर्मणि यज्ञकुण्ड–मण्डप–देवालयादिनिर्माणकार्येषु सूक्ष्मदिग्ज्ञानम् अवश्यं कर्तव्यम् । उक्तञ्चैतत् वास्तुरत्नावलीग्रन्थे यथा –

**प्रासादे सदनेऽलिन्दे कुण्डे द्वारे विशेषतः ।**

[1] सिद्धान्तशिरोमणिः – गोल. भु. को. - ४५ श्लो.

 ISSN: 2320-740X

**दिङ्ढे कुलनाशः स्यात्तस्मात् संसादयेद्दिशः ॥**[1] इति ।

अर्थात् प्रासाद-गृह-कुण्डादिनिर्माणविषयेषु यदि दिशः ज्ञानं न जायते तदा यजमानस्य कृते तदशुभाय भवति । अतः दिशः सशोधनं अवश्यमेव विधातव्यमिति देवविदां मतमिदं समुचितमेव ।

दिशः अष्टौ भवन्ति । तत्र पूर्वा, पश्चिमा, दक्षिणोत्तराख्याः प्रधानाः चतस्रः दिशः । एवं आग्नेय-नैर्ऋत-ईशान-वायव्याख्याः चतस्रः विदिशः इति आहत्याष्टौ दिशः ।

साम्प्रतं सूक्ष्मदिक्साधनप्रकारः सूर्यसिद्धान्तानुसारेण उच्यते । तदित्थम् –

**शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे ।**

**तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत् ॥**

**...................... विदिशस्तद्वदेव हि ॥** [2]

इत्थम् अमीषु श्लोकेषु दिक्साधनप्रकारः निरूपितः । तदेव संक्षेपेणात्र निरूप्यते । शिलातलप्रदेशे अथवा जलेन समीकृते प्रदेशे (समानायां भुवि इत्यर्थः) एकं वृत्तं लिखेत् । तस्य वृत्तस्य मध्यभागे एकं शङ्कुं स्थापयेत् । तदग्रिमदिने शङ्कुच्छायाम् अवलोकयेत् । सूर्योदयकाले वृत्तस्य मध्यभागे स्थितस्य शङ्कोः छाया पश्चिमायां दिशि, सूर्यास्तकाले च पूर्वस्यां दिशि पतति । अतः सूर्योदयकाले छायाग्रा पश्चिमायां दिशि तथा सूर्यास्तकाले पूर्वस्यां दिशि च वृत्तपरिधिं स्पृशति । अतः सततं छायाग्रां वृत्ते अङ्कयेत् । अनेन पूर्वापररेखा सम्पद्यते । एवं पूर्वापररेखायाः अर्धीकरणेन याम्योत्तररेखा समुपलभ्यते । तस्याः रेखायाः लम्बरूपरेखा स्फुटां पूर्वापरां दिशं सूचयति ।

एवं दिक्चतुष्टयं विज्ञाय दिङ्मध्यद्वयस्थाने मत्स्योत्पादनेन आग्नेयादिचतस्रः विदिशः संसाध्याः । अर्थात् दिशः आधारेण समुत्पादितमत्स्यरेखाभिः अवशिष्टाः विदिशः अपि समुत्पाद्याः । एवमष्टौ दिशः स्फुटतया ज्ञेयाः ।

**********

[1] वास्तुरत्नावली – ३ अ. १ श्लो.

[2] सूर्यसिद्धान्तः - ३ अ. १-४ श्लो.

# इकोऽचि विभक्तौ

**दुर्गा श्रीवत्सा**

शास्त्रिद्वितीयवर्षम्

इकोऽचि विभक्तौ इति सूत्रे अज्ग्रहणस्य प्रयोजनं किम् इत्यस्मिन् विषये विचार्यते । इकः अचि विभक्तौ इति पदच्छेदः। इकः इति षष्ठ्यन्तं पदम् । इकः इत्यनेन नपुंसकस्य इति विशेष्यते । तेन तदन्तविधिः। अतः इगन्तस्य नपुंसकस्य इति भवति । अचि विभक्तौ इत्यत्र विभक्तौ इत्यस्य अचि इति विशेषणं भवतीत्यतः अत्रापि तदन्तविधिः प्राप्नोति चेदपि यस्मिन्विधिस्तदादावल्ग्रहणे इत्यनेन तदादिग्रहणम् । तेन अजादौ विभक्तौ इति लभ्यते । तथा च इगन्तस्य क्लीबस्य नुम् स्यात् अजादौ विभक्तौ इति सूत्रार्थः लभ्यते। तस्य उदाहरणं वारिणी इति । वारि इत्यस्मात् प्रातिपदिकात् प्रथमाविभक्ति-द्विवचने वारि औ इति स्थिते नपुंसकाच्च[1] इति सूत्रेण अत्र औकारस्य शीभावे कृते वारि ई इति जाते वारि इति इगन्तं नपुंसकं प्रातिपदिकम्, एवम् ई इति अजादिः विभक्तिः व्यपदेशिवद्भावेन । अतः तस्यां परतः इगन्तस्य क्लीबस्य नुमागमः भवति । नुम् मित् । अतः मिदचोऽन्त्यात्परः[2] इति सूत्रेण अन्त्यात् अचः परः भवति नुमागमः। तदा वारिन् ई इति जाते अट्कुप्वाङ्नुम्व्यवायेऽपि[3] इत्यनेन नस्य णत्त्वे वारिण् ई इति जाते मेलने वारिणी इति रूपं भवति ।

अस्मिन् सूत्रे अच् पदं नास्ति चेत् इगन्तस्य क्लीबस्य नुम् स्यात् विभक्तौ इति सूत्रार्थः भवति । तदा वारिभ्याम् इत्यत्र नुमागमः स्यात् इत्यापत्तिः । यथा वारि इत्यस्मात् प्रातिपदिकात् तृतीया विभक्ति-द्विवचने वारि भ्याम् इति स्थिते वारि इति प्रातिपदिकम् इगन्तं क्लीबमस्ति, एवं भ्याम् इत्यस्य विभक्तित्वमपि अस्तीत्यतः अनेन सूत्रेण नुमागमः स्यात् । अतः अज्ग्रहणं क्रियते इति चेत् तत्र नुमागमे अपि नलोपःप्रातिपदिकान्तस्य[4] इति सूत्रेण नकारस्य लोपः भवति , तदा वारिभ्याम् इति इष्टं रूपमेव सिद्ध्यति । अतः अज्ग्रहणं नापेक्षते, इति चेन्न । सम्बोधनप्रथमाविभक्तौ नुमागमवारणार्थम् अज्ग्रहणम् । सम्बोधनप्रथमाविभक्तौ हे वारि सु इति स्थिते स्वमोर्नपुंसकात्[5] इत्यनेन सोर्लुक्

---

[1] अष्टाध्यायी 7.1.19

[2] अष्टाध्यायी 1.1.47

[3] अष्टाध्यायी 8.4.2

[4] अष्टाध्यायी 8.2.7

[5] अष्टाध्यायी 7.1.27

 ISSN: 2320-740X

प्राप्नोति एवम् इकोऽचि विभक्तौ इत्यनेन नुमागमः अपि प्राप्नोति । अत्र विप्रतिषेधे सति परत्वात् आदौ नुमागमः भवति, तदनन्तरं सोः लुकि “हे वारिन्” इति अनिष्टरूपं स्यात् ।अतः अज्ग्रहणम् इति चेत् अत्र नलोपः प्रातिपदिकान्तस्य इत्यनेन नलोपः भवति । तदा हे वारि इति इष्टं रूपमेव सिद्ध्यति इति चेत् ,तत्र न ङि सम्बुद्ध्योः इत्यनेन तस्य नलोपस्य निषेधः विधीयते । नस्य लोपो न स्यात् ङौ सम्बुद्धौ च इति तस्य सूत्रस्य अर्थः । सम्बोधनप्रथमाविभक्तेः सम्बुद्धिः इति संज्ञा विधीयते । अनेन सम्बुद्धौ परतः हे वारिन् इत्यत्र नकारस्य लोपः न भवति । अतः तत्र नकार एव श्रूयेत इत्यापत्तिः । तदा उच्यते नुमागमानन्तरं स्वमोर्नपुंसकात् इत्यनेन सोर्लुक् भवतीत्यतः सम्बोधनविभक्तिः तत्र न भवति । तेन सम्बुद्धिपरकत्वाभावात् न ङिसम्बुद्ध्योः इति सूत्रस्य प्रवृत्तिः एव न भवति इत्यतः नलोपस्य निषेधाभावात् नलोपःप्रातिपदिकान्तस्य इत्यनेन नलोपः भवति इति चेत् तदा उच्यते तत्र प्रत्ययलक्षणमाश्रियते । प्रत्ययलक्षणेन सम्बुद्धिपरकत्वं स्वीक्रियते । यतः नलोपस्य निषेधरूपकार्यं लुप्तप्रत्ययनिमित्तकाङ्गोद्देश्यकं कार्यम् । तथा च प्रत्यये लुप्तेऽपि तन्निमित्तं कार्यं भवतीत्यतः सम्बुद्धिपरकत्वसत्त्वात् न ङिसम्बुद्ध्योः[1] इत्यनेन नलोपनिषेधः भवति । तदा नकारस्य सत्त्वात् हे वारिन् इति अनिष्टं रूपं स्यात् इति चेत् उच्यते प्रत्ययलक्षणेन सम्बुद्धिपरकत्वं स्वीक्रियते चेदपि न लुमताङ्गस्य[2] इत्यनेन प्रत्ययलक्षणस्य निषेधः विधीयते । यतः तत्र स्वमोर्नपुंसकात् इत्यनेन सोः लुक् कृता । अत्र च सोः लुका लुप्तत्वात् तन्निमित्तम् अङ्गकार्यम्, अर्थात् नलोपस्य निषेधरूपं कार्यं न भवति । तेन न लुमताङ्गस्य इत्यनेन प्रत्ययलक्षणनिषेधाभावात्, नलोपे सति हे वारि इति इष्टं रूपं सिद्ध्यति इत्यतः अज्ग्रहणं व्यर्थम् । तेन अज्ग्रहणं व्यर्थीभूय न लुमताङ्गस्य इति प्रत्ययलक्षणनिषेधस्य अनित्यत्वं ज्ञापयति । तथा च अत्र न लुमताङ्गस्य इति निषेधः न भवति इत्यतः प्रत्ययलक्षणेन सम्बुद्धिपरकत्वात् न ङिसम्बुद्ध्योः इत्यनेन नलोपस्य निषिद्धत्वात् तत्र नकार एव भवतीत्यतः हे वारिन् इति अनिष्टं रूपं स्यात् । अतः अज्ग्रहणम् । तदा तु हे वारिन् इत्यत्र इगन्तनपुंसकत्वं वारि इति प्रातिपदिकस्य अस्ति चेदपि अजादिविभक्तिपरकत्वाभावात् नुमागमः तत्र न भवति । नलुमताङ्गस्य इत्यनेन प्रत्ययलक्षणनिषेधस्य अनित्यत्वं यदा स्वीक्रियते तदा नलुमताङ्गस्य इत्यनेन प्रत्ययलक्षणनिषेधाभावात्, प्रत्ययलक्षणेन सम्बुद्धिपरकत्वस्वीकारात् ह्रस्वस्य गुणः[3] इति सूत्रेण गुणे सति हे वारे इति रूपं भवति । यदा अनित्यत्वं न स्वीक्रियते, तदा प्रत्ययलक्षणनिषेधसत्त्वात् , प्रत्ययलक्षणेन सम्बुद्धिपरकत्वाभावात् हे वारि इति रूपान्तरं भवति । तथा च अज्ग्रहणस्य “न लुमताङ्गस्य इति निषेधस्य” अनित्यत्वज्ञापनं प्रयोजनम् ।

[1] अष्टाध्यायी 8.2.8

[2] अष्टाध्यायी 1.1.63

[3] अष्टाध्यायी 7.1.108

# यथोद्देशं संज्ञापरिभाषम् । कार्यकालं संज्ञापरिभाषम् ।

**महेशबाग्वारः**

शास्त्रिद्वितीयवर्षम्

महावैयाकणनागेशभट्टेन विरचितपरिभाषेन्दुशेखरग्रन्थे अमू द्वे परिभाषे विद्येते । अमुयोः परिभाषयोः नागेशकैयटयोः मतमुपस्थाप्यते ।

- **यथोद्देशं संज्ञापरिभाषम् ।**

उद्देशमनतिक्रम्य यथोद्देशम्[1] । उद्देशो नाम उपदेशः[2] यत्र देशे उपदिश्यते यथा "वृद्धिरादैच" "तस्मिन्नितिनिर्दिषृ पूर्वस्य" इत्यादयः ।तद्देशे एव वाक्यार्थबोधेन ("आदैच् वृद्धिसंज्ञको भवति" । "सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणात्यवहितस्य पूर्वस्य ज्ञेयम्" इत्यादि । ) गृहीत शकत्या "वृद्धिपदमादैक्षु शक्तम्", गृहीतपरिभाषार्थेन (औपश्लेषिकाधिकरणसप्तम्यन्तपदघटिते) शास्त्रे 'निर्दिष्टे, पूर्वस्य' इति पदद्वयमुपतिष्ठते इत्यनेन च) शास्त्रे सर्वत्र (वृद्धिरेचि, सार्वधातुकयोः) व्यवहारः भवति इति । देशपदेनात्र उच्चारणकालः व्यवह्रियते ।

**अत्र कैयटः –**

अयं पक्षः उत्तमाधिकारिदृष्यन्तः । यथा उत्तमाधिकारी गुरोः "वृद्धिरादैच्" इत्यस्य शक्तिग्रहणाऽनन्तरं 'भविष्यति अनेन प्रयोजनम्' इति विचिन्त्य तष्णीं तं शक्तिग्रहं स्मरन् "वृद्धिरेची"त्यस्य वाक्यर्थम् अवगच्छति तथैव परिभाषायाः तज्जन्यनियमस्मरणे विधिसूत्रवाक्यार्थबोधः । इति ।

अत्र नागेशः –

संज्ञाविषये तज्जन्यशकत्या एव वाक्यार्थबोधः इति साम्यमेव । पतिभाषाविषये तावत् - परिभाषायाम्[3] (यथा "तस्मिन्नतिनिर्दिष्टे पूर्वस्य" इत्यत्र) तल्लिङ्गघाटितानि शास्त्राणि (औपश्लेषिकाधिकरणसप्तम्यन्तपदघटितानि "सार्वधातुकर्धधातुकयोः" इत्यादीनि) उप्तिष्ठन्ते । तथा च परिभाषया गुणभेदं[4] (स्वस्य भेदं) परिकल्प्य

---

[1] "यथाऽसादृश्य" इति सादुश्यभिन्ने पदार्थानतिवृत्यर्थे "यथा" इत्यत्ययेन साकं समासः ।

[2] उद्दिश्यते अस्मिन्निति भावः । (अधिकरणसाधनोऽयम्)

[3] तत्स्थले इत्यर्थः । तदुच्चारणप्रसङ्गे ।

[4] विधिशास्त्राणि मुख्यानि भवन्ति । परिभाषाशास्त्राणि च तदर्थबोधसहायत्वात गौणानि (अप्रधानानि) भवन्ति । अतः तेषां गुणत्वम्।

 ISSN: 2320-740X

सर्वेषामर्थसंस्कारो विधीयत इति । एवञ्च वाक्यैकवाक्यता इति पर्यवस्यति ।

द्वितीयम्

- कार्येण काल्यते (स्वसन्निधिं प्राप्यते) इति । अर्थात कार्येण स्ववृत्तिलिङ्गचिह्नित परिभाषाणामक्षेप इत्यर्थः । यथा स्वम् विधिशास्त्रम् – 'सपः सुठि' इति । तद्वृत्तिलिङ्गम् सुटि इति सप्तम्यन्तम् । तेन चिन्हित-परिभाषाणाम्।

अत्र कैयटः –

अस्मिन् पक्षे संज्ञाशास्त्राणां परिभाषाशास्त्राणाञ्च स्वदेशे वाक्यार्थबोधाऽभावेन[1] प्रदेशविधिसूत्रदेशगमनम् । अस्याः परिभाषयाः गुणभेदेन विधिसूत्रे एव उपस्थितिरित्यर्थः ।

अतएव 'अमी ईशाः' इत्यत्र "अदसोऽसेर्दाद दोमः" इत्यनेन विहितमुत्वम् "अदसो मात्" इत्येतत्प्रति न त्रिपादीत्वा-दसिद्धत्वम् । "अदसो मात्" इत्यस्य "अणोऽप्रगृह्यस्यानुनासिकः" इत्यत्र एकवाक्यतपन्नत्वात् तस्य शास्त्रस्य च त्रिपाद्यामेव विद्यामानत्वेन तद् दृष्ट्या मुत्वस्यासिद्धत्वाभावात् प्रगृह्यसंज्ञाभावतीति । यतोहि असिद्धत्वस्य कार्यार्थतया कार्यज्ञानस्य च प्रदेशदेशे एव जायमानत्वेन तथैवासिद्धत्वमिति भावः । एवञ्च कार्यज्ञानानन्तरमेव विरोधप्रतिसन्धानमित्यतः विप्रतिषेधसूत्रप्रवृतावपि तादृशमेव परत्वमिति । अत एव "अयादिभ्यः परैव प्रगृह्यसंज्ञा" इति भाष्योक्त संगच्छते । अर्थात् "अमी ईशाः" इत्यत्र ईत्वमत्वस्थासिद्धत्वात् एकारस्य सत्वेन "चोऽयवायावः" इत्यनेन अयादेशः प्राप्तः । तथैव "अदसो मात" इत्यनेन प्रगृह्यसंज्ञाऽपि प्राप्ता । तत्र परत्वात् अयोदेशे प्राप्ते भाष्यकारैः "अयादिभ्यः परैव प्रगृह्यसंज्ञा" इत्युक्तम् । यदि संज्ञाशास्त्राणां स्वदेशत्यागो न स्यात् तदा प्रगृह्यसंज्ञायाः परत्वमसम्भवम् । त्यागस्योच्यमाने तु "अदसो मात्" इत्यस्य "अण्ऽप्रगृह्यस्यानुनासिकः" इत्यत्र विद्यमानात् परत्वसम्भवेन भाष्यं संगच्छते इति भावः । एवञ्च संज्ञापरिभाषाणाम् स्वदेशत्यागेन विध्येकवाक्यता इति ।

अत्र नागेशः –

संज्ञाशास्त्राणां परिभाषाशास्त्राणाञ्च बुद्धया विधिशास्त्रप्रदेशे उपस्थितिः, न तु तद्देश त्यागेन । 'अमी ईशाः' इत्यादौ "अदसो मात्" इत्यत्र मात्ग्रहणसामर्थ्यत् मुत्वस्य मीत्वस्य वा सिद्धत्वम् ।

"अयदिभ्यः परैव प्रगृह्यसंज्ञा इति भाष्यस्य प्रगृह्यसंज्ञाप्रयुक्तप्रकृतिभावः ("प्लुत प्रगृह्याऽचि नित्यम्") इत्यर्थः । तथा सति

[1] स्वदेशत्यागेनेति भावः ।

प्रकृतिभावस्य अयादेशात् परत्वात् स्वदेशत्यागाऽभावेऽपि न भाष्यासंगतिः । अन्यथा[1] "ङमो ह्रस्वादचि ङमुण्नित्यमि" त्यत्र "तस्मादित्युरस्य", तस्मिन्निति निर्दिष्टे पूर्वस्य्" उभयोः उपस्थितौ "उभय निर्देशे पञ्चमीनिर्देशस्य परत्वात् बलवत्वम्" इत्यस्याः (परत्वाऽभावेन कस्याऽपि) अप्रवृत्रौ इष्टार्थः नसिद्ध्येत् ।

"षष्ठी स्थानेयोगा" इति सूत्रस्थ भाष्य प्रमाण्येन परिभाषायाः 'दीपवत्' एकत्रैव स्थित्वा प्रकाशेन सर्वोज्वालकत्ववत् उभयपक्षे[2] संज्ञापरिभाषयोः दीपवत् स्वदेशस्थत्वस्वीकारः इत्यभिप्रायः । तर्हि एतन्मते शम्का भवति, उभयपक्षेऽपि विध्येकतापन्नत्वम् स्वदेशत्यागाऽभाव इति चेत् अनयोः पक्षयोः को भेदः ? इति । तत्रोच्यते उभयपक्षेऽपि भेदः अस्ति कार्यकालपक्षे त्रिपाद्यामपि संज्ञापरिभाशह्योरूपस्थितिरिति । अन्यथा ययोद्देशपक्षे परिभाषा – दृष्ट्या त्रिपाद्यकभावात् तत्र उपस्थितिः "रायो हलि", "समः सुठि", "रषभ्या....." इत्यादीनां न स्यात् । कार्यकालपक्षे तु कर्येण आक्षिप्यते इत्यतः त्रिपादीदृष्ट्या सपाद्सप्ताध्यायाः सिद्धत्वात् तत्र बौद्धा उपस्थितिः भवतीहि ।

**********

# कालिदासस्य चित्रकलानुशंसनम्

**प्रसीदरञ्जन मेहर**

शास्त्रिद्वितीयवर्षम्

चित्रस्य मूलं रागः । स च रसभावजनकतया कस्यापि प्राणतत्वं भवति । कालिदासः प्रमुखतया प्रकृतेर्गायकः । प्रकृतिश्च पदार्थानां स्वभाव एव । एवं स्वभावतया स्थावरजङ्गमानां रम्याकृतीनां वर्णनपथा कालिदासः चित्रकलायाः चित्रकारस्य च विभुत्वं निरूपयति ।

कालिदासस्य मते चित्रकलायां प्रवेशार्थं प्रथमं तावद्रागनिविष्टा चित्तवृत्तिरपेक्षते । अभिज्ञानशाकुन्तले नाट्यरङ्गस्य तन्मयत्वस्योपमानत्वेनालेख्यत्वमुपस्थापथति यथा –

**अहो ! रागनिविष्टचित्तवृत्तिरिवालिखितं सर्वतो रङ्गम् ।**

कालिदासस्थ 'चित्रदर्शनं' विश्वसृग् विधाता एव सर्वश्रेष्ठश्चित्रकारः यस्य विभुत्वमपरिमितं वर्तते । चित्रनिर्माणात्

[1] स्वदेशत्यागेन विध्येकतापन्नायाम् तु ।

[2] भाष्यकारस्य अविशेषेण वचनाद् उभयपक्ष इत्यर्थः ।

 ISSN: 2320-740X

पूर्वं चित्रकारः मनसि सर्वानप्यर्थान् सङ्कलय्य रूपेषु सुन्दरतमं रूपं चित्रयितुमिच्छति। कुमारसम्भवे अभिज्ञानशाकुन्तले च तेन स्पष्टमुक्तं यत्सौन्दर्थं तद्व्यञ्जयितुञ्च 'यथाप्रदेशं द्रव्याणां विनिवेशः' कुशलचित्रकारस्य वैशिष्ट्यम्। उभयत्रापि चित्रकर्ता विधातारमतिशेत इति व्यज्यते। पार्वत्याः रूपनिर्माणं विश्वसृजा प्रयत्नादेकत्र सौन्दर्यदिदृक्षया कृतं वर्तते –

**सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।**

**सा निर्मिता विश्वसृजा प्रत्यत्नादेकत्र सौन्दर्यदिदृक्षयेव॥**

शकुन्तला त्वपरा स्त्रीरत्नसृष्टिरेवोक्ता यस्याः निर्माणं चित्ररचना द्वारा श्रेष्ठचित्रकार इव विधाता करोति

**चित्रे निवेश्य परिकल्पितसत्वयोगाद्रूपोच्चयेन मनसा विधिना कृता नु।**

**स्त्रीरत्नसृष्टिपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥**

